B1:134
v-2

Sr No 590.
Bibliotheca Indica
The Aitareya Brahmana
of the Rg-Veda.
Vol II
Call No
II E 51.
Ac. No 5898.
Tissue and Gathering by
A. C. Ghosh

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

Published by

THE ASIATIC SOCIETY OF BENGAL.

New series Nos. 862, 864, 867, 870, and 871.

THE AITAREYA BRÁHMAṆA

OF THE RG-VEDA,

WITH THE

Commentary of Sáyaṇa Áchárya.

EDITED BY

PAṆḌIT SATYAVRATA SÁMAŚRAMÍ,

Associate Member of the Asiatic Society of Bengal; Editor, Author, Commentator, Annotator, Compiler, Translator, & Publisher of different Vedic Works &c. &c.

VOL. II.

Calcutta:

Printed by M. N. Sarkár, SATYA PRESS.

1896.

॥ ऐतरेयब्राह्मणम् ॥

(ऋग्वेदस्य)

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम्।

वङ्गदेशीयास्थायितिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा

यथामति संशोध्य सम्पाद्य च सम्पादितम्।

॥ द्वितीयभागः ॥

(तृतीयचतुर्थपञ्चिकात्मकः)

कलिकाता-राजधान्याम्,

१८५१-संवत्सरायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

S
294·59212
B 813 a·s
V·2

SL no 19322

5898

॥ अथ सङ्केताक्षरसूची ॥

आर० आ० ... आरण्यार्चिकम् ।	अग्नि० ... अग्निहोत्रम् ।
आर० गा० ... आरण्यगानम् ।	गे० गा० ... गेयगानम् ।
आ० ग्रा० ... आर्षेयब्राह्मणम् ।	चु० ... चूलिका ।
ऊ० गा० ... ऊहगानम् ।	प० ... प्रकरणम् ।
ऊह्य० गा० ... ऊह्यगानम् ।	पार० ... पारण्यकम् ।

ग्रा० भा० ... ग्रामेय भाष्यम् ।

॥ अथ परिच्छेदसूची ॥

॥ अथ तृतीयपत्रिका ॥

(११) अथ प्रथमाध्यायः (निविदादिप्रकरणार्चिकम्)
अथ प्रथमः खण्डः (प्रउगगानविकल्पनम्)
अथ द्वितीयः खण्डः (प्रउगयज्ञक्रमार्थवर्णनम्)
अथ तृतीयः खण्डः (,,)
अथ चतुर्थः खण्डः (तत्रैवाचेपौनरुक्त्यम्)
अथ पञ्चमः खण्डः (वषट्कारविधिः)
अथ षष्ठः खण्डः (वषट्कारप्रशंसा)
अथ सप्तमः खण्डः (वषट्कारप्रतिषेधाः)
अथ अष्टमः खण्डः (वषट्कर्तुर्देवताभावम्)

अथ नवमः खण्डः (प्रैषादीनां प्रशंसा) ... ३६
अथ दशमः खण्डः (निविदां स्थानानि) ... ३८
अथैकादशः खण्डः (निविद्रूपदेशाः) ... ४२
(१२) अथ द्वितीयाध्यायः (तत्रैव माध्यन्दिनसवनीयानि) ५१
अथ प्रथमः खण्डः (आश्वावप्रतिगरौ) ... ,,
अथ द्वितीयः खण्डः (अनुष्टुप्-प्रशंसा) ... ५५
अथ तृतीयः खण्डः (,,) ... ५८
अथ चतुर्थः खण्डः (मरुत्वतीयशस्त्रविधिः) ६४
अथ पञ्चमः खण्डः (तत्र प्रगाथ-प्रशंसा) ... ६७
अथ षष्ठः खण्डः (तत्रैव विचारादिकम्) ... ७०
अथ सप्तमः खण्डः (तत्रैव धाय्याविधानादि) ७६
अथ अष्टमः खण्डः (तत्रैव प्रगाथान्तरविध्यादि) ८२
अथ नवमः खण्डः (तच्छस्त्रयाज्ययोः प्रशंसा) ८८
अथ दशमः खण्डः (निष्केवल्यशस्त्रविधिः) ... ९३
अथैकादशः खण्डः (तस्यैव प्रशंसादि) ... ९७
अथ द्वादशः खण्डः (तत्रैव स्तोत्रियविध्यादि) १०४
अथ त्रयोदशः खण्डः (,,) ... ११०
(१३) अथ तृतीयाध्यायः (तत्रैव तृतीयसवनीयानि) ११५
अथ प्रथमः खण्डः (जगतीत्रिष्टुभोः कथा) ... ,,
अथ द्वितीयः खण्डः (गायत्रीकथा) ... ११८
अथ तृतीयः खण्डः (सवनत्रयकथा) ... १२२
अथ चतुर्थः खण्डः (छन्दोऽक्षरविचारः) ... १२५
अथ पञ्चमः खण्डः (वैश्वदेवाग्निमारुतयोः) १३०
अथ षष्ठः खण्डः (आभ्रवं शस्त्रम्) ... १३५

अथ सप्तमः खण्डः (वैश्वदेवशस्त्रविधादि) ... १६८
अथ अष्टमः खण्डः (तत्रैव याज्यादिकम्) ... १७६
अथ नवमः खण्डः (आग्निमारुतशस्त्रप्रशंसा) १७८
अथ दशमः खण्डः (तत्रैव देवस्तुत्यादिप्रशंसा) १८१
अथैकादशः खण्डः (आग्निमारुतशस्त्रनिरूपणम्) १८८
अथ द्वादशः खण्डः तत्रैव जातवेदस्त्यादिविधिः) १९१
अथ त्रयोदशः खण्डः (तत्रैव) ... १९६
अथ चतुर्दशः खण्डः (तत्रैव शस्त्रयाज्यानुवाक्यानिरूपणम्) १७२
(१४) अथ चतुर्थाध्यायः (अग्निष्टोमस्योपसंहारारंभः) १८१
अथ प्रथमः खण्डः (अग्निष्टोमस्य प्रशंसा) ... ,,
अथ द्वितीयः खण्डः (दीक्षणीयेष्टयादिभिः स्तुतिः) १८५
अथ तृतीयः खण्डः (प्रातःसवनमाश्रित्य स्तुतिः) १८७
अथ चतुर्थः खण्डः (सोमसवनतृतीयैः स्तुतिः) १८७
अथ पञ्चमः खण्डः (माध्यन्दिनसवनादिभिः स्तुतिः) २०१
अथ षष्ठः खण्डः (आदित्यशस्त्रेण स्तुत्यादि) २०७
(१५) अथ पञ्चदशाध्यायः (तस्य शेष उक्थ्यक्रतुश्च) ... २१४
अथ प्रथमः खण्डः (अग्निष्टोमोपेक्षा) ... ,,
अथ द्वितीयः खण्डः (तत्र पशुनाशनविधिः) २१८
अथ तृतीयः खण्डः (तत्र छन्दोऽविविधानानि) २२४
अथ चतुर्थः खण्डः ... ऋविरन्तराणि) ... २३०
अथ पञ्चमः खण्डः (उक्थ्यक्रतौ विशेषविधयः) २३६
अथ षष्ठः खण्डः तत्रैव सूक्तविशेषविध्यादि) २३८

॥ अथ चतुर्थपञ्चिका ॥

(१६) अथ प्रथमाध्यायः (षोडशिक्रतुरतिरात्रारम्भश्च) २४५
अथ प्रथमः खण्डः (षोडशिशंसनादि) ... ,,
अथ द्वितीयः खण्डः (षोडशिस्तोत्रादि) २५१
अथ तृतीयः खण्डः (विहरणप्रकारः) ... २५४
अथ चतुर्थः खण्डः (महानाम्नीवर्णनम्) ... २५८
अथ पञ्चमः खण्डः (अतिरात्रक्रतौ प्रधानानि) २६६
अथ षष्ठः खण्डः (रात्रिपर्यायशस्त्राणि) ... २७०
(१७) अथ द्वितीयाध्यायः (अतिरात्रशेषोगवामयनारम्भः) २७८
अथ प्रथमः खण्डः (आश्विनशस्त्रविधिः) ... ,,
अथ द्वितीयः खण्डः (आग्नेयकाण्डादिविधिः) २८३
अथ तृतीयः खण्डः (तदाश्विनशस्त्रप्रशंसा) २८६
अथ चतुर्थः खण्डः (ऐन्द्रप्रगाथादिविधयः) २८१
अथ पञ्चमः खण्डः (तच्छस्त्रपरिधानीयादि) २९८
अथ षष्ठः खण्डः (गवामयनद्वितीयाहः) ... ३०४
अथ सप्तमः खण्डः (पृष्ठबृहद्रथन्तरयोरत्यागः) ३११
अथ अष्टमः खण्डः (निष्केवल्ये विशेषविधिः) ३१७
(१८) अथ तृतीयाध्यायः (गवामयनसत्रशेषः) ... ३२१
अथ प्रथमः खण्डः (अभिप्लवे त्रीण्यहानि) ,,
अथ द्वितीयः खण्डः (पञ्चषडहविधिः) ... ३२४
अथ तृतीयः खण्डः (गवामयनप्रशंसा, आदित्यानामयनाङ्गिरसामयनयोश्च पार्थक्यज्ञापनादि) ३२७
अथ चतुर्थः खण्डः (सत्रेषु विषुवद्विध्यादि) ३३३
अथ पञ्चमः खण्डः (स्वरसामाहानां विध्यादि) ३४०

अथ षष्ठः खण्डः (दूरोहणप्रशंसनम्, हंसवल्गा-
सार्ङ्गसूत्रस्य च विधिव्याख्याने) ... ३४६
अथ सप्तमः खण्डः (दूरोहणप्रशंसने उपदेशाः) ३५६
अथ अष्टमः खण्डः (विषुवतः प्रशंसाविचारौ) ३५८
(१८) अथ चतुर्थाध्यायः (अथ द्वादशाहयागद्वयम्) ... ३६६
अथ प्रथमः खण्डः (भरतद्वादशाहयागविध्यादि) ,,
अथ द्वितीयः खण्डः (व्यूढद्वादशाहविध्यादि) ३६८
अथ तृतीयः खण्डः (यजनयाजनयोरधिकारौ) ३७१
अथ चतुर्थः खण्डः (दीक्षाकालपशवादिविधिः) ३८१
अथ पञ्चमः खण्डः (व्यूढनामनिर्वचनादि) ३८८
अथ षष्ठः खण्डः (पृष्ठस्तोत्र सुत्यस्थादि) ... ३९५
(२०) अथ पञ्चमाध्यायः (नवरात्रस्य माद्यं द्वितीयं च) ४००
अथ प्रथमः खण्डः (प्रथमाहस्य देवतादि) ... ,,
अथ द्वितीयः खण्डः (प्रथमाहसम्बन्धलक्षणशेषः) ४०१
अथ तृतीयः खण्डः (द्वितीयाहस्य देवतादि) ४१२
अथ चतुर्थः खण्डः (द्वितीयाहसम्बन्धलक्षणशेषः) ४१८

॥ अथ याज्ञिकशब्दसूची ॥

शब्दः	पृष्ठा
अंशुः (ग्रहः)	१
अग्निष्टोमः	२०४,२२६
अग्निष्टोमसाम	२४३
अग्निष्टोमसाङ्गः	३०९
अग्निहोत्रम्	१८०,२१७
अङ्गिरसामयनम् ...	३१०
अच्छावाकीया	५७
अज्ञातः	४१७—४१९
अतिच्छन्दः	३९८
अतिरात्रः (क्रतुः) ...	१९२,२७६
अतिरात्राङ्गः ...	३०५,३१७,३२१
अत्यतिरात्रः	१९४
अदाभ्यः (ग्रहः) ...	२
अनवानम्	१९०
अनुचरः ...	६७,७१.४१८,४२१
अनुबन्ध्यः	२२६
अनुमतिः	२२७
अनुरूपः	११२,१६२
अनुवषट्कारः ...	२२
अनुष्टुप्	३९८
अनुसरणी	१४७
अनूचानम्	२१८
अन्तर्यामः (ग्रहः) ...	२
अन्तर्वेदम्	४१५,४१७

शब्दः	पृष्ठा
अन्तस्थलम्	२७२
अन्यङ्गयेतः	३४४
अन्योन्यायतनम् ...	३८९
अपिशर्वरः	२६९
अपिशर्वराणि ...	२६९
अभिचारः	८५
अभिजित् ... ३१६,३३१,३३६,३५२	
अभिप्लवाः ३१६,३२३,३२७,३३१,३३२	
अयातयामता ... ३८६,३९०	
अर्वाक्सङ्ग्रहम् ...	२७९
अवरोधनम्	३२०
अवरोहः	३१८,३५७
अविक्षतम्	२४९
अष्टकापालीः	१८७
अष्टाचत्वारिंशः (स्तोमः) ...	३०९
असामन्यः	१०८
असुर्याः	२३७
अस्तमिति	२११
अहः २४७,३०५	
अहःक्रमिः	३३१,३६८
आ ...	११९,४०२—४०५
आक्रान्ति	३३१
आग्निमारुतं (शस्त्रम्)	६६,१९०,१८४

शब्दः	पृष्ठा	शब्दः	पृष्ठा
आग्निलाहृतम्	... ४११,४१२	आग्निः (ऋषः)	... ३
आग्निलाहृती	... ... १७८	आग्निं (छान्दसम्)	... २७३
आग्नेयं (छान्दसम्)	... २८४	आग्निं (ऋछन्दः)	... २८६
आग्नेयी (याज्या)	... १४७	आङ्गाराः ...	... ४२,४६७
आग्नेयः (ऋषः)	... २,३	आङ्गुनः ...	... १७७
आग्रयणम् ...	६०,१८५,४०३,४१६		
आग्रयणीयम् ...	... ६०	आङ्गिरसः ...	... १८८,१९०
आग्रयणीयानि ...	... १८४	आङ्गिरसः ...	... ८७,७५
आग्रयेयिष्टम् ...	... १४८		
आग्निष्टोमिकः ...	... १८८	आङ्गिरसम् ...	... १४७
आदित्यः (ऋषः)	... २,१९२	आङ्गिरसानि ...	... ११
आदित्यानामयनम्	... २७०	आङ्गिरसः (ऋषः)	१९१,१९२,२४१
आदित्यारुणयम्	... १३२	आङ्गिरसः (ऋषः)	... ४
आधभक्तिः ...	... ४	आङ्गिरसः (ऋषः)	... ४
आधवनीयः ...	... २	आङ्गिरसाः ...	... ४१०,४९१
आधूर्यमाणपशवः	... ४८२	आङ्गिरसीयम् ...	... ११२
आपोदेवीयम्	... १८४	आङ्गिरसः ...	... ११४
आभीयोगः (ऋषिः)	... १९२	आङ्गिरसे ...	... १०७
आभ्यः ...	... ३८५	आङ्गिरसः ...	... ३
आभिप्लविकः ...	... ४१४	आङ्गिरसीयाः	... ४१७,४९१
आभ्रीमयम् ...	... ७७	आङ्गिरसीयेष्टिः	... ४०४,४१४
आयुषः ...	... ३१४,३२२	आङ्गिरसे ...	... २९२
आरण्यकीयाः	... ४०४	आङ्गिरसः ...	... १०८
आरोहः ...	३१८,३४७	आङ्गिरसः ...	... ४५
आर्भवपवमानाः	... ६२	आङ्गिरसोपनम् ...	... ३३०
आर्भवं (पात्रम्)	... १३४,४१०	आङ्गिरसः ...	... १०४
आर्भवः ...	... ४०२	आङ्गिरसयनम् ...	... २१८
आश्विनः (ऋषः)	... २,३,५	आङ्गिरसीयम्	... ३८०

शब्दः	पृष्ठा
उपसदः ...	७८,२१७,३७१
उपसर्गाः	२६१
उषाः (यजुः) ...	२
उषालम्भाम्	२६१
उषस्यं (काण्डम्) ...	२८५
ऋग्वत् ...	४१५,४१७,४२१
ऋचः	२९९
ऋक्	१०६
ऋतुः (यजुः)	२
ऋतुयाजाः	२४२
ऋभवः	१३७
एककपालम्	२२२
एकविंशः ...	१९४,२१०,२२५,२४२
एकविंशाक्षः	२२५
ऐन्द्रः (यजुः) ...	५
ऐन्द्रः (ऋचः) ...	५
ऐन्द्रः (प्रगाथः) ...	२९२
ऐन्द्रवायवः (यजुः) ...	५
ऐन्द्रवायवः (ऋचः) ...	५
ऐन्द्रं (काण्डम्) ...	२८५
ऐन्द्रं (सूक्तम्) ...	२४२
ऐन्द्राग्नः (यजुः) ...	२
ऐन्द्राबार्हत्यम्	२४१
ऐन्द्राबैष्णवम्	२४२

शब्दः	पृष्ठा
ऐन्द्राः	१७४
ओङ्कारः	१७८
औपवसथम्	७६
करिष्यत्	४०२
काण्वा (ऋक्) ...	१७०
कुर्वत्	४१५,४१६
कुहूः	२२७
गणाः	१९२
गतश्रीः	२२६
गवामयनम्	७०५,२२८
गाथा	२०५
गायत्रम्	७३,४०२
गायत्री ...	११९,१२७,१३०,१८२
गौर्षम्	२२१
गृहपतिवती	२८२
गौः (अजः) ...	२१९,२२२
गौरिवीतं (साम) ...	२५२
गौरिवीतं (सूक्तम्) ...	८५
ग्रहाः	२,१८
घृतशाला	१४७
चतुर्विंशः	३०९
चतुर्विंशाक्षः	३०६,३०८,३१७,३१८,३२१

शब्दः	पृष्ठा
चतुष्टोमः	२०४
चतुस्त्रिंशः	३३९
चमसगवः ...	१९२,२४१,३४९
चातुर्मास्यानि	१८८
चितैषणम्	२९०
छन्दांसि	११
छन्दोज्यतिषजगतम् ...	२४४
जगती	११७,१२७
जघनम्	२२१
जागतम्	२९१
जागतानि	३४९
जातवेदस्यम् ...	१४३,४१२,४२३
जातवेदस्या	४१२,४२७
जामदग्न्यः	३८४
जैत्रयज्ञः	३०८
ज्योतिः (यजुः) ...	३१४,३२२
ज्योतिष्टोमः	२०४
तापसितः	३७१
तार्क्ष्यम्	३५१
तूपराः	३८४
तृची	२०९
तृतीयसवनपशवः ...	३
तृतीयसवनम्	१२४
त्रयस्त्रिंशद्देवाः	१०३
त्रिपदाः	७४

शब्दः	पृष्ठा
त्रिवृत्स्तोमः	३३२
त्रिशाखः	३७०
त्रिष्टुप्	२००,३३२
त्रिष्टुप्	११७,१२७
त्रैष्टुभम् ...	२९०,३३९,३४३
त्र्यम्बकः	१८३
त्वाष्ट्रः	३८०
दधिग्रहः	३
दधिघर्मः	१८९
दक्षिणी	१०९
दाक्षायण (यज्ञः) ...	३९९
दिवाकीर्त्यम् ...	१९९,३१९,३३९,३४४
दीक्षणीयेष्टिः	२८७
दीक्षा	३०१,३८३
दीक्षितः	३०१,३८४
दुरोदरम्	३३८
दैवतस्त्री	३२७
दैवयजनम्	३९२,३९३
दैविजा	२२९
दैवी	२३१
द्यावापृथिवीयम् ...	२३९,३५२
द्यावापृथिवीया ...	२९९
दीक्षणत्रयः	३
द्वादशकपालम्	२२६
द्वादशरात्रः	३९७
द्वादशाहः ...	३४७,३९२,३८०,४११
द्विपदाहः	४१५

शब्दः	पृष्ठा
त्रिष्टुभ्याः	२
थामच्छत्	२७
थाम्याः	७५,७८
धारायहाः	२
ध्रुवः (यज्ञः) ...	२
नभस्यम्	३२४
नमस्कारवती	१७२
नवराधः	४०१
नानदम्	२५२
नियाभ्याः	३
निधनम्	१०८
निरग्निचित्यः	३८५
निविदः ...	३८,४०,२५०
निविद्यानम् ...	... ४६,७६,४०९
निविद्यानीयम्	८४,११३,४०८
निष्केवल्यभ्	११३,१८४,२१९,४०९,४१८
नीवेशराम्	११२
नृष्टिगाः	२४३
नौधसम्	३९२
पङ्क्तिः	३९८
पञ्चदशः ...	७४,२११,३४३
परस्साम	३३८
परिधानि	३००
परिप्लवाः	३
परिप्लवा	९९

शब्दः	पृष्ठा
परोक्षम्	२०३
पर्यायाः	२६९,२७३
पर्यायावः	१४१
पवमानस्तोत्राणि ...	१७३,२७४
पवित्रम्	३
पशुः	३८३
पशुपुरोडाशः	३८६
पशुबन्धाः	१८९
पाकयज्ञाः	१८७
पाङ्क्तः	१०९
पाञ्चजन्यम्	१४३
पाञ्जीवतः (यज्ञः) ...	२
पालागली	९९
पावीरवी	१६९
पिङ्गलती	१४७
पितरा	१७०
पितृवत्	४०२,४०५
पीतवत्यः	२७२
पुनराध्यायनम	१४८
पुरुषच्छन्दः	२९८
पुरोरुक्	२७
पूर्वपक्षः	३१७
पृष्ठस्तोत्राणि	१८४
पृष्ठानि (षट्)	९६,३९७,३२८
पृष्ठ्याः	३१६,३२७,३३१,३३२,३३६
पैचीयाः	२४३
प्र—११९,४०२,४०३,४०४,४०५,४१०,४११	
प्रउगम्	२,११,१७,६१,१८४,४१६

शब्द:	पृष्ठा
अकृतिः	१८५,१८७
अग्नाथः	७१,७२
अजातिमती	२८१
अजादतियज्ञ.	२७४
अतिमरक्षम	१८१
अतिमरः	४२
अतिपत् ४७.७१.२८१.४ १, १ .२२	
अतिवत्	४१५
अतिशासकम्	११३
अतिष्ठितलक्षा	११३
अतिहारः	१८८
अथवरोहणम	१८७
अथवशीर्षम्	२१९
अथमपथः	३१४
अथलाङ्गः	४०१
अनविष्टीयम	२७८
अवर्ण्य.	१८४
अवनात्रः	१८८
अवृतः	१८७
आजापत्यः (पशु) ...	७८४
आजापत्या	१८४
आतरनुवाकः	३५४
आतरन्वचनसूक्ता. ...	४
आतरसवनम्	१०३
आग्नेयीवाङ्गः	३१२,३८१
आग्नेयीयेष्टिः ...	१८८,२०५,२१४
ऐषः	३६

शब्द:	पृष्ठा
ऋक्षितसमा	३२०
ऋक्षिरक्षम्	१८७
ऋक्षीयसी	३१०
ऋक्षिवत्समाम:	४०,४२
कार्शनम् ...	४१५,४१८,४२१
कुरुत् ...	३१२,३४२,३४१,३४६
कुरुक्षेत्रम्	३१८
कृष्णसाय	३४३
कृष्णलाय. ...	७१,७५
काण्वाग्नेयी. ...	३००
गायत्रसाम ...	३२०,३८७
गोसवम्	३४३
चतुः	१३१,३४४
चतुर्थ.	३७२
चतुर्थी	२११
चन्द्रा (दक्ष.) ...	२,५
चन्द्रा	२१०
छन्दश्चित. (दक्ष) ...	२
छन्दश्चितः (प्रजाप.) ...	८३
छन्दश्चित (क्रमम) ४१,४८,२८४,४०९,४५७	
छन्दश्चित (यज्ञम्) ...	४०९
छन्दोदेवाकीर्यम ...	३४३
जघनाधा.	४६१
जघनाङ्गः ...	२१७,३१८,३३१
जह्निवी	४९
जाम्बन्दिनपरशाखा: ...	४१,४२

शब्दः	पृष्ठा
माध्यन्दिनसवनयज्ञाः ...	२
माध्यन्दिनसवनम् ...	१२४
माहतम्	१६१,४११
माहेन्द्रः (यज्ञः) ...	२,९९
मुष्करः	१८४
मैत्रावरुणः (यज्ञः) ...	२,५
मैत्रावरुणः (ऋचः) ...	५
मैत्रावरुणः (प्रगाथः) ...	२८५
यज्ञक्रतवः	१९४
यज्ञगाथा	२०५
यज्ञायज्ञीयम्	९३,१८४
यामी	१७०
योनिः	१०७,१९२
यौधाजयम्	७१,७५
रथन्तरम् ...	३१२,३४२,३९१,३९९
रथन्तरयोनिः	२९४
रथवत्	४ २
राका	२२७
राका (ऋक्) ...	१९८
रात्रिपर्यायाः	१९१,२७१
राथन्तरम् ...	४०२,४०५,४०९
रिक्थः	२७
रूपम्	४०२
रैवतम् ...	३१४,३४२,३९७
रौद्री	१५९
रौरवम्	७१,७५
लक्षम्	१४
वज्रः	२७
वषट्कारवत्	३०२
वषट्कारः	२१,२९
वषट्कारानुलक्षणम् ...	३३
वसिष्ठयज्ञः	१८९
वाजपेयः (क्रतुः) ...	१९२
वाजी	२२८
वाल्मम्	२२२
वामदेव्यम्	२२१
वायव्यः	१८६
वायव्यः (ऋचः) ...	२,५
वावाता	९९
वालुष्टम्	१५७
विकर्णम्	३४३
विक्रतयः	१८५,१८७
विवाहः	३९१
विश्वजित् ...	२१७,२२१,२४२
विश्ववत् ...	२१५,२१७,२२१
विश्ववान् ...	१९९,२२५,३३९,३६१
हषच्वत् ...	२६५,४१५,४१८,४२१, ४२२,४२२,४२३,४२३
विष्टरपाणि	२५५–२५८
विष्टतम्	२४९
वेदी	३७
हषन्वत्	४१५,४१९,४१७,४१७,४२३
वैराजम् ...	३१४,३४२,३९९

शब्द:	पृष्ठ।	शब्द:	पृष्ठ।
वैदथम् ...	३१४,३४२,३४६	वीळुमित्रजम् ...	५४७
वैश्वजनी (पुत्रव:) ...	३६३	वीळुमी	२७६,२५०
वैश्वदेव: (ग्रह:) ...	२.६	वीळुमी (ग्रह:) ...	३
वैश्वदेव: (ग्रह:) ...	३		
वैश्वदेवं (ग्रहम्)	४२,१८४,४११,४२०	संवत्सरदीक्ष.	३८४
वैश्वदेवं (सूक्तम्) ..	१४०	संवत्सरसत्राणि ...	२३६
वैश्वानरीयं (सूक्तम्) ...	१६०	सवर्धरं (सदम) ...	२१४,२६६
वैश्वामी (ऋक्) .	१७४	सवम्	३०८,३१३
वैश्वामी (ऋचा) .	१६७	सविष:	३१६
वैष्णवाद्यी	१७४	सोम (सोमम्) ..	१८४
व्यूढादण्डाह.	३७०,३८७,३८८	सोमक्रीतम्	२७४,२८४
व्रतम्	१८७	सन्दश (ग्रहापात.) ...	३८६
		सादश ...	३०१,३४२
शंसति	२७५,२८४	सप्तपदम	४०९
शकीकृथा:	६	सप्तिसत्र	३८४,१४२
शकधमक	१०८	सवत्सानि	११
शकधान्या	३७४	सवनीय .. .	३४६
शकाधि (शादम) ...	१८३	साकमश्वम	४३८
शक्तिन	४४२	साक्षिदेय ..	३८३
शाकरम् ..	३१४,३१२,३४७	साम	१०८,१०७
शाखालम्	४३२	सामन्	१०६
शुक्र (ग्रह:) ...	३,४	सामनक्य	१०८
शुक्रग्रह:	१८७	सामिधेन्य.	३१७,३४४
शौनकयज्ञ	१८६	सारस्वत. (ग्रह:) .	४
श्यामा:	३८४	सारस्वत (ग्रह) ...	४
श्रीतम्	३४२	सारस्वतियज्ञ. ...	१८६
श्रेष्ठयज्ञ:	३८८	सावित्र (ग्रह.) ...	३,११३
		सिक्त.	२०६
षड्ग्रह: ...	३१८,३२३-३२७,३३१	सिनीवाली	२४७

शब्दः	पृष्ठा
क्षीरस्वरत्वम्	१४१
क्षीराभिषवः	१७१
क्षीपर्चन्	१११
क्षीर्यः	१४४
क्षीर्यं (कार्यम्) ...	२८९
क्षुतशब्दाणि	१८३
क्षुधन्ति	१७५,२७६
क्षोत्राणि (द्वादश) ...	१८३
क्षोत्रियः	२०,१११
क्षोत्रियम्	१०७
क्षोत्रियाः (१९०) ...	१९५

शब्दः	पृष्ठा
क्षितम्	४१६,४१७
क्षरवती	१२६
क्षरसामानः ...	२१७,२२८,२२७,२४१
क्षापिमात् (प्रमाणः) ...	९८
क्षंसवती	१४९
क्षात्रियोजनः (यज्ञः) ...	२
क्षिङरोति	२००
क्षिङारः	४,१०८
क्षैरेयस्तूपम्	११९

॥ अथेङालोच्यस्थानसूची ॥

पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०	पृ०	पं०
७	४-२०	१२	२	१२	४	१६	४	२४	३
३१	८	३९	२०	५२	८	५९	८	७७	१५
८९	३	९७	१४	९८	२	९८	९	९८	८
१०५	१	११८	१८	१२९	११	१४१	५	१४९	९
१५३	२०	१६१	१५	१६६	१०	१६८	१७	१७५	२९
१८१	९	१८२	४	२०३	१०	२०९	११	२०७	१७
२०७	१८	२०८	९	२१४	९	२१८	२२	२२४	२२
२२५	१०	२३०	१७	२३१	९	२४१	१२	२४५	१७
२४५	१८	२४५	१९	२४९	५	२५०	३	२७१	१२
२७८	९	२७८	११	२८९	१५	२८९	१९	२८९	१८

२८६	२०	२८७	३	२९०	३	२८७	६	३०५	२
३०५	७	३११	७	३२१	५	३२५	५	३३४	६
३४०	१७	३४१	८	३४६	१२	३५६	१५	३६०	६
३६०	१२	३७५	३	३७५	१०	३७५	११	३७५	१६
३७५	१५	३७५	१५	३८८	१४	३८६	३	३८६	४
३८६	७	३८६	१०	३८६	१६	४२०	१०		

॥ अग्निष्टोमकार्यसूची ॥

(अनुसन्धान)

"अथाग्निष्टोमसंस्थेन ज्योतिष्टोमेन यो यजेत् ।
स पूर्वं ऋत्विजो वृत्वा देवभूमिं विनिश्चयेत् ।
दीक्षणीयां निर्वपेत् सोत्पि पत्नीसंयाजसंस्थितिम् ।
कृते प्राचीनवंशेऽथ संस्कारा वपनादयः ।
हुत्वा दीक्षाहुतीः, कार्या दीक्षा कृष्णाजिनादिभिः ।
दीक्षितो नियमैर्युक्तो भवेत् क्षीरव्रतादिभिः ।
सप्तमेऽहं दीक्षितोऽथ भित्त्वा द्रप्सं मानयेत् ।
सोमं चमस्यस्याध्य विक्रमेत् सोमविक्रयी ।
संगृह्य प्रायणीया स्याद्, यज्ञीयान् क्रयणीपदम् ।
क्रीत्वा सोमं रथे क्षिप्त्वा प्राग्वंशाये समानयेत् ।
आतिथ्यां निर्वपेत् सोम मासाद्या मुपसादयेत् ।
आतिथ्येऽग्निरिडाप्ता स्यात्, सामूतम् मवत्यति ।
दीक्षा सवान्तरा सेति, प्रवर्ग्योपसदोः क्रतिः ।
दिनत्रये तत् कृतं स्यात्, वेदिर्मध्यदिने भवेत् ।
षट्त्रिंशत्पदटीकैवा प्राग्वंशात् पूर्वतः क्षिता ॥

प्रातः प्रवर्ग्यं सुदास्य, पश्चादुत्तरवेदिनः ।
शकटे हे हविर्धाने, हविर्धानं च मण्डपम् ।
पश्चात्तदस्तस्य मध्ये निखातौदुम्बरी मिता ।
दक्षिणस्यानसोऽधस्ताद् गर्त्तानुपरवान् खनेत् ।
विधाय फलकाभ्यां तानग्ने कुर्याग्न्यङ्क खरम् ।
निर्वपेदिष्णागानग्नीषोमीयं पशु माचरेत् ।
प्रयुज्याचितपात्राणि दर्शवत् सर्वं माचरेत् ।
आज्य आसादिते वेद्या मन्ते यूपं समुच्छ्रयेत् ।
यूपस्योच्छ्रयणादूर्द्धं समापय्य पशुं ततः ।
यैरर्जनानि हुत्वाग्निं सोमं गावादि चानयेत् ।
हविर्धाने स्थापयित्वा गृह्णीयात्सप्तवेदरीः ।
प्रयुञ्जात् सोमपात्राणि महाराजे खरादिषु ।
गावस्तु स्थापिते सोमे पक्षिणां ध्वनितः पुरा ।
स्यात् प्रातरनुवाकार्थं सुपाकरण मादरात् ॥
वसतीवर्यपां प्राप्तौ प्रचारः स्याद् दधिग्रहे ।
उपांशु ग्रदाभ्यौ हुत्वा च महाभिषव माचरेत् ।
उपांशु मन्तर्यामं च हुत्वा रिक्तं तु सादयेत् ॥
अथैन्द्रवायवं पात्रैर्गृहीत्वा सादयेत् खरे ।
यो मैत्रावरुणस्तं तु श्रीणाति पयसा ग्रहम् ।
शुक्रः सुतो हिरण्येन, सुतो मन्थी तु सक्तुभिः ।
गृहीत्वाग्रयणं गृह्णात्यतिग्राह्याभिधान् ग्रहान् ।
गृहीत्वौक्थ्यं ध्रुवो ग्राह्यः पवमानग्रहास्त्रयः ।
पूतभृद् द्रोणकलशो ऽपरसाधवनीयकः ।
ते ब्रह्मण्यमानाय प्रचरन्त्यथ पञ्च ते ।

पठीत्वाश्विन माग्नेयं पयोः कुर्यादुपाजतिम् ।
सवनीयपुरोडाशैश्चरित्वा सौम्यचरुत्रयम् ।
हुत्वा यजं, हयोर्मंत्रावरुणाश्विनयोर्हुती ।
शुक्रमन्थ्यादिकान् हुत्वा चमसानपि शुध्यति ।
संरभ्यर्तुयजैन्द्राग्नसोमप्रतिगरांस्ततः ।
आज्यस्तोत्रेभ्य आर्द्धं हि प्रातस्सवनसंस्थितिः ॥
माध्यन्दिने तु सवने पुरोडाशः पयोर्भवेत् ।
यजो मरुत्वतीयः स्यात् पवमानेन संस्तुतिः ।
दधिघर्मं हुते दद्यात् दधिचामो यथायजम् ।
मरुत्वतीयांस्तान् हुत्वा माहेन्द्रेण समाप्यते ॥
तृतीयसवनारम्भ आदित्यग्रह माचरेत् ।
आर्भवेण सुपीताय पशुकामैः प्रचरत्ययम् ।
सावित्रवैश्वदेवाख्यौ यजौ, सौम्यचरुस्तथा ।
पात्नीवतग्रहादूर्द्धं यज्ञायज्ञीयमंस्तवः ।
आग्निमारुतशस्त्रं स्याद् शस्त्रीयाद्वारियोजनम् ।
समाप्ते सवने पश्चात् कुर्यादवभृथं ततः ।
कुर्यादुदयनेष्टिं मनुबन्ध्यां यजेत गाम् ।
दैविकां निर्वपेद् देवसुवामापि यजूंष्यथ ।
उपोष्य वेदि माग्नेय मिष्ट्वाग्निष्टोमसंस्थितिः ॥"

॥ सम्पादकोक्तिः ॥

अथ सर्वक्रतुप्रधानभूतो ज्योतिष्टोमः सप्तसंस्थ इति याज्ञिक-प्रसिद्धिः । संख्या विधेत्यनवान्तरम् । ततश्चैकस्यैव ज्योतिष्टोमस्य सप्तविधत्वात् अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अति-रात्रः, वाजपेयः, आप्तोर्यामश्चेति सप्त नामानि सम्यन्नानि । तत्र यश्चायमग्नीषोमीयाख्यनाग्निष्टोमसाम्ना यत्र समाप्तिः, स आद्यो ऽग्निष्टोमः । स एवात्यग्निष्टोमादीनां षण्णां मादर्शरूपो ऽतो याज्ञिकैः प्रकृतियाग इत्युच्यते । स खल्वयमैतरेयके आदितश्चतुः-खण्डाधिकचतुर्दशाध्यायैर्विवक्षितः । ततः पञ्चदशाध्यायात्मोपा-न्त्ययोः खण्डयोरुक्थ्यप्रकृतौ विशेषा उक्ताः । ततः षोडशाध्यायी याद्यचतुःखण्डेषु षोडशिसंस्थस्य तस्य विशेषविधयोऽभिहिताः । तत ऊर्ध्वं सप्तदशाध्यायीयपञ्चमखण्डान्त्यं अतिरात्रविधय उप-दिष्टाः । एवं सार्धेनाध्यायषोडशकेन चतुःसंस्थो ज्योतिष्टोमः समाम्नातः ।

एतच्चतुष्टय मुपजीव्यैव गवामयनम्, अङ्गिरसामयनम्, आदि-त्यानामयनं चेति त्रीणि सत्राणि प्रयतन्त इति तानि तत ऊर्ध्वं सार्धैकाध्यायेनोक्तानि । तत्रापि गवामयनम् प्रकृतिः ।

ततः पञ्चभिरध्यायैर्विधयो द्विविधोऽपि द्वादशाहस्तूनविंशा-ध्यायस्यादित एवारब्धः । अस्य चाध्यायस्य चतुर्थपञ्चिकान्त्यत्वेना-त्रैव द्वितीयो भागः समापितः ॥

ज्योतिष्टोमीयानुष्ठेयाना मिष्याधङ्गकर्मणां वारिकोपनिबद्ध' सङ्क्षेपतः क्रमवर्णनं यद् विद्यते ऋतुसङ्गहे, तदपीहाग्निष्टोमीय-कर्मणां पौर्वापर्यपरिज्ञानाय सूचीत्वेन सङ्गृहीत मिति शम् ॥

कलिकाता। संवत् १८५३।

सामयमी श्रीसत्यव्रतशर्म्मा।
(सम्पादकः)

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ तृतीयपञ्चिका ॥

(५५)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ यद्दोक्थं वा एतद्यत्प्रउगं नव प्रातर्यज्ञा गृह्यन्ते नवभिर्वषिष्यमाणे स्तुवते स्तोमे दशमं गृह्णाति छिद्रं वृतरासां दशमः सो सा सञ्ज्ञा वायव्यं शंसति तेन वायव्य उक्थवानैन्द्रवायवं शंसति तेनैन्द्रवायव उक्थवान् मैत्रावरुणं शंसति तेन मैत्रावरुण उक्थवानाश्विनं शंसति तेनाश्विन उक्थवानैन्द्रं शंसति तेन शुक्रामन्थिना उक्थवन्तौ वैश्वदेवं शंसति तेनाग्नय उक्थवाग्गायत्रसारस्वतं शंसति न सारस्वतो यज्ञो ऽस्ति वाक् तु सरस्वती ये तु के च वाचा यज्ञा गृह्यन्ते ते ऽस्य सर्वे यदुक्था उक्थिनो भवन्ति य एवं वेद ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

आहावं निविदः सूक्त मच्छावाकस्य चोदनाम् ।
यजमानपुनर्जन्म हुवते साधिदैवतम् ॥

इत्थं माध्यग्रहं निरूप्य प्रउगग्रहं निरूपयितुं प्रस्तौति—'ग्रहोक्थं वा एतत्यत् प्रउगं ; तत्र प्रातर्यज्ञे गृह्यन्ते, नवभिर्बर्हिष्यवमाने स्तुवते, स्तुते स्तोमे दशमं गृह्णाति, द्विहार इतरासां दशमः सो सा सप्त'—इति । प्रउगाख्यं 'यत्' यत्र मस्ति, तत् 'ग्रहोक्थं वै' ऐन्द्रवायवादिग्रहाणां मुक्थं, तदीयदेवताप्रशंसारूपमित्यर्थः । नवेत्यादिना ग्रहसम्बन्ध एव स्पष्टीक्रियते । प्रातःसवने ऐन्द्रवायवमैत्रावरुणादयो * धाराग्रहा नवसङ्ख्याका † गृह्यन्ते ।

---

* अन्तर्यामादय इति वक्तव्यम् ; नान्यथा हि नवसङ्ख्या पूर्येत । अतएव कात्यीयभाष्ये 'तथाः सन्ततं सवन्त्याः धारायाः यैषा अन्तर्यामादीनां ध्रुवपर्यन्तानां ग्रहणम् (८.६.१.)'—इत्यादुदाहृतम्, ततः 'अन्तर्यामादि-ध्रुवपर्यन्तान् धारायज्ञान्'—इत्यादि च (२५.) । आपस्तम्बोऽप्याह—"धारायाः अन्तर्यामं गृह्णाति, सर्वौषधीति ग्रहानाध्रुवात्"—इति (श्रौ० १२.१३.५.)। यत्तूक्तं जैमिनीयन्यायमालायाम् 'ऐन्द्रवायवादिग्रहेषु'—इति (५. ४ १.), तत् खलु "वाग् वा ऐन्द्रवायवग्रहः मैत्रावरुणः श्रीर्व माश्विनः"—इति (तै० सं० ६.४.६.) द्विदेवत्यग्रहविध्यर्थानुवादवाक्यानुगतम् ; तथा आश्विनग्रहस्य तृतीयत्व मपि द्विदेवत्यग्रहेष्वेव बोध्यम् ।

† गृह्यन्ते सोमरस एभिरिति ग्रहाः, चैकङ्कतादीनि पात्राणि ; इह तु तानि सोमरसपूर्णानीव विवक्षितानि । "गृहृदृनिधिगमय"—इति (पा० ३. ३. ५८.) करणे अप् प्रत्ययः । ते च ग्रहा अग्निष्टोमे चयस्त्रिंशत्सङ्ख्याकाः । तान् परिगणयामः—उपांशुरेकः ; अन्तर्यामः, ऐन्द्रवायवः, मैत्रावरुणः, आश्विनः, शुक्रः, मन्थी, आग्रयणः, उक्थ्यः, षोडशीति नव धाराग्रहाः ; तत्र चैन्द्रवायवादयस्त्रयो द्विदेवत्याः ; अथ ऋतुग्रहा द्वादश ; ऐन्द्राग्नः, वैश्वदेवश्चेति चतुर्विंशतिः प्रातःसवनगृह्याः ; त्रयो मरुत्वतीयाः, माहेन्द्रश्चेति चत्वारो माध्यन्दिनसवनगृह्याः ; आदित्यः, सावित्रः, वैश्वदेवः, पावमानवतः, द्वादशिनीयश्चेति पञ्चैव तृतीयसवनगृह्याः ; अत्यग्निष्टोमे तु चत्वारोऽधिकाः—अंशुः, अदाभ्यः, दधिग्रहः, षोडशी चेति षड्ग्रहमया समर्पिताः । एषु अन्तर्यामादयो नवैव धाराग्रहाः । उक्तेषु आधवनीयकल-

[illegible] आध्वर्युः * । तथा बर्हिष्यवमानस्तोत्रे स्तोत्रे उद्गातारो [illegible]भिः' नवसङ्ख्याभिः ऋग्भिः 'स्तुवते';—"उषासौ नक्तता"-इत्यि[illegible]तृचः † ; "दविद्युतत्या"-इति द्वितीयः, "एवया"-इति तृतीयः (ऐ० आ० १. १. १—९.)। एतेषु त्रिषु तृचेषु नवसङ्ख्याका ऋचो विद्यन्ते, ता आवृत्तिरहिता गीयन्ते। एवं 'स्तोत्रे' बर्हिष्यवमानस्तोत्रे उद्गाद्भिः 'स्तुते' सति अध्वर्युः 'दशमं' ग्रहम्, आश्विनाख्यं गृह्णाति। यद्यप्याध्वर्यवयोः मन्त्रब्राह्मणाख्यौ वेदौ आश्विनग्रहे धारायज्ञेषु तृतीयत्वेनाम्नातः, तथाप्यसौ दशमत्वेन गृहीतव्यः ; "आश्विनौ दशमौ गृह्णाते, ते तृतीयं जुह्वति"-इति श्रुत्यन्तरवचनात् §। तथा च ग्रहेषु दशमः सम्पन्नः ‖। तत्रैव 'इतरासां' बर्हिष्यवमानस्तोत्रगतानां ऋचां 'त्रिवारः' दशमत्वेन

आदृदर्शेन सोम मादाय दशमानग्रहस्तस्मिन् स्तोत्रमभिगायन्नाश्विनौ[illegible]। तत: दशमान: त्रिगुणा: दविद्युतत्या द्वीपलक्षणस्योपरि सवनाभिधानार्थं श्वेते आश्विनौ दशमग्रहं गृह्णीत: ; तत: सप्तमं सवनं धारया. धारणात् अध्वर्योरादीन् ध्रुवग्रहणात् नव ग्रहान् गृह्णातीत्यत एवैते धारायज्ञा उच्यन्ते। आश्व० श्रौ० ८ ४. १७; ९. १. आप० श्रौ० १९ १२. १२- १३. ५. द्रष्टव्यानि। ये तु न धारायज्ञा:, ते "द्वीपलक्षणाय परिप्लवा ग्रहाणां : ग्रहणादन्यत:"-इति आप० श्रौ० १९. १८ ११।

* "एष ग्रहाध्वर्यवादाय त्रिप्रं स्तोतार मभिद्रुत्य 'मंयस्पुत्रिति यमं स्तोमं प्रशंसति"-इति आप० श्रौ० १२. २१. ५।

† "ऋचि वैकल्पिकपदाद्विरावृत्तिः कर्तव्या' इति का० ९ १ २४. वा० १।

‡ तै० सं० १. ४. ३—१५ ; ९. ४. ३। का० सं० ७, ८ अ०, क्रम० आ० ४ १ १०-१८।

§ एवं च पाठो मीमांसासमाधेयोऽपि दृश्यत (तै० सं० ५ ७. १.), आश्विनग्रहाभ्यासस्थेव आश्रयम् । तृतीयपदवचनम्—' बर्हिष्यवमाने खलु आश्विना गृह्यते"-इति तै० सं० ५ ७. ९। आश्वलायनोऽपि तथैव सवनं सवनं प्रति (तै० सं० १ ४. ९. ७)। अतश्च मैत्रिमि आयमाखीवाधिकरणस्य सप्तावृत्तं सायणम (४. ७. १ आप०)।

‖ उपांशुग्रहेषु प्रातःसवनग्रहेष्विति शेषम्, न तु धारायज्ञेषु ; उपांशोर्धारायज्ञत्वा भावाद्दशमत्वानुपपत्तेरिति।

गच्छनीयः * । तथा सति ग्रहाणां स्तोत्रियाणां च सङ्ख्यासाम्यं भवति । तदिदं 'सो सा सख्या'–इतिवाक्येनोच्यते । उकारो निपातः समुच्चयार्थः सन् स्तोत्रियेभ्यां तच्छब्दाभ्यां सम्बध्यते । तथा सति 'सा' च ग्रहसङ्ख्या, 'सा' च स्तोत्रियसङ्ख्येत्युक्तं भवति । 'सख्या'–इत्यत्र द्वितीयो मकारश्छान्दसः । तस्मिन्नुपगते सति 'सख्या' तुल्येत्युक्तं भवति । एवं सति यथा वक्ष्यमाणस्य स्तोत्रस्य ग्रहसम्बन्धः, तथा प्रउगग्रहस्यापि ग्रहसम्बन्धो द्रष्टव्य इत्यभिप्रायः ॥

अथ प्रउगग्रहे विद्यमानानां ऋचानां मध्ये प्रथमं ऋचं विधत्ते— "वायव्यं शंसति, तेन वायव्य उक्थवान्"–इति । वायुर्देवता यस्य ऋचस्य सोऽयं 'वायव्यः',— "वायवा याहि दर्शत"–इत्यादिकः (सं०१.२.१-३.) ; तं शंसेत् । 'तेन' शंसनेन 'वायव्यः' ग्रहः 'उक्थवान्' ग्रहवान् भवति । यद्यपि वायव्यः पृथक् ग्रहो नास्ति, तथाप्यैन्द्रवायवस्य ग्रहस्य पूर्वभागो वायव्य इत्युच्यते । स च प्रथमम् "आ वायो भूष"–इत्यनेन (सं०७.९२.१.) केवलवायुदेवताकेन मन्त्रेण गृह्यते, तेन वायव्यो भवति ; पश्चात् "इन्द्रवायू इमे सुताः"–इत्यनेनेन्द्रसहितवायुदेवताकेन मन्त्रेण (सं०१.२.४.) गृह्यते, तेनैन्द्रवायवोऽपि भवति । अत एव वायोर्द्वैर्ग्रहणं तैत्तिरीया

* "छिन्द्र इति छिद्रम्य"–इति (१.२.३.) आश्वलायनोक्तम् छिद्रवान् बह्वृचानाम्, छन्दोगानां तु "छिन्द्र इति छिद्रवः"–इति (७. ११. ७.) लाट्यायनोक्तो वाक्यः । साम्नां सामभक्तिकत्वे पाङ्क्तभक्तिकत्वे च स एवायं भक्तिः (छा० उप० २. २. १ ; ८. १.) । ग्रहोपदिष्टे छिद्रवत्त्वे उक्तार्थो भिन्नो मन्त्रात्मक एव । स चायातश्छान्दोग्ये । तथाहि— "ते ह यथैवेदं वक्ष्यमाणेन स्तोत्रमाचाः सर्व्वस्याः सर्पणीमेव मासतपुरुषेण सम्पविश्य छिद्रम्;— 'यो३ मदा३मी३ पिबामी३ देवो वरुणः प्रजापतिः सविता३ऽग्न मिन्द्रा३ऽग्दवदग्न पते ऽग्न मिन्द्रा ग्दराऽऽइहरी३म्–इति'"–इति १. १२. ४, ५ ।

[illegible]तीयते — "सऋदिन्द्राय मधवते पचन्ते विर्वायवे"-इति (तै० सं० ६.४.७.४.) *। तत्र प्रथमभागरूपो वायव्यो यज्ञः, वैश्यदेव शस्त्रशस्त्रेण यज्ञवान् सम्पद्यते ॥

द्वितीयं ऋचं विधत्ते— "ऐन्द्रवायवं शंसति, तेनैन्द्रवायवश्च यज्ञवान्"-इति। इन्द्रश्च वायुश्च मिलिता † देवता यस्य ऋचश्च सोऽयम् 'ऐन्द्रवायवः',—"इन्द्रवायू इमे सुताः"-इत्यादिकः (सं० १.२.४-६); तं शंसेत्। तच्छंसनेनैन्द्रवायवयज्ञोत्तरभागः यज्ञवान् भवति ॥

तृतीयं ऋचं विधत्ते— "मैत्रावरुणं शंसति, तेन मैत्रावरुणश्च यज्ञवान्"-इति। मित्रो वरुणश्च मिलिता ‡ देवता यस्य ऋचश्च सोऽयं 'मैत्रावरुणः',—"मित्रं हुवे पूतदक्षम्"-इत्यादिकः (सं० १.२.७-८.)। तं शंसतीत्यादिकं पूर्ववद्योज्यम् ॥

चतुर्थं ऋचं विधत्ते — "आश्विनं शंसति, तेनाश्विन यज्ञवान्"-इति। अश्विनौ मिलिता § देवता यस्य ऋचश्च सोऽयम् 'आश्विनः',—"अश्विना यज्वरीरिषः"-इत्यादिकः (सं० १.३.१-३.)॥

पञ्चमं ऋचं विधत्ते— "ऐन्द्रं शंसति, तेन शुक्रामन्थिना यज्ञवन्तौ"-इति। इन्द्रो देवता यस्य ऋचश्च सोऽयम् 'ऐन्द्रः',—"इन्द्रा याहि चित्रभानो"-इत्यादिका ऐन्द्रस्तृचः (सं० १. ३. ४-६.)। तेन शुक्रयज्ञमन्थियज्ञयोरुभयोः यज्ञवत्त्वम् ॥

षष्ठं ऋचं विधत्ते— "वैश्वदेवं शंसति, तेनाग्नयश्च यज्ञवान्"-इति। "सोमामवर्धयन्नीधृतः"-इत्येषः (सं० १. ३. ७-८.) वैश्वदेवस्तृचः। तेनाग्नयश्च यज्ञश्च यद्यपि यज्ञवत्त्वं नाप्नुतः, तथापि

* 'या वायो'-'इन्द्रवायू'-इत्यनयो मध्ये एकस्मिन्नुपांशु यजामीत्याचार्यो तै०सं०१.४.४।
†, ‡, §, 'मिलिता' ब।

विश्वेदेवदेवताकत्वात् 'वैश्वदेवम्'। एवं सर्वेषु यज्ञसंस्थयोरपि देवताकत्वं द्रष्टव्यम् ॥

सप्तमं ऋचं विधत्ते— "सारस्वतं शंसति"-इति। "पावका नः सरस्वती"-इत्यादिकः (सं०१.३.१०-१३.) सारस्वतस्तृचः ॥

ननु पूर्ववदत्रापि यज्ञस्य शस्त्रवत्त्वं कुतो नोपन्यस्यते ? इत्याशङ्क्याह— "न सारस्वतो यज्ञोऽस्ति"-इति। आथर्वणमन्त्रकाण्डे सारस्वतमन्त्रस्यापठितत्वाद्, ब्राह्मणे विध्यभावाच्च यज्ञाभावः। तर्हि यज्ञोक्ष्येऽस्मिन्नस्य सारस्वतस्य ऋचस्य किमर्थं शंसन मात्रात मित्याशङ्क्याह—"वाक् तु सरस्वती, ये तु के च वाचा यज्ञा रभ्यन्ते, ते ऽस्यसर्वे शस्त्रोक्थाः"-इति। सरस्वती हि वाग्देवता, यज्ञाणां च वाचा रभ्यमाणत्वात् सारस्वतत्वम्, तेन सर्वेऽपि यज्ञाः 'शस्त्रोक्थाः' पठितशस्त्रा भवन्ति ॥

वेदनं प्रशंसति। "उक्थिनो भवन्ति य एवं वेद"-इति। तस्य वेदितुः सर्वे यज्ञाः शस्त्रवन्तो भवन्ति, यज्ञदेवतास्तुष्यन्तीत्यर्थः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
प्रथमः खण्डः ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

अन्नाद्यं वा एतेनावरुन्धे यत्प्रउगं मन्यान्या देवता प्रउगे शस्यते ऽन्यदन्यदुक्थं प्रउगे क्रियते ऽन्यदन्य-

दस्यान्नाद्यं गर्हेषु म्रियते य एवं वेदैतद्वै यज्ञ-
मानस्याध्यात्मतम मिवोक्थं यत् प्रउगं तस्मादेनमै-
तदुपेत्यतम मिवेत्याहुरेतेन स्तोत्रं होता संस्करोतीति
वायव्यं शंसति तस्मादाहुर्वायुः प्राणः प्राणो रेतो
रेतः पुरुषस्य प्रथमं सम्भवतः सम्भवतीति यद्वायव्यं
शंसति प्राण मेवास्य तत्संस्करोत्यैन्द्रवायवं शंसति
यत्र वाव प्राणस्तदपानो यदैन्द्रवायवं शंसति प्राणा-
पानावेवास्य तत्संस्करोति मैत्रावरुणं शंसति तस्मा-
दाहुश्चक्षुः पुरुषस्य प्रथमं सम्भवतः सम्भवतीति
यन्मैत्रावरुणं शंसति चक्षुरेवास्य तत्संस्करोत्याश्विनं
शंसति तस्मात् कुमारं जातं संवदन्त उप वै शुश्रू-
षते नि वै ध्यायतीति यदाश्विनं शंसति श्रोत्र
मेवास्य तत्संस्करोत्यैन्द्रं शंसति तस्मात् कुमारं
जातं संवदन्ते प्रतिधारयति वै ग्रीवा अधो शिर
इति यदैन्द्रं शंसति वीर्य मेवास्य तत्संस्करोति
वैश्वदेवं शंसति तस्मात् कुमारो जातः पशव इव प्रच-
रति वैश्वदेवानि ह्यङ्गानि यद्वैश्वदेवं शंसत्यङ्गान्ये-
वास्य तत्संस्करोति सारस्वतं शंसति तस्मात् कुमारं
जातं जघन्या वागाविशति वाग्घि सरस्वती यत्
सारस्वतं शंसति वाच मेवास्य तत्संस्करोत्येष वै

आत्मने यजमानाय एतावतो देवतायै सर्वेभ्य ऋग्वेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः प्रउगेभ्यः सर्वेभ्यः सवनेभ्यो य एवं वेद यस्य चैवंविदुष एतच्छंसन्ति ॥ २१ ॥

विहितं प्रउगशस्त्रं प्रशंसति— "यज्ञाय वा एतेनावदन्ते यत् प्रउग मन्त्रान्वा देवता प्रउगी शस्त्रमि त्यदन्यदुक्थं प्रउगी क्रियते"–इति । यदेतत् प्रउगाख्यं शस्त्र मस्ति, तदेतदृत्विग्यजमानयोः साधनम् । अतस्तेनायं प्राप्नोति । यस्मादस्मिन् शस्त्रे इयक् इयगेव देवता शस्यते,— प्रथमऋचि केवलो वायुः, द्वितीयस्यामिन्द्रवायू, तृतीयस्यामश्विनावित्यादिर्देवताभेदः ; यावेव देवता भिद्यन्ते, तयैवास्मिन् शस्त्रे 'अन्यदन्यत् उक्थं',— "वायवायाहि"–"इन्द्रवायू"–इत्यादिकं परस्परविलक्षणं शस्त्राङ्गं क्रियते; तस्मादोदनशाकसूपादिविलक्षणभक्षभोज्यलेह्यचोष्यसाम्यादनाद्यहेतुत्वं युक्तम् ॥

वेदनं प्रशंसति— "अन्यदन्यदस्यास्यां शस्त्रेषु क्रियते य एवं वेद"–इति । 'अन्यदन्यत्' परस्परविलक्षणं मधुराम्लादिरूपम् ॥

प्रकारान्तरेण प्रउगं प्रशंसति— "एतद्वै यजमानस्यात्मानतम मिवोक्थं यत् प्रउगं ; तस्मादेनेनैतदुपैक्षतम मिवेत्याहुरेतेन स्तोत्रेण होता संस्करोति"–इति । प्रउगाख्यं यच्छस्त्र मस्ति, एतदेव यजमानस्य 'अध्यात्मतम मिव' आत्मानं शरीरं अधिकृत्य वर्तते इत्यध्यात्मम्, शरीरसम्बन्धीत्यर्थः । पूर्वत्राध्यशब्दस्य यजमानशरीरनिष्पत्तिहेतुत्वाभिधानात् (१भा०४७४पृ०) तदध्यात्मम्,

[illegible] तस्मात् 'यजमानेन' यजमानेन 'एतत्' [illegible] अतिग्रन्थेनोप समीपे ऐन्द्राग्नेन आदरत्वेन [illegible] अभिप्रा आहुः। तेषा मय मतिभावः,— 'एतेन' [illegible] 'एनं' यजमान माध्वर्यवादुत्पन्नं * होतार संस्करोति, तस्मादाध्वर्यवं युक्तम् ॥

अथ प्रथमटचं विहित मनूद्य स्तौति— "प्राणेन संधति;— तस्मादाद्युर्वायुः प्राणः, प्राणो रेतो, रेतः पुरुषस्य प्रथमं सम्भवतः सम्भवतीति; यद्वायव्यं संधति, प्राण मेवास्य तत् संस्करोति"— इति। पूर्वोक्तो विधिर्वाग्रव्यं संसतीति (४ द०) वाक्येनानूद्यते। यस्मादाध्वर्यवं संसनीयं, तस्मादभिप्रा एव आहुः,— प्राणस्य वायु-कार्यत्वेन वायुरेव प्राणः, रेतसः प्राणाधारत्वशरीरनिष्पादकत्वा-द्रेतः प्राणः, प्राणस्वरूपं तत्सदृशं रेतः 'सम्भवतः' उत्पद्यमानस्य 'पुरुषस्य' देहस्य कारणत्वेन पिण्डदेहे प्रथमं सम्भवति। अत अभिप्रैरुक्तत्वादाध्वर्यवसंयुक्तः समीचीनः। तच्छंसनेन होता यज-मानस्य प्राण मेव संस्करोति ॥

द्वितीयं विधि मनूद्य स्तौति— "ऐन्द्रवायवं संधति;— यद्व वाव प्राणस्तदपानो; यदैन्द्रवायवं संसति, प्राणापानयोरेवास्य तत् संस्करोति"—इति। उच्छ्वासरूपः प्राणो यत्राक्षि, तत्र निश्वास-रूपोऽपानोऽप्यक्षि; इन्द्रवायू च प्राणापानस्वरूपौ; तस्मात् तेन सूक्तेन प्राणापानयोः संस्कारः ॥

तृतीयं विधि मनूद्य स्तौति— "मैत्रावरुणं संधति; तस्मा-दाहुश्चक्षुः पुरुषस्य प्रथमं सम्भवतः सम्भवतीति; यन्मैत्रावरुणं

* 'ऽध्वर्यव' घ।

शंसति, चक्षुरेवास्य तत् संस्करोति"–इति। अन्यत्रापि "चक्षु-र्मैत्रावरुणः"–इति (तै० सं० ६,४,८,४;)। मित्रावरुणसम्बन्धस्य ग्रहस्य चक्षुर्ग्रहाभिधानात् तच्चोऽपि चक्षुःस्वरूप एव। तच्चक्षुः अन्यस्मात् श्रोत्रादीन्द्रियात् प्रथम मुत्पद्यते। अस्यार्थस्यागमगम्य-त्वादाहुरभिज्ञा इत्युक्तम्। एवंविध चक्षुःस्वरूपेण मैत्रावरुण-ग्रहेण यजमानचक्षुषः संस्कारः॥

चतुर्थं विधिं मनूद्य स्तौति— "श्राव्णिनं शंसति; तस्मात् कुमारं जातं संवदन्त, उप वै शुश्रूषते नि वै ध्यायतीति; यदा-श्राव्णिनं शंसति, श्रोत्र मेवास्य तत् संस्करोति"– इति। उत्पन्नं बालं मुख मेवेक्षमाणा माहुपित्रादयः परस्पर मेव माहुः,—नानाविधै रुपलालनैराकृतो बालकोऽस्मन्मुख मवलोकयति, तस्मादयं अस्म-दीयं वाचं श्रोतुमिच्छति, नैरन्तर्येणावलोकनेन मा मेव ध्यायतीति। तदेतच्छ्रावणग्रहानुग्रहकृतम्। तस्मात् तच्छंसनेन श्रोत्रस्य संस्कारः॥

पञ्चमं विधिं मनूद्य स्तौति— "ऐन्द्रं शंसति; तस्मात् कुमार जातं संवदन्ति, प्रतिधारयति वै ग्रीवा अथो शिर इति; ऐन्द्रं शंसति, वीर्यं मेवास्य तत् संस्करोति"– इति। दोलायां शयानं बाल मवेक्ष्य परस्पर मेव माहुः,—अय मिदानीं 'ग्रीवाः प्रतिधारयति' इत्यतु भादौ गल मुन्नमयति, ततः शिर उन्नमय-तीति। एतस्य व्यापारस्य वीर्यनिमित्तत्वादिन्द्रस्य च वीर्यप्रद-त्वात् तदीयग्रहेण ग्रीवः संस्कारः॥

षष्ठं विधिं मनूद्य स्तौति— "वैश्वदेवं शंसति; तस्मात् कुमारो जातः पशव एव प्रचरति; वैश्वदेवानि ह्यङ्गानि; यद्वैश्वदेवं शंसत्यङ्गान्येवास्य तत् संस्करोति"–इति। उत्पन्नो बालः 'पशव एव'

दर्शनश्रवणघ्राणमनादिक्रियाभ्यः पश्चादेव समर्थः सन् हस्ताभ्यां पादाभ्यां चेतस्ततः प्रचरति ; हस्तादीन्यङ्गानि च बहुदेवतानि ; तस्मात् वैश्वदेवर्चेनाङ्गसंस्कारः ॥

अथ विधिं मनूद्य स्तौति— "सारस्वतं शंसति ; तस्मात् कुमारं जातं जघन्या वागाविशति ; वाग्घि सरस्वती, यत् सारस्वतं शंसति वाच मेवास्य तत् संस्करोति" इति । हस्तपादप्रचारावस्थाया ऊर्ध्वं वक्तुं प्रारभते, अतो 'जघन्या वाक्' इत्युच्यते । वाचः सरस्वतीरूपत्वात् तदीयत्वेन तस्याः संस्कारः ॥

वेदितारं मनुज्ञातारं च प्रशंसति— "एष वै जातो जायते सर्वाभ्य एताभ्यो देवताभ्यः सर्वेभ्य उक्थेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः प्रउगेभ्यः सर्वेभ्यः भवनेभ्यो य एवं वेद, यस्य चैवंविदुष एतच्छंसति" इति । 'यः' होता यथोक्तप्रकारेण वेद, एष एव पूर्वं कर्मानुष्ठित्रर्थं जातोऽपि पुनर्देवतादिभ्यो जातो भवति । यथोक्तं विदुषो 'यस्य' यजमानस्य होता 'एतत्' प्रउगं शंसति, सोऽपि यजमानो देवतादिभ्यः पुनर्जायते । देवता वायुादयः । उक्थानि आज्यप्रउगादीनि । छन्दांसि गायत्र्यादीनि । प्रउगानि तत्तद्यवास्तूचः । भवनानि लोकाः प्रसिद्धानि । एतेभ्यः सर्वेभ्यः पुनरुत्पत्तिः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपङ्क्तिकायां प्रथमाध्याये
द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

प्राणानां वा एतदुक्थं यत्प्रउगं सप्त देवताः शंसति सप्त वै शीर्षन् प्राणाः शीर्षन्नेव तत्प्राणान् दधाति किं स यजमानस्य पापभद्र मादियेतेति ह स्माह यो ऽस्य होता स्यादित्यचैवैनं यथा कामयेत तथा कुर्याद् यं कामयेत प्राणेनैनं व्यर्द्धयानीति वायव्य मस्य लुब्धं शंसेदृचं वा पदं वातीयात्तेनैव तल्लुब्धं * प्राणेनैवैनं तद् व्यर्द्धयति यं कामयेत प्राणापानाभ्या मेनं तद् व्यर्द्धयानीत्यैन्द्रवायव मस्य लुब्धं शंसेदृचं वा पदं वातीयात्तेनैव तल्लुब्धं प्राणापानाभ्या मेवैनं तद् व्यर्द्धयति यं कामयेत चक्षुषैनं व्यर्द्धयानीति मैत्रावरुण मस्य लुब्धं शंसेदृचं वा पदं वातीयात्तेनैव तल्लुब्धं चक्षुषैवैनं तद् व्यर्द्धयति यं कामयेत श्रोत्रेणैनं व्यर्द्धयानीत्याश्विन मस्य लुब्धं शंसेदृचं वा पदं वातीयात्तेनैव तल्लुब्धं श्रोत्रेणैवैनं तद् व्यर्द्धयति यं कामयेत वीर्येणैनं व्यर्द्धयानीत्यैन्द्र मस्य लुब्धं शंसेदृचं वा पदं वातीयात्तेनैव तल्लुब्धं वीर्येणैवैनं तद् व्यर्द्धयति यं कामयेताङ्गैरेनं व्यर्द्धयानीति वैश्वदेव मस्य लुब्धं शंसे-

* 'तं लुब्धं' क: एव मिद सर्वत्र।

दृंहं वा पदं वातीयात्तेनैव तल्लुब्ध मङ्गैरेवैनं तद् व्यर्द्धयति यं कामयेत वाचैनं व्यर्द्धयानीति सारस्वत मस्य लुब्धं शंसेद्दृंहं वा पदं वातीयात्तेनैव तल्लुब्धं वाचैवैनं तद् व्यर्द्धयति य मु कामयेत सर्वैरेन मङ्गैः सर्वेणात्मना समर्द्धयानीत्येतदेवास्य यथापूर्व मृजुकृत्नं शंसेत्सर्वैरेवैनं तदङ्गैः सर्वेणात्मना समर्द्धयति सर्वैरङ्गैः सर्वेणात्मना समृद्धाते य एवं वेद ॥ ३ ॥

प्रकारान्तरेण प्रउगशस्त्रं प्रशंसति— "प्राणानां वा एतदुक्थं यत् प्रउगं; सप्त देवताः शंसति,— सप्त वै शीर्षन् प्राणाः शीर्षन्नेव तत् प्राणान् दधाति"—इति । शिरोगतसप्तच्छिद्रवर्त्तिप्राणानां पूर्वोक्तभक्षतृचगतवायुादिदेवतानां च सङ्ख्यासाम्यात् शस्त्रस्थ प्राणरूपत्वम्. तेन यजमानस्य शिरसि प्राणधारणं भवति ॥

अथ प्रश्नोत्तराभ्यां प्रउगशस्त्रस्य सामर्थ्यं दर्शयति—"किं स यजमानस्य पापभद्र मादृश्येनेति ह आह, योऽस्य होता स्यादित्यतैवैनं यथा कामयेत तथा कुर्यात्"—इति । 'अस्य' यजमानस्य 'यः' होता स्यात्, स तस्य 'पापभद्रं किं मादृश्येत' पाप मनिष्टफलं, भद्र मिष्टफलं, तादृगं फलं किं सम्पादयितुं समर्थः ? इति प्रश्नः । अत्रैव जन्मनि 'एनं' यजमानं प्रति यथा होता कामयेत, तथा कर्तुं शक्नोति इत्युत्तरम् ॥

तत्र प्रथमतृचप्रयुक्त मनिष्टं दर्शयति— "यं कामयेत प्राणेनैनं व्यर्द्धयानीति, वायव्य मस्य लुब्धं शंसेद्दृंहं वा पदं वातीयात्, तेनैव तल्लुब्धं प्राणेनैवैनं तद् व्यर्द्धयति"—इति । 'यं'

यजमान मुद्दिश्य होता कामयेत । कथ मिति, तदुच्यते—'एनं' यजमानं प्राणेन 'व्यर्द्धयानीति' तद्दियुक्तं करवाणीति। एवं कामयमानो होता 'अस्य' यजमानस्य सम्बन्धिनं 'वायव्यं' तृचं 'लुभ्यं' व्यामूढं यथा भवति तथा 'शंसेत्' स्तभ्नुयेत्, न पठेदित्यर्थः । 'लुभ विमोहने' इति धातुः (तु० २५)। व्यामोहप्रकार उच्यते— एका ऋचं वा तदीय मेकं पदं वा 'अतीयात्' स्तभ्नुयेत्, न पठेदित्यर्थः। तावता 'तत्' तृचस्वरूपं 'लुभ्यं' व्यामूढं भवति; तथा सति प्राणरूपत्वेन पूर्वनिरूपितस्य वायोः क्रोधात् 'एनं' यजमानं प्राणेन वियोजयति ॥

द्वितीयतृचनिमित्त मनिष्टं दर्शयति— "यं कामयेत प्राणापानाभ्यां मैनं तद् व्यर्द्धयानीत्यैन्द्रवायवस्य लुभ्यं शंसेदृचं वा पदं वातीयात्, तेनैव तल्लुभ्यं प्राणापानाभ्यां मैवैनं तद् व्यर्द्धयति"—इति । पूर्ववत् व्याख्येयम् ॥

तृतीयतृचनिमित्त मनिष्टं दर्शयति— "यं कामयेत चक्षुषैनं व्यर्द्धयानीति, मैत्रावरुणस्य लुभ्यं शंसेदृचं वा पदं वातीयात्, तेनैव तल्लुभ्यं चक्षुषैवैनं तद् व्यर्द्धयति" इति। पूर्ववत् व्याख्येयम् ॥

चतुर्थतृचप्रयुक्त मनिष्टं दर्शयति— "यं कामयेत श्रोत्रेणैनं व्यर्द्धयानीत्याश्विनस्य लुभ्यं शंसेदृचं वा पदं वातीयात्, तेनैव तल्लुभ्यं श्रोत्रेणैवैनं तद् व्यर्द्धयति"—इति । पूर्ववत् व्याख्येयम् ॥

पञ्चमतृचप्रयुक्त मनिष्टं दर्शयति— "यं कामयेत वीर्येणैनं व्यर्द्धयानीत्यैन्द्रस्य लुभ्यं शंसेदृचं वा पदं वातीयात्, तेनैव तल्लुभ्यं वीर्येणैवैनं तद् व्यर्द्धयति" इति । पूर्ववत् व्याख्येयम् ॥

षष्ठतृचप्रयुक्त मनिष्टं दर्शयति— "यं कामयेताङ्गैरेनं व्यर्द्धयानीति, वैश्वदेवस्य लुभ्यं शंसेदृचं वा पदं वातीयात्,

तेनैव तल्लुब्ध मङ्गैरेनं तद् व्यर्धयति"-इति । पूर्ववत् व्याख्येयम् ॥

समभतृचप्रयुक्त मनिष्टं दर्शयति— "यं कामयेत वाचैनं व्यर्धयानीति, सारस्वत मस्य लुब्धं शंसेदृचं वा पदं वातीयात्, तेनैव तल्लुब्धं वाचैवैनं तद् व्यर्धयति"-इति । पूर्ववत् व्याख्येयम् ॥

अथास्य शस्त्रस्येष्टफलसामर्थ्यं दर्शयति— "य मु कामयेत सर्वैरेन मङ्गैः सर्वेणात्मना समर्धयानीत्येतदेवास्य यथापूर्व मृजुक्रमं शंसेत्,—सर्वैरेवैनं तदङ्गैः सर्वेणात्मना समर्धयति"-इति । पूर्वोक्तानि प्राणादीनि, सर्वाण्यङ्गानि, सम्पूर्णो देहः, सर्व आत्मा, तत्समृद्धिकामो होता 'यस्य' यजमानस्य सम्बन्धि 'तत्' एव प्रउगशस्त्रं 'यथापूर्वं' गुरोः समीपे पारायणक्रमेण पठितं, तथैव 'ऋजुक्रमं' कस्यचिदवयवस्यान्यथात्वाभावादृजुत्वं, तथा क्रमं सम्यादित कृत्वा शंसेत् । ततः काम्यमानसमृद्धिः सिध्यति ॥

वेदनं प्रशंसति — "सर्वैरङ्गैः सर्वेणात्मना समृध्यते य एवं वेद" इति । व्याख्यातार्थः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपङ्क्तिकायां प्रथमाध्याये
तृतीयः खण्डः ॥ ३ ॥

॥ अथ चतुर्थः खण्डः ॥

तदाहुर्यथा वाव स्तोत्र मेवं शस्त्र माग्नेयीषु सामगा * स्तुवते वायव्यया होता प्रतिपद्यते कथ मस्याग्नेय्यो ऽनुशस्ता भवन्तीत्यग्नेर्वा एताः सर्वास्त्वो यदेता देवताः स यदग्निः प्रवानिव दहति तदस्य वायव्यं रूपं तदस्य तेनानुशंसत्यथ यद् द्वैध मिव कृत्वा दहति द्वौ वा इन्द्रवायू तदस्यैन्द्रवायवं रूपं तदस्य तेनानुशंसत्यथ यदुच्च हृष्यति नि च हृष्यति तदस्य मैत्रावरुणं रूपं तदस्य तेनानुशंसति स यदग्निर्घोरसंस्पर्शंसदस्य वारुणं रूपं तं यद् घोरसंस्पर्शं सन्तं मित्रकृत्येवोपासते तदस्य मैत्रं रूपं तदस्य तेनानुशंसत्यथ यदेन द्वाभ्यां बाहुभ्यां द्वाभ्या मरणीभ्यां मन्थन्ति द्वौ वा अश्विनौ तदस्याश्विनं रूपं तदस्य तेनानुशंसत्यथ यदुच्चैर्घोष ।- स्तनयन् ववषा कुर्वन्निव दहति यस्माद् भूतानि विजन्ते तदस्यैन्द्रं रूपं तदस्य तेनानुशंसत्यथ यदेन मेकं सन्तं बहुधा विहरन्ति तदस्य वैश्वदेवं रूपं तदस्य तेनानुशंसत्यथ यत्स्फूर्जयन् वाच मिव वदन् दहति तदस्य सारस्वतं रूपं तदस्य तेनानुशंसत्येव मु

* 'शासते' क । । 'यदुच्चैर्घोषः' क ।

ह्यस्य वायव्ययैव प्रतिपद्यमानस्य तृचेन तृचेनैवैताभिर्देवताभिः स्तोत्रियोऽनुशस्तो भवति विश्वेभिः† सोम्यं मध्वग्न इन्द्रेण वायुना पिबा मित्रस्य धामभिरिति वैश्वदेव मुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद् देवताः प्रीणाति ॥ ४ ॥

अथ स्तोत्रशस्त्रयोः देवतावैलक्षण्यरूप माक्षेप मुत्थापयति— "तदाहुर्यथा वाव स्तोत्र मेवं शस्त्र माग्नेयीषु सामगा स्तुवते, वायव्यया स्तौता प्रतिपद्यते, कथ मस्याग्नेय्योऽनुशस्ता भवन्तीति"— इति । सामगानां यान्याज्यस्तोत्राणि, तत्र ऋच आग्नेय्य आम्नाताः; "अग्न आ याहि" इत्यादिषु (उ०आ०१.१.४–७.) सामगैराज्यस्तोत्रप्रारम्भात्‡ । होता तु "वायवा याहि"-इत्यनया (सं०१.२.१.) वायव्यया प्रउगशस्त्रं प्रारभते । अतो ऽनेन विलक्षणदेवताकेन शस्त्रेणाग्नेय्य ऋचः कथ मनुशस्ता भवन्ति ? अनुकूलशंसनाभावे "मृत मनु शंसति" इति (ता० ब्रा० ८. ८. १०.)§ शास्त्रान्तरं विरुध्येतेति आक्षेपः ॥

तस्योत्तरं दर्शयति— "अग्नेर्वा एताः सर्वास्तन्वो यदेता देवताः" इति । सामसु तृचेषु (१ १५पृ०) या एता वायुादयो देवताः प्रतीयन्ते, ताः सर्वा अग्नेरेव शरीरभूताः; अतोऽग्निविषय मेव छत्स्नं शस्त्रं सम्पद्यत इति । स्तोत्रगता आग्नेय्यः ऋचो ऽनुशस्ता भवन्ति ॥

---

† 'देवताभिः' ब, ग, घ । ‡ 'विश्वेभ्यः' ङ ।

§ ता० ब्रा० २. ४ ६, ७. २ ; ११. २ ३ ।

¶ १ भा० ४५३ पृ० 'अ' द्रष्टव्यम् ।

5878

अग्नेः प्रथमतृचप्रतिपादिताया वायुदेवतायाः स्वरूपं दर्शयति— "स यदग्निः प्रवानिव दहति, तदस्य वायव्यं रूपं, तदस्य तेनानुशंसति"-इति। 'प्रवानिव' प्रकर्षवानिव सन्निधिकज्वालया दहत्यग्निरिति यदस्ति, तत्प्रकर्षात्मकं वायुसम्बन्धि रूपम्; वायुना ज्वालाधिक्योदयात्। अतोऽस्य प्रउगशस्त्रस्य सम्बन्धिना तेन वायुरूपेणायं होता तदग्निरूप मनुशंसति॥

द्वितीयतृचप्रतिपादिताया इन्द्रवायुदेवतायाः सारूप्यं दर्शयति—"अथ यद् द्वैध मिव कृत्वा दहति, द्वौ वा इन्द्रवायू तदस्यै न्द्रवायवं रूपं, तदस्य तेनानुशंसति"-इति। ज्वालाद्वय मिव कृत्वा यदा दहति, तदा द्वित्वसाम्यात् तज्ज्वालाद्वय मिन्द्रवायुसम्बन्धि रूपं भवति। अन्यत् पूर्ववत्॥

तृतीयतृचे सारूप्यं दर्शयति—"अथ यदुग्रं हृथति, नि न हृथति, तदस्य मैत्रावरुणं रूपं, तदस्य तेनानुशंसति"-इति। ज्वलतोऽग्नेरौग्रत्यम् 'उहर्षः', ज्वालाशान्त्या नीचत्वं * 'निहर्षः'; तदुभयं मित्रावरुणसम्बन्धि रूपम्;—मित्रं दृष्टवतो हर्षेणोग्रत्वात् तन्मित्ररूपम्; वरुणसम्बन्धिनीना मपां नीचगामित्वात् एतद् वरुणस्य रूपम्। तदीयत्वेनाग्निरनुशस्तो भवति। तदेव युक्तत्वत्व माह—"स यदग्निर्घोरमंस्पर्शस्तदस्य वारुणं रूपं, तं यद् घोरं मंस्पर्शं सन्तं मित्रकृत्येवोपासते, तदस्य मैत्रं रूपं, तदस्य तेनानुशंसति"-इति। सोऽग्निः 'घोरमंस्पर्शः' उष्णसंस्पर्शः इति यदस्ति, तदस्याग्नेर्वरुणसम्बन्धि रूपम्; वरुणस्यौग्रत्वात्। घोरमंस्पर्शं मन्तं स्पृष्टु मशक्य मपि तं मग्निं शीतार्त्ताः प्राणिनो 'मित्रकृत्वा' मित्रस्य कृतिः कार्यं समीपे ऽवस्थानं तेनैव 'एनम्

* 'ज्वालया अग्नेर्नीचत्व' ग।

उपासते' शीतपरिहाराय पक्षौ उदरं पुच्छं च वह्निसमीपे प्रतापयन्तो वह्निं सेवन्ते 'तत्' एतत्सेवनम् 'अस्य' अग्नेः मिश्रसम्बन्धि रूपम् । ततो ह्याग्नेः सम्बन्धिना 'तेन' मैत्रावरुणरूपेणार्थं होता वह्निं मनुशंसति ॥

चतुर्थतृचे सारूप्यं दर्शयति— "अथ यदेनं द्वाभ्यां बाहुभ्यां द्वाभ्यां अरणीभ्यां मन्थन्ति, द्वौ वा अश्विनौ, तदस्याश्विनं रूपं, तदस्य तेनानुशंसति"-इति । अश्विनोर्द्वित्वादस्तदयेनारणिद्वयेन च मन्थनम् 'अस्य' अग्नेः आश्विनं रूपम् ॥

पञ्चमतृचे सारूप्यं दर्शयति— "अथ यदुच्चैर्घोष क्षानयन् ध्वनयन् कुर्वन्निव दहति, यस्माद् भूतानि बिभ्यति, तदस्यैन्द्रं रूपं, तदस्य तेनानुशंसति"-इति । 'क्षानयन्' ध्वनिं कुर्वन् । स एव ध्वनिः विभिर्वकारैरनुक्रियते । यत् दृष्टद्वात् ध्वनिसहितादग्नेः रूपात् 'भूतानि' प्राणिनो 'बिभ्यति' बिभ्यति, 'तत्' भयकारणं ध्वनिसहित मिन्द्रस्य सङ्ग्रामार्थं मास्फोटनं कुर्वतः शत्रुभयकारिणो रूपम् ॥

षष्ठतृचे सारूप्यं दर्शयति— "अथ यदेन मेकं सन्तं बहुधा विहरन्ति, तदस्य वैश्वदेवं रूपं, तदस्य तेनानुशंसति"-इति । अग्नेराहवनीयादिस्थानेषु आग्नीध्रादिधिष्ण्येषु च बहुधा विहरणं यदस्ति, तद्विश्वेषां देवानां रूपम् ; तेषा मपि बहुत्वात् ॥

सप्तमतृचे सारूप्यं दर्शयति— "अथ यत् स्फूर्जयन् वाच मिव वदन् दहति, तदस्य सारस्वतं रूपं, तदस्य तेनानुशंसति"-इति । यथा जनो वाचं वदति, तथैवाग्निः 'स्फूर्जयति' ईषद्विच्छिद्य विलक्षणोच्चारण मिव शब्दं करोति । तदेतद्वागुच्चारणसदृशं ध्वनिकरणं सरस्वतीसम्बन्धरूपम् ॥

इत्थं मन्त्रवर्णादिदेवतानां च साकल्यद्वारानुशंसन मुपपाद्योप-संहरति— "एव मु ह्यस्य वायव्यस्यैव प्रतिपद्यमानस्य तृचेन तृचे-नैवैताभिर्देवताभि स्तोत्रियो ऽनुशस्तो भवति"–इति। 'एव मु ह्य' अनेनैवोक्तप्रकारेण "वायवा याहि"–इत्येतया वायुदेवताकयैवर्चा शस्त्रं प्रारभमाणस्य होतुः तेनतेनोक्ततृचेनैव प्रतिपादिताभिर्वायुा-दिभिः देवताभिरग्निसदृशीभिः 'स्तोत्रियः' स्तोत्रसम्बन्धितृचो "अग्न आ याहि"–इत्यादिकः (ऐ० आ० १.१.४-७.) आग्नेयो-ऽपि 'अनुशस्तो भवति' तस्यानुकूल्यं यथा भवति तथा प्रउग-शस्त्र मनुष्ठितं भवति इत्यर्थः ॥

अथ शस्त्रयाज्यां विधत्ते— "विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना पिबा मित्रस्य धामभिरिति (सं० १.१४.१०.) वैश्वदेव मुक्थं शस्त्वा वैश्वदेव्या यजति, यथाभागं तद्देवताः प्रीणाति"–इति। हे अग्ने ! 'विश्वेभिः' सर्वैः देवैः सह, विशेषतः इन्द्रेण वायुना च सह, तथा मित्रस्य 'धामभिः' स्थानैर्युक्तः सन् 'सोम्यं मधु' सोमसम्बन्धिनं मधुरं रसं पिब। विश्वेभिरित्यादिका सेय मृक् वैश्वदेवी, तथा 'यजति' तां याज्यां पठेत् *। कदा पठे-दिति तदुच्यते—'वैश्वदेवं' बहुदेवताकम् 'उक्थं' शस्त्रं प्रउग-नामकं शस्त्वा पश्चात्पठेत्। तथा सति स्वस्वभाग मतिक्रम्य सर्वा देवतास्तर्पयति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
चतुर्थः खण्डः ॥ ४ ॥

---

* आश्व० श्रौ०५.२०.१०। 'याज्यान्तानि शस्त्राणि'–इति च तत्रैव तदुत्तरम् (५.२०.११.)।

॥ अथ पञ्चमः खण्डः ॥

देवपात्रं वा एतद्यद् वषट्कारो वषट् करोति देवपात्रेणैव तद् देवतास्तर्पयत्यनुवषट् करोति तद्यथादो ऽश्वान् वा गा वा पुनरभ्याकारं तर्पयन्त्येव मेवैतद्देवताः पुनरभ्याकारं तर्पयन्ति यदनुवषट् करोतीमानेवाग्नीनुपासत इत्याहुर्धिष्ण्यानथ कस्मात्पूर्वस्मिन्नेव जुह्वति पूर्वस्मिन् वषट् कुर्वन्तीति यदेव सोमस्याग्ने वीहीत्यनुवषट् करोति तेन धिष्ण्यान् प्रीणात्यसंस्थितान्त्सोमान् भक्षयन्तीत्याहुर्येषां नानुवषट् करोति को नु सोमस्य स्विष्टकृद्भाग इति यद्वाव सोमस्याग्ने वीहीत्यनुवषट् करोति तेनैव संस्थितान्त्सोमान् भक्षयन्ति स उ एव सोमस्य स्विष्टकृद्भागो वषट् करोति ॥ ५ ॥

अथ शस्त्रयाज्यान्ते पठनीयं वषट्कारं विधत्ते— "देवपात्रं वा एतद्यद्वषट् करोति, देवपात्रेणैव तद् देवतास्तर्पयति"-इति। "वौषट्"-इति मन्त्रो वषट्कारः। स च 'देवपात्रं' देवानां पानसाधनम्; तस्माद् 'वषट् (करोति)' कुर्यात्, वौषड्इत्येवं पठेत्*। तथा सति देवाना मुचितेनैव पानसाधनेन सर्वा देवतास्तर्पयतीति ॥

ततः उह्यं पठनीय मनुवषट्कारं विधत्ते— "अनुवषट् करोति, तद्यथादो ऽश्वान्वा गा वा पुनरभ्याकारं तर्पयत्येव मेवैतद्

* परस्मिन् खण्डे द्रष्टव्यम् (२४ पृ० ६ पं०)।

देवताः पुनरभ्याकारं तर्पयन्ति यदनुवषट् करोति"-इति। "सोमस्याग्ने वीहि"-इत्ययं मन्त्रोऽनुवषट्कारः*, तं पठेत्। 'तत्' तत्र लोके 'अदः' किञ्चिदिदं निदर्शनमस्ति; कथमिति, तदुच्यते— यथा मनुष्याः स्वकीयानश्वान्वा स्वकीयान् गाः वा 'पुनरभ्याकारं' पौनःपुन्येन तृणोदकादिभिरभिमुखीकृत्य 'तर्पयन्ति' कण्डूयनेन प्रियशब्देन वा लालयित्वा यथेष्टघासं प्रयच्छन्ति, एवमेवैतेन अनुवषट्कारेण पुनःपुनर्देवता अभिमुखीकृत्य यजमानो हविषा तर्पयति॥

अनुवषट्कारप्रशंसार्थं चोद्यं मुद्रावयति— "इमानेवाग्नीनुपासत इत्याहुर्धिष्ण्यानथ कस्मात् पूर्वस्मिन्नेव जुह्वति पूर्वस्मिन् वषट् कुर्वन्तीति?"-इति। सोममध्यवर्त्तिषु धिष्ण्येषु आग्नीध्राद्यग्नयो ये विहिताः, तानग्नीन् ऋत्विजः समीपे स्थित्वा 'उपासत एव' सेवन्त एव केवलम्;— न तु तेषु जुह्वति, नापि वषट् कुर्वन्ति। 'पूर्वस्मिन्नेव' उत्तरवेदिस्थितेऽग्नौ ऋत्विजो जुह्वति, तत्रैव वषट् कुर्वन्ति च। अस्त्येवं सति धिष्ण्यगतानां अग्नीनां प्रीतिर्नास्ति। कस्मादेवं वैषम्यं क्रियते? इति चोद्यवादिन आहुः। तन्नोत्तरं दर्शयति— "यदेव सोमस्याग्ने वीहीत्यनुवषट् करोति, तेन धिष्ण्यान् प्रीणाति"-इति। हे अग्ने! इति जात्याकारेणाग्निं मन्त्रोद्य 'सोमस्य' सोमरसं 'वीहि' पिब, 'इति' अनेन मन्त्रेण होता अनुवषट् करोति, इति यदस्ति, तेन 'धिष्ण्यान्' अग्नीन् होता तर्पयति। तस्मात् न वैषम्यम्॥

प्रकारान्तरेण प्रशंसितुं पुनश्चोद्यद्वय मुद्रावयति— "अमंस्यितान्सोमान् भक्षयन्तीत्याहुर्येषां नानुवषट् करोति, को नु

* "सोमस्याग्ने वीहीत्यनुवषट्कारः"-इति आप०श्रौ०५.१२६। १भा० १६२५० ६०।

सोमस्य खिष्टकृद्भाग इति"—इति । 'येषां' हविर्देवत्यग्रहाणां मध्ये होता नानुवषट् करोति, ते हविर्देवत्याः सोमाः 'असंस्थिताः' असमाप्ताः ; देवतार्थसोमस्यासमाप्तौ कथं मृत्विजः 'तान्' हविर्देवत्यान् भक्षयन्ति ? इत्येके चोद्यं माहुः । दर्शपूर्णमासादिषु खिष्टकृद्भागेन ततः पूर्वेषां हविषां संस्कारो भवति, ततः सोमस्यापि संस्काराय को नाम खिष्टकृद्भागः ? इति द्वितीयं चोद्यम् । तत्रोत्तरं माह — "यद्वाव सोमस्याग्ने वीहीत्यनुवषट् करोति, तेनैव संस्थितान्सोमान् भक्षयन्ति, स उ एव सोमस्य खिष्टकृद्भागो वषट् करोति"—इति । मन्ये सोमस्येति जातिमात्रं सुहिश्य अनुवषट् करोति इति यदेवास्ति, तेनैवानुवषट्काररहिता हविर्देवत्यादयः सर्वे सोमाः 'संस्थिताः' समाप्ताः ; तस्मात् संस्थितानेव हविर्देवत्यान् ऋत्विजो भक्षयन्ति । 'स उ' स एव, यथोक्तोऽनुवषट्कार एव सोमस्य खिष्टकृद्भागः ; अतो ऽनुवषट् करोति । उक्तस्य सर्वस्य प्रयोजनस्य सिद्ध्यर्थं अनुवषट् कुर्यादित्यर्थः ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
पञ्चमः खण्डः ॥ ५ ॥

॥ अथ षष्ठः खण्डः ॥

वज्रो वा एष यद्वषट्कारो यं द्विष्यात्तं ध्यायेद् वषट्करिष्यंस्त्वन्निनेव सं वज्रं माक्षापयति षळिति

वषट् करोति षड् वा ऋतव ऋतूनेव तत्कल्पयत्यृतून् प्रतिष्ठापयत्यृतून्वै प्रतितिष्ठत इदं सर्वं मनु प्रतितिष्ठति यदिदं किञ्च प्रतितिष्ठति य एवं वेद तदु ह स्माह हिरण्यदन् वैद एतानि वा एतेन षट् प्रतिष्ठापयति द्यौरन्तरिक्षे प्रतिष्ठितान्तरिक्षं पृथिव्यां पृथिव्यप्स्वापः सत्ये सत्यं ब्रह्मणि ब्रह्म तपसीत्येता एव तत्प्रतिष्ठाः प्रतितिष्ठन्तीरिदं सर्वं मनु प्रतितिष्ठति यदिदं किञ्च प्रतितिष्ठति य एवं वेद वौषळिति वषट् करोत्यसौ वाव वाहुतवः षळेत मेव तद्हुतष्वादधात्यृतुषु प्रतिष्ठापयति याहगिव वै देवेभ्यः करोति ताहगिवास्मै देवाः कुर्वन्ति ॥ ६ ॥

अथ वषट्कार मान्त्रिकत्वेन अभिचारप्रयोग उच्यते— "वज्रो वा एष यद्वषट्कारो यं द्विष्यात् तं ध्यायेद् वषट्करिष्यन्तमिति वज्रं भ्रातृव्याय प्रहरति"-इति। वषट्कारस्य वज्ररूपत्वात् तत्काल ध्यानेन द्वेष्ये वज्रप्रहारो भवति ॥

अथ "वौषट्"-इत्यस्य वषट्कारस्य उत्तरभागं प्रशंसति— षळिति वषट् करोति, षड् वा ऋतव ऋतूनेव तत् कल्पयत्यृतून् प्रतिष्ठापयत्यृतून् वै प्रतितिष्ठत इदं सर्वं मनु प्रतितिष्ठति यदिदं किञ्च" इति। षड्वित्यनेन मन्त्रभागेन वसन्तादि षड्ऋतुभक्षाया बुद्धिस्थत्वात् 'ऋतून् कल्पयति' इत्यस्य प्रयोजनमर्थान् करोति। तावता ऋतवो व्याकुलता मन्त्रेण प्रतितिष्ठन्ति। तत्प्रतिष्ठाम् 'अनु'

स्थावरजङ्गमरूपं जगत् सर्वं स्वस्वभागे प्रतिष्ठितं भवति ॥ वेदं प्रशंसति— "प्रतितिष्ठति य एवं वेद"–इति ॥

प्रामाणिकपुरुषवचनोदाहरणेन दृढयति— "तदु ह स्माह हिरण्यदन् वैदः एतानि वा एतेन षट् प्रतिष्ठापयति,—द्यौरन्तरिक्षे प्रतिष्ठिता, अन्तरिक्षं पृथिव्यां, पृथिव्यप्स्वापः सत्ये, सत्यं ब्रह्मणि, ब्रह्म तपसीत्येता एव तत् प्रतिष्ठाः प्रतितिष्ठन्तीरिदं सर्वं मनु प्रतितिष्ठति यदिदं किञ्च ; प्रतितिष्ठति य एवं वेद"–इति । हिरण्मया दन्ता यस्यासौ 'हिरण्यदन्', विदस्य पुत्रो 'वैदः' ; तादृशो मुनिः 'तदु ह' तदेव वचन माह स्म । किं वचनम् ? इति, तदुच्यते—'एतानि' द्युलोकादीनि ब्रह्मान्तानि षट् स्थानानि * यानि सन्ति, तान्येव 'एतेन' षषट्कारेण होता प्रतिष्ठापयति । तत्र द्युलोकस्याधस्तादन्तरिक्षं, तस्मात् अन्तरिक्षे द्युलोक आश्रितः । तच्चान्तरिक्षं पृथिव्या माश्रितम् । पृथिवी चाधोवर्त्तिनीष्वप्सु आश्रिता । 'आपः सत्ये' ; जनेषु सत्यवादिषु सत्सु यथाकालं वृष्टिसम्भवात् । सत्यं 'ब्रह्मणि' वेदे प्रतिष्ठितम् ; ईदृश माचरणं सत्य मिति वेदेनैवावगमात् । वेदः 'तपसि' षषट्कारमन्त्रानुष्ठानरूपे प्रतिष्ठितः ; वेदस्यानुष्ठानप्रतिपादनार्थत्वात् । 'इति' अनेन प्रकारेण 'एताः' द्युलोकादय एव 'तत्' तेन षषट्कारेण यदा परस्परं प्रतिष्ठिता भवन्ति, तदानीं प्रतिष्ठारूपास्ताः पृथिव्याद्याः एकैकत्र प्रतिष्ठिताः सतीः 'मनु' पश्चाद् 'यदिदं किञ्च' जगदस्ति, तत् सर्वं प्रतितिष्ठति । य एवं वेदिता, स च प्रतितिष्ठति ॥

अथ षषट्कारमन्त्रस्य पूर्वोत्तरभागावुभौ प्रशंसति— "वौष-

* 'षड् वस्तूनि' घ ।

ळिति* वषट्करोत्यसौ वाव वाऽऋतवः षळेत मेव तदृतुष्वादधात्यृतुषु प्रतिष्ठापयति ; यादृगिव वै देवेभ्यः करोति, तादृगिवास्मै देवाः कुर्वन्ति" इति। मन्त्रे पूर्वभागो 'वौ'-शब्दो निपातत्वाद् "वौ गतिप्रजन०"-इत्यादिधातुजत्वाद्वा † गमनस्वभाव मादित्य मभिधत्ते। तदेतदभिप्रेत्य 'असौ वाव वौ'-इत्युक्तम्। वसन्ताद्याः 'ऋतवः' सङ्ख्यावशात् 'षट्'-इत्यभिधीयते। तस्मन्त्रपाठेन 'एत मेव' 'वौ' शब्दाभिधेय मादित्यं षट्-शब्दाभिधेयेषु ऋतुष्वादधाति। न केवल माधानमात्रं किन्तु तेषु ऋतुषु 'प्रतिष्ठापयति' स्थैर्येणावस्थापयति। एवं सत्यसौ होता देवेभ्यो यादृश मेव प्रयोजनं करोति, तादृश मेव प्रतिष्ठारूपं प्रयोजनम् 'अस्मै' होत्रे, तद्द्वारेण यजमानाय देवाः कुर्वन्ति ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
षष्ठः खण्डः ॥ ६ ॥

॥ अथ सप्तमः खण्डः ॥

त्रयो वै वषट्काराः वज्रो धामच्छ्रिक्तः स य मेवोच्चैर्बलि वषट् करोति स वज्रस्तं प्रहरति

* "वौरुपलिति वषट्कारः"-इति आश्व० श्रौ० १.५.१५। "धृङ्क्षिण्यश्रीयत्वोषडाश्वसा मादेः"-इति (पा० ८.२.८१.) सूत्रितः।

† 'वौ गतिव्याप्तिप्रजनकान्त्यसनखादनेषु'-इति धा० पा० अदा० प० २८।

स्तत् प्रैषाणां प्रैषत्वम्''-इति । ज्योतिष्टोमाख्यो 'यज्ञः' यदा केनचिन्निमित्तेन देवेभ्य उदक्रामत्, तदा 'तम्' उत्क्रान्तं यज्ञं 'प्रैषैः' ''होता यक्षदग्निं समिधा''-इत्येवमादिभिः (तै० ब्रा० ३. ६.२.१-१२.) प्रैषमन्त्रैस्तस्य यज्ञस्य 'प्रैषम्' आह्वानम् 'ऐच्छन्' ; यस्मादेवं तस्मात् 'प्रैषम्' आह्वानं कुर्वन्तोभिरिति व्युत्पत्त्या मन्त्राणां प्रैषनाम सम्पन्नम् * ॥

अथ पुरोरुचः प्रशंसति— ''तं पुरोरुग्भिः प्रारोचयन् ; यत् पुरोरुग्भिः प्रारोचयंस्तत् पुरोरुचां पुरोरुक्त्वम्''-इति । ''वायुरयोगाः''-इत्यादाः सप्त पुरोरुचः (वा०स०१७.३१-३७.) ; प्रउगलक्षणानां सप्तानां प्ररोचनहेतुत्वात् । तथाविधाभिः पुरोरुग्भिः तं पूर्व माहृतं यज्ञं देवाः 'प्रारोचयन्' तस्य यज्ञस्य रुचि मुत्पादितवन्तः । अतः पुरोरोचनहेतुत्वात् पुरोरुगिति नाम सम्पन्नम् † ॥

वेदेः प्रशंसा माह— ''तं वेद्या मन्वविन्दन् ; यद्वेद्या मन्वविन्दंस्तद्वेदेर्वेदित्वम्'' इति । 'तं' प्ररोचितं यज्ञं लाभिक्यां 'वेद्याम्' 'अन्वविन्दन्' अनुकूलत्वेनोपलब्धवन्तः । इत्थं लाभस्य स्थानत्वाद् वेदिरिति नाम सम्पन्नम् ‡ ॥

---

* 'यज्ञादश प्रयाजाः । तेषां प्रैषा । ०——९ । यज्ञमुत्प्रेषितो मैत्रावरुणः प्रैषति ; प्रैषैरेतारम् । होता यक्षदग्निभिः प्रैषनामभिः' -इति आश्व० श्रौ० ३.२.१-५ ।

† ''वायुरयोगा यज्ञपतिरिति सप्तानां पुरोरुचां तत्स्थानत्वा उपरिष्टात् तृचं यज्ञ शंसति । वायुरग्नि : इत्यृतेनेति सप्तरुचाः' इति आश्व०श्रौ०५.२०-४,५ । तृचाश्च प्र० ४-६पृ०८० ।

‡ 'विदेर्लाभे-इत्यस्य सूत्रस्य, (१५२) 'ऋषिविकृष्टिवेतिविदिच्छादिकोर्णिभ्यश्च'-इति (उणा० ४.११८) इप्रत्यये सति भाव । ''अपरेणाहवनीयं वेदिं खनति'-इत्यारभ्य ''वेदि कृत्वा यथोक्तम्'-इति यावत् कात्या० श्रौ० २.६.१-३५ टी० ।

ग्रहप्रशंसा माह— "तं वित्तं ग्रहैर्व्यगृह्णत ; यद्वित्तं ग्रहैर्व्यगृह्णत, तद्ग्रहाणां ग्रहत्वम्"—इति। 'वित्तं' लब्धं 'तं' यज्ञं 'ग्रहैः' उपांशुवन्तर्यामादिभि 'व्यगृह्णत' विशेषेण स्वीकृतवन्तः। तस्मात् ग्रहणस्य स्वीकारस्य हेतुत्वात् ग्रहनाम सम्यक्त्वम् * ॥

निविदां प्रशंसा माह— "तं वित्त्वा निविद्भिर्व्यवेदयन् ; यद्वित्त्वा निविद्भिर्व्यवेदयंस्तन्निविदां निवित्त्वम्" इति। 'तं' यज्ञं 'वित्त्वा' लब्ध्वा ते देवाः परेभ्यो देवेभ्यो 'निविद्भिः' पूर्वोक्तद्वादश पदादिरूपाभिः † 'व्यवेदयन्' कथितवन्तः। तस्मात् निवेदनस्य परबोधनार्थकथनस्य हेतुत्वात् निवित्त्वम् सम्यक्त्वम् ‡ ॥

अथ प्रैषकर्तुः प्रशस्तत्वगुणविधानार्थं प्रश्नोति— "महद्वाव नष्टैष्यभ्यं वेच्छति, यतरो वाव तयोर्ज्यायं इवाभीच्छति, स एव तयोः साधीय इच्छति"—इति। नष्टं वस्तु प्रयत्नेन तत्र तत्रान्विच्छतीति 'नष्टैषी', तादृशः। पुरुषो द्विविधः ;—तत्र कश्चिद् 'महद्वाव' नष्टाद्वस्तुनोऽधिकं मेव अभीच्छति, नष्टादल्पं वा अन्यः कश्चिदिच्छति ; तयोर्मध्ये 'यतरो वाव' य एव पुरुषो 'ज्यायं इव' महदेवेच्छति, " स पुरुषः 'तयोः' मध्ये 'साधीयः' अत्यल्पं साधु वस्तु इच्छति ; अन्यं कामयमानस्तु न तथेत्यर्थः ; अस्त्येवं लौकिकं न्यायः, किं प्रकृते ? इत्याशङ्क्याह— "य उ एव प्रैषान् वर्षीयसो वर्षीयमो वेद, स उ एव तान् साधीयो वेद ; नष्टैष्यं ह्येत यत् प्रैषाः" इति। 'य उ एव' वस्तु प्रैषमन्त्रात् 'वर्षीयसः—वर्षीयसः अतिप्रवृद्धान् वेद ; सर्वेषु प्रैषमन्त्रेषु प्रवृद्धत्वार्थं वीप्सा प्रयुक्ता।

* पं० २ पृ० ६ । † १भा० ४३५ पृ० २ ।

‡ १भा० ४३५पृ० १। 'यच्छी निविदः प्रशस्ता'—इति वर्धमानैकादशाक्षरार्थं वक्ष्यति। 'पदैरावृत्ति निविदः'—इति हि वा० सं० १९. २५।

वीक्षा । 'तं' वषट्कारं प्रजाश्च पशवश्च सेवन्ते ; तस्मात्तादृक्कामेन धामच्छद्वषट्कारः प्रयोक्तव्यः ॥

रिक्तस्य स्वरूपं दर्शयति— "अथ येनैव षळवराप्नोति, स रिक्तः"—इति । षट्शब्दो वषट्कार मभिधत्ते ; भीमसेनो भीम इतिवदेकदेशेन व्यवहारात् । 'येनैव' उच्चारणेन 'षळवराप्नोति' वषट्कारावरोधं समृद्धभावं प्राप्नोति ; नीचोच्चारणेन हि वषट्कारस्य समृद्धभावः । 'सः' तथोच्चारितो वषट्कारो 'रिक्तः' —इत्युच्यते ; उच्चध्वनियोग्यस्य तदभावे शून्यप्रायत्वात् ॥ त मेतं रिक्तं निन्दति— "रिणत्त्यात्मानं रिणक्ति यजमानं पापीयान् वषट्कर्त्ता भवति, पापीयान् यस्मै वषट् करोति ; तस्मात् तस्मान्नेयात्"—इति । रिक्ताख्यो वषट्कारः प्रयुज्यमानः सन् होतुरात्मानं 'रिणक्ति' रिक्तीकरोति, समृद्धिहीनं दरिद्रं करोतीत्यर्थः । तथा यजमान मपि 'रिणक्ति' अतस्तेन वषट्कर्त्ता होता 'पापीयान् भवति' अत्यन्तनरकसाधनपापेन युक्तो भवति । 'यस्मै' यजमानाय वषट्करोति, सोऽपि पापीयान् भवति । तस्मात् कारणात् 'तस्य' रिक्तस्य वषट्कारस्य आशां 'नेयात्' न प्रापुयात्, इच्छा मपि न कुर्यात्, किमु तत्प्रयोग मित्यर्थः ॥

प्रश्नोत्तराभ्यां वषट्कारस्येष्टानिष्टफलप्राप्तिसामर्थ्यं दर्शयति— "किं म यजमानस्य पापभद्र मादिश्येतेति ह स्माह योऽस्य होता स्यादिमत्रैवैनं यथा कामयेत तथा कुर्यात्" इति । तदेतद् वाक्यं "प्राणानां वा एतदुक्थम्"—इत्यस्मिन् खण्डे (१२पृ०) प्रउग-विषयं यथा व्याख्यातम्, तथैवात्र वषट्कारविषयं व्याख्यातव्य मिति ॥

अनिष्टफलसाधनत्वं दर्शयति— "यं कामयेत यथैवानोजानो

ऽभूत्, तथैवेजानः स्यादिति,—तथैवास्य ऋचं ब्रूयात् तथैवास्य वषट् कुर्यात्, सदृश मेवैनं तत् करोति"-इति। 'अनीजानः' अकृतयज्ञः पुरुषः यथैव फलरहितो ऽभूत्, तथैवायम् 'ईजानः' कृतयज्ञोऽपि फलरहितः स्यादिति 'यं' यजमानं होता कामयेत, 'अस्य' यजमानस्य येन स्वरेण याज्यां ब्रूयात्, तेनैव स्वरेण वषट्कारमपि ब्रूयात्; तथा सति 'एनं' कृतयज्ञं यज्ञरहितेन 'सदृशं' फलरहितं करोति॥ अनिष्टफलान्तरसाधनत्वं दर्शयति—"यं कामयेत पापीयान्त्स्यादित्युच्चैस्तरा मस्य ऋच मुक्त्वा शनैस्तरां वषट् कुर्यात्पापीयांस मेवैनं तत्करोति"-इति। 'पापीयान्' दरिद्रो नरकयोग्यो वा यजमानः स्यादिति कामयमानो होता ऋच मतिशयेनोच्चैरुच्चार्य वषट्कार मतिशयेन नीचैः ब्रूयात्; तथा सति एनं यजमानं पापीयांस मेव करोति॥

अथेष्टफलसाधनत्वं दर्शयति—"यं कामयेत श्रेयान्त्स्यादिति, शनैस्तरा मस्य ऋच मुक्त्वोच्चैस्तरां वषट् कुर्याच्छ्रिय एवैनं तच्छ्रिया मादधाति"-इति। 'श्रेयान्' दारिद्र्यरहितः पापरहितश्च यजमानः स्यादिति कामयमानो होता 'ऋच' याज्यां शनैरुच्चार्य वषट्कार मतिशयेनोच्चैरुच्चारयेत्*; तच्च 'श्रिये' सम्पदर्थ मेव भवति। 'तत्' तेन प्रयोगेण 'एनं' यजमानं 'श्रियाम्' ऐहिकामुष्मिकसम्पदि स्थापयति॥

याज्यावषट्कारयोर्नैरन्तर्यं विधत्ते—"सन्तत मृचा वषट् कृत्यं सन्तत्यै"-इति। 'ऋचा' याज्यया सह 'सन्तत' निरन्तरं यथा भवति तथा 'वषट् कृत्य' वषट्कार उच्चारणीयः। तच्च यजमानस्य श्रेयः सन्तत्यै सम्पद्यते॥

* "उभैस्तरा वा वषट्कारः"-इति पा० १. ९. ३५।

वेदनं प्रशंसति— "सन्धीयते प्रजया पशुभिर्य एवं वेद"-इति । 'सन्धीयते' संयुज्यते ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
सप्तमः खण्डः ॥ ७ ॥

॥ अथ अष्टमः खण्डः ॥

यस्मै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्त्सात्तादेव तद्देवतां प्रीणाति प्रत्यक्षाद् देवतां यजति वज्रो वै वषट्कारः स एष प्रहृतो ऽशान्तो दीदाय तस्य हैतस्य न सर्व इव शान्तिं वेद न प्रतिष्ठां तस्माद्वाप्येतर्हि भूयानिव मृत्युस्तस्य हैषैव शान्तिरेषा प्रतिष्ठा वागित्येव तस्माद्वषट्कृत्य वषट्कृत्य वागित्यनुमन्त्रयेत स एनं शान्तो न हिनस्ति वषट्कार मा मां प्रमृक्षो माहं त्वां प्रमृक्षं बृहता मन उपह्वये व्यानेन शरीरं प्रतिष्ठासि प्रतिष्ठां गच्छ प्रतिष्ठां मा गमयेति वषट्कार मनुमन्त्रयेत तदु ह स्माह दीर्घ मेतत् सदप्रभ्योजः सह ओज इत्येव वषट्कार मनुमन्त्रयेतौजश्च ह वै सहश्च वषट्कारस्य प्रिय-

तमे तन्वौ प्रियेणैवैनं तद्धाम्ना समर्धयति प्रियेण धाम्ना समृध्यते य एवं वेद वाक् च वै प्राणापानौ च वषट्कारस्य एते वषट्कृते वषट्कृते व्युत्क्रामन्ति तानन्वमन्त्रयेत वागोजः सह ओजो मयि प्राणापानावित्यात्मन्येव तद्धोता वाचं च प्राणापानौ च प्रतिष्ठापयति सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद ॥ ८ ॥

अथ होतुर्वषट्कारकाले देवताध्यानं विधत्ते— "यस्यै देवतायै हविर्गृहीतं स्यात्, तां ध्यायेद्वषट् करिष्यन् * ; साक्षादेव तद्देवतां प्रीणाति, प्रत्यक्षाद् देवतां यजति"-इति। अध्वर्युः यां देवता मुद्दिश्य हविर्गृह्णाति, 'तां' देवता मयं होता 'वषट्-करिष्यन्' वषट्कारायोद्युक्तः मन् 'ध्यायेत्' मनसा देवतायाः शास्त्रीयां देवतामूर्त्तिं मादौ कृत्वा सम्यगनुसन्धाय पश्चाद्वषट् कुर्यादित्यर्थः। एवं सति 'साक्षादेव' प्रत्यक्षेणैव देवतां तर्पयति। न केवलं तस्यैव मेव देवतायाः साक्षात्कारः, किन्तु 'प्रत्यक्षात्' 'प्रत्यक्षेणैव 'तद्देवतां यजति' यागकाले प्रत्यक्षेण पश्यतीत्यर्थः ॥

ननु देवता चक्षुषा न दृश्यते, कथ मस्याः प्रत्यक्षत्व मिति चेत्, नायं दोषः ; मानसप्रत्यक्षस्य विवक्षितत्वात्। यथा पुरोवर्त्तिनी देवता चक्षुषा दृश्यते, तथैव चिन्त्यमानापि मनसा दृश्यत एव † ॥

---

* यद मेव स्तुतिवचनं यथाश्रुतमुक्तं निरुक्ते ; ८. १. ७. द्रष्टव्यम्।

† दुर्गाचार्यकृता निरुक्तावतिरिक्तार्थवचनीया। ए० सी० सु० १ भा० ४८६ पृ०।

होतुर्वषट्कारादूर्ध्वं मनुमन्त्रणं विधत्ते — "ब्रह्मो वै वषट्-कारः, स एष प्रहृतो ऽशान्तो दीदाय, तस्य हैतस्य न सर्व इव शान्तिं वेद, न प्रतिष्ठां ; तस्माद्याप्येतर्हि भूयानिव मृत्युस्तस्य हैवैव शान्तिरेषा प्रतिष्ठा वागित्येव ; तस्माद्वषट्कृत्य-वषट्कृत्य वागित्यनुमन्त्रयेत ; स एनं शान्तो न हिनस्ति"-इति । वषट्कारस्य वज्रत्व मसकृदुक्तम् 'स एषः' वषट्काराख्यो वज्रः परस्योपरि प्रहृतः सन् 'अशान्तः' उग्रः 'दीदाय' दीप्यते । 'तस्य' वज्रस्य 'शान्तिम्' उपशमप्रकारं 'सर्व इव' सर्वोऽपि पुरुषो न वेद । उप-द्रवशान्तिरूपं वषट्कारस्योपत्वपरिहारेण क्वचिदवस्थानं 'प्रतिष्ठा', तां मपि सर्वो न वेद । 'तस्मात्' शान्तिप्रतिष्ठाविषयज्ञाना-भावात् 'एतर्हि अपि' इदानी मपि लोके मृत्युः 'भूयानिव' बहु-भूत एव प्रवर्त्तते । 'तस्य' तादृशवषट्कारवज्रस्यैवैवं वक्ष्यमाणा 'शान्तिः' शमनोपायः ; तथैषा वक्ष्यमाणैव 'प्रतिष्ठा' परोपद्रव-रहितावस्थितिः । वागित्येवेत्यनेन साभिधीयते । उपरिष्टाद्वक्ष्य-माणस्य मन्त्रस्य * स्मरण मिदम् । वागोज इत्यादिको यो मन्त्रः, स एव शमनोपाय ; न त्वन्यः कश्चिदस्ति । तस्माद् 'वषट्कृत्य-वषट्कृत्य' यदा यदा वषट् करोति, तदा तदा वागिति मन्त्रेणानु-मन्त्रयेत । 'सः' वज्रस्तावता शान्त एव, न हिनस्ति । अय मेकः पक्षः ॥

पक्षान्तर मभिप्रेत्यान्येन मन्त्रेणानुमन्त्रणं विधत्ते— "वषट्-कार मा मां प्रमृक्षो, मार्हं त्वां प्रमृक्षं, तृहता मन उपह्वये, व्यानेन शरीरं, प्रतिष्ठासि प्रतिष्ठां गच्छ, प्रतिष्ठां मा गमयेति वषट्कार मनुमन्त्रयेत" -इति । हे 'वषट्कार' वज्ररूप ! 'मां'

* अस्मिन्नेव खण्डे उपरिष्टाद (३५ पृ० ८ पं०) व्याख्यास्यमानस्येति भावः ।

यजमानं 'मा प्रमृक्षः' प्रमृष्टं विनष्टं मा कार्षीः ; अहं मपि त्वा 'मा प्रमृक्षं' विनष्टं माकार्षम्। 'बृहता' प्रौढेन यज्ञेन 'मनः' त्वदीयं 'उपह्वये' अनुजानामि। तथा 'व्यानेन' व्यानादिवायुना सह त्वदीयं शरीरं मनुजानामि। यतस्त्वं सर्वस्य प्राणिसङ्घस्य 'प्रतिष्ठा' आश्रयोऽसि, तदर्थं त्वं मपि 'प्रतिष्ठां' स्थैर्येणावस्थितिं गच्छ। ततो मा मपि 'प्रतिष्ठां' स्थैर्येणावस्थितिं प्रापय। 'इति' अनेन मन्त्रेणानुमन्त्रयेत ॥

न मिमं द्वितीयं पक्षं निन्दित्वा मन्त्रान्तरं दर्शयति— "तदु ह स्माह दीर्घ मेतत्सदप्रभोजः सह ओजः" इति। 'तदु ह' तदेव अनुमन्त्रणे ब्रह्मवादी कश्चिदाह स्म। किं माह ? इति, तदुच्यते— 'एतत्' पूर्वोक्तं, मन्त्रवाक्यं 'दीर्घं सत्' अपि वैद्यं शमाधिक्यम् 'अप्रभु' न क्षमम्। कोऽसौ क्षमः ? इति, स उच्यते— 'ओजः सहः ओजः' इति पदत्रयात्मको मन्त्रः *। मन्त्रार्थं तु श्रुतिरेव व्याख्यास्यति ॥

तेन मन्त्रेणानुमन्त्रणं विधत्ते— "इत्येव वषट्कार मनुमन्त्रयेत" इति। एवकारः पूर्वमन्त्रव्यावृत्त्यर्थः ॥ मन्त्रपदार्थौ दर्शयति—"ओजश्च ह वै सहश्च वषट्कारस्य प्रियतमे तनूः" इति। स्पष्टोऽर्थः ॥ अनेन मन्त्रेणोग्रत्वशान्तिं दर्शयति— "प्रियेणैवैनं तन्वा समर्धयति"—इति। प्रियतमयोः शरीरयोर्नामग्रहणे सति वषट्कारस्योग्रत्वरूपः कोपो गच्छति, ततः 'एनं' वषट्कारम् 'प्रियेण धाम्ना समर्धयति' सर्वभूतानां मनुपद्रवकारिणा प्रियेण

* एष एव प्रियशरीरद्वयार्था सुपपेता भवतीत्यर्थः ; तद्ब्राह्मणमुपदर्शयति (२५ ५० ४ पं०) तथा च श्रुतिः— "बाधीजः सह ओजो मयि प्राणापानाविति वषट्कारं शुक्रीजाऽनुमन्त्रयते"—इति आश्व० श्रौ० १. ५. १७।

स्वरूपेण समृद्धं करोति । अत्र मन्त्रगतो द्वितीय ओजः-शब्दः आदरार्थ इत्यभिप्रायः ॥

वेदनं प्रशंसति — "प्रियेण धाम्ना समृध्यते य एवं वेद"—इति ॥

अथ प्रियशरीरद्वयवाचकाभ्यां पदाभ्यां सहित मादौ विहितं मन्त्र मेव सिद्धान्तयति — "वाक् च वै प्राणापानौ च वषट्-कारस्य एते वषट्कृते वषट्कृते व्युत्क्रामन्ति; ताननुमन्त्रयेत— वागोजः सह ओजो मयि प्राणापानावित्यात्मन्येव तद्धोता वाचं च प्राणापानौ च प्रतिष्ठापयति, सर्वायुः ; सर्वायुत्वाय" इति । येयं वागस्ति, यौ च प्राणापानौ स्तः, तेऽत्र त्रयो * वषट्कारस्वरूपम् । यदा यदा होता वषट् करोति, तदा तदा वषट्कार-रूपा होतुर्वाक्प्राणापानाः शरीरादुत्क्रामन्ति । अतस्तन्मा भूदिति तांस्तीव्रागोजइत्यादिना प्राणापानावित्यन्तेन मन्त्रेणानुमन्त्रयेत । मन्त्रस्याय मर्थः— 'ओजः' 'सहः'-इत्याभ्यां प्रियशरीराभ्या मुपेत ! हे वषट्कार ! त्वत्प्रसादान्मयि 'ओजः' बल मस्तु, तथा वाक्प्राणापानाः मुखेन तिष्ठन्तु । अनेन मन्त्रेण होता स्वात्मन्येव वाचं च प्राणापानौ च प्रतिष्ठापयति । तावता स्वयं 'सर्वायुः' शतसंवत्सरपरिमितेनायुषा युक्तो भवति । एतच्च यजमानस्य सर्वायुत्वाय सम्पद्यते । पूर्वत्र (३३ पृ० ४ पं०) 'वषट्कृत्य वषट्कृत्य वागित्यनुमन्त्रयेत'-इति वषट्कारानुमन्त्रणयोरेक-कर्तृकत्व मुक्तम्, अत्र 'आत्मन्येव तद्धोता'-इतिब्राह्मणे होट्-कर्तृकत्वं प्रतीयते ; ततोऽनुमन्त्रणस्य यजमानकर्तृकत्व मन्त्रै-रुक्तं बाधित्वा होटकर्तृत्व मेव द्रष्टव्यम् † ॥

* "ते त्रयो" घ ।

† "इति होत."-इति आप० श्रौ० १ २१ १६ ।

वेदनं प्रशंसति— "सर्वं मायुरेति य एवं वेद"-इति ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
अष्टमः खण्डः ॥ ८ ॥

॥ अथ नवमः खण्डः ॥

यज्ञो वै देवेभ्य उदक्रामत्तं प्रैषैः प्रैष मैच्छन् यत्प्रैषैः प्रैष मैच्छंस्तत् प्रैषाणां प्रैषत्वं तं पुरोरुग्भिः प्रारोचयन्यत्पुरोरुग्भिः प्रारोचयंस्तत्पुरोरुचां पुरोरुक्त्वं तं वेद्यामन्वविन्दन् यद्वेद्या मन्वविन्दंस्तद्वेदेर्वेदित्वं तं वित्तं ग्रहैर्व्यगृह्णत यद्वित्तं ग्रहैर्व्यगृह्णत तद् ग्रहाणां ग्रहत्वं तं वित्त्वा निविद्भिर्न्यवेदयन् यद् वित्त्वा निविद्भिर्न्यवेदयंस्तन्निविदां निवित्त्वं महद्वाव नष्टेष्यथल्पं वेक्षति यतरो वाव तयोर्ज्यायं इवाभीक्षति स एव तयोः साधीय इक्षति य उ एव प्रैषान्वर्षीयसो वर्षीयसो वेद स उ एव तान्त्साधीयो वेद नष्टेष्यं ह्यतद्यत्प्रैषास्तस्मात्प्रह्वस्तिष्ठन् प्रेष्यति ॥ ९ ॥

अथ प्रैषादीनां प्रशंसां विवक्षुरादौ प्रैषान् प्रशंसति— "यज्ञो वै देवेभ्य उदक्रामत् ; तं प्रैषैः प्रैष मैच्छन् ; यत् प्रैषैः प्रैष मैच्छं-

द्विषते भ्रातृव्याय वधं यो ऽस्य सृत्यस्तस्मै स्तर्तवै तस्मात्स भ्रातृव्यवता वषट् कृत्यो ऽथ यः समः सन्ततो ऽनिर्हाणर्च्छः स धामच्छत् तं तं प्रजाश्च पशव-श्चानूपतिष्ठते तस्मात्स प्रजाकामेन पशुकामेन वषट्-कृत्यो ऽथ येनैव षऊवराश्नोति स रिक्तो रिणक्त्या-त्मानं रिणक्ति यजमानं पापीयान्वषट्कर्त्ता भवति पापीयान्यस्मै वषट् करोति तस्मात्तस्याशां नेयात्किं स यजमानस्य पापभद्र मादृियेतेति ह स्माह यो ऽस्य होता स्यादित्यचैवैनं यथा कामयेत तथा कुर्याद् यं कामयेत यथैवानीजानो ऽभूत्तथैवेजानः स्यादिति यथैवास्य ऋचं ब्रूयात्तथैवास्य वषट् कुर्यात्स-दृश मेवैनं तत्करोति यं कामयेत पापीयान्स्यादित्यु-चैस्तरा मस्य ऋच मुक्त्वा शनैस्तरां वषट् कुर्यात्पापी-यांस मेवैनं तत्करोति यं कामयेत श्रेयान्त्स्यादिति शनैस्तरा मस्य ऋच मुक्त्वोचैस्तरां वषट् कुर्याच्छ्रिय एवैनं तच्छ्रिया मादधाति सन्तत मृचा वषट्कृत्य सन्तत्यै सन्धीयते प्रजया पशुभिर्य एवं वेद ॥ ७ ॥

अथ फलविशेषार्थं वषट्कारस्यावान्तरभेदानाह— "त्रयो वै वषट्कारा वज्रो धामच्छद्रिक्तः" इति। 'वज्रः'-इति प्रथमस्य वषट्कारभेदस्य नामधेयम्, 'धामच्छत्'-इति द्वितीयस्य, 'रिक्तः'-इति तृतीयस्य ॥

तेषां मध्ये वज्रस्य स्वरूपं दर्शयति— "स य मेवोच्चैर्बलि वषट् करोति, स वज्रः इति। 'सः' होता य मेव मन्त्रं मुच्चैर्यथा भवति तथा, बलिं च यथा भवति तथा, वषट्करोति, 'सः' मन्त्ररूपो वषट्कारो 'वज्रः' इत्युच्यते। अत्रोच्चैः-शब्देन ध्वनेराधिक्यं मुच्यते, 'बलि'-शब्देनाक्षरसारूप्यम्; तदुभययुक्तो वज्रः॥ तस्य प्रयोगं विधत्ते— "तं-तं प्रहरति, द्विषते भ्रातृव्याय वधं योऽस्य स्तृत्य-स्तस्मै स्तर्तवै; तस्मात्त भ्रातृव्यवता वषट् कृत्यः"-इति। 'यः' द्वेषो यजमानस्य 'स्तृत्यः' हन्तव्यो भवति, 'तस्मै स्तर्तवै' तं हन्तुं 'द्विषते' द्वेषं कुर्वते 'भ्रातृव्याय' शत्रवे 'तं-तं वधं प्रहरति' वध-शब्दो हननसाधनं वज्रं ब्रूते। यदा-यदा अपेक्षितस्तदा-तदेति विवक्षया तं-त मिति वीप्सा। यस्मात् प्रहरणहेतुर्वज्रः, तस्मात् 'सः' वज्रो 'भ्रातृव्यवता' यजमानेन वषट्काररूपेण प्रयोक्तव्यः। होतृप्रयोग एव यजमानप्रयोगः; दक्षिणया क्रीतत्वात्॥

धामच्छदः स्वरूपं दर्शयति—"अथ यः समः सन्ततो ऽनिर्हाणैः, स धामच्छत्"-इति। 'यः' वषट्कारः 'समः' पूर्वोक्तबलि-त्वादिदोषरहितो यथाधीतस्तथैवोच्चारितः, 'सन्ततः' याज्यया सह विच्छेदरहितः, निःशेषेण हानं परित्यागो यस्य ऋचः, सा निर्हाणा; तथाविधा काचिद्ग् याज्यारूपा यस्य वषट्कारस्य सोऽयं 'निर्हाणैः', याज्यापाठहीन इत्यर्थः; तद्वैलक्षण्यात् 'अनिर्हाणैः', सम्पूर्णयाज्यापाठोपेत इत्यर्थः। कीदृशो वषट्कारो धामच्छत्? इति, उच्यते—धाम यज्ञस्थानं, तत्र यथा रक्षांसि न प्रविशन्ति, तथा छादयति, स 'धामच्छत्'। तस्य प्रयोगं विधत्ते— "तं-तं प्रजाश्च पशवश्चानूपतिष्ठते, तस्मात्त प्रजाकामेन पशुकामेन वषट् कृत्यः"-इति। प्रजाभिः पशुभिश्च अन्वयार्थं तं-त मिति

प्रैषमन्त्राः कस्मात् प्रहृताः ? इति चेत्, पुरोनुवाक्यानां सन्निहितत्वात् ताभ्योऽधिका 'दीर्घाः' इत्यवगन्तव्यम् । 'स उ एव' दीर्घत्वाभिज्ञ एव 'तान्' प्रैषमन्त्रान् 'साधीयो वेद' अतिशयेन सम्यक् वेद। ननु लौकिकन्यायोदाहरणे नष्टवस्तुनोऽन्वेषण मुदाहृतम्, इह तु प्रैषमन्त्राणा मभिव्यक्तिरुत्पत्तितो लौकिकेनासङ्गत मिति चेत्, सङ्गत मेवैतत् ;—'हि' यस्माद्धे प्रैषाः सन्ति, ते 'नष्टैष्यन्' नष्टस्य यज्ञस्यान्वेषणहेतवः ॥

पुरोनुवाक्याभ्यो दीर्घत्वेन प्रैषान् प्रशस्य तदुच्चारणकाले प्रहृत्वं विधत्ते— "तस्मात् प्रहृस्तिष्ठन् प्रेषति" इति । यस्मादतिशयेन ह्रस्वाः प्रैषाः 'तस्मात्' तत्पाठकाले मैत्रावरुणः 'प्रहृः' विनयेनैव किञ्चिदवनतशिरास्तिष्ठन्नुपविष्टो मन्त्रान् पठेत् । यथा लोके पितृगुर्वादीन् दृष्ट्वा प्रहृस्तिष्ठति, तद्वत्,— यथा वा नष्टवस्त्वन्विच्छन् प्रहृत्वादिना गुप्तश्चरति ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
नवमः खण्डः ॥ ९ ॥

॥ अथ दशमः खण्डः ॥

गर्भो वा एत उक्थानां यन्निविदस्तद्यत्पुरस्ता-
दुक्थानां प्रातःसवने धीयन्ते तस्मात्पुरस्ताद्गर्भो

धीयन्ते पराञ्चः सम्भवन्ति यन्मध्यतो मध्यन्दिने धीयन्ते तस्मान्मध्ये गर्भा धृता यदन्ततस्तृतीयसवने धीयन्ते तस्मादमुतो ऽर्वाञ्चो गर्भाः प्रजायन्ते प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद पेशा वा एत उक्थानां यन्निविदस्तद्यत्पुरस्तादुक्थानां प्रातः-सवने धीयन्ते यथैव प्रवयणतः पेशः कुर्यात्तादृक्तद्यन्मध्यतो मध्यन्दिने धीयन्ते यथैव मध्यतः पेशः कुर्यात्तादृक्तद्यदन्ततस्तृतीयसवने धीयन्ते यथैवाव प्रञ्जनतः पेशः कुर्यात्तादृक्तत्सर्वतो यक्तस्य पेशसा शोभते य एवं वेद ॥ १० ॥

अथ निविदां सवनभेदेन स्थानभेदं विवक्षुः प्रातःसवने स्थान-विशेषं विधत्ते— "गर्भा वा एत उक्थानां यन्निविदस्तद् यत् पुरस्तादुक्थानां प्रातःसवने धीयन्ते, तस्मात् पराञ्चो गर्भा धीयन्ते, पराञ्चः सम्भवन्ति" इति। "अग्निर्देवेभ्यः"-इत्यादयो निविदः सन्ति *। एतं निविद्विशेषा उक्थानां शस्त्राणां 'गर्भा वै' गर्भ-स्थानीया एव। तथा सति प्रातःसवनप्रयोगे शस्त्राणां पुर-स्ताद्विविदो 'धीयन्ते' स्थाप्यन्ते, स्थापयेयुरित्यर्थः। यस्मात् गर्भस्थानीयानां पुरःस्थापनम्, तस्माल्लोकेऽपि गर्भाः 'पराञ्चः' स्त्री-शरीरे पर मुत्कृष्टं पुरोभागं सञ्चन्तो गच्छन्तो 'धीयन्ते', धार्यन्ते प्रसवकालेऽपि 'पराञ्चः' पुरोभागं गच्छन्त उत्पद्यन्ते ॥

* १ भा० ४२५ पृ० '।', ४३८ पृ० १७ पं० द्र०।

माध्यन्दिनसवने स्थानविशेषं विधत्ते— "यन्मध्यतो मध्यन्दिने धीयन्ते, तस्मान्मध्ये गर्भा धृताः"—इति । यस्माच्छस्त्राणां मध्ये निविदः प्रयुक्ताः, तस्मात् गर्भा उदरमध्ये धीयन्ते ॥

तृतीयसवने स्थानविशेषं विधत्ते— "यदन्ततस्तृतीयसवने धीयन्ते, तस्मादमुतोऽवाञ्चो गर्भाः प्रजायन्ते प्रजार्थे" इति । 'अन्ततः' शस्त्रस्य अन्तिमे देशे एका ऋचं शिष्ट्वा निविदः पठितव्याः । यस्मादेता अन्तिमदेशभागिन्यः, तस्मात्तोकोऽपि गर्भो 'अमुतः' निवासस्थानान्मातृकुक्षिमध्यात् 'अर्वाञ्चः' अधोभागगताः प्रजायन्ते ; तच्च यजमानस्य प्रजननार्थं भवति ॥

निदानं प्रशंसति— "प्रजायते प्रजया पशुभिर्य एवं वेद"—इति ॥

माध्यन्दिनसवने विचित्रं निविदां स्थानत्रयं प्रशंसति — "पेशा वा एता उक्थानां यन्निविदम् ; तद्यत् पुरस्तादुक्थानां प्रातःसवने धीयन्ते, यथैव प्रवयणतः पेशः कुर्यात् तादृक्तद् ; यन्मध्यतो मध्यन्दिने धीयन्ते, यथैव मध्यतः पेशः कुर्यात् तादृक्तद् ; यदन्ततस्तृतीयसवने धीयन्ते, यथैवाव प्रज्ञनतः पेशः कुर्यात् तादृक्तत्" इति । पेशः अलङ्काराः । 'वेञ् तन्तुसन्ताने'—इति (भ्वा० १००६) धातोः वयशब्दोत्पत्तिः । कविन्द्रानां यत्प्रारम्भे वस्त्रवयनम्, तत् 'प्रवयणम्' । लोके यथैव वाससां* 'प्रवयणतः' वयनप्रारम्भे 'पेशः' अलङ्कारं कुर्यात् ; वर्णान्तरैरपि तन्तुभिरलङ्कारः ; तथैव प्रातःसवने शस्त्राणां पुरतो निविदुपठनं भवति । तच्च § वस्त्रस्थानीयानां सूक्तानां प्रथमभागे अलङ्कारार्थं सम्पद्यते ‖ ; — शस्त्रमध्ये तत्पठनं, वस्त्रमध्ये वर्णान्तरैरलङ्करणमिव । एवं 'प्रज्ञनः'

* 'वयशब्दनिपात.' घ । † 'कुविन्द्रस्य' ग । ‡ 'वाससः' ग ।
§ 'पर' घ । ‖ 'अलङ्कारा सम्पद्यते' घ ।

वस्तुस्थानभागः ; तच्च यथा वर्णान्तरेणालङ्कारः, तादृगुक्थानां मध्ये निविद्यठनम् ॥

वेदनं प्रशंसति—"सर्वतो यज्ञस्य पेशसा शोभते य एतं वेद" इति ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
दशमः खण्डः ॥ १० ॥

॥ अथ एकादशः खण्डः ॥

सौर्या वा एता देवता यन्निविदस्तद्यत्पूर्वस्मादुक्थानां प्रातःसवने धीयन्ते मध्यतो माध्यन्दिने उत्तमतस्तृतीयसवन आदित्यस्यैव तद्रूपमनु पर्यावर्तन्ते पक्षो वै देवा यज्ञं समभरंस्तस्मात्पक्षो निविदः पक्ष्यन्ते वपे तद् देवा यज्ञं समभरंस्तस्मादपवपः समवद्यतस्मादाद्रवं निविदां शंस्त्रे दद्यादिति तदु खलु वर एव दद्यात्ति न निविदः पद मतीयाद्यन्निविदः पद मतीयाद्यज्ञस्य तच्छिद्रं कुर्यादज्ञस्य वै छिद्रं पदयजमानोऽनु पापीयान् भवति तस्मान्न निविदः पद मतीयान्न निविदः पदे विपरिहरेद्यन्निविदः पदे

विपरिहरेन्मोहयेद्यज्ञं मुग्धो यजमानः स्यात्तस्मान्न निविदः पदे विपरिहरेन्न निविदः पदे समस्येद्यन्निविदः पदे समस्येद्यज्ञस्य तदायुः संहरेत्यमायुको यजमानः स्यात्तस्मान्न निविदः पदे समस्येत् प्रेदं ब्रह्म प्रेदं क्षत्रं मिमीते एव समस्येद् ब्रह्मक्षत्रयोः संधित्यै तस्माद् ब्रह्म च क्षत्रं च संधियते न त्रयं न चतुष्टयं मिति मन्येत निविद्धान मेकैकं वै निविदः पद मृक्तं मृक्तं प्रति तस्मान्न त्रयं न चतुष्टयं मिति मन्येत निविद्धानं निविदा ह्येव स्तोत्रं मतिशस्तं भवत्येकां परिशिष्य तृतीयसवने निविदं दध्याद्यद् द्वे परिशिष्य दध्यात्प्रजननं तदपहन्याद्गर्भैस्तत्प्रजा व्यर्धयेत्तस्मादेकां मेव परिशिष्य तृतीयसवने निविदं दध्याद्यृक्तेन निविदमति पद्येत येन मृक्तेन निविदं मति पद्येत न तत्पुनरुपनिवर्तेत वान्तमेव तदन्यत्तदेवां तत्कन्दमं मृक्तमाहृत्य तस्मिन्निविदं दध्यान्नमो ब्रह्मणे नमो वय मिति पुरस्तान्मृक्तस्य शंसति पथो वा एष प्रेति यो यज्ञं मुह्यति मा यज्ञादिन्द्र सोमिन इति यज्ञादेव तन्न प्रच्यवते मा तस्यनो अरातय इत्यरातीयत एव तदपहन्ति यो यज्ञस्य प्रसाधनमस्तन्तुं वेष्यातत: त माहुतं नशीमहीति प्रजा

वै तनूः प्रजा मेवास्मा एतत्सन्तनोति मनोऽन्वाहवामहे नाराशंसेन सोमेनेति मनसा वै यज्ञस्तायते मनसा क्रियते सैव तत्र प्रायश्चित्तिः प्रायश्चित्तिः॥११॥

इत्यैतरेयब्राह्मणे तृतीयपञ्चिकायां प्रथमोऽध्यायः॥१॥

अथ निविद्विषये बहु वक्तव्यं विवक्षुरादौ सूर्यसादृश्येन निविदः प्रशंसति—"सौर्या वा एता देवता यन्निविदस्तत्यत् पुरस्तादुक्थानां प्रातःसवने धीयन्ते, मध्यतो मध्यन्दिने उत्तमतृतीयसवन आदित्यस्यैव तद् व्रतं सन्तं पर्यावर्त्तन्ते"—इति। या निविदः सन्ति, ता 'एताः' सूर्यसम्बन्धिन्य एव। यथा सूर्यः पुरस्तादुदेत्यथ मध्ये स्थित्वा पश्चादस्तमेति, एवं निविदोऽपि पुरस्तात्पठ्यन्ते च स्थाप्यन्ते; तस्मादादित्यस्यैव 'व्रतम्' आचरणं सन्तं निविदः पर्यावर्त्तन्ते॥

तासां निविदां द्वादशपदरूपाणां मध्येकैकस्मिन् पादेऽवसानं विधत्ते—"पच्छो वै देवा यज्ञं समभरंस्तस्मात् पच्छो निविदः शस्यन्ते" इति। देवाः पुरा यज्ञं 'पच्छः' पादशः 'समभरत्' एकैकभागक्रमेण सम्पादितवन्त इत्यर्थः। तस्मादेता निविदोऽपि पादशः शंसनीयाः *॥

निविदां शंसकाय होत्रे उच्चदानं विधत्ते—"यद्वै तद्देवा यज्ञं समभरंस्तस्मादुच्चः समभवत्; तस्मादुच्चं निविदां शंस्ते दद्यादिति,—तदु खलु वर मेव ददति"—इति। 'यद्वै' यस्मिन्नेव देशे 'तत्' तदा देवा यज्ञं सम्पादितवन्तः, तस्माद् देशात्

* 'निविदोऽपि 'पच्छः' एकैकस्मिन् पादे उच्चसाय शंसनीयाः' च।

अग्न उत्पन्नः । अत एवाभिज्ञा आहुः । किमाहुरिति, तदुच्यते— निविदां ग्रंसकायाग्नं दद्यादिति, 'तद् खलु' तेनैवाग्नदानेन 'वर मेव' श्रेष्ठ मेव वस्तु 'ददति' प्रयच्छन्ति ॥

द्वादशसु निवित्पदेषु कस्यापि पदस्यातिक्रमं निषेधति—"न निविदः पद मतीयात्"-इति । एक मपि पदं न त्यजेदित्यर्थः ॥

विपक्षबाधपूर्वकं पूर्वपक्षं निगमयति—"यन्निविदः पद मतीयाद्, यज्ञस्य तच्छिद्रं कुर्याद् ; यज्ञस्य वै च्छिद्रं स्रवत्यजमानो नु पापीयान् भवति ; तस्मान्न निविदः पद मतीयात्" इति । पदस्य परित्यागे यज्ञस्य छिद्रं भवति । तच्च स्रवति । ततो यजमानो निन्द्यो * भवति । तस्मान्निवित्पदं न परित्यजेत् ॥

पदानां विपर्यासं † निषेधति— "न निविदः पदे विपरिहरेत् ; यन्निविदः पदे विपरिहरेन्मोहयेद्यज्ञं, मुग्धो यजमानः स्यात् ; तस्मान्न निविदः पदे विपरिहरेद्"-इति ॥ [विपरिहारो विपर्यासः‡] निविदः सम्बधि यत् पदद्वयम्, तत् 'न विपरिहरेत्' विपरीततया न पठेत् । तथा सत्ययं होता 'यज्ञं मोहयेत्' यज्ञे भ्रान्तिं जनयेत् । ततो यजमानोऽपि 'मुग्धः' भ्रान्तः स्यात् । तस्माद्विपर्यासो न कर्त्तव्यः ॥

निवित्पदसंश्लेषणं § निषेधति—"न निविदः पदे समस्येद्, यन्निविदः पदे समस्येद्यज्ञस्य तदायुः संहरेत्, — प्रमायुको यजमानः स्यात् ; तस्मान्न निविदः पदे समस्येत्"—इति । पदयोः संश्लेषणे यज्ञस्यायुः संहृतं भवेत्, यज्ञो विनश्येदित्यर्थः । ततो यजमानोऽपि म्रियेत । तस्मात्पदद्वयं न संश्लेषयेत् ॥

---

* 'दरिद्रो' घ । † 'व्युत्क्रमन्यासं' घ ।

‡ घ पुस्तके लेते पदे न विदीते । § 'पदयोः परस्परं श्लेषं' घ ।

अनेन निषेधेन सर्वेषां पदानां परस्परविश्लेषणप्राप्ता मध्यमयोर्द्वयोः पदयोः संश्लेषणं विधत्ते— "प्रेदं ब्रह्म, प्रदं क्षत्र मित्येत एव समस्येद्, ब्रह्मक्षत्रयोः संश्लित्यै ; तस्माद् ब्रह्म च क्षत्रं च संश्लिष्टं" इति। निवित्पदानां मध्ये 'प्रेदं ब्रह्म'-इत्येकं पदम्, 'प्रेदं क्षत्रम्'-इत्यपरं पदम् ; ते उभे एव संश्लेषयेत्। एवकार इतरसंश्लेषव्यावृत्त्यर्थः। तदेतत्संश्लेषणं ब्राह्मणक्षत्रियजात्योः परस्पराश्रयणाय भवति। तस्मादेव लोके जातिद्वयं परस्पराश्रितं तिष्ठति ;—ब्राह्मणो धर्मं प्रवर्त्तयति, क्षत्रियस्तस्य रक्षां करोति ॥

निवित्पदानां प्रक्षेपस्याश्रयभूते सूक्ते कञ्चिन्नियमं विधत्ते—"न ह्यचं न चतुर्ऋचं मिति मन्येत निविद्वान मेकैकं वै निविदः पदं मृचं सूक्तं प्रति ; तस्मान्न ह्यचं न चतुर्ऋचं मिति मन्येत, निविद्वानं निविदा ह्येव स्तोत्रं मितिगस्तं भवति"- इति। तिस्र ऋचो यस्मिन् सूक्ते तत् 'ह्यचम्' * ; चतस्र ऋचो यस्मिन् सूक्ते तच्चतुर्ऋचम्। तादृग् मुभयविधं सूक्तं मतिक्रम्य 'निविद्वानं' निविदां पदानां [धानं] † प्रक्षेपं 'न मन्येत' न चिन्तयेत्। एतदुक्तं भवति—त्रिचतुर्मात्रात्मकात् सूक्तादर्वाचीनं सूक्तं निविदो न दध्यात्, किन्तु मध्यस्थमेव दध्यादिति। 'निविदः' सम्बन्धि यत् 'एकैकम्' एव पदं तदेव प्रत्यृचं ‡ प्रतिसूक्तं च समर्थं भवति। यस्मादीदृशं सामर्थ्यं तस्मादित्युक्तार्थोपसंहारः। अधिके सूक्ते निवित्पदेषु प्रक्षिप्तेषु निविदैव स्तोत्रातिशंसनं कृतं भवति, न तु सूक्तम् ऋचं वापेक्षेत तदित्यर्थः § ॥

---

* ३ पृ० '२' दृश्यम्।
† एतदधिकं घ-पुस्तके।
‡ 'प्रतिर्चं' ध।
§ 'ह्यचं वापेक्षत इत्यर्थः' च।

तृतीयसवने विशेषं विधत्ते— "एकां परिशिष्य तृतीयसवने निविदं दध्यात्" इति ॥ सूक्ते येय ऋगस्था, ता सवस्याप्य ततः पूर्व मेव तृतीयसवने निविदः प्रक्षिपेत् ॥

विपक्षबाधपुरःसरं स्वपक्षं सुपसंहरति— "यदु हे परिशिष्य दध्यात्प्रजननं तदुपहन्यात्गर्भैस्तत् प्रजा व्यर्धयेत्; तस्मादेका मेव परिशिष्य तृतीयसवने निविदं दध्यात्" इति। यदि 'हे' ऋचौ परिशिष्य ततः पुरा निविदं दध्यात्, तदानीं प्रजोत्पादनं * विनाशयेत्;—पुत्रादयः 'प्रजाः गर्भैः व्यर्धयेत्' वियुक्तान् कुर्यात्। प्रजनन मुपहन्यादित्यनेन यजमानस्य प्रजोत्पादनराहित्य मुक्तम्, प्रजा व्यर्धयेदित्यनेन पूर्वं सुत्यक्षानां पुत्रादीना मपत्यराहित्यम्। तस्मादित्युपसंहारः ॥

अथ निविद्यानीयेन सूक्तेन निविदतिक्रमं निषेधति— "न सूक्तेन निविद मति पद्येत" इति। यत् सूक्तं निविद्यानार्हं निविद मतिक्रामति, तेन सूक्तेन 'न पदेत' निवित्प्रक्षेपं परित्यज्य केवलं तत् सूक्तं न पठेत् इत्यर्थः ॥

प्रमादान्निवित्प्रक्षेपविस्मृतौ सत्यां पुनस्तत्सूक्ते निविदं प्रक्षिप्य पाठो भ्रान्त्या प्रसक्तः, तं निषेधति— "येन सूक्तेन निविद मति पद्येत, न तत् पुनरुपनिवर्त्तेत, वास्तुह मेव तत्"- इति। निविद मतिक्रम्य परित्यज्य निवित्प्रक्षेपयोग्येन 'येन सूक्तेन' 'पदेत' अनुष्ठानं प्राप्नुयात्, 'तत्' विस्मृतनिविक्तं सूक्तं 'पुनर्नोपनिवर्त्तेत' भूयो निविदं प्रक्षिप्य न पठेत्। तत्र हेतुरुच्यते—'तत्' विस्मृतनिविक्तं सूक्तं 'वास्तुह मेव' वास्तुशब्देन निवित्स्थान मुच्यते; तस्य स्थानस्य घातकं तत् सूक्तम्, ततः पुनःपाठस्य न योग्यत्वम् ॥

* 'प्रजोत्पादनसाधनं' ग।

का तर्हि तदानीं निविदो गतिरित्याशङ्क्याह—"अन्यत्तदेवतं तच्छन्दसं सूक्तं माहत्य तस्मिन्निविदं दध्यात्"-इति। पूर्वस्य निविद्धानीयस्य * सूक्तस्य देवता यादृशी, छन्दश्च यादृशं, तथाविधाभ्यां देवताच्छन्दोभ्यां युक्तं मन्यत् [किञ्चित्†] सूक्तं माहत्य तस्मिन् सूक्ते निविदं प्रक्षिपेत्॥

तत्र किञ्चिद्विशेषं विधत्ते—"मा प्र गाम पथो वय मिति पुरस्तात् सूक्तस्य शंसति"-इति। यस्मिन्नाहृतं नूतने सूक्ते निवित् प्रक्षिप्यते, तस्य सूक्तस्य 'पुरस्तात्' तत्पाठात् पूर्वं "मा प्र गाम"-इति (मं०१०.५७.१.) सूक्तं शंसेत्। 'वयं' होतारः 'पथः' शंसनमार्गात् भ्रष्टाः सन्तो 'मा प्र गाम' प्रभ्रंशं मा प्राप्नुवाम इति तस्य पादस्यार्थः। मार्गभ्रंशदोषोऽस्माकं मा भूदित्यभिप्रायः॥

द्वितीयपादस्य तात्पर्यं दर्शयति—"पथो वा एष प्रैति, यो यज्ञे मुह्यति, मा यज्ञादिन्द्र सोमिन इति; यज्ञादेव तत्र प्रच्यवते"-इति। "मा यज्ञादिन्द्र सोमिनः" इति द्वितीयः पादः। तस्याय मर्थः—हे इन्द्र! 'सोमिनः' सोमयुक्ताद्यज्ञात् मा प्र गामित्यनुवर्तते,—प्रभ्रंशं मा प्राप्नवामेति। 'यः' पुमान् यज्ञे 'मुह्यति' भ्रान्तिं प्राप्नोति, एष पुमान् अवश्यं 'पथः प्रैत्येव' मार्गात् प्रभ्रश्यत्येव। अतो "मा प्र गाम पथः"-इत्येतावता न पर्याप्तं किन्तु मार्गभ्रंशपरिहारदार्ढ्यार्थं मा यज्ञादित्यपि पठनीयम्। तत्पादपाठेनायं यज्ञाद्व प्रच्यवते। अथवा 'पथो वा एषः' इत्यर्थवादः पूर्वपादशेषत्वेन व्याख्येयः॥

तृतीयपाद मनूद्य व्याचष्टे—"मां तस्युर्नो अरातय इत्यरातीयत एव तदपहन्ति"-इति। 'नः' अस्माकम् 'अन्तर्' मध्ये

* 'निविद्धानीयस्य' घ। † नैतत्पदं घ-पुस्तके।

'अरातयः' शत्रवो 'मा स्तुः' मा तिष्ठन्तु । तस्मादपाठेन 'अरातीयतः' शत्रुत्व मिच्छतः एव पुरुषान् अपद्यन्ति ॥

तस्मिन्* सूक्ते द्वितीय ऋच मनुवदति— "यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः, त माहुतं नशीमहीति"-इति । 'यः' पुत्रो 'यज्ञस्य प्रसाधनः' कुलपारम्पर्येण यज्ञस्य प्रकर्षेण साधकः, अत एव 'तन्तुर्देवेष्वाततः' दीर्घतन्तुरिव देवेषु विस्तारितः ; 'त' तथाविधं पुत्रम् 'आहुतम्' आह्वानेन सम्पादितदेवतं 'नशीमहि' अत्र निषेधार्थः कश्चिन्नकारोऽध्याहर्त्तव्यः, नैव नाशयाम इत्यर्थः । अस्माभिः प्रमादे कृतेऽप्यस्मत्पुत्रस्य देवेषु प्रचाराद्य प्रमादः समाधीयत इत्यर्थः ॥ अथ तन्तुशब्दस्य तात्पर्यं दर्शयति— "प्रजा वै तन्तुः प्रजा मेवास्मा एतत् सन्तनोति"-इति । कुलाचाराद्यविच्छेदहेतुत्वात् पुत्रादिरूपा † प्रजा तन्तुशब्देनोच्यते ‡ । तथा सत्येतत्पाठेन 'प्रजा मेव' पुत्रादिरूपा मेव 'अस्मै' यजमानाय 'सन्तनोति' अविच्छिन्नां करोति ॥

तृतीयस्या ऋचः पूर्वार्द्ध मनुवदति— "मनो न्वाहुवामहे नाराशंसेन सोमेनेति" इति । आप्यायितात्यमसा नाराशंसाः । तत्सम्बन्धिना सोमेन 'नु' क्षिप्र मेव 'मनः' अस्मदीयम् 'आहुवामहे' आह्वयामि । अस्यार्द्धस्य तात्पर्यं दर्शयति— "मनसा वै यज्ञस्तायते मनसा क्रियते"-इति । सर्वो यज्ञो मनसैव 'तायते' विस्तार्यते ; मनःपूर्वकत्वादिन्द्रियान्तरप्रवृत्तेः । तस्मिंश्च प्रसारिते यज्ञे यो यः कर्त्तव्यविशेषोऽस्ति §, स सर्वोऽपि 'मनसा क्रियते' तस्मात्मनस आह्वानं युक्तम् ॥

---

* 'एतस्मिन्' घ। † 'पुत्ररूपा' ग।

‡ 'तन्तुशब्देन विविक्षिता' घ। § 'तस्मिंश्च प्रसारिते यो यज्ञः कर्त्तव्यविशेषोऽस्ति' घ।

अस्य सूत्रस्य प्रथमतः पाठे प्रयोजनं दर्शयति— "सैव तत्र प्रायश्चित्तिः प्रायश्चित्तिः"–इति । "मा प्र गाम"–इत्यादि-सूत्रस्योक्तिरेव निविदतिक्रमरूपस्य * प्रत्यवायस्य प्रायश्चित्तिः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ११ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां प्रथमाध्याये
एकादशः खण्डः ॥ ११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* 'निविदिरतिक्रमरूपस्य' ब ।

॥ अथ द्वितीयाध्यायः ॥

(तप)

॥ द्वितीयः खण्डः ॥

—•○•—

॥ ॐ ॥ देवविशः कल्पयितव्या इत्याहुश्छन्दश्छन्दसि प्रतिष्ठाप्य मिति शोंसावो मित्याह्वयते प्रातस्सवने चाक्षरेण शंसा मोदेवो मित्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण तदष्टाक्षरं सम्पद्यते ऽष्टाक्षरा वै गायत्री गायत्रो मेव तत्पुरस्तात्प्रातस्सवने ऽचीकृपता सुक्थं वाचीत्याह शस्त्वा चतुरक्षरं मो सुक्थशा इत्यध्वर्युश्चतुरक्षरं तदष्टाक्षरं सम्पद्यते ऽष्टाक्षरा वै गायत्री गायत्रो मेव तदुभयतः प्रातस्सवने ऽचीकृपता मध्वर्यो शोंसावो मित्याह्वयते मध्यन्दिने षळक्षरेण शंसा मोदेवो मित्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण तदेकादशाक्षरं सम्पद्यत एकादशाक्षरा वै त्रिष्टुप् त्रिष्टुभ मेव तत्पुरस्ान्मध्यन्दिने ऽचीकृपता सुक्थं वाचीन्द्रायेत्याह शस्त्वा सप्ताक्षरं मो सुक्थशा इत्यध्वर्युश्चतुरक्षरं तदेकादशाक्षरं सम्पद्यत एकादशाक्षरा वै त्रिष्टुप् त्रिष्टुभ मेव तदुभयतो मध्यन्दिने

ऽचीक्लृपता मध्वर्यो शोशोंसावो मित्याह्वयते तृतीय-सवने सप्ताक्षरेण शंसा मोदैवो मित्यध्वर्युः प्रति गृणाति पञ्चाक्षरेण तद् द्वादशाक्षरं सम्पद्यते द्वादशाक्षरा वै जगती जगती मेव तत्पुरस्तात्तृतीय-सवने ऽचीक्लृपता मुक्थं वाचीन्द्राय देवेभ्य इत्याह शस्त्वेकादशाक्षरं मो मित्यध्वर्युरेकाक्षरं तद् द्वाद-शाक्षरं सम्पद्यते द्वादशाक्षरा वै जगती जगती मेव तदुभयतस्तृतीयसवने ऽचीक्लृपतां तदेतदृषिः पश्य-न्नभ्यनूवाच यद् गायत्रे अधि गायत्र माहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत यद्वा जगज्जगत्याहितं पदं य एतद्विदुस्ते अमृतत्व मानशुरित्येतद्वै तच्छन्दश्छन्दसि प्रतिष्ठापयति कल्पयति देवविशो य एवं वेद॥१(१२)॥

एकादशे ऽथ प्रउगप्रशंसां ततो वषट्कार मनुस्तुतिं च ।
तत्कर्तुरामन्त्र्यनुमन्त्रणं च ततो निविद्भेषविशेष माहुः ॥

अथाह्वावप्रतिगरादयो वक्तव्याः ; तत्र प्रातःसवने होतुराह्वाव मध्वर्योः प्रतिगरं च विधत्ते — "देवविशः कल्पयितव्या इत्याहु-श्छन्दश्छन्दसि प्रतिष्ठाप्य मिति, शोंसावो मित्याह्वयते प्रातस्सवने त्रैष्टुभेन, शंसा मोदैवो मित्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण, तदष्टाक्षरं सम्पद्यते,—ऽष्टाक्षरा वै गायत्री, गायत्री मेव तत् पुर-स्तात् प्रातस्सवने ऽचीक्लृपताम्" इति । 'देवविशः' देवानां सम्बन्धिन्यः प्रजाः मैत्र्यरूपाः 'कल्पयितव्याः' सम्पादनीयाः इति

ब्रह्मवादिन आहुः *। तत्कथं सम्पादनीयम् ? इति, तदुच्यते—एवं छन्दो ऽन्यस्मिन् छन्दसि प्रतिष्ठापनीयम् ; तथा सति देवस्त्रियः सम्पद्यत इति ब्रह्मवादिना मभिप्रायः। तस्मात् तत्सम्पादनार्थं होता प्रातस्सवने "शंसावोम्"—इति मन्त्रेण अध्वर्यु माह्वयति। तस्याय मर्थः—हे अध्वर्यो ! 'शंसावः' शंसनं कुर्वतः, 'ॐ'-इत्यङ्गी-कारार्थः, त्वया अनुज्ञा देयेत्युक्तं भवति। सोऽयं चाक्षरो मन्त्रः। ततोऽध्वर्युः "शंसा मोदेवोम्"—इति पञ्चाक्षरेण 'प्रतिगृणाति' प्रत्युत्तरं ब्रूयात्। तस्याय मर्थः—हे होतः ! त्वं शंस, तव 'मो-देव' इत्ये एवास्माक मनोऽनुज्ञा दत्तेति। तदेतन्मन्त्रद्वयं मिलित्वा अष्टाक्षरं सम्पद्यते, गायत्री चाष्टाक्षरा, तेन प्रातस्सवने 'पुरस्तात्' आदौ द्वावपि मिलित्वा गायत्री मेव 'अधीक्षपतां' कल्पित-वन्तौ ॥ शस्त्रादुत्तरकालीनौ द्वाभ्यां पठनीयौ मन्त्रौ विधत्ते—"उक्थं वाचीत्याह शस्त्वा चतुरक्षरम्, ओ सुक्थशा इत्यध्वर्यु-श्चतुरक्षरं तदष्टाक्षरं सम्पद्यते,—अष्टाक्षरा वै गायत्री, गायत्री मेव तदुभयतः प्रातस्सवने ऽधीक्षपताम्"—इति। होता शस्त्रं पठित्वा "उक्थं वाचि"—इति चतुरक्षरं मन्त्रं ब्रूयात्। मदीयायां वाचि उक्थं सम्पद्यत मिति तस्यार्थः। ततो ऽध्वर्युः "ओ सुक्थशाः" -इति चतुरक्षरं मन्त्रं ब्रूयात्। 'ॐ'—इत्यङ्गीकारे। 'उक्थशाः' त्वं शस्त्रशंसी भवसीत्यर्थः। तदेतन्मन्त्रद्वयं मिलित्वा अष्टाक्षरं सम्प-द्यते। 'उभयतः शंसनात् पुरस्तात् पथाच्च ; शेषं पूर्ववत्† ॥

माध्यन्दिनसवनेऽपि तदुभयत्रचतुष्टयं विधत्ते—"अध्वर्यो शंसावो मित्याह्वयते मध्यन्दिने षळक्षरेण, शंसा मोदेवो मित्य-

* 'सम्पादनीया इत्यर्थः। तत्र ब्रह्मवादिन आहुः' घ।

† आश्व० श्रौ० ५. ८. १ ; ५ ; १०. २२ ; ९. ८.।

ध्वर्युः प्रतिगृणाति पञ्चाक्षरेण, तदेकादशाक्षरं सम्पद्यते,—एकादशाक्षरा वै त्रिष्टुप्, त्रिष्टुभ मेव तत् पुरस्ताच्माध्यन्दिने ऽचीक्लृपताम्; उक्थं वाचेन्द्राय देवेभ्य इत्याह शस्त्वैकादशाक्षरम्, ओ मुक्थशा इत्यध्वर्युश्चतुरक्षरं, तदेकादशाक्षरं सम्पद्यते,—एकादशाक्षरा वै त्रिष्टुप्, त्रिष्टुभ मेव तदुभयतो मध्यन्दिने ऽचीक्लृपताम्"-इति। पूर्ववद् व्याख्येयम् * ॥

तृतीयसवने मन्त्रचतुष्टयं विधत्ते— "अध्वर्यो शोशोसावो मित्याह्वयते तृतीयसवने सम्पद्यते, शंसा मोदेवो मित्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण, तद् द्वादशाक्षरं सम्पद्यते,—द्वादशाक्षरा वै जगती, जगती मेव तत्पुरस्तात्तृतीयसवने ऽचीक्लृपताम्; उक्थं वाचेन्द्राय देवेभ्य इत्याह शस्त्वैकादशाक्षरम्, ओ मित्यध्वर्युरेकाक्षरं, तद् द्वादशाक्षरं सम्पद्यते,—द्वादशाक्षरा वै जगती, जगती मेव तदुभयतस्तृतीयसवने ऽचीक्लृपताम्"-इति। "शोशोसावोम्" -इति द्विर्भावस्छान्दसः। माध्यन्दिनसवने केवल मिन्द्रार्थं मेव वाच्युक्थं सम्पद्य मित्युक्तम्, अत्र त्विन्द्रार्थं मितरदेवार्थं चेति विशेषः। अन्यत् सर्वं पूर्ववद् व्याख्येयम् † ॥

उक्तमर्थं मन्त्रसंवादेन दृढयति—"तदेतदृषिः पश्यन्नभ्यनूवाच"-इति। 'तदेतद्' ब्राह्मणोक्तं सर्वम् 'ऋषिः' मन्त्रद्रष्टा दिव्यज्ञानेन पश्यन् मन्त्रवाक्येनाभितो ऽनुवचनं कृतवान्॥ त मेतं मन्त्रं दर्शयति— "यद् गायत्रे अधि गायत्र माहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत। यद्वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्व मानशुः"-इति (सं० १. १६४. २३.)। शंसनात्पूर्वकालीने मन्त्र-

* आश्व० श्रौ० ५. १४. १; ८. ५; १०. २४; ९. ८।

† आश्व० श्रौ० ५. १८. ४; ८. ५; १८, ११; ९. ८।

द्वयात्मके 'गायत्रे' छन्दसि, तदुत्तरकालीनमन्त्रद्वयात्मकं 'वार्त्र' छन्दः 'अध्याहितं' सम्पादितमिति 'यत्' अस्ति, अथवा पूर्वकालीनान्मन्त्रद्वयात्मकात् 'त्रैष्टुभात्' उत्तरकालीनमन्त्रद्वयात्मकं 'त्रैष्टुभं' 'निरतक्षत' निष्पन्नमिति यदस्ति, अथवा 'जगत्' आगतं छन्दः पूर्वकालीनं 'जगति' उत्तरकालीने जागते छन्दसि 'आहितं' सम्पादितम्; इत्येतत् त्रिविधं 'पदं' यदस्ति, 'तत्' पदं 'य इत्' य एव अनुष्ठातारो 'विदुः' जानन्ति, 'ते' अनुष्ठातारो 'अमृतत्व मानशुः' देवत्वं प्राप्तवन्तः *॥ अस्य मन्त्रस्य तात्पर्यं दर्शयति—"एतद्वै तच्छन्दश्छन्दसि प्रतिष्ठापयति"-इति। 'एतद्' ऋषिप्रोक्तं मन्त्रवाक्यं मुत्तरकालीने 'छन्दसि' 'तत्' पूर्वकालीनं 'छन्दः' 'प्रतिष्ठापयति' तत्राश्रित मित्येवं प्रतिपादयति॥

उक्तार्थवेदनं प्रशंसति—"कल्पयति देवविशो य एवं वेद"-इति। वेदिता 'देवविशः' देवसम्बन्धिनीः प्रजाः सैन्यरूपाः सम्पादयति॥१॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये
प्रथमः खण्डः॥ १ (१२)॥

॥ अथ द्वितीयः खण्डः॥

१ ापतिर्वै यज्ञं छन्दांसि देवेभ्यो भागधेयानि व्यभजत्। स गायत्री मेवाग्नये वसुभ्यः प्रातःसवने

* ऋक्संहिताभाष्ये चैतन्मन्त्रस्य व्याख्यानानि द्रष्टव्यानि (१. १६४. ११.)।

ऽभजत् त्रिष्टुभ मिन्द्राय रुद्रेभ्यो मध्यन्दिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने ऽथास्य यत् स्वं छन्द आसीदनुष्टुप् ता मुदन्त मभ्युदौहदक्षावाकीया मभि सैन मब्रवीदनुष्टुप् त्वं न्वेव देवानां पापिष्ठोऽसि यस्य तेऽहं स्वं छन्दोऽस्मि यां मोदन्त मभ्युदौहीरक्षावाकीया मभीति तदजानात्स स्वं सोम माहरत्स स्वे सोमेऽग्रं मुख मभि पर्याहरदनुष्टुभं तस्मादनुष्टुवग्रिया मुख्या युज्यते सर्वेषां सवनाना मग्रियो मुख्यो भवति श्रेष्ठता मश्नुते य एवं वेद स्वे वै स तत्सोमे ऽकल्पयत्तस्माद्यच्च क्व च यजमानवशो भवति कल्पत एव यज्ञोऽपि तस्मै जनतायै कल्पते यचैवं विद्वान् यजमानो वशी यजते ॥ २ (१३) ॥

अथ अनुष्टुभो मुख्यत्वेन प्रशंसां कर्तुं माख्यायिका माह— "प्रजापतिर्वै यज्ञं छन्दांसि देवेभ्यो भागधेयानि व्यभजत्,—सः गायत्री मेवाग्नये वसुभ्यः प्रातस्सवने, भजत् त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यन्दिने, जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीय-सवने"-इति। पुरा 'प्रजापतिः' सर्वं जगत् सृष्ट्वा सवनत्रयात्मकं 'यज्ञं' गायत्र्यादीनि 'छन्दांसि' च देवतार्थं 'भागधेयानि' भाग-विशेषरूपाणि कृत्वा 'व्यभजत्' विभक्तवान्। केन प्रकारेणेति, स— उच्यते—यज्ञे यत् प्रातस्सवन मस्ति, तस्मिन् 'गायत्री मेव' अग्न्यर्थं मष्टवसुदेवतार्थं च विभक्तवान्, माध्यन्दिनसवने त्रिष्टुभ

मिन्द्रार्थं मेवादग्नयेऽर्थं च विभक्तवान्, तृतीयसवनं जगती विश्वेभ्यो देवेभ्य आदित्येभ्यश्च विभक्तवान्। एवं सत्यनुष्टुबका परिशिष्टा; तस्या वृत्तान्त माह— "अथास्य यत् स्व छन्द आसीदनुष्टुप्, ता मुदस्त मभ्युदीहदच्छावाकीया मभि सेन मब्रवीदनुष्टुप्,—त्वं त्वेव देवानां पापिष्ठोऽसि यस्य ते ऽहं स्वं छन्दोऽस्मि, यां मोदस्त मभ्युदीहीदच्छावाकीया मभीति; तदजानन्त; स त्वं सोम माहरत्, स त्वे सोमेऽयं मुख मभि पर्याहरदनुष्टुभं; तस्माद्दनुष्टुबधिया * मुख्या युज्यते सर्वेषां सवनानाम्"—इति। अथाग्न्यादीनां वस्वादीनां च छन्दोविभागानन्तरम् 'अस्य' प्रजापतेः स्वभूत मनुष्टुबाख्यं यच्छन्द आसीत्, 'ताम्' अनुष्टुभम् 'उदस्त मभि' यज्ञस्य कस्मिंश्चान्तदेश मभिलक्ष्य 'उदीहत्' अपसारितवान्। कुत्र देश ? इति, तदुच्यते— 'अच्छावाकीया मभि'—इति। अच्छावाक! वदस्व इत्येव मध्वर्युणोक्तो ऽच्छावाको यां ब्रूते, सेय मृगच्छावाकीया; ता मभिलक्ष्य उदूढवान्, अनुष्टुभ मच्छावाकीयां कृतवानित्यर्थः। तेन कुपिता 'सा' अनुष्टुबेव 'एनं' प्रजापति मब्रवीत्,— हे प्रजापते! 'त्वं तु एव' त्व मेव खलु एको देवानां मध्ये पापिष्ठोऽसि, 'यस्य' प्रजापतेस्त्वाहं छन्दोऽस्मि। अग्निवस्वादयः पूर्वं छन्दोरहिताः, तादृग्भ्योऽपि छन्दांसि दत्तवानसि; अहं तु पूर्व मेव त्वदीयाम्, तादृशीं मां त्वत्तोऽपसार्याच्छावाकीया मभिलक्ष्य उदूढवानसि। अतो मदुपेक्षया तव पापिष्ठत्व मित्यनुष्टुभो ऽभिप्रायः। 'तत्' सर्वं मनुष्टुभा प्रोक्त मुपालम्भरूपं प्रजापतिर्ज्ञातवान्। ज्ञात्वा च तदुपालम्भपरिहारार्थं स्वकीयं सोमयाग माहरत्। स तु तस्मिन् सोमयागे

* 'ऽवया' घ, टी० च।

'अग्रं' श्रेष्ठं प्रारम्भरूपं यत् मुख मस्ति, तदभिलक्ष्य अनुष्टुभं 'पर्याहरत्', तत्र नीतवानित्यर्थः। 'तस्मादु' तस्मादेव कारणात् इयं अनुष्टुप् 'अग्रिया' श्रेष्ठा सती सर्वेषां सवनानां 'मुख्या' मुखे भवा प्रारम्भकालीना प्रयुज्यते ॥

एतदेदनं प्रशंसति— "अग्रियो* मुख्यो भवति, श्रेष्ठता मश्नुते य एवं वेद"—इति। वेदिता स्वकीयज्ञातीनां मध्ये 'अग्रियः' अग्रे भवो ऽग्रः ज्येष्ठः, 'मुख्यः' व्यवहारनिर्वाहकः, 'श्रेष्ठतां' विद्यावत्तादिगुणैः श्रेष्ठत्वं प्राप्नोति ॥

प्रजापतिन्यायेन यजमानस्यापि [सवनीययागादृ†] आदावनुष्टुप्प्रयोगं दर्शयति— "स्वे वै स तत् सोमे ऽकल्पयत्; तस्माद्यत्र क्व च यजमानवशो भवति, कल्पत एव यज्ञोऽपि"—इति। यस्मात् 'सः' प्रजापतिः स्वकर्तृके एव सोमयागे 'तत्' सवनेषु अनुष्टुभो मुख्यता मकल्पयत्, तस्मादिदानी मपि 'यत्र क्वापि' यागे यज्ञो यजमानवशो भवति, स यज्ञोऽपि 'कल्पत एव' अवैकल्येनानुष्ठास्यामीत्यभिप्रेत्यानुष्टुभः सवनाना मादौ प्रयोगे सति यज्ञस्य यजमानवशत्वम्, तत्र यज्ञो वैकल्यरहितो भवतीत्यर्थः ॥

उक्तं वाक्यार्थं मेव वाक्यान्तरेण स्पष्टीकरोति— "तस्यै जनतायै कल्पते यत्रैवं विद्वान् यजमानो वशो यजते"—इति। 'यत्र' यस्यां जनतायाम् ‡, 'एवम्' अनुष्टुभो महिमानं विद्वान् यजमानः 'वशी' स्ववशो भूत्वा, तस्मिन्ननुष्टुभः प्रयोगे सावधानो

* 'अग्री' घ, टी० घ।

† नास्त्येतत्पदं क-पुस्तके; अत्रि लिख 'अवश्यम्'—इति।

‡ 'जनसभायाम्' ग।

भूत्वा यजते, 'तस्यै जनतायै' तस्या जनतायाः * 'कल्पते' यज्ञः प्रयोजनसमर्थो भवति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये
द्वितीयः खण्डः ॥ २ (१२) ॥

॥ अथ तृतीयः खण्डः ॥

अग्निर्वै देवानां होतासीत्तं मृत्युर्बहिष्पवमाने ऽसीदत्सोऽनुष्टुभाज्यं प्रत्यपद्यत मृत्यु मेव तत्पर्यक्रामत् तं माध्यं ऽसीदत् स प्रउगेण प्रत्यपद्यत मृत्यु मेव तत्पर्यक्रामत् तं माध्यन्दिने पवमाने ऽसीदत्सोऽनुष्टुभा मरुत्वतीयं प्रत्यपद्यत मृत्यु मेव तत्पर्यक्रामत्तं माध्यन्दिने बृहतीषु नाशक्नोत्स्तुं प्राणा वै बृहत्यः प्राणानेव तन्नाशक्नोद् व्यवैतुं तस्मान्मध्यन्दिने होता बृहतीषु स्तोत्रियेणैव प्रतिपद्यते प्राणा वै बृहत्यः प्राणानेव तदभि प्रतिपद्यते तं तृतीयपवमाने ऽसीदत्सोऽनुष्टुभा वैश्वदेवं प्रत्यपद्यत मृत्यु मेव तत्पर्यक्रामत् तं यज्ञायज्ञीये ऽसीदत्स वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत मृत्यु मेव तत्पर्यक्रामद्यज्ञो

* 'तस्या जनभायां' म ।

वै वैश्वानरीयं प्रतिष्ठा यज्ञायज्ञीयं वज्रेणैव तत्प्रतिष्ठाया मृत्युं नुदते स सर्वान् पाशान्त्सर्वान् त्थाणून्मृत्योरतिमुच्य स्वस्त्येवोदमुच्यत स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद ॥ ३ (१४) ॥

पुनरपि प्रकारान्तरेणानुष्टुभो महिमानं दर्शयितु माख्यायिका माह—"अग्निर्वै देवानां होतासीत्, तं मृत्युर्बर्हिष्यवमाने ऽसीदत्, सोऽनुष्टुभाज्यं प्रत्यपद्यत, मृत्यु मेव तत्पर्यक्रामत्, त माज्ये ऽसीदत्, स प्रउगेण प्रत्यपद्यत, मृत्यु मेव तत्पर्यक्रामत्" इति। पुरा कदाचित्, देवानां यागे अग्निरेव होता अभूत्, 'तम्' अग्निं होतारं मृत्युः 'असीदत्' हन्तुं प्रारब्धवान्। कस्मिन् काले? इति, तदुच्यते— बर्हिष्यवमानाख्ये स्तोत्रे प्रातस्सवनसम्बन्धिनि "उपास्मै गायता नरः"–इत्यादृगाश्रयणेन मानवैः स्तूयमाने सति *। सोऽय मग्नेर्मृत्युप्राप्तिकालः। तदानीं मग्निः मृत्युं परिहर्तुम् अनुष्टुप्छन्दस्कया "प्र वो देवायाग्नये"–इत्येतयर्चा आज्यशस्त्रं † प्रारब्धवान्। 'तम्' तेनानुष्टुप्-प्रयोगेण सोऽग्निस्तदानीमेव मृत्युं 'पर्यक्रामत्' अतिक्रान्तवान्। ततः "अग्न आ याहि"–इत्यादृगाश्रयणेनाज्यस्तोत्रे ‡ (उ० आ० १. १. ४–७.) मानवैः स्तूयमाने सति § 'तम्' अग्निं मृत्युः 'असीदत्' प्राप्तवान्। तदा

* १ भा० ४५३ पृ० 'ग' द्रष्टव्यम्। ता० ब्रा० ७. १. उ० आ० १.१.१–३।

† १ भा० ४५४, ४५८ पृ० द्रष्टव्यम्।

‡ १ भा० ४५८ पृ० द्रष्टव्यम्।

§ 'तर्तोऽग्निना होत्रा आज्यशस्त्रं शस्यमाने सति' ग

'सः' अग्निः मृत्युं परिहर्तुं "वायवा याहि"-इत्यादिलक्षण सप्तर्चात्मकेन प्रउगशस्त्रेण * अनुष्टातुं 'प्रत्यपद्यत' प्रारब्धवान्। 'तत्' तेन प्रउगप्रयोगेण तदानीं मेव मृत्यु मतिक्रान्तवान्॥

इत्थं प्रातस्सवने ऽनुष्टुभं मृत्युपरिहारहेतुत्वेन प्रशस्य माध्यन्दिनसवनेऽपि तथा प्रशंसति— "तं माध्यन्दिने पवमाने ऽसोदत्, सोऽनुष्टुभा मरुत्वतीयं प्रत्यपद्यत, मृत्यु मेव तत्पर्यक्रामत्, तं माध्यन्दिनं हुतीषु नाशक्नोत् सन्तुं,—प्राणा वै हुतयः, प्राणानेव तन्नाशक्नोद् व्यवैतुं; तस्मान्माध्यन्दिने होता हुतीषु स्तोत्रियेणैव प्रतिपद्यते,—प्राणा वै हुतयः, प्राणानेव तदभिप्रतिपद्यते"-इति। प्रातस्सवनाविराजतो मृत्युः सामगैः "उद्वा ते जात मन्धसः"-इत्यादिके (उ० आ० १.१.८-१०.) माध्यन्दिनपवमानस्तोत्रे † गीयमाने सति, तस्मिन् काले 'तम्' अग्निं होतारम् 'असोदत्' प्राप्तवान्। तदानीं 'सः' अग्निर्होता मृत्युपरिहाराय अनुष्टुप्-छन्दस्कया "आ त्वा रथम्"-इत्येतयर्चा (मं० ८.६८.१.) मरुत्वतीयं शस्त्रं ‡ 'प्रत्यपद्यत' प्रारब्धवान्। 'तत्' तेनानुष्टुप्-प्रयोगेण तदानीं मेव मृत्यु मतिक्रान्तवान्। माध्यन्दिनपवमानाविराजतो मृत्युर्माध्यन्दिनसवनसम्बन्धिनि मरुत्वतीयशस्त्रे शस्यमाने सति, शंसितारं अग्निं होतारं प्राप्स्यामीति विचार्य तत्र हुतीच्छन्दस्कासु ऋक्षु गीयमानासु § 'तम्' अग्निं 'सन्तुं' प्राप्तुं नाशक्नोत्।

* १-१५ पृ० द्रष्टव्यम्।

† 'एतावता वाव माध्यन्दिनं सवनं पर्यप्तं, त्रिभिश्च छन्दोभिः पञ्चभिश्च सामभिः; यन्माध्यन्दिनेन पवमानेन स्तुवन्ति, माध्यन्दिन मेव तं सवनं पर्यायन्ति"-इत्यादि ता० ब्रा० ७. ३-८. ३।

‡ तच्च शस्त्रं मृषिष्टात् चतुर्थादिषु षट्सु स्तोत्रेषु आम्नासते।

§ 'विद्यमानासु' घ।

तत्र हेतुरुच्यते,— बृहतीच्छन्दस्का ऋचः प्राणस्वरूपा एव; 'तत्' तेन कारणेन प्राणानेव 'व्यवैतु' वियोजयितुं मृत्युर्नाशक्नोत्। प्राणाभिमानिभिर्बृहतीभिः प्राणानां रचितत्वात्। बृहत्यश्च मरुत्वतीयशस्त्रानन्तरभाविनिष्केवल्यशस्त्रे* बह्वो विद्यन्ते। ताश्च सर्वस्मिन्नेव माध्यन्दिने सवने मृत्युप्रवेशं निवारयन्ति। यस्मादेवं बृहत्यो मृत्युप्रवेशं निवारयितुं समर्थाः, तस्मात् माध्यन्दिनप्रयोगी होता बृहतीच्छन्दस्कासु ऋक्षु स्तोत्रियेणैव ह्रचेन शस्त्रं प्रारभेत। यस्मिंस्तृचे साम्नैः स्तोत्रं गीतम्, सोऽयं ह्रचस्तोत्रियः; तेन ह्रचेन प्रारभ्ये सति तत्स्थानां बृहतीनां प्राणरूपत्वात् प्राणानेवाभिलक्ष्य शस्त्रप्रारम्भं कृतवान् भवति † ॥

अथ तृतीयसवने मृत्युपरिहारेणानुष्टुभं प्रशंसति— "तं तृतीयपवमाने ऽसीदत्, सोऽनुष्टुभा वैश्वदेवेन प्रत्यपद्यत, मृत्यु मेव तत्पर्यक्रामत्"—इति। त्रिषु पवमानेषु बर्हिष्पवमानः प्रथमः, माध्यन्दिनपवमानो द्वितीयः, आर्भवपवमानस्तृतीयः। माध्यन्दिनसवने प्रवेष्टु मशक्तो मृत्युः "स्वादिष्ठया मदिष्ठया"—इत्येतस्मिन् (उ० आ० १.१.१५.) आर्भवाख्ये तृतीयपवमानस्तोत्रे ‡ तृतीयसवनगते सामगैर्गीयमाने सति 'तम्' अग्निं होतारं मृत्युरसीदत्। 'सः' अप्यग्निस्तं वारयितु मनुष्टुप्-छन्दस्कया "तत्सवितुर्वृणीमहे"—इत्येतयर्चा (मं० ५. ८२. १.) वैश्वदेवाख्यं शस्त्रं §

---

* परस्तादिष्टेव दशमादिषु चतुःखण्डेषु निष्केवल्यं नाम शस्त्रम्।

† इदमनुपदं (६ ख०) वीतहव्यमीमांसायां व्यक्तीभविष्यति।

‡ "साध्या वै नाम देवा आसन् ०——० स्वादिष्ठया मदिष्ठयेति प्रजापतेः तृतीयसवनस्य सन्दृत्यायै"—इत्यादि ता० ब्रा० ८. ४, ५।

§ एतत्पराध्यायीयसप्तमाष्टमखण्डयोरालोच्यते।

प्रारभत ; तेनानुष्टुप्-प्रयोगेण तदानीं मेव मृत्युं मतिक्रान्तवान् । इत्थं मनुष्टुप् सवनत्रये शस्त्रं ॥

अथ यज्ञायज्ञीयाख्यं साम, वैश्वानरीयं सूक्तं च प्रशंसति—"तं यज्ञायज्ञीये ऽसौदत्त वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत, मृत्युं मेव तत्पर्यक्रामद्,—वज्रो वै वैश्वानरीयं, प्रतिष्ठा यज्ञायज्ञीयं,—वज्रेणैव तत्प्रतिष्ठाया मृत्युं नुदते ; स सर्वान् पाशान्त्सर्वान् स्थाणून् मृत्योरतिमुच्य स्वस्येवोदमुच्यत,—स्वस्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय"-इति । "यज्ञा यज्ञा वो अग्नये"-इत्यस्या मृचि (उ० आ० १.१.२०.) उत्पन्नं साम यज्ञायज्ञीयम्*। तत्साम-साध्ये तन्नामके स्तोत्रे† सामगैर्गीयमाने सति तृतीयपवमानाग्नि-राक्रमतो मृत्युः 'तम्' अग्निं होतारं प्राप्तवान् । 'सः' अपि अग्निः होता मृत्युपरिहाराय "वैश्वानराय पृथुपाजसे"-इत्यादिना वैश्वा-नरीयेण सूक्तेन आग्निमारुताख्यं‡ शस्त्रं प्रारब्धवान् । तेन सूक्त-प्रयोगेण तदानीं मेव मृत्युं मतिक्रान्तवान् । तच्च वैश्वानरीयं सूक्तं वज्रस्वरूपम्, यज्ञायज्ञीयस्तोत्रं तु प्रतिष्ठायाः समासेर्हेतुः । तस्मात् सूक्तरूपेण वज्रेणैव प्रतिष्ठाया यज्ञसमासेर्मृत्युं मग्निर्निराकुरुते । 'सः' तादृशोऽग्निः 'सर्वान् पाशान्' मृत्युसम्बन्धिबन्धनरज्जुरूपान्, तथा मृत्योः सम्बन्धिनः 'सर्वान् स्थाणून्' काष्ठोपलक्षितगदाद्यायु-धानि, 'मृत्योः' सकाशात् 'अतिमुच्य' निवार्य 'स्वस्येव' स्वेनैव स्वयं मृत्युमकाशादुन्मुक्तोऽभूत् । अग्निवच्चानुषोऽपि होता तेनैव प्रकारेण अनुतिष्ठन् सर्वेणायुषा युक्तः स्वेनैव मृत्योरुन्मुच्यते ॥

---

* ऊ० गा० १. १. ८१ ।

† "देवा वै ० — ० ते देवा यज्ञायज्ञीय मपश्यंस्तेषां यज्ञायज्ञा वो अग्नय इति"—इत्यादि-ता० ब्रा० ८. ६, ७ ।

‡ एतदुत्तराध्यायीयेषु नवमादिषु त्रिषु[illegible] द्रष्टव्यम् ।

अथ सर्वमेधो यः पूर्वोत्तरपक्षयोः सर्वप्रायश्चित्तादीनि विधिवेद्यः। सोऽयं षोडशप्रयोगो * यजमानस्य सर्वायुष्ट्वाय सम्पद्यते ।

वेदनं प्रशंसति— "सर्वं मायुरेति य एवं वेद"—इति ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये तृतीयः खण्डः ॥ १ (१४) ॥

॥ अथ चतुर्थः खण्डः ॥

इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतो ऽगच्छत्स परमां मेव परावत मगच्छदनुष्टुब् वै परमा परावद्गावा अनुष्टुप् स वाचं प्रविश्याशयत्तं सर्वाणि भूतानि विभज्यान्वैच्छंस्तं पूर्वेद्युः पितरो ऽविन्दन्नुत्तर मह्नर्देवास्तस्मात्पूर्वेद्युः पितृभ्यः क्रियत उत्तर मह्नर्देवान् यजन्ते ते ऽब्रुवन्नभिषुणवामैव तथा वा वन आगिष्ठ मागमिष्यतीति तथेति तेऽभ्यषुण्वंस्त आ रथं यथोतय इत्येवेन मावर्तयन्निदं वसो सुत मन्ध इत्येवैभ्यः सुतमौच्छन्मा विरभवदिन्द्र नेदीय एदिहीत्येवैनं मध्यं प्रापादयन्नागतेन्द्रेण यज्ञेन यजते सेन्द्रेण यज्ञेन राध्नोति य एवं वेद ॥ ४ (१५) ॥

---

* 'दीक्षप्रयोगो' न ।

अत्र मरुत्वतीयशस्त्रं आरभ्यते, तत्रार्थं ब्राह्मणोक्तः—

"प्रतिपदनुष्टुबनु प्रगाथो बृहतिविष्टुबोऽथ ह्रस्वमैन्द्रवम्।

ध्रुवविधिविहितयोस्तथाथ धाय्या वितत मथ मरुत्वतीये शस्त्रे॥"

—इति। तत्र "आ त्वा रथम्"—इति (सं०८,६८,१-३.) मरुत्वतीयस्य प्रतिपदनुष्टुप्, तां प्रशंसितुं आह— "इन्द्रो वै इदं हत्वा नास्तृषीति मन्यमानः परा: परावतो ऽगच्छत्; स परमा मेव परावत मगच्छदनुष्टुब् वै परमा परावद्; वाग्वा अनुष्टुप्; स वाचं प्रविश्याशयत्, तं सर्वाणि भूतानि विभज्यान्वैच्छन्त' पूर्वेदुः पितरो ऽविन्दन्तर मह्नैवास्मात् पूर्वेदुः पितृभ्यः क्रियत, उत्तर मह्नो देवान् यजन्ते"—इति। इन्द्रः पुरा हननामान मसुरं * हत्वा 'नास्तृषि' नाहं तृप्तिमवान् अस्मि इति मन्यमानः तदीयजीवन मार्गरुध तस्मात्तोतः 'परा: परावतः' अभ्यधिका दूरभूमो रगच्छत्। 'सः' अयं तावताप्यसन्तुष्टः 'परमा मेव' अभ्यधिका मेव 'परावतं' दूरभूमिं पुनरप्यगच्छत्। अधिकाभ्यो दूरभूमिभ्यो ऽत्यन्त मधिका दूरभूमिः कीदृशी चेत्, तेय मुच्यते—'अनुष्टुप् वै परमा' परावत्' अत्यधिका दूरभूमिः; तस्मा मनुष्टुभि प्रविष्टस्य चक्षुषा द्रष्टु, मशक्यत्वात्। अनुष्टुप् च वाक्स्वरूपा। ततः स इन्द्रो वाचं प्रविश्य तत्र शयनं लतवान्। 'तम्' इन्द्रं सर्वाणि भूतानि सर्वेषु देशेषु 'विभज्यान्वैच्छन्' त मन्वेष्टु, मेका एकस्मिन् देशे गतः, अन्यो देशान्तर मित्येताद्दशो विभाग इत्यर्थः। 'तम्' अन्विष्यमाण मिन्द्रं पितरो यागशीलाः† पूर्वेदुः 'अविन्दन्' अलभन्त, देवास्तु 'उत्तर मह्नः' उत्तरस्मिन् अहन्यविन्दन्। यस्मादेव तस्माल्लोकेऽपि पूर्वेदुः अमावास्यायां पितृभ्यः श्राद्धं क्रियते,

* 'हननामकं दैत्यं' ग। * † 'यागादिना' ग।

'उत्तर अहः' उत्तरस्मिन्नहनि प्रतिपदिने दर्शपूर्णमासयागादिना देवान् यजन्ते। इन्द्रस्य रक्षकत्वात् प्रशस्तानुष्टुबिति तात्पर्यार्थः॥

अथ मरुत्वतीयशस्त्रस्य प्रतिपत्तृचं* दर्शयति—"ते ऽब्रुवन्नभिषुणवामैव तथा वाव न आशिष्ठ मागमिष्यतीति, तथेति; तेभ्यषुणंस्त्रा त्वा रथं यथोतय इत्येवैन मावर्त्तयन्निदं वसो सुत मन्ध इत्येवैभ्यः सुतकौर्त्या माविरभवदिन्द्र नेदीय एदिहोत्येवैनं मध्यं प्रापादयन्त" इति। इन्द्रलब्ध्यावस्थिताः 'ते' देवाः परस्परमिद मब्रुवन्,—'अभिषुणवामैव' वयं सर्वथा सोमस्याभिषवं करवामः, 'तथा वाव' तेनैव प्रकारेण 'आशिष्ठम्' आशुतम मतिशीघ्रं यथा भवति तथा 'नः' अस्मान् इन्द्र आगमिष्यतीति। तद्वचन मङ्गीकृत्य 'ते' सर्वे 'अभ्यषुणवन्' अभिषवं कृतवन्तः। तादृशा 'ते' देवाः "आ त्वा रथं यथोतये"-इत्यनेनैव मन्त्रेण (सं०८.६८.१.) तस्मिन् मनुष्टुभः सकाशादभिषवदेशं 'प्रत्यावर्त्तयन्' अत्र किञ्चिदाकृष्टिवाचकम् "आ वर्त्तयामसि"-इति पदद्वयं ध्रियते, तस्मामर्थादिन्द्रस्याकृष्टिरभूत्। "इदं वसो सुत मन्धः"-'इति' अस्मिन् मन्त्रपादे (सं० ८.२.१.) 'सुतकौर्त्याम्' अभिषववाचिना सुतशब्देनैभ्यो देवेभ्य इन्द्रः 'आविरभवत्' प्रकटोऽभूत्। "इन्द्र नेदीय एदिहि" इतिमन्त्रगतेन (सं० ८.५३.५) समीपागमनवाचिना 'नेदीयः इहि' इतिपदद्वयेन 'एतम्' इन्द्रं यागदेशमध्वं प्रापितवन्तः। अनेनार्थवादेन तत्तन्मन्त्रविधिरुन्नेयः। एतदेवाभिप्रेत्याश्वलायन आह—"मरुत्वतीयं शस्त्रं शंसेदध्वर्यो शोंसावो मिति माध्यन्दिने शस्त्रादिष्वाङ्गाव आ त्वा रथं यथोतय इदं

* 'मन्त्रान्' घ।

वसो सुत मन्थ इति मरुत्वतीयस्य प्रतिपदनुचराविन्द्र नेदीय एदिहीतीन्द्रनिह्नवः प्रगाथः"-इति (५.१४.२-५.) । येन ऋचेन शस्त्रं प्रारभते, सोऽयं ऋचः प्रतिपदुच्यते ; तदनन्तरभावी ऋचोऽनुचरः । अत्र "आ त्वा रथम्"-"इदं वसो"-इत्येताहचौ प्रतिपदनुचरौ द्रष्टव्यौ । तत ऊर्ध्वमिन्द्रनिह्नवाख्यः "इन्द्र नेदीयः"-इति प्रगाथः, ऋग्द्वयात्मको द्रष्टव्य इत्यर्थः ॥

वेदनं प्रशंसति— "आगतेन्द्रेण यज्ञेन यजते, सेन्द्रेण यज्ञेन राध्नोति य एवं वेद"-इति । आगत इन्द्रो यस्मिन् यज्ञे, सोऽय मागतेन्द्रः : वेदिता ताहशेन यज्ञेन यजते, तथेन्द्रसहितेन यज्ञेन समृद्धो भवति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये
चतुर्थः खण्डः ॥ ४ (१५) ॥

॥ अथ पञ्चमः खण्डः ॥

इन्द्रं वै वृत्रं जघ्निवांसन्नास्तौतेति मन्यमानाः सर्वा देवता अजहुस्तं मरुत एव स्वापयो नाजहुः प्राणा वै मरुतः स्वापयः प्राणा ह्येवैनं तं नाजहुस्त्वादेषो ऽच्युतः स्वापिमान् प्रगाथः शस्यत आ स्वापे स्वापिभिरित्यपि ह यद्वैन्द्र मेवात ऊर्ध्वं छन्दः शस्यते

तद्व सर्वं मरुत्वतीयं भवत्येष वेदच्युतः स्रापिमान् प्रगाथः शस्यत आ स्रापे स्रापिभिरिति ॥ ५ (१६) ॥

पूर्वोक्त मिन्द्र नेदीय इत्यादिकं प्रगाथं शंसितु माख्यायिका माह— "इन्द्रं वै हतं जघ्निवांसं नास्तृतेति मन्यमानाः सर्वा देवता अजहुस्तं मरुत एव स्रापयो नाजहुः;—प्राणा वै मरुतः स्रापयः, प्राणा ह्येवैनं तं नाजहुस्; तस्मादेष श्च्युतः स्रापिमान् प्रगाथः शस्यत आ स्रापे स्रापिभिरिति"-इति। इन्द्रो यदा हतं हतवान्*, तदा तं मिन्द्रं सर्वा देवताः 'अजहुः' परित्यक्तवत्यः। कीदृश्यो देवताः? 'नास्तृतेति' न हिंसितवानिन्द्र इति मन्यमानाः। हतस्यातिप्रौढशरीरत्वात् प्रहारमात्रेणासौ न मृत इति देवतानां भ्रान्तिः। इतरदेवताभिः परित्यक्तं 'तम्' इन्द्रं 'मरुत एव नाजहुः' न परित्यक्तवन्तः। तत्रिशेषणं 'स्रापयः'-इति, सुषुप्तिकालेऽपि वर्त्तमाना इत्यर्थः। स्रापिशब्दार्थः श्रुत्यैव प्रदर्श्यते—'प्राणा वै' देहमध्ये वर्त्तमानाः प्राणा एव 'स्रापयो मरुतः' स्रापकालानुवर्त्तिनो वायवः। प्राणानां तत्कालानुवृत्तिं माथर्वणिकाः प्रश्नोत्तराभ्यां मामनन्ति—"भगवन्नेतस्मिन् पुरुषे कानि स्रपन्ति? कान्यस्मिन् जाग्रति?"-इति (प्र० उप० ४.१.) प्रश्नः। "प्राणाग्नय एवैतस्मिन् पुरे जाग्रति"-इति (प्र० उप० ४.३.) उत्तरम्। एवंविधा यस्मात् प्राणरूपा मरुत एवैन मिन्द्रं तदानीं न परित्यक्तवन्तः 'तस्मात्' कारणात् 'एषः' "इन्द्र नेदीयः"-इत्यादिकः (स० ८.५३.५.) 'स्रापिमान् प्रगाथः' 'श्च्युतः' मरुत्वतीयशस्त्रे सर्वथाप्यपरित्यक्तः शस्यते। स्रापि-शब्दो

* "तत्रोपसार्यन पुरुषवर्णा भवन्ति"-इति च निरु० २.५.२।

यस्मिन् प्रगाथेऽस्ति, सोऽयं स्वापिमान्;—"आ स्वापे स्वापिभिः"—इत्ययं पादोऽस्मिन् प्रगाथे आम्नायते, तस्मादयं स्वापिमान् ॥

इत्थमिन्द्रनिह्वाख्यं प्रगाथं प्रशस्य पुनरपि प्रकारान्तरेण तमेव प्रशंसति— "अपि ह यदैन्द्र मेवास्य जहुं छन्दः शस्यते, तद्ध सर्वं मरुत्वतीयं भवत्येष वेदच्युतः स्वापिमान् प्रगाथः शस्यत आ स्वापे स्वापिभिरिति"—इति। 'अपि ह' अपि च 'अतः' एतत्-प्रगाथशंसनाद्धेतोः मस्मिन्मरुत्वतीयशस्त्रे 'यदैन्द्र मेव छन्दः' ऐन्द्र-सम्बन्धेव छन्दः-शब्दोपलक्षितो मन्त्रः शस्यते, 'तद्ध सर्वं' तदपि मन्त्रजातं मरुत्वतीयं शस्त्रं भवति। एष वेदित्यादिना तत्र युक्ति-रुच्यते — "आ स्वापे स्वापिभिः" इतिपादोपेतत्वेन 'स्वापिमान्' एष प्रगाथः 'अच्युतयेत्' अपरित्यक्तश्चेत्, तदा मरुत्वतीयं भवति; स्वापिशब्दवाच्यानां मरुतां प्रतिपादकत्वादित्यर्थः। सोऽयं प्रगाथः शाखान्तरे द्रष्टव्यः * ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये
पञ्चमः खण्डः ॥ ५ (१६) ॥

---

* यद्यप्ययं सर्वोऽपि प्रगाथः क्वचित् क्वचित् शाकलशाखीयसंहितायामपि वालखिल्यान्त-र्गतत्वेन दृश्यते, तथा सूक्तस्य स्वात्मसूक्तत्वभङ्गेन; परं नैष शाकलशाखीयोऽपि त्वयं वाष्कल-शाखीयः। अतएव शाकलसंहिताव्याख्याने वेदार्थप्रकाशे न व्याख्यातं तत्रावश्यत्वं कार्यं मेतेन सायणाचार्येण; तथैवैतत्पुराणं 'शाखान्तरे द्रष्टव्यः'—इति।

॥ अथ षष्ठः खण्डः ॥

ब्राह्मणस्यैतं प्रगाथं शंसति बृहस्पतिपुरोहिता वै देवा अजयन्त्स्वर्गं लोकं व्यथिंल्लोके ऽजयन्त तथैवैतद्यजमानो बृहस्पतिपुरोहित एव जयति स्वर्गं लोकं व्यथिंल्लोके जयते तौ वा एतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते तदाहुर्यन्न किञ्चनास्तुतं सत्पुनरादायं शस्यते ऽथ कस्मादेतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते इति पवमानोक्थं वा एतद्यन्मरुत्वतीयं षट्सु वा अत्र गायत्रीषु स्तुवते षट्सु बृहतीषु तिसृषु त्रिष्टुप्सु स वा एष त्रिच्छन्दाः पञ्चदशो माध्यन्दिनः पवमानस्तदाहुः कथं त एष त्रिच्छन्दाः पञ्चदशो माध्यन्दिनः पवमानो ऽनुशस्तो भवतीति ये एव गायत्र्या उत्तरे प्रतिपदौ यो गायत्रो ऽनुचरस्ताभिरेवास्य गायत्रो-ऽनुशस्ता भवन्त्योताभ्या मेवास्य प्रगाथाभ्यां बृहत्यो ऽनुशस्ता भवन्ति तासु वा एतासु बृहतीषु सामगा रौरवयौधाजयाभ्यां पुनरादायं स्तुवते तस्मादेतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते तच्छस्त्रेण स्तोत्र मन्वेति ये एव त्रिष्टुभौ धाय्ये यत् त्रैष्टुभं निविद्धानं ताभिरेवास्य त्रिष्टुभो ऽनुशस्ता भवन्त्योव

मु हास्यैष चिच्छन्दाः पञ्चदशो माध्यन्दिनः पवमानो ऽनुशस्तो भवति य एवं वेद ॥ ६ (१७) ॥

अथाग्निमरुत्वतीये शस्त्रे "प्र नूनं ब्रह्मणस्पतिः"-इत्यादिकं प्रगाथं (सं० १.४०.५.) विधत्ते — "ब्राह्मणस्पत्यं प्रगाथं शंसति" -इति । द्वयोर्ऋचोः समूहः प्रगाथः । तथा चाश्वलायन आह— "ऋचः प्रतिपदनुचरा ऋचाः प्रगाथाः"-इति (५.१४.७.) । ऋग्द्वयमेवानुष्ठानकाले ऋचरूपेण प्रयुज्यते, तस्मादयं प्रगाथ इत्युच्यते * ॥

विहितं ब्राह्मणस्पत्यं प्रशंसति— "बृहस्पतिपुरोहिता वै देवा अजयन्त्स्वर्गं लोकं व्यस्निंल्लोके ऽजयन्त, तथैवैतद्यजमानो बृहस्पतिपुरोहित एव जयति स्वर्गं लोकं व्यस्निंल्लोके जयति"-इति । योऽयं प्रगाथे ब्रह्मणस्पतिराम्नातः, सोऽयं बृहस्पतिः ; तस्य ब्राह्मणजातिस्वामित्वात् । स च बृहस्पतिः पुरोहितो येषां देवानां ते 'बृहस्पतिपुरोहिताः' । तथा च श्रुत्यन्तरे समाम्नातम्— "बृहस्पतिर्देवानां पुरोहित आसीत्"-इति । पौरोहित्यमित्यर्थ एव चतुर्विंशतिरात्रनामकं सत्रं मन्त्रलिङ्गात् । तदपि श्रुत्यन्तरे एवाम्नातम्— "बृहस्पतिरकामयत अन्ने देवा दधीरन् गच्छेयं पुरोधा मिति, स एतं चतुर्विंशतिरात्रमपश्यत्" इति (तै० सं० ७. ४. १. १.) † तादृशा बृहस्पतिपुरोहिता देवा अनेन प्रगाथेन स्वर्गं लोकं जित्वा भूर्लोकेऽपि विजयं प्राप्ताः । तथैव तत्पाठेनेदानीन्तनोऽपि यजमानो 'बृहस्पतिपुरोहित एव' बृहस्पत्यनुग्रहयुक्त एव सन् लोकद्वयं जयति ॥

---

* सा० सं० भा० भू० २५–३८ पृ० द्र० ।

† "अथस्त्रिंशदि देवा बृहस्पतिपुरोहिताः"-इति श्रुत० ब्रा० १२. ८. ३. २९ ।

अत्र किञ्चिच्चोद्य मुद्भावयति— "सो वा एतौ गायत्रावसुतौ सन्तौ पुनरादायं शस्येते ; तदाहुर्यत्र किञ्चनासुतं सत् पुनरादायं शस्यते ; अथ कस्मादेतौ प्रगाथावसुतौ सन्तौ पुनरादायं शस्येते ? इति"-इति। समाम्नाते हे एव ऋचौ प्रयथनेन तत्त्वरूपतया सम्पादेते। प्रयथनप्रकार उच्यते—"प्र नूनं ब्रह्मणस्पतिः"-इत्येषा बृहती-च्छन्दस्का ; द्वादशाक्षरेण तृतीयपादेनाष्टाक्षरैश्चान्त्यैर्युक्ततया षट्-त्रिंशदक्षरसम्पन्नैः। सेय मृक् सकृत् पठनीया, पुनरपि तत्त्व मष्टाक्षरं चतुर्थपादं द्विरभ्यास्य षोडशाक्षरोऽर्धर्चः सम्पादनीयः। उत्तरस्या मृचि प्रथमपादो द्वादशाक्षरः, द्वितीयपादोऽष्टाक्षरः ; एतत् सर्वं मिलित्वा द्वितीया बृहती सम्पद्यते। तत्त्व मन्तिम मष्टाक्षरं पादं द्विरभ्यस्य समाम्नाते उत्तरार्धे द्वादशाक्षरं प्रथमपाद मष्टाक्षर मुत्तरपादं च पठित्वा तृतीया बृहती सम्पादनीया। अथ मेव प्रयथनप्रकारः "इन्द्र नेदीय एदिहि"-इत्यत्रापि प्रगाथे (६८ पृ०) योजनीयः। तावेतौ प्रगाथौ 'पुनरादायं' पुनः-पुनः पठित मेव पाद मादाय शस्येते। सामगैस्तु माध्यन्दिनपवमाने प्रगा-थावेतावसुतौ *। तैरसुतयोः होत्रा शंसन मयुक्तम् ; न ह्यन्यत्र क्वचिदपि सामगैरसुतं मन्त्रजातं पुनः-पुनरादायं शस्यमानं दृष्टम्। एवं सति कस्मात्कारणादसुतयोरत्र शंसन मिति चोद्य-वादिन माहुः॥

एतच्चोद्य मवस्थाय परिहार मनुक्रमेव चोद्यान्तर मुद्भावयति — "पवमानोक्थं वा एतद्यद्बार्हतीयं षट्सु वा अत्र गायत्रीषु स्तुवते, षट्सु बृहतीषु, तिसृषु त्रिष्टुप्सु, स वा एष त्रिच्छन्दाः, पञ्चदशो माध्यन्दिनः पवमानस्तदाहुः कथं न एष त्रिच्छन्दाः पञ्चदशो

* 'प्रगाथावेतौ न सुतौ' इ।

माध्यन्दिनः पवमानो अभिशस्तो भवतीति"–इति । अस्तृतीयशस्त्रं यदस्ति, तत् 'एतत्' 'पवमानोक्थं' माध्यन्दिनपवमानसम्बन्धि शस्त्रम् । 'अत्र' माध्यन्दिनपवमानशस्त्रे "उषा ते आतम्"–इत्यादिषु 'षट्सु गायत्रीषु' प्रथमं स्तुवते* । ततः "पुनानः सोम"–इत्यादिषु 'षट्सु बृहतीषु' स्तुवते † । यद्यप्ययं ब्रूचाभागः प्रगाथः, तथापि पूर्वोक्तन्यायेन प्रथम (७२५० ५पं०) तिस्रो बृहत्यः सम्पादनीयाः । तासु च रौरवसाम प्रागुद्गातव्यम्, तत उपरि यौधाजयं साम गातव्यम् ; एवं सति तिस्रो बृहत्यः सामद्वयार्थं द्विरावर्त्यमानाः षट् सम्पद्यन्ते । तथा "प्र तु द्रव"–इत्यादिषु (उ० ग्रा० १.१.१०.१–३.) 'त्रिष्टुप्सु त्रिष्टुप्सु' स्तुवते ‡ । एवं सति स एष

---

* छन्दोगाचार्ये 'उषा ते शत्रम्'–इति, 'स न बृहाय'–इति, 'एवा विश्वानि'–इति, ऋक्त्रयात्मा समूह ऐकं बृहच्छस्त्रं साधारं भवति (उ० ग्रा० २. १. ८. १–३.) । तत्र 'गायत्रेण स्तुत्वा'–इत्यादि ब्राह्मणशासनात् (ता० ब्रा० ७. ३. ११.) अग्निष्टोमीयमाध्यन्दिनपवमाननिष्पत्तये 'गायत्रं' नाम साम गातव्यं भवति । तत्स्वरूपन्तु गुरुमुखादवगन्तव्यं प्रयोगादिदर्शनाभावात् 'अयम्, प्रकाशितश्च तस्या सामसंज्ञेति । ततश्चैव तथाभूतं सूक्तं साधित्वा 'निधनवत्, स्तुवन्ति'–इत्यादिब्राह्मणशासनात् (ता० ब्रा० ७. ३. १२.) तदर्थं मेव 'आसङ्गीयं' नाम साम च गातव्यं भवति । यदेव ऊहगानमयत्वादिदं साम । अदित्यं गायत्रमैरवसामद्वयार्थं द्विरावर्त्यमानास्त्रिष्वेव ऋचः षट् सम्पद्यन्ते ।

† अत्रि छन्दोगाचार्ये 'पुनान. सोम'–इति, 'दृष्टाग ऊधर्दिव्यम्'–इति, ऋक्त्रयात्मक मेव पतत् (उ० ग्रा० १ १. ६. १, २.)। तत्र 'ऐडन बृहती साधयन्ति'–इत्यादिब्राह्मण शासनात् (ता० ब्रा० ७. ३ १४.) अग्निष्टोमीयमाध्यन्दिनपवमाननिष्पत्तये 'रौरवं' नाम साम गातव्यं भवति। ऋचश्च तद्दृष्टाग्ने (१. १. २.)। ततश्च मेव ब्रूचं सूक्तं साधित्वा 'तथापि त्रिष्विधनम्'–इत्यादिब्राह्मणशासनात् (ता० ब्रा० ७. ३. १७.) तदर्थं मेव 'यौधाजयं' नाम साम च गातव्यं भवति । तदपि ऋचश्चैव तत उत्तरम् (ऊ० गा० १. १. ३.)।

‡ 'त्रैष्टुभं'-नामेति शेषः। तत्र ऋचश्चैव यौधाजयसामत्वेन मेव (ऊ० गा० १. १. ४.)। 'अनिधनवन्ती भवति'–इत्यादि च तद्विधायकं ब्राह्मणम् (७. ३. २२.)।

माध्यन्दिनपवमानः 'त्रिच्छन्दाः' भवति * ; गायत्री-बृहती-त्रिष्टुब्रूपाणां त्रयाणां छन्दसां सद्भावात्। तथा स पवमानः पञ्चदशस्तोमोपेतः। तस्य च स्तोमस्य प्रकारः छन्दोगब्राह्मणे एव मान्नायते—"पञ्चभ्यो हिङ्करोति, स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः"—इति (ता०ब्रा०३.४.१.)। अस्याय मर्थः—तृचात्मक मेकं सूक्तं चिरावर्त्तनीयम्। तत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासो विधेयः, द्वितीयावृत्तौ मध्यमायाः, तृतीयावृत्तौ चरमायाः। एवं प्रतिसाम सावृत्ताभिः पञ्चदशभिः ऋग्भिरुपेतत्वात्पञ्चदशस्तोम इति। एवं सत्यत्र चोद्यवादिन आहुः,—हे होतः! ते 'एषः' यथोक्तलक्षणः 'पवमानः' कथं भरुत्वतीयशस्त्रेणानुशस्तो भवति? अनुशंसनं चान्याय्यम्; "यथा वाव स्तोत्र मेवं शस्त्रम्"—इतिन्यायात्। अतो ऽत्र स्तोत्रशस्त्रयोर्वैलक्षण्य मयुक्त मिति चोद्यान्तरम्॥

तत्र द्वितीयस्य चोद्यस्य तावदुत्तरं दर्शयति—"ये एव गायत्रा उत्तरे प्रतिपदो यो गायत्रो ऽनुचरस्ताभिरेवास्य गायत्रोऽनुशस्ता भवन्तीतराभ्या मेवास्य प्रगाथाभ्यां बृहत्योऽनुशस्ता भवन्ति"—इति। "आ त्वा रथम्"—इत्यग्निर्भरुत्वतीयशस्त्रस्य (६५ पृ०) प्रतिपदृचे तृचे प्रथमा ऋगनुष्टुबेव, 'उत्तरे' प्रतिपदृचे द्वे ऋचौ गायत्र्यौ विदीते; यस्याश्च: "इदं वसो सुत मन्धः"—इति (६६ पृ०) अनुचराख्यसूक्तस्य गायत्रः; 'ताभिरेव' पञ्चभिर्गायत्रीभिः 'अस्य' होतुः

* "माध्यन्दिनं सवनं पुरुषे त्रिभिश्च छन्दोभिः पञ्चभिश्च सामभिः"—इति ता० ब्रा० ७.३.२। गायत्रीत्रिष्टुब्बृहतीभिश्छन्दोभिः, गायत्रसहोयवरौरवर्यौधाजयौग्नेय सामभिरित्यर्थः।

पवमानस्तोत्रगता गायत्रो ऽनुशस्ता भवन्ति । "इन्द्र नेदीयः"-इति (६६ पृ०) योऽयमिन्द्रनिह्नवः प्रगाथः, यच्च "प्र नूनं ब्रह्मण-स्पतिः"-इति (७१ पृ०) ब्राह्मणस्पत्यः प्रगाथः, 'एताभ्याम्' उत्त-राभ्यां * पवमानस्तोत्रगताः 'बृहत्यः' अनुशस्ता भवन्ति ; प्रग्रथ-नेन बृहतीसम्पादनस्योभयत्र समानत्वात् ॥ यत् त्रिष्टुभा मनुशंसनं तदुपरिष्टादभिधास्यते (१७ पं०) ॥

अथ प्रसङ्गात् प्रथमचोद्यस्यापि (७२पृ०१पं०) परिहारं दर्शयन् पुनःपुनरादानस्यानुशंसनं दर्शयति— "तासु वा एतासु बृहतीषु सामगा रौरवयौधाजयाभ्यां पुनरादायं स्तुवते ; तस्मादेतौ प्रगाथा-वस्तुतो सन्तौ पुनरादायं शस्येते, तच्छस्त्रेण स्तोत्रं सम्वेति"-इति । "पुनानः सोम"-इत्यस्मिन् प्रगाथे या बृहत्यः प्रग्रथनेन सम्पादिताः, 'तासु' एतासु बृहतीषु रौरवाख्येन यौधाजयाख्येन च साम्ना पुनः-पुनः पठित मेव पाद मादायादाय स्तुवते ; तस्मात् 'एतौ' इन्द्रनिह्नव-ब्राह्मणस्पत्यप्रगाथौ सामगैरस्तुतावपि सन्तौ होत्रा पुनः पुनः पठित मेव पाद मादायादाय शस्येते । तथा च सत्यं होता स्वकीयेन शस्त्रेण स्तोत्र मनुगच्छति ॥

इदानीं त्रिष्टुभा मनुशंसनं दर्शयति— "ये एव त्रिष्टुभौ धाय्ये, यत् त्रैष्टुभं निविद्धानं, ताभिरेवास्य त्रिष्टुभो ऽनुशस्ता भवन्ति" इति । यथा सामिधेनीषु प्रक्षिप्यमाणाना † मृचां धाय्येति सञ्ज्ञा ‡, एव मत्रापि । तथा मति "अग्निर्नेता भग इव क्षितीनाम्"-इत्येका (सं० ३.२०.४.) धाय्या, "त्वं सोम क्रतुभिः"-इत्यपरा (सं० १.९१.२.), 'ये एव' त्रिष्टुपृक्तन्दस्के धाय्ये विद्येते, यच्च त्रिष्टुपृक्तन्दस्कं "जनिष्ठा उग्रः"-इत्यादिकं (सं० १०.७३.१.)

* 'उभाभ्यां' घ । † 'प्रक्षिप्यमाणा' घ । ‡ ! भा० २१५० ४० ।

'निविद्धानं' सूक्तम्,—निविद्यन्ते निधीयन्ते यस्मिन् सूक्ते तत् निविद्धानम् ; 'ताभिरेव' सूक्तगताभिर्धाय्यासहिताभिस्त्रिष्टुब्भिः 'यज्ञ' स्तोतुः स्तोत्रगताः 'त्रिष्टुभः' अनुशस्ता भवन्ति ॥

उक्तार्थवेदनं प्रशंसति— "एव मु ह्यस्यैष त्रिच्छन्दाः पञ्चदशो माध्यन्दिनः पवमानो ऽनुशस्तो भवति य एवं वेद" इति ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये षष्ठः खण्डः ॥ ६ (१७) ॥

॥ अथ सप्तमः खण्डः ॥

धाय्याः शंसति धाय्याभिर्वै प्रजापतिरिमांल्लोकानधयद्यं यं काम मकामयत तथैवैतद्यजमानो धाय्याभिरेवेमांल्लोकान् धयति यं यं कामं कामयते य एवं वेद यदेव धाय्याश्चः यच्च यच्च वै देवा यज्ञस्य च्छिद्रं निरजानंस्तद् धाय्याभिरपिदधुस्तद् धाय्यानां धाय्यात्वं मच्छिद्रेण ह्यस यज्ञेनेष्टं भवति य एवं वेद यद्वेव धाय्याश्चः सूमहे तद्यज्ञस्य यद्धाय्यास्तद्यथा सूच्या वासः सन्दधदियादेव मेवैताभिर्यज्ञस्य च्छिद्रं सन्दधदेति य एवं वेद यद्वेव धाय्याश्चः तान्वा

एतान्युपसदा मेवोक्थानि यद् धाय्या अग्निर्नेते-त्याग्नेयी प्रथमोपसत्तस्या एतदुक्थं त्वं सोमक्रतुभि-रिति सौम्या द्वितीयोपसत्तस्या एतदुक्थं पिन्वन्त्यप इति वैष्णवी तृतीयोपसत्तस्या एतदुक्थं यावन्त ह वै सौम्येनाध्वरेणेष्ट्वा लोकं जयति त मत एकैकयोप-सदा जयति य एवं वेद यश्चैवं विद्वान् धाय्याः शंसति तद्वैक आहुस्तान्वो मह इति शंसेदेतां वाव वयं भरतेषु शस्यमाना मभिव्यजानीम इति वदन्त स्तत्तन्नाद्रत्यं यदेतां शंसेदीश्वरः पर्जन्यो ऽवर्षी:* पिन्वन्त्यप इत्येव शंसेद्वृष्टिवनि पदं मरुत इति मारुत मस्यं न मिहे वि नयन्तीति विनीतवद्यद्विनीतवत्तद्वि-क्रान्तवद्यद्विक्रान्तवत्तद्वैष्णवं वाजिन मितीन्द्रो वै वाजी तस्या वा एतस्या चत्वारि पदानि वृष्टिवनि मारुतं वैष्णव मैन्द्रं सा वा एषा तृतीयसवनभाजना सती मध्यन्दिने शस्यते तस्माद्वेदं भरतानां पशवः सायङ्गोष्ठाः सन्तो मध्यन्दिने सद्वविनी मायन्ति सो जगतो जागता हि पशव आत्मा यजमानस्य मध्य-न्दिनस्तद्यजमाने पशून् दधाति ॥ ७ (१८) ॥

मरुत्वतीयशस्ते प्रक्षेपणीया ऋचो विधत्ते— "धाय्याः शंसति"

* 'उवर्षी:' क, ख ।

—इति। "अग्निर्नेता" -इत्येका (सं०३.२०.४.), "त्वं सोम क्रतुभिः" इति द्वितीया (सं०१.९१.२.), पिन्वन्त्यपः"—इति तृतीया (सं० १.६४.६.) ; ताः शंसेत् ॥

तासां प्रशंसा माह— "धाय्याभिर्वै प्रजापतिरिमांल्लोकान-धयद् यं यं काम मकामयत"—इति। पुरा प्रजापतिर्यं यं लोकं कामितवान्, तानिमान् लोकानुक्ताभिर्धाय्याभिः 'अधयत्' अपि-बत्। लोकशब्देन जलम्। * * * ॥

वेदनं प्रशंसति— "तथैवैतद्यजमानो धाय्याभिरेवेमांल्लोकान् धयति यं यं कामं कामयते य एवं वेद यदेव धाय्याः"—इति। या एवोक्ता धाय्याः सन्ति, ताभिर्वेदिता यजमानः कामितं लोकं धयति॥ अत्र धयत्याभिरिति 'धाय्या'-शब्दनिर्वचन मर्थाद्दर्शितम् ॥

प्रकारान्तरेण प्रशंसा माह —"यत्र यत्र वै देवा यज्ञस्य च्छिद्रं निरजानंस्तद्धाय्याभिरपिदधुस्तद्धाय्यानां धाय्यात्वम्"- इति। यज्ञ-सम्बन्धिनि यस्मिन्-यस्मिन्नङ्गे 'छिद्रं' वैकल्यं देवा निर्ज्ञातवन्तः, 'तत्' छिद्रं धाय्याभिः 'अपिदधुः' आच्छादितवन्तः॥ तस्माद्धा-त्याभिरिति व्युत्पत्त्या धाय्यात्वं सम्यक्त्वम् ॥

वेदनं प्रशंसति— "अच्छिद्रेण ह्यस्य यज्ञेनेष्टं भवति य एवं वेद यदेव धाय्याः" इति। 'यदेव'-इत्यत्र योऽयं मुकारः, सोऽयं पूर्वेण फलेन समुच्चयार्थः ;— न केवलं पूर्वं फलं किं त्वित मपी-त्यर्थः। अत्र पूर्ववत् श्रुतिः प्रशंसाद्योतनार्था ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "स्यूमङ्कै तद्यज्ञस्य यद्धाय्या-स्तद्यथा सूच्या वासः सन्दधदियादेव मेवैताभिर्यज्ञस्य च्छिद्रं सन्दधदेति य एवं वेद यदेव धाय्याः" इति ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "तान्यु वा एतान्युपसदा

मेवोक्थानि यद्याज्याः ; अग्निर्नेतेत्याग्नेयी प्रथमोपसत्, तस्या एतदुक्थं ; त्वं सोमक्रतुभिरिति, सौम्या द्वितीयोपसत्, तस्या एतदुक्थं ; पिन्वन्त्यप इति, वैष्णवी तृतीयोपसत्, तस्या एतदुक्थम्" इति । उपसदा मर्थवादे अग्निरनीकं, सोमः शस्त्रं, विष्णुस्तेजन मिति प्रस्तुत्य अग्न्यादिदेवताकास्तिस्र उपसदः समाम्नाताः* ; अत्रापि 'अग्निर्नेता' इत्यादयस्तद्देवताका एव धाय्याः श्रुताः । एकैका धाय्या एकैकस्य उपसदः शस्त्रम् ॥

उक्तार्थवेदनं, तत्पूर्वकं शंसनं च प्रशंसति— "यावन्तं ह वै सौम्येनाध्वरेणेष्ट्वा लोकं जयति, त मत एकैकयोपसदा जयति,—य एवं वेद, यथैवं विद्वान् धाय्याः शंसति" इति । वेदिता शंसिता च एकैकधाय्यारूपयोपसदा कृत्स्नं सोमयागफलं प्राप्नोति । उपसत्सम्बन्धिशस्त्रत्वेनाभिहितत्वादुपसत्त्वोपचारः ॥

अत्र कश्चित् पूर्वपक्षं सुपन्यस्यति— "तदेक आहुस्तान्वो मह इति शंसेदेतां वाव वयं भरतेषु शस्यमाना मभिव्यजानीम इति वदन्तः"—इति । 'तद' तत्रैव तृतीयधाय्याविषये केचिदेव माहुः,— "तान्वो मह्रो मरुतः" —इत्येतां (सं० २. ३४. ११.) वैष्णवीं तृतीयां धाय्यां शंसेत्, न तु "पिन्वन्त्यपः" इत्येताम् (७८ पृ०) । तत्रोपपत्तिं चैव माहुः,—बिभर्त्ति फल मिति भरो यज्ञः, तं भरं तन्वन्तीति 'भरताः' ऋत्विजः ; तेषु पूर्वकालीनेषु "तान्वो मह्रः"—इत्येता मेवर्चं शस्यमानां वय मभिव्यजानीम इति स्वानुभवमितरेषा मग्रे वदन्तस्तां पूर्वपक्षं माहुः ॥

तं निराचष्टे— "तत्तवाट्टत्यम्"—इति । तद्विषयं तन्मतं नादरणीयम् । विपक्षे बाधकं दर्शयति— "यदेतां शंसेदीश्वरः

* १ भा० १८० पृ० ४ पं० द्रष्टव्यम् ।

पर्जन्यो ऽवर्षीः"-इति । 'यत्' यदि होता "तान्वो मघः"-इति 'एताम्' ऋचं शंसेत्, तदानीं 'पर्जन्यः' मेघः स्वस्मकालेषु 'अवर्षीत्' ईश्वरः' वृष्टिराद्रित्यं कर्तुं समर्थो भवति,— वृष्टिर्न भवेत् ; वृष्ट्यनुरूपाणां पदानां तस्या सत्यभावादित्यर्थः ॥

सिद्धान्तं दर्शयति— "पिन्वन्त्वप इतीव शंसेद्"-इति । इयमेव व्याख्या, न तु "तान्वो मघः"-इत्यादिकापि । अत्र विहितायाः ऋचि वृष्ट्यनुकूलपदसद्भावं दर्शयति— "वृष्टिवनि पदं, मरुत इति मारुतम्, अत्यं न मिहे वि नयन्तीति विनीतवद्,— यद्विनीतवत्, तद्विक्रान्तवद्,—यद्विक्रान्तवत्, तद्वैष्णवं, वाजिन मितीन्द्रो वै वाजी ; तस्यां वा एतस्यां चत्वारि पदानि,—वृष्टिवनि, मारुतं, वैष्णवम्, ऐन्द्रम्" इति । अत्र† 'पिन्वन्त्वपः'-इति पदं श्रूयते, तत् सेचनार्थम् ; 'पिवि सेचने'-इत्यस्मात् (स्वा० ५८८) धातोरुत्वात् । 'मरुतः'—इति मारुतं पदम्, तदपि वृष्ट्यनुकूलम् ; पुरोवातस्य वृष्ट्यङ्गत्वात् । "अत्यं न मिहे वि नयन्ति वाजिनम्" इतितृतीयपादे विनीतवत्पदमस्ति ; 'वि नयन्ति' इत्यत्र नयतिधातुर्जन्यत्वात् । तेन च विनयेन वृष्टिपातनं लक्ष्यते । किञ्च यद्विनीतवत्पदम्, तद्विक्रान्तवदित्यस्य मर्थमाचष्टे ; धातूनामनेकार्थत्वात् । तथा सति यद्विक्रान्तवत्पदम्, तद् 'वैष्णवं' विष्णुमन्वस्ति ; "इदं विष्णुर्विचक्रमे"-इति (सं० १. २२. १७.) श्रुत्यन्तरात् । तथा सति वैष्णव्यास्तृतीयस्या उपसदः सम्बन्धनमपि भवतीत्यर्थः । तस्मिन्नेव तृतीयपादे 'वाजिनम्'-इति

---

* अवैलीसुनि रूपम् (पा० ३.४.९) ।

† "पिन्वन्तापो मरुतः सुदानवः पयो घृतवद् विदथेष्वाशवः । अत्यं न मिहे वि नयन्ति वाजिनं वृषणो मत्सरासः सुदानवः ॥"-इति (सं० १.६४.६.) एतस्या ऋचि ।

यद्वै विद्यते, तत्रेन्द्रो वाजिशब्दार्थः ; हृष्टिद्वारात्मप्रदत्वेन वाजोऽन्न मर्हास्तीति निर्वक्तुं शक्यत्वात्। उक्तेन प्रकारेण 'तस्याम्' एवैतस्याम् "पिम्बन्त्यपः" —इत्यृचि चत्वारि पदानि हृष्टेरनुकूलानि, —हृष्टिवनि, मारुतं, वैश्वदेवम्, ऐन्द्रं चेति *। तस्मादेव पूर्वोक्तदोषो नास्तीत्यर्थः ॥

पुनरप्येता मृचं प्रकारान्तरेण प्रशंसति— "सा वा एषा तृतीयसवनभाजना सती मध्यन्दिने शस्यते ; तस्माद्वेदं भरतानां पशवः सायङ्गोष्ठाः सन्तो मध्यन्दिने सङ्गविनो मायन्ति ; सो जगती ; जागता हि पशव, आत्मा यजमानस्य मध्यन्दिनसवनयजमाने पशून् दधाति"—इति। येयं "पिम्बन्त्यपः"—इत्यृगस्ति, सैवैव 'तृतीयसवनभाजना' जगतीच्छन्दस्कत्वाज्जागतस्य तृतीयसवनस्य योग्या। तादृशी सती होत्रा मध्यन्दिने शस्यते। तस्मादेव कारणादिदं लोके दृश्यते,— सायंकाले गोष्ठे व्रजे ये पशवस्तिष्ठन्ति, ते 'सायङ्गोष्ठाः', 'भरतानाम्' ऋत्विजां पशवस्तादृशाः सन्तो मध्यन्दिने 'सङ्गविनीं' सङ्गवकालयोग्यां शालाम् 'मायन्ति' प्राप्नुवन्ति। अयं भावः— ये पशवः क्षीरं दुहन्ति, ते सायं गृहं मागच्छन्ति ; ये तु न दुहन्ति, ते सायं व्रजे एव निवसन्ति ; उभयविधा अपि ते मध्याह्नकाले घर्मकालोत्तप्तसन्तापनिवारणाय निर्मितां सङ्गवकालयोग्यां शालां मागच्छन्ति ;—तदेतन्मध्याह्नपाठनिमित्तमिति। किञ्च 'सो' सा पूर्वोक्ताप्यृग् जगतीच्छन्दस्का, पशवश्च जगतीच्छन्दसा सह प्रजायन्ते,— मध्यदेशादुत्पन्न-

* (१) 'हृष्टिवनि' हृष्टिसम्भजनकारि पिम्बन्तीति। (२) 'मारुतं' मरुत इति। (३) 'वैश्वदेवम्' विश्वयन्तीति। (४) 'ऐन्द्रम्' वाजिन मिति।

स्यात्* 'जागताः', मध्यन्दिनकालश्च यजमानस्यात्मा। तथा सति तस्मिन् काले जगतीपाठेन यजमानं पशून् सम्पादयति† ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये सप्तमः खण्डः ॥ ७ (१८) ॥

॥ अथ अष्टमः खण्डः ॥

मरुत्वतीयं प्रगाथं शंसति पशवो वै मरुतः पशवः प्रगाथः पशूना मवरुद्ध्यै जनिष्ठा उग्रः सहसे तुरायेति सूक्तं शंसति तद्वा एतद् यजमानजननमेव सूक्तं यजमानं ह वा एतेन यज्ञाद्देवयोन्यै प्रजनयति तत्सञ्चयं भवति सं च जयति वि च जयत एतद्गौरिवीतं गौरिवीतिर्ह वै शाक्त्यो नेदिष्ठं स्वर्गस्य लोकस्यागच्छत् स एतत्सूक्त मपश्यत् तेन स्वर्गं लोक मजयत्तथैवैतद्यजमान एतेन सूक्तेन स्वर्गं लोकं जयति तस्याङ्गाः शस्त्वार्धाः परिशिष्य मध्ये निविदं दधाति स्वर्गस्य हैष लोकस्य रोहो यन्निवित् स्वर्गस्य

---

* १ भा० २०५ पृ० १९ पं०। ता०ब्रा० ६.१.१० ।

† "अग्निर्नेता, त्वं सोम क्रतुभिः, पिबत्वग्न इति धाय्याः"-इति आश्व० श्रौ०५.१४.१७ ।

हैतल्लोकस्याक्रमणं यन्निविद् ता माक्रममाण एव शंसेदुपैव यजमानं निगृह्णीत योऽस्य प्रियः स्यादिति नु स्वर्गकामस्याथाभिचरतो यः कामयेत ऋचैव विशं हन्या मिति चिस्तर्हि निविदा सूक्तं विशंसेत् ऋचं वै निविद् विट् सूक्तं ऋचैवैव तद्विशं हन्ति यः कामयेत विशा ऋचं हन्या मिति चिस्तर्हि सूक्तेन निविदं विशंसेत् ऋचं वै निविद् विट् सूक्तं विशैव तत् ऋचं हन्ति य उ कामयेतोभयत एनं विशः पर्यवच्छिनदानीत्युभयतस्तर्हि निविदं व्याहरयीतोभयत एवैनं तद्विशः पर्यवच्छिनत्तीति न्वभिचरत इतरथा त्वेव स्वर्गकामस्य वयः सुपर्णा उप सेदुरिन्द्र मित्युत्तमया परिदधाति प्रियमेधा ऋषयो नाधमानाः अप ध्वान्त मूर्णुहीति येन तमसा प्रावृता मन्येत तन्मनसा गच्छेदप हैवास्मात्तल्लुप्यते मूर्ध्नि चक्षुरिति चक्षुषी मरीमृज्येतांजरसं ह चक्षुष्मान् भवति य एवं वेद मुमुग्ध्यस्मान्निधयेव बद्धानिति पाशा वै निधा मुमुग्ध्यस्मान् पाशानिव बद्धानित्येव तदाह ॥८(१९)॥

अथ प्रयाथान्तरं विधत्ते— "मरुत्वतीयं प्रगाथं शंसति; पशवो वै मरुतः, पशवः प्रगाथः, पशूना मवरुद्ध्यै"-इति । यस्मिन् प्रगाथे मरुतः शूयन्ते, सोऽयं मरुत्वतीयः प्रगाथः । "प्र व इन्द्राय

हवते मरुतो ब्रह्मार्वत"-इत्येतस्मिन् प्रगाथे (सं० ८.८८.३.) मरुतः श्रूयन्ते, न मिमं शंसेत् *। पशूनां प्रावरणराहित्येऽपि वस्त्रसञ्चारकाले वायवो न तान् बाधन्ते, तस्मिन्नाश्रुतां पशुत्वम्, प्रगाथस्य च पशुप्राप्तिहेतुत्वात्पशुत्वम् ; अतः स प्रगाथः पशुप्राप्त्यै भवति ॥

अथ निविद्वानीयं सूक्तं विधत्ते—"जनिष्ठा उग्रः सहसे तुरायेति सूक्तं शंसति ; तद्वा एतद्यजमानजनन मेव सूक्तं, यजमानं ह वा एतेन यज्ञाद् देवयोन्यै प्रजनयति"-इति। होता "जनिष्ठा उग्रः"-इत्यादि (सं०१०.७३.१.) सूक्तं शंसेत्। 'तदेतत्' सूक्तं 'यजमानजनन मेव'। कथ मिति, तदुच्यते— 'एतेन' सूक्तेन होता 'यज्ञात्' अनुष्ठीयमानात् 'देवयोन्यै' देवलोकस्थानार्थं यजमानं प्रजनयति। तस्माद् यजमानजननत्वम् ॥

तेन रूपेण प्रशस्य पुनः प्रकारान्तरेण प्रशंसति— "तत्सञ्जयं भवति ; सं च जयति, वि च जयते"-इति। यस्मादेतेन सूक्तेन संयुज्यापि † शत्रून् यजमानो जयति, वियुज्यापि जयते ; तस्मात् सूक्तं 'सञ्जयम्'। समोचोनो जयो येन सूक्तेनेति समासः ॥

पुनरपि प्रकारान्तरेण प्रशंसति— "एतद्गौरिवीतं ; गौरिवीतिर्ह वै शाक्त्यो नेदिष्ठं स्वर्गस्य लोकस्यागच्छत्, स एतत् सूक्तमपश्यत् ; तेन स्वर्गं लोकमजयत् ; तथैवैतद्यजमान एतेन सूक्तेन स्वर्गं लोकं जयति"-इति। शक्तिनामकस्य महर्षेः कुले जातः 'शाक्त्यः', 'गौरिवीतिः' नाम, महर्षिः। स तु स्वर्गसमीपं गत्वा प्रवेष्टुं मशक्तः सन्, तत्साधनत्वेनैतत् सूक्तं दृष्ट्वा, तेन स्वर्गं प्राविशत्।

* प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः"-आश्व० श्रौ० ५.४.१८।

† 'संजय्यापि' घ।

तस्मादेतत् सूक्तं महर्षिनाम्ना गौरिवीत मित्युच्यते (सं०१०.७१. १-११.)। यथा महर्षिस्तथा यजमानोऽप्येतेन सूक्तेन स्वर्गं प्राप्नोति ॥

तस्मिन् सूक्ते निविद्प्रक्षेपस्य स्थानं विधत्ते — "तस्यार्धाः शस्त्वार्धाः परिशिष्य मध्ये निविदं दधाति"-इति। 'तस्य' सूक्तस्य सम्बन्धिनोष्णिहः भागद्वयं कृत्वा, द्वयोर्भागयोर्मध्ये "बृहती मरुत्वान्"-इति (निवि० २.१.) एतां निविदं धारयेत्। नन्वस्मिन्नेकादशर्चे सूक्ते समभागो न सम्भवतीति चेत्, तर्हि प्रथमभागे काञ्चिदधिकां शस्त्वा तत ऊर्ध्वं प्रक्षिपेत्; "एकभूयसोः शस्त्वा" -इत्युक्तत्वात्* ॥

निविदं प्रशंसति—"स्वर्गस्य वैष लोकस्य रोहो यन्निविद्"-इति। रोहः आरोहणं, हेतुरित्यर्थः ॥ तत्र स्वरविशेषं विधत्ते — "स्वर्गस्य वैतल्लोकस्याक्रमणं यन्निविद्, तां माक्रममाण इव शंसेदुपैव यजमानं निगृह्णीत योऽस्य प्रियः स्यादिति तु स्वर्गकामस्य"-इति। येयं निविदस्ति, तदेतत् 'स्वर्गस्याक्रमणं' सोपानस्थानीयम्। तस्माद्यथा लोके सोपानारोहणश्रमेण पुनः पुनः श्रमं करोति, तदनुकारिणं स्वरं कृत्वा तथैव पठेत्। एवं पाठे सति 'अस्य' यजमानस्य 'यः' पुमान् प्रियः स्यात्, स पुमानेनं यजमानम् 'उपैव' समीप एव 'निगृह्णीत' स्वीकुर्यात्। 'इति तु' एष एव प्रयोगः, स्वर्गकामस्यावगन्तव्यः। वक्ष्यमाणप्रयोगेण शाक्वर्यपरिहाराय स्वर्गकामस्येत्युक्तिः ॥

अभिचारप्रयोगं† विधत्ते — "अथाभिचरतः,— यः कामयेत

* अभिष्टा उप इति। एकभूयसीः शस्त्वा मरुत्वतीया निविदं दध्यात् सर्वत्र"-इति आश्व० श्रौ० ५.१८.१८, २०। 'एका भूयसीषु शस्त्वा' ग।

† 'प्रयोगान्तरं' घ।

क्षत्रेण विशं हन्या मिति, त्रिस्तृर्चि निविदा सूक्तं विशंसेत् ; क्षत्रं वै निविद्धिट् सूक्तं, क्षत्रेणैव तद्विशं हन्ति"-इति । क्षत्रियजात्या वैश्यजातेर्वधं कामयमानो यजमानो निविदा सूक्तं 'त्रिर्विशंसेत्' । एतदुक्तं भवति— सूक्तस्यादौ मध्ये चान्ते च निविदं दध्यात्, तदिदं सूक्तविच्छेदपूर्वकं* शंसन मिति । निविदः क्षत्रियजातित्वं, सूक्तस्य वैश्यजातित्वं पूर्व मेवाख्यातम् † । अत उक्तशंसनेन क्षत्रियजात्या वैश्यजातिं हन्ति । सोऽय मेकोऽभिचारप्रकारः ॥

अथैतद्विपर्ययेणाभिचारं विधत्ते — "यः कामयेत विशा क्षत्रं हन्या मिति, त्रिस्तृर्चि सूक्तेन निविदं विशंसेत् ; क्षत्रं वै निविद्धिट् सूक्तं, विशैव तत् क्षत्रं हन्ति"-इति । निवित्पदानाम् (निवि०२.१-२०.) आदौ मध्ये अन्ते च सूक्तं पठेत्, तदेतत् निविद्विच्छेदरूपं शंसनम् ॥

प्रकारान्तरेणाभिचारं विधत्ते—"य उ कामयेतोभयत एनं विशः पर्यवच्छिनदानीत्युभयतस्तृर्चि निविदं व्याह्वयीतोभयत एवैनं तद्विशः पर्यवच्छिनत्ति"-इति । 'य उ' यस्तु होता 'एनं' यजमानम् 'उभयतः' पूर्वोत्तरभागयोः सम्बन्धिनीः 'विशः' प्रजाः 'पर्यवच्छिनदानि' परितो विच्छिन्ना करवाणीति कामयेत,— स्वस्मात् पूर्वभाविन्यः पितृपितृव्यमातुलादयो याः प्रजाः, स्वस्मादुत्तरभाविन्यः पुत्रजामात्रादयो याः प्रजाः, तासां सर्वासा मवच्छेदं करवाणीत्यर्थः । यद्वा 'उभयतः' मातृपक्षे पितृपक्षे च विद्यमानानां प्रजानाम् 'अवच्छेदं' विरोधं करवाणीत्येवं 'यः' होता यजमानं इष्टि, स होता 'निविद मुभयतः' निविद मादावन्ते च 'व्याह्वयीत' विविध माह्वानं कुर्यात् ;—आदावपि "शंसा-

* सूक्तविच्छेदकं' ग । † १ भा० ४३४ पृ० १० प० ।

वीम्''–इत्येतं मान्त्रवर्णिकमन्त्रं पठेत्, अन्तेऽपि तथा पठेदित्यर्थः । तथा सति 'एनं' यजमानं पूर्वापरभागयोर्मांसपक्वापिंसपक्वयोश्च प्रजाभिः सहावच्छिनत्ति ॥

उक्तविधीना मसाङ्गर्याय निगमयति— ''इति त्वभिचरत इतरथा त्वेव स्वर्गकामस्य''–इति । 'इति तु' ''यः कामयेत, जलेश्च'' –इत्यादुक्त एव प्रकारः 'अभिचरतः' द्रष्टव्यः । 'इतरथा तु' अनेवम्प्रकारं तु, पूर्वोक्तं मूलमध्ये निविष्टश्लोकरूपं, सोपानारोहण-सदृशखरोपेतं 'स्वर्गकामस्य' द्रष्टव्यम् ॥

अन्तिमया मूलगतयर्चा (सं०१०.७३.११) समाप्तिं विधत्ते— ''वयः सुपर्णा उपसेदुरिन्द्रं मित्युत्तमया परिदधाति''–इति । वेतिर्धातोर्गत्यर्थस्य 'वयः' इति रूपम् ; गमनकुशला इत्यर्थः । अत एव 'सुपर्णाः' पक्षिसदृशाः केचिद् 'इन्द्रं' स्वर्गवासिनम् 'उपसेदुः' प्राप्तवन्तः । इति तस्य पादस्यार्थः । द्वितीयपादं सुबोधत्वाभिप्रायेण पठति— ''प्रियमेधा ऋषयो नाधमानाः''–इति । यत्यतदर्थावधारणशक्तिर्मेधा, सा प्रिया येषां ऋषीणां ते 'प्रियमेधाः', 'ऋषयः' अतीन्द्रियार्थद्रष्टारः 'नाधमानाः' किञ्चित् स्वकार्यं याचमानाः, ''इन्द्रं सुपसेदुः''–इति पूर्वेणान्वयः । तृतीयपादस्य पूर्वभाग मनूद्य व्याचष्टे— ''अप ध्वान्तं मूर्णुहीति ; येन तमसा प्राहृतो मन्येत, तन्मनसा गच्छेदप हैवाभ्यात् तन्मुच्यते''–इति । हे इन्द्र ! 'ध्वान्तं' तमः 'अपोर्णुहि' अपसारय । एतस्मिन् भागे पठिते सति तमो लुप्यते । होता येन तमसा 'प्राहृतः' आच्छादितोऽहमिति मन्येत, 'तत्' तमो 'मनसा गच्छेत्' ध्यायेत् । तमो हि बहुविधम्,—दृष्टिनिरोधकं मैक्ये, मोहरूपं द्वितीयम्, पापरूपं तृतीयम् । तेषां मध्ये येन स्वस्य बाधः,

तत् तमः एतद्भागपाठकाले विनष्ट मिति ध्यायेत्। तथा 'तत्' तमः 'अस्मात्' पुरुषाद् विनश्यत्येव। तस्य पादस्योत्तरभागे किञ्चिदनुष्ठानं विधत्ते— "पूर्हि चक्षुरिति चक्षुषी मरीमृज्येत"- इति। हे इन्द्र! 'चक्षुः पूर्हि' दृष्टिं पूरय। एतं भागं पठन् स्वेन हस्तेन चक्षुषी 'मरीमृज्येत' पुनः-पुनः शोधयेत्॥

वेदनं प्रशंसति— "आ जरसं ह चक्षुष्मान् भवति य एवं वेद"- इति। 'आ जरसं' जरासमाप्तिपर्यन्तम्॥

चतुर्थपाद मनूद्य व्याचष्टे— "मुमुग्धास्मान्निधयेव बद्धानिति; पाशा वै निधा; मुमुग्धास्मान् पाशादिव बद्धानित्येव तदाह"- इति। हे इन्द्र! 'निधयेव' पाशेनेव तमसा 'बद्धान्' अस्मान् 'मुमुग्धि' मोचय। अस्मिन् पादे 'निधा'-शब्देन पाशबन्धनहेतवो रज्जवो विवक्षिताः। अतो निधयेव बद्धानित्युक्ते 'पाशादिव बद्धान्'- इत्युक्तं भवति* ॥ ८॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये
अष्टमः खण्डः ॥ ८ (१९) ॥

॥ अथ नवमः खण्डः ॥

इन्द्रो वै वृत्रं हनिष्यंस्त्वष्टा देवता अब्रवीदनु मोपतिष्ठध्व मुप मामृच्यध्व मिति तथेति तं हनिष्यन्त

---

* "निधा पाशा भवति"—इत्यादि निरु० ४.१.२।

आद्रवन्त्सोऽवेन्मां वै हनिष्यन्त आद्रवन्ति हन्तेमाꣳ भीषया इति तानभिप्राश्वसीत् तस्य श्वसथादीषमाणा विश्वे देवा अद्रवन्मरुतो हैनं नाजहुः प्रहर भगवो जहि वीरयस्वेत्येवैन मेतां वाचं वदन्त उपातिष्ठन्त तदेतदृषिः पश्यन्नभ्यनूवाच हतस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सख्यायः मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासीति सोऽवेदिमे वै किल मे सचिवा इमे मा ऽकामयन्त हन्तेमानस्मिन्नुक्थ आ भजा इति तानेतस्मिन्नुक्थ आ भजदथ हैते तर्ह्युभे एव निष्केवल्ये उक्थे आसतुर्मरुत्वतीयं ग्रहं गृह्णाति मरुत्वतीयं प्रगाथं शंसति मरुत्वतीयं सूक्तं शंसति मरुत्वतीयां निविदं दधाति मरुतां सा भक्तिर्मरुत्वतीय मुक्थं शस्त्वा मरुत्वतीयया यजति यथाभागं तद्देवताः प्रीणाति ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ये त्वा नून मनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिरिति यत्र-यत्रैवैभिर्व्यजयत यत्र-यत्र वीर्यं मकरोत् तदेवैतत्समनुवेद्येन्द्रेणैनान्त्स सोमपीथान् करोति ॥ ९ (२०) ॥

अथ मरुत्वतीयं शस्त्रं तदन्ते पठनीयां याज्यां च प्रपंचयति

मुपाख्यान माह— "इन्द्रो वै वृत्रं हनिष्यंस्सर्वा देवता अब्रवीदनु मोप तिष्ठध्व मुप मा ह्वयध्व मिति ; तथेति ; तं हनिष्यन्त आद्रवन्सोऽवेत्यां वै हनिष्यन्त आद्रवन्ति, हन्तेमान् भीषया इति ; तानभि प्राश्वसीत्; तस्य श्वसथादीषमाणा विश्वे देवा अद्रवन्मरुतो हैनं नाजहुः ; प्रहर भगवो जहि वीरयस्वेत्येवैन मेतां वाचं वदन्त उपातिष्ठन्त"–इति। पुरा कदाचिदिन्द्रो वृत्रं हन्तु मुद्यतः सर्वा अपि देवताः प्रत्येव अब्रवीत्,—'अनु मोपतिष्ठध्वम्' आनुकूल्येन मां सेवध्वम्, 'उप मा ह्वयध्वं' वृत्रवधाय प्रवृत्तं माम् 'उपह्वयध्वम्' अनुजानीध्व मिति। ततोऽङ्गीकृत्य सर्वे देवाः 'तं' वृत्रं हन्तु मुद्यता आगच्छन्। तदा 'सः' वृत्रो मां हन्तु मुद्यता आद्रवन्तीति 'अवेत्' स्वमनसा ज्ञातवान्। तत इदं विचारयामास,—हन्त! सम्यग् जातम्; देवनिवारणोपायस्य प्रतिभातत्वात्; —'इमान्' देवान् 'भीषयै' अहं भीतान् करवाणि। इति विचार्य 'तान्' देवान् 'अभि' लक्ष्य 'प्राश्वसीत्' प्रश्वास मकरोत्। 'तस्य' वृत्रस्य 'श्वसथात्' प्रश्वासात् 'ईषमाणाः' बिभ्यतः सर्वे देवाः पलायन मकुर्वन्। वृत्रो हि स्वजन्मानन्तरं प्रतिदिनं सर्वासु दिक्षु शरपातमात्रदेशं प्राप्य वृद्धिं गतवान्। तथा चान्यत्र श्रूयते— "स इषुमात्र मिषुमात्रं विष्वङ्वर्धत, स इमांल्लोकान्वृणोद्यदिमांल्लोकान्वृणोत्तद् वृत्रस्य वृत्रत्वम्"– इति (तै० सं० २.४.१२.२)। तादृशस्य प्रौढशरीरस्य प्रश्वासः प्रलयकालीनवायुसमानः ; अतस्तदीयप्रश्वासेन देवाः परमाणव इव दूरे अपसारिताः। तदानीं 'मरुतः' एव 'एनम्' इन्द्रं 'नाजहुः' न परित्यक्तवन्तः। हे इन्द्र! भगवन्! वृत्रं वज्रेण 'प्रहर' तेन प्रहारेण 'जहि' मारय, ततो 'वीरयस्व' स्वकीयं वीरत्वं प्रकटय ; 'इति' अनेनैव

प्रकारेण 'एनम्' इन्द्रं प्रति 'एतां' वाचं वदन्तो मरुतस्त्वा मिन्द्र मसेवन्त ॥

उक्तमर्थं मन्त्रसंवादेन दृढयति— "तदेतदृषिः पश्यन्नभ्यनूवाच,—इन्द्रस्य त्वा सखयादीषमाणा विश्वे देवा अजनिष्वं सखायः, मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विशाः पृतना जयासीति"- इति । कश्चिदृषिर्दिव्यज्ञानेन 'तदेतद्' देवपत्नायनं पश्यन्, "इन्द्रस्य त्वा"- इत्यादिमन्त्रेण प्रकटीचकार । हे इन्द्र ! तव सखायो विश्वे देवा ये सन्ति, ते सर्वे इन्द्रस्य सख्यात् पलायमानास्त्वां परित्यक्तवन्तः । तस्मादिदानीं 'ते' तव मरुद्भिः सह सख्यं अस्तु ; 'अथ' अनन्तरमिमाः सर्वा इन्द्रसम्बन्धिनीः सेना जेष्यसीति (सं०८.९६.७.) ॥

अथ मरुता मिन्द्रकृत मुपकारं दर्शयति— "सो अवेदिमे वै किल मे सचिवा इमे मा अकामयन्त, हन्तेमानस्मिन्मुक्थ आ भजा इति; तानेतस्मिन्मुक्थ आ भजदथ वैते तर्ह्यभे एव निष्केवल्ये उक्थे आसतुः"-इति । 'सः' इन्द्रः स्वमनसा 'अवेत्' विचारितवान् । कथ मिति, तदुच्यते— 'इमे वै किल' पुरतोऽवस्थिताः मरुत एव 'मे' मम 'सचिवाः' सखायः । यस्मात् 'इमे' मरुतो 'मा अकामयन्त' मा अपेक्षितवन्तः, न तु मां परित्यज्य गताः ; तस्मादस्मात्किलेत्थं इन्द्र ! सम्यगेभिः कृत मित्यहं दृष्टवानस्मि ; ततः 'इमान्' मरुतः 'अस्मिन्मुक्थे' माध्यन्दिनसवनगतयज्ञे 'आभजे' भागिनः कारयामि ; 'इति' एवं मनसि विचार्य तथैवाकरोत् । 'अथ' अनन्तरं 'तर्हि' तदा प्रभृति 'एते ह' मरुतो ऽवश्यं यज्ञभागिनो ऽभूवन्निति शेषः । ततः पूर्वं तु माध्यन्दिनसवने निष्केवल्यनामके शस्त्रे केवलेन्द्रदेवताके उभे आस्ताम्, न तु तत्र मरुतां प्रवेश आसीत् । तस्मादिदानीं प्रवेश इन्द्रकृत उपकारः ॥

इन्द्रेण दत्तान् मरुतां भागान् प्रदर्शयति— "मरुत्वतीयं ग्रहं गृह्णाति, मरुत्वतीयं प्रगाथं शंसति, मरुत्वतीयं सूक्तं शंसति, मरुत्वतीयां निविदं दधाति, मरुतां सा भक्तिः"–इति। मरुतोऽस्य सन्तीति तैः सहितो मरुत्वान् तदीयं ग्रह मध्वर्युर्गृह्णाति। होता "प्र व इन्द्राय बृहते"–इत्येतं (सं० ८.८९.३.) मरुत्वतीयं प्रगाथं शंसति, "जनिष्ठा उग्रः"–इत्यादिकं (सं० १०.७३.१.) मरुत्वतीयं सूक्तं शंसति, "इन्द्रो मरुत्वान्"–इत्यादिकं (निवि० २.१.) मरुत्वतीयां निविदं सूक्ते प्रक्षिपति। ग्रहग्रहणादिसूक्तशंसनान्ता 'सा' सर्वा 'मरुतां' मरुत्सम्बन्धा 'भक्तिः' भागः॥

अथ शस्त्रयाज्यां विधत्ते—"मरुत्वतीय मुक्थं शस्त्वा मरुत्वतीयया यजति, यथाभागं तद् देवताः प्रीणाति"–इति॥ तां याज्यां दर्शयति— "ये त्वाहिहत्ये मघवन्नवर्धन्, ये शाम्बरे हरिवो ये गविष्टौ, ये त्वा नूनं मनुमदन्ति विप्राः, पिबेन्द्र सोमं सगणो मरुद्भिरिति"–इति। हे मघवन् इन्द्र! 'अहिहत्ये' वृत्रवधे 'ये' मरुतः त्वाम् 'अवर्धन्' वर्धितवन्तः। 'अहि' शब्दो वृत्रवाची; "अहिर्माचक्षते वृत्रम्"–इतिवररुचिवचनात्*। शम्बरः कश्चिदसुरः, तत्सम्बन्धी वधः 'शाम्बरः', तस्मिन् ये मरुतस्त्वां 'अवर्धन्' वर्धितवन्तः,– इत्यन्वयः। गवां मिष्टिरन्वेषणं 'गविष्टिः'। 'बलः' नाम कश्चिदसुरो गुहाया मासीत्†; "इन्द्रो बलस्य बिलमपोर्णोत्"–इतिश्रुत्यन्तरात् (तै० सं० २. १. ५. १.)। तेन बलेन गावोऽपहृताः, तासां गवां मन्वेषणे ये मरुतस्त्वा मवर्धन्, तथा 'ये' मरुतो 'नूनम्' अद्यापि 'विप्राः' ऋत्विजः भूत्वा त्वाम्,

* निघ० १.१०.२१। निरु० २.५.२,३; १०.४.७।

† 'गुहावासी' घ।

'अनुमदन्ति' स्तोत्रैरनुदिनं हर्षयन्ति, हे इन्द्र ! तैर्मरद्भिः सहितस्त्वं सगणो भूत्वा सोमं पिबेति याज्यामन्त्रार्थः (सं०१.४७.४.) ॥

एतां याज्यां प्रशंसति— "यत्र-यत्रैवैभिर्व्यजयत, यत्र-यत्र वीर्यं मकरोत्, तदेवैतत्समनुवेदेन्द्रेणैनान्त्सोमपीथान् करोति" —इति। 'यत्र-यत्रैव' यस्मिन्-यस्मिन् वृत्रवधादिके स इन्द्रः 'एभिः' मरुद्भिर्विजयं प्राप्तः, प्राप्य च 'यत्र-यत्र' यस्मिन्-यस्मिन्नपि युद्धादौ 'वीर्यं' शौर्यं मकरोत्, 'तदेवैतत्' अखिल मिन्द्राय 'समनुवेद' सम्यगनुक्रमेण विज्ञाप्येन्द्रेण सह 'एतान्' मरुतः सोमपानसहितान् करोति ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपङ्क्तिकायां द्वितीयाध्याये
नवमः खण्डः ॥ ९ (२०) ॥

॥ अथ दशमः खण्डः ॥

इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत् प्रजापतिं महं मेतदसानि यत् त्वं महं महानसानीति स प्रजापतिरब्रवीदथ कोऽहं स्मिति यदेवैतदवोच इत्यब्रवीत्ततो वै को नाम प्रजापतिरभवत्को वै नाम प्रजापतिर्यन्महानिन्द्रोऽभवत् तन्महेन्द्रस्य महेन्द्रत्वं स महान् भूत्वा देवता अब्रवीदुद्धारं म

उद्धरतेति यथाप्येतर्हीच्छति यो वै भवति यः श्रेष्ठता मश्नुते स महान् भवति तं देवा अब्रुवन्त्वय मेव ब्रूष्व यत्ते भविष्यतीति स एतं माहेन्द्रं ग्रह मब्रूत माध्यन्दिनं सवनानां निष्केवल्य मुक्थानां त्रिष्टुभं छन्दसां पृष्ठं साम्नां त मस्मा उद्धार मुद्धरन्नुदस्मा उद्धारं हरन्ति य एवं वेद तं देवा अब्रुवन्त्सर्वं वा अवोचथा अपि नोऽवास्त्विति स नेत्यब्रवीत्कथं वोऽपि स्यादिति त मब्रुवन्नप्येव नोऽस्तु मघवन्निति तानीच्चतैव ॥ १० (२१) ॥

अथ निष्केवल्याख्यं शस्त्रं विधातव्यम्; तस्य चायं सङ्ग्रहश्लोकः—

"स्तोत्रियस्यानुरूपस्य धाय्या प्रागाथिकं तथा।

निविद्धानीयसूक्तं च निष्केवल्ये प्रकीर्त्तितम्" इति।

तदर्थ मादावुपाख्यान माह—"इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत्,— प्रजापति मह मेतदसानि, यत्त्व मह महानसानीति; स प्रजापतिरब्रवीदथ कोऽह मिति; यदेवैतदवोच इत्यब्रवीत्; ततो वै को नाम प्रजापतिरभवत्को वै नाम प्रजापतिर्यन्महानिन्द्रो ऽभवत्, तन्महेन्द्रस्य महेन्द्रत्वम्" इति। इन्द्रः पुरा वृत्रं हत्वा सर्वाः 'विजितीः' जेतव्या भूमीर्विजित्य प्रजापति मिद मब्रवीत्,— हे प्रजापते! त्व मिदानीं यदसि, एतदहं मतः परम् 'असानि' भवानि। किं तदिति वीप्सायां घिग्रेधाकारेणोच्यते। अहं 'महानसानि' सर्वेभ्यो भूतेभ्योऽधिकः पूज्यो

भवानीति । ततः 'सः' प्रजापतिरिदं अब्रवीत्,— मह्यमेव महत्त्वं त्वया स्वीकृते सति अनन्तरं अहं को नाम भविष्यामीति । तत इन्द्र इदं अब्रवीत्— हे प्रजापते ! स्वामानं मुद्दिश्य निवेदनेन क इति यदेवैतदवोचः, तदेव त्वं भवेति । तत आरभ्य 'कः'-इत्येतन्नामवान् प्रजापतिरभूत् । एतत्कशब्दवाच्यत्वं सर्वत्र प्रसिद्धम् ; अत एव श्रुत्यन्तरे प्रतिग्रहमन्त्रब्राह्मणे एव आम्नायते— "क इदं कस्मा अदादित्याह, प्रजापतिर्वै कः, प्रजापतये ददाति"—इति (तै० ब्रा० २.२.५.५.) । 'क' शब्दस्य सुखवाचित्वात् तेन प्रजापतेर्व्यवहारे सति सुखो प्रजापतिरित्युक्तं भवति । प्रजापतिमतं महत्त्वं स्वीकृत्येन्द्रो यस्मात् महानभवत्, तस्मान्महेन्द्रं नाम सम्पन्नम् । श्रुत्यन्तरेऽप्येतदाम्नातम्— "इन्द्रो ह वै महन्, तं देवा अब्रुवन्,— महान्वा अयं अभूद्यो ह वै नवधीदिति ; तस्मान्महेन्द्रस्य महेन्द्रत्वम्" इति (तै० सं० ६.५.५.३.) ॥

अथेन्द्रस्य महत्त्वप्रयुक्तं सत्कारविशेषं दर्शयति— "स महान् भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेति ; यथाप्येतर्ह्याह्वयति, यो वै भवति, यः श्रेष्ठता मश्नुते, स महान् भवति, तं देवा अब्रुवन्,—स्वय मेव ब्रूष्व यत्ते भविष्यतीति ; स एतं माहेन्द्रं यज्ञ मब्रूत माध्यन्दिनं सवनानां, त्रिष्टुभं छन्दसां, पृष्ठं साम्नां ; त मस्मा उद्धार मुदहरन्" इति । 'सः' इन्द्रः, उत्तप्रकारेण महत्त्वं प्राप्य देवताः प्रत्येतदब्रवीत्,— हे देवताः । 'उद्धारं' उत्कर्षं निमित्तीकृत्य यः पूजाविशेष उच्यते, सोऽयं सत्कार उद्धारः, तं सत्कारभागं 'मे' मदर्थम् 'उद्धरत' पृथक्कुरुतेति । यथेत्यादिना लौकिकदृष्टान्त उच्यते । 'यो वै भवति, यः पुमान् भवति, ऐश्वर्यं प्राप्नोति, यश्च 'श्रेष्ठतां' विद्याचारादि-

प्रयुक्तं वैशिष्ट्यं मन्यते, 'सः' प्राजैश्वर्यो विशिष्टश्च सर्वेषां मध्ये महान् भवति। स तादृशः पुरुषः 'एतर्ह्यपि' इदानीमपि यथा विशिष्टपूजारूपं भागमिच्छति, तथा अयमिन्द्रोऽपीत्यध्याहारः। 'तम्' उद्गारेच्छावन्तमिन्द्रं देवा इदं मन्त्रयन्,—हे इन्द्र! यत् ते प्रियं भविष्यति, तत् स्वयमेव ब्रूष्वेति। ततः 'सः' इन्द्रो यज्ञानां मध्ये 'एतं' माहेन्द्रग्रहं मन्त्रयत, तथा सवनानां मध्ये माध्यन्दिनं सवनम्, शस्त्राणां मध्ये निष्केवल्यं शस्त्रम्, छन्दसां मध्ये त्रिष्टुभम्, साम्नां मध्ये 'पृष्ठं' पृष्ठस्तोत्रनिष्पादकं बृहद्रथन्तर-वैरूपादिकम्*। ततो देवाः 'अस्मै' इन्द्राय 'तं मुद्गारं' माहेन्द्रग्रहादिकं यज्ञादुदहरन्। तदेतच्छाखान्तरेऽप्याम्नातम्—"स एतं माहेन्द्रं मुद्गारं मुदहरत तृतं हृत्वान्यासु देवताखधि यन्माहेन्द्रो गृह्यत उद्गार मेव तं यजमान उद्धरते ऽन्यासु प्रजाखधि" इति (तै०सं०६.५.५.३,४.)॥

वेदनं प्रशंसति—"उदस्मा उद्गारं हरन्ति य एवं वेद" इति॥

उद्गारभागं दत्तवतां देवानां तस्मिन्नुद्गारे स्वापेक्षितभागप्रार्थनां दर्शयति— "तं देवा अब्रुवन्,—सर्वं वा अवोचथा अपि नोऽत्रास्त्विति; स नेत्यब्रवीत्,—कथं वोऽपि स्यादिति; त मब्रुवन्नप्येव नोऽस्तु मघवन्निति; तानीत्यतैव"—इति। उद्गारयुक्तं 'तम्' इन्द्रम्, इतरे देवा इदं मन्त्रयन्,—हे 'मघवन्' इन्द्र! सर्वं मेव यज्ञं स्वसम्बन्धित्वेनोक्तवानसि, अस्माकं मध्यत्र सारो भागोऽस्तिति। ततः 'सः' इन्द्र एव मब्रवीत्,—अयं सारः सर्वोऽपि

---

* उद्गत्, रथन्तरम्, वैरूपम्, वराजम्, शाक्वरम्, रैवतश्चेति षट्। ता० ब्रा० ७.६.७। सं० ब्रा० १.२.२.३। "यत् पृष्ठेषु व्यदधुस्तेनेन्द्रं सर्वाणि ह पृष्ठानीन्द्रस्य निष्केवल्यानि"—इति च ता० ब्रा० ७.८.५।

मत्तोऽपेक्षितः, युष्माक मध्यत्र भागः कथं स्यात् ? मामेव युष्माकं भागः । इति निराकृतवन्तं तमिन्द्रं देवाः प्रार्थयमाना इद मब्रुवन्,— हे मघवन् ! 'नः' अस्माक मध्यस्त्वेव, सर्वथा मामेवापेक्षित एवेति । ततः स इन्द्रः 'तान्' देवान् 'ईक्षतैव' अनुग्रह-दृष्ट्यावलोकितवानेव ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपङ्क्तिकायां द्वितीयाध्याये
दशमः खण्डः ॥ १० (२१) ॥

॥ अथ एकादशः खण्डः ॥

ते देवा अब्रुवन्नियं वा इन्द्रस्य प्रिया जाया वायाता प्रासहा नामास्या मेवेच्छामहा इति तथेति तस्या मैच्छन्त सैनानब्रवीत् प्रातर्वः प्रति वक्ष्याम्यीति तस्मात् स्त्रियः पत्याविच्छन्ते तस्मादु स्त्रानुरार्च पत्याविच्छते तां प्रातरुपायन्त्सैतदेव प्रत्यपद्यत यद्वावान पुरुतमं पुराषाळा इत्रहेन्द्रो नामान्यग्राः अचेति प्रासहस्पतिस्तुविष्मानितीन्द्रो वै प्रासह-स्पतिस्तुविष्मान् यदी मुष्मसि कर्त्तवे कारुतदिति यदेवैतदवोचामाकारुतदित्येवैनांस्तदब्रवीत् ते देवा अब्रुवन्नप्यस्या इहास्तु या नोऽस्मिन् न वै क मविद

दिति तथेति तस्या अप्यवाकुर्वंस्तस्मादेषावापि शस्यते बहावान पुरुतमं पुराषाळिति सेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम को नाम प्रजापतिः श्वशुरस्तद्यास्य कामे सेना जयेत् तस्या अर्द्धर्चिष्ठंस्तृण मुभयतः परिच्छिद्योत्तरां सेना मभ्यस्येत्प्रासहे कास्त्वा पश्यतीति तद्यथैवादः क्षुधा श्वशुराल्लज्जमाना निलीयमानैत्येव मेव सा सेना भज्यमाना निलीयमानेति यवैवं विद्वांस्तृण मुभयतः परिच्छिद्योत्तरां सेना मभ्यस्यति प्रासहे कास्त्वा पश्यतीति तानिन्द्र उवाचापि वोऽवास्त्विति ते देवा अब्रुवन् विराड् याज्यास्तु निष्केवल्यस्य या चयस्त्रिंशदक्षरा चयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च देवता अक्षरभाजः करोत्यक्षर मक्षर मेव तद्देवता अनु प्र पिबन्ति देवपात्रेणैव तद्देवतास्तृप्यन्ति यं कामयेतायतनवान्त्स्यादित्यविराजास्य यजेद् गायत्र्या वा त्रिष्टुभा वान्येन वा छन्दसा वषट् कुर्यादनायतनवन्त मेवैनं तत्करोति यं कामयेतायतनवान्त्स्यादिति विराजास्य यजेत् पिबा सोम मिन्द्र मन्दतु त्वेत्येतयायतनवन्त मेवैनं तत्करोति ॥ ११ (२२) ॥

अथ निष्क्रैवल्यायस्ते याज्यां विधातुं पूर्वोपाख्यानमेवं प्रस्तौति —"ते देवा अब्रुवन्नियं वा इन्द्रस्य प्रिया जाया वावाता प्राणस्य नामास्या मेवेच्छामहा इति ; तथेति ; तस्या मैच्छन्त ; सैनान्-अब्रवीत्, - प्रातर्वः प्रति वक्ष्याम्योति ; तस्मात् स्त्रियः पत्याविच्छन्ते ; तस्मादु स्वानुरागं पत्याविच्छन्ते ; तां प्रातरुपायन्नेतदेव प्रत्य-पद्यत"-इति । ते देवा इन्द्रस्याभिप्रायं प्रजानन्तः परस्पर मिदं मन्त्रयन्त्,— 'इयं वै' पुरतो दृश्यमानैव इन्द्रस्य प्रिया जाया ; सा 'वावाता' मध्यमजातीया । राज्ञां हि त्रिविधाः स्त्रियश्चोत्तम-जातेर्महिषीति नाम, मध्यमजातेर्वावातेति, अधमजातेः परिवृक्ति-रिति *। अतएवाश्वमेधे ऽस्यां प्रति राजस्त्रीणां कर्त्तव्यविशेष एतैर्नामभिरामन्त्रणः-"भूरिति महिषी, भुव इति वावाता, स्वर-रिति परिवृक्तिः" इति (तै० ब्रा० ३.८.४.५.) । तस्याश्च वावा-ताया: प्राणश्चेति नाम ; राजप्रियत्वात् । प्रमथ्य बलात्कारेण सर्वं कार्यं कर्तुं शक्तेत्यर्थः । तस्मादेतस्या मेव निमित्तभूतायां सख्यां राजाभिप्रायं ज्ञातुं मिच्छामहे इति विचार्य, त मभिप्रायं सर्वै-रङ्गीकृत्य, 'तस्यां' वावातायां स्वाभीष्ट मैच्छन्त । 'सा' ऽपि वावाता 'एतान्' देवानिद मब्रवीत्,— रात्रौ राजाभिप्रायं विचारयितुं शक्यत्वात् परेद्युः प्रातःकाले 'वः' युष्माकं प्रत्युत्तरं 'वक्ष्यामि' वक्ष्यामीति । यस्मादेवं तस्माल्लोकेऽपि प्रियाः स्त्रियः सर्वं मव-गन्तव्यं वृत्तान्तं पत्यावगन्तु मिच्छन्ति । यस्मादिक्षितावसरे सर्वं मवगन्तु समर्थं 'तस्माद्' तस्मादेव कारणात् प्रिया

* "महिषी जाया उपजीव्या भवति, मध्यमा, वावाता, परिवृक्ता, पालागली ; सर्वा निष्कीऽलंकृता मिथुनस्यैव सर्वस्यार्थे ताभिः सर्वाभ्यामार्थं प्रयतते, पूर्वया वारा यजमानो दक्षिणया पत्नीः"- इति श्रुत० ब्रा० १३ १४ १.८ ।

स्त्री 'अनुराधा' रात्रिसमये विविक्तवेलायां पत्नीं सर्वं मवगन्तु मिच्छति। देवास्तु प्रातःकाले वावाता सुपागच्छन्। 'सा' वावाता 'एतदेव' वक्ष्यमाणमन्त्ररूपं वाक्यं प्रत्युत्तरत्वेन प्राहवती॥

तस्मिन् मन्त्रे (सं० १०.७४.६.) पादत्रयं पठति—"यद्वावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामाग्यप्राः, अचेति प्रासहस्पतिसुविद्यानिति"-इति। पुरातनानां पुरुषाणां मध्ये स विष्णुः 'पुराषाट्' इन्द्रः। स च 'पुरुतमम्' अतिशयेन प्रभूतं 'यत्' उद्दारितरूपं वसु 'वावान' आदौ दीर्घश्छान्दसः, 'ववान' सम्यग् भेजे, लब्धवानित्यर्थः। स च वृत्रहेन्द्रः तस्मिन्नुदारे 'नामानि आ अप्राः' माहेन्द्रग्रहो माध्यन्दिन मित्यादीनि स्वाभीष्टनामानि 'आ' समन्तात् पूरितवान्। प्रकृष्टं महो बलं येषां ते प्रासहाः, तेषां पतिः 'प्रासहस्पतिः' इन्द्रः 'अचेति' अजानात्, देवाना मभीष्टं ज्ञातवान्, कटाक्षेणानुगृहीतवानित्यर्थः। स चेन्द्रः 'तुविष्मान्' बहुधनवान्॥ अस्मिन् तृतीयपादे पदयोरप्रसिद्धत्वात् तदर्थं व्याचष्टे —"इन्द्रो वै प्रासहस्पतिसुविद्यान्"-इति॥

चतुर्थपाद मनूद्य व्याचष्टे—"यदौ सुश्मसि कर्त्तवे करत्तदिति; यदेवैतदवोचामाकरत्तदित्येवैनांस्तदब्रवीत्"-इति। पादत्रयोक्तं वावाताया वचनं श्रुत्वा देवाः परस्परं ब्रुवते— 'यदीम्' यदिदं मस्माकं मध्यम भागोऽस्त्वित्येतादृशं कार्यं 'कर्त्तवे' कर्तुम् 'उश्मसि' वयं सर्वे कामयामहे, 'तत्' सर्वं 'करत्' इन्द्रः सम्पूर्णं मकरोत्। अथवा चतुर्थपादोऽपि वावाताया एव वचनम्। हे देवाः! वयं सर्वे यदिदं कार्यं कर्तुं कामयामहे, 'तत्' युष्मद्भागप्रदानरूपं कार्यम् इन्द्रोऽकरोदिति*। इद मेव द्वितीयं व्याख्यानं

* एतन्मन्त्रस्य व्याख्यानान्तरं संहिताभाष्ये द्रष्टव्यम्।

यदेवैतदित्यादिब्राह्मणेन स्पष्टीकृतम् । हे देवाः ! मया सह युष्माभिरालोचितं कार्यं मित्रः कृतवानित्येतेनैव प्रकारेण तस्मिन् मन्त्रे[*] सा वावाता अवदत् ॥

उपाख्यानशेषं दर्शयति -- "ते देवा अब्रुवन्यस्या इदास् या नोऽस्मिन्न वै क मविददिति ; तथेति ; तस्या अप्यवावातुर्वन्" -- इति । ते देवा वावातायाः उत्तरं श्रुत्वा परस्परमिदमब्रुवन्,— 'या' वावाता 'नः' अस्माकं सुपकारिणी, 'अस्मिन्' निष्केवल्ये शस्त्रे 'कम्' अपि मन्त्रं 'न तं अविदत्' नैव लब्धवती । अस्या अपि वावातायाः इह निष्केवल्ये शस्त्रे मन्त्रोऽस्तु, 'इति' एतदङ्गीकृत्य तस्या अप्येव मन्त्रस्य मकुर्वन् ॥

इदानीं धाव्यां विधत्ते -- "तस्मादेषावापि यस्यते,— यद्धावान पुरुतमं पुरुपाळिति" इति । यस्माद् वावातायाः मन्त्रः कृतः, तस्मात् कारणात् "यद्धावान" एषापि ऋक् 'अत्र' निष्केवल्यशस्त्रे धाव्यात्वेन ग्रहणीया[†] ; अस्या ऋचो यक्रीयेत्यस्य जायोत्तात् (?) ॥

प्रसंगावृद्धिस्थं कञ्चित् (लौकिकं) प्रयोगं विधत्ते-- "मेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम ; को नाम प्रजापतिः श्वशुरस्तस्यास्य कामे मेना जनेत्, तस्या अहात् निर्हंस्तृण मुभयतः परिच्छिद्योत्तरां मेनां भक्षयेत्, प्रासहे कृत्वा पश्यतीति ; तद्यथैवाद्दः स्वा श्वशुरात्प्रजायमाना निर्लीयमानैवेव मेव मा मेना भक्ष्यमाना निर्लीयमानेति यदेवं विद्वांस्तृण मुभयतः परिच्छिद्योत्तरां मेनां भक्षयति प्रासहे कृत्वा पश्यतीति" इति ।

* "यद्धावानेति धाव्या" इति आश्व० श्रौ० ४. १५. २१ ।

† आश्वलायन पदं स० पूर्णम् ।

पूर्वचासेन्द्रस्य प्रिया जाया वावाता प्रासहा नामेति यैव सुता, सेयं लोकव्यवहारे 'सेना वै' युद्धार्थोद्यतसेनारूपेण वर्त्तते *; इन्द्रजायायाः सेनाभिमानित्वात्। तच्च शाखान्तरे समाम्नातम्— "इन्द्राणी वै सेनाया देवता"—इति (तै० सं० २.२.८.१.) †। 'को नाम' क इत्यनेन नाम्ना युक्तः प्रजापतिः, तस्या इन्द्रजायायाः श्वशुरः; प्रजापतेरिन्द्रोत्पादकत्वात्। तथा चान्यत्र श्रूयते— "प्रजापति मिन्द्र मसृजतानुजावरं देवानाम्"—इति ‡। 'तत्' तथा सति 'अस्य' लौकिकस्य पुरुषस्य युद्धार्थिनो 'या' स्वकीया 'सेना' जयत्विति कामो भवति, एतस्मिन् कामे सति स पुमान् तस्याः स्वकीयायाः सेनायाः 'अर्द्धात्तिष्ठन्' अर्द्धभागे मध्ये (पङ्क्तां §) मूमाववस्थितः किञ्चित् तृणं मादाय, मूलतोऽग्रतः 'उभयतः' परिच्छिद्य 'इतरां' परकीयां सेनाम् 'अभि' लक्ष्य 'अस्येत्' वाणवत् क्षिपेत्। तत्रायं मन्त्रः— "प्रासहे कस्त्वा पश्यति"—इति। हे प्रासहाख्ये! इन्द्रजाये! 'कः' प्रजापतिः, त्वदीयः श्वशुरः, 'त्वा' त्वां चक्षुषा पश्यति। अनेन मन्त्रेण तृणे क्षिप्ते सति परसेनाया भङ्गे दृष्टान्त उच्यते— 'तत्' तस्मिन् विवक्षितार्थे 'यथैवादः' निदर्शनं भवति, तथा कथयामः,— अनूचानानां मौक्षाणां वा गृहेषु युवतिः स्नुषा स्वकीयं श्वशुरं दृष्ट्वा तस्मात्

* "सेना सेश्वरा समानजातीया"—इति निरु० २.३.२।

† "इन्द्राणी देवी सुभगा सुपत्नी। उदग्भ्यो पतिभिर्वि जिगाय। विश्वं यदस्या जघनं योजनानि। उपस्थ इन्द्रः स्थविरं बिभर्त्ति॥ सेना ह नाम पृथिवी घनञ्जया। विश्वश्चसा अदितिः सुरेवत्। इन्द्राणी देवी प्रासहा ददानां। सा नो देवी सुहवा शर्म यच्छतु॥" —इति ऋचौ तै० ब्रा० २.४.२.७।

‡ तै० सं० ६.६.११.२; ७.२.१०.२, २.३.४.२।

§ नास्त्येतत् पदं क पुस्तके।

'लज्जमाना' लज्जां प्राप्नुवती 'निलीयमाना' स्वावयवुच्छनदर्शना-भङ्गसङ्कोचेन तिरोहितवसना गृहाभ्यन्तर मागच्छति ; एव मेव 'सा' परकीया सेना अभिमन्त्रितलक्षणरूपास्त्रप्रक्षेपेण 'भज्यमाना' सती तत्र-तत्रारण्यपर्वतादिषु 'निलीयमाना' तिरोहिता सती स्वकीयं देश मेति। कुत्राय मितरसेनाभङ्गः ? इत्याशङ्क्य 'यत्रैवम्' इत्यादिना पूर्वोक्त एवार्थः स्पष्टीकृतः ॥

प्रासङ्गिकं परिसमाप्य प्रकृत मनुसरति — "तानिन्द्र उदाचापि योऽत्रास्त्विति ; ते देवा अब्रुवन्,— विराड् याज्यास्तु निष्कैवल्यस्य या त्रयस्त्रिंशदक्षरा" इति। वाक्यशेषस्य वचनेनेन्द्रसमीपं प्रति देवेष्वागतेषु 'तान्' देवानिन्द्र एव सुवाच,— युष्माक मप्यत्र निष्कैवल्ये [पेक्षितो भागोऽस्त्विति। ततो देवाः त्रयस्त्रिंशदक्षरां विराट्कल्पां "पिबा सोमम्" इत्येतां (मं० ७.२२.१.) याज्यां प्रार्थितवन्तः ॥

तां याज्यां प्रशंसति— "त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च ; देवता अक्षरभाजः करोत्यक्षर मक्षर मेव तद्देवता अनु प्र यिबन्ति, देवयानेनैव तद्देवतास्तृप्यन्ति" इति। एतद्वाक्यं पूर्ववदेव व्याख्यातम्*। यद्यप्यस्या याज्यायास्त्रयस्त्रिंशदक्षराणि साक्षात् न दृश्यन्ते, तथापि संयोगाक्षरादिविभागेन सङ्ख्या पूरणीया। ततो देवसाम्यात् प्रत्यक्षर मेकैकदेवताद्यनिः सिध्यति ॥

अथाभिचारप्रयोगं विधत्ते— "यं कामयेतानायतनवान्स्यादित्यविराजास्य यजेद्वायव्या वा त्रिष्टुभा वान्येन वा च्छन्दसा वषट् कुर्यादनायतनवन्त मेवैनं तत्करोति"-इति। आयतन माश्रयो

* [भा० ४५६० पृ. द्रष्टव्य।

ऋङ्मादिरस्यास्तीति 'आयतनवान्', तद्विपरीतो यजमानोऽस्विति कामयमानो होता विराडतिरिक्तगायत्र्यादिच्छन्दोयुक्तां याज्यां पठित्वा तदन्तं वषट् कुर्यात्। तथा सत्यायतनहीनो यजमानो भवति ॥

उक्तार्थव्यतिरेकं विधत्ते— "यं कामयेतायतनवान्त्स्यादिति विराजास्य यजेत्,— पिबा सोम मिन्द्र मन्दतु त्वेत्येतयाऽऽयतनवन्त मेवैनं तत्करोति"-इति * ॥ ११ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये एकादशः खण्डः ॥ ११ (२२) ॥

॥ अथ द्वादशः खण्डः ॥

ऋक् च वा इदमग्रे साम चास्तां सैव नाम ऋगासीदमो नाम साम सा वा ऋक् सामोपावदन्मिथुनं सम्भवाव प्रजात्या इति नेत्यब्रवीत्साम ज्यायान्वा अतो मम महिमेति ते ह्ये भूत्वोपावदतां ते न प्रति चन समवदत तास्त्रिसो भूत्वोपावदंस्तत्तिसृभिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम सम्मितं

* "पिबा सोम मिन्द्र मन्दतु त्वेति याज्या"-इति आश्व० श्री० ५.१५.२२ ।

तस्मादेकस्य बह्वो जाया भवन्ति नैकस्यै बहवः सह पतयो यदैतत्सा चामश्च समभवतां तत्साम-भवत्तत्साम्नः सामत्वं सामन् भवति य एवं वेद यो वै भवति यः श्रेष्ठता मश्नुते स सामन् भवत्यसामन्य इति हि निन्दन्ति ते वै पञ्चान्यद् भूत्वा पञ्चान्यद् भूत्वा कल्पेता माहावस्य हिङ्कारश्च प्रस्तावस्य प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च ते यत्पञ्चान्यद् भूत्वा पञ्चान्यद् भूत्वा कल्पेतां तस्मादाहुः पाङ्क्तो यज्ञः पाङ्क्ताः पशव इति यदु विराजं दक्षिणी मभि समपद्येतां तस्मादाहुर्विराजि यज्ञो दक्षिण्यां प्रतिष्ठित इत्यात्मा वै स्त्रीणियः प्रजानुरूपः पत्नी भार्या पशवः प्रगाथो गृहाः सूक्तं स वा अस्मिंश्च लोकेऽमुष्मिंश्च प्रजया च पशुभिश्च गृहेषु रमति य एवं वेद ॥ १२ (२३) ॥

"सुत मनु शंसति"-इति-(ता० ब्रा० ६.८.१०)-विधिवशेन निष्केवल्यशस्त्रस्य स्तोत्रपूर्वकत्वात् वृद्धिरस्य (स्तोत्रियस्यैकस्य*) साम्न आश्रयत्वेन हृत्वं विधातु माख्यायिका माह— "ऋक् च वा इदमग्रे साम चास्तां, सैव नाम ऋगासीदमो नाम साम, सा वा ऋक् सामोपावदश्नुतां सम्बभूव प्रजात्वा इति; तेभ्यत्रयो-ऽबिभ्यत्, ज्यायान्वा अतो मम महिमेति; ते ह भूत्वोपावदताम्;

* नास्तीयत्पदद्वयं ग पुस्तके ।

ते न प्रति चन समवदत ; तास्तिस्रो भूत्वोपावदंस्तास्तिसृभिः समभवद्, यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति ; तिसृभिरुद्गायन्ति ; तिसृभिर्हि साम सम्मितं ; तस्मादेकस्य बह्वो जाया भवन्ति, नैकस्यै बहवः सह पतयो यद्वैतत्सा चामश्च समभवतां, तत्सामाभवत्तत्साम्नः सामत्वम्"–इति। यत् 'इदम्' इदानीं ऋगाश्रितं साम उभयमेलनरूपं मधीयते, तदिदम् 'अग्ने' मेलनात् पुरा ऋगक्षरपदरूपा पृथग्भूता, साम च गीतिरूपं पृथग्भूतम् ;—इत्येवं हे अपि पृथगेवास्ताम्। तयोः परस्परमेलनयोग्यतां प्रदर्शयितु मेकस्मिन्नेव साम्नि अन्तर्भावः प्रदर्श्यते सामेति। साम्नो यदेतत्तेति पूर्वं मक्षरं, तदेवैकं नाम, तत्सामवाच्या ऋगासीत् ; अम इत्येकं नाम, तद्वाच्यं सामासीत्। अतो मेलनयोग्यतायां सत्यां सैव ऋक्, साम प्रति 'उपावदत्' समीप मागत्योक्तवती। आवां मुभे मिथुनं यथा भवति तथा सम्भवाव। तच्च सम्भवनं प्रजोत्पत्त्यर्थं मिति। तदुक्तं साम निराकरोत् स्वाभिप्रायं चावदत्,—'अतः' अस्माट्टस्मिन्नो 'ज्यायान्' अभ्यधिको 'मम' साम्नो महिमा ; तस्मादिवादश्च विवाहश्च तुल्ययोरितिन्यायविरोध इति। ततः साम्ना सह स्वस्य तुल्यत्वसिद्ध्यै तु 'ते' हे ऋचौ सम्भूयोपेत्य पूर्ववदुक्तवत्यौ। चनेत्यक्षरद्वयात्मको निपातोऽपिशब्दार्थः *। 'ते' हे ऋचौ 'प्रति' अपि साम 'न समवदत' संवाद मङ्गीकारं नाकरोत्। पुनः 'ताः' ऋचस्तिस्रो भूत्वोपेत्य पूर्ववदुक्तवत्यः। तदानीं ताभिस्तिसृभिः 'समभवत्' सम्भवनं संयोग मकरोत्। यस्मात्संयोगः सम्भूतः, तस्मात्सामयुक्ताभिस्तिसृभिः ऋग्भिः सामगाः 'स्तुवन्ति' यज्ञे स्तोत्रं कुर्वन्ति। तस्यैव व्याख्यानं 'तिसृभिरुद्गायन्ति'–इति।

* पा० सू० ८.१.४७। अम० को० ३.५.३। मेदि० अव्य० ४५।

औद्गात्रं कर्म कुर्वन्नित्यर्थः। अत एव शाखान्तरे श्रूयते— "एवं साम ह्रचे क्रियते स्तोत्रियम्"—इति। यद्यपि छन्दस्सामनामके ग्रन्थे एकैकस्या ऋचि सामोत्पत्तम्, तथाप्युत्तरस्मिन् ग्रन्थे गात्रातेषु ह्रचेषु प्रयोगकाले साम गातव्यं भवति। तत्र प्रथमायां ऋचि योनिरूपायां यत्सामोत्पन्नं छन्दस्सामग्रन्थे समाम्नातम् *, तदवलोक्य तत्सामदृश्येन द्वितीयतृतीययोः ऋचोर्गानं समूहनीयम् †। एतदपि शाखान्तरे विहितम्— "यद्योन्यां तदुत्तरयोर्गायति" इति ‡। तस्मादौद्गात्रं कर्म तिसृभिः ऋग्भिर्निष्पद्यते। यस्मादाख्यानोक्तप्रकारेण तिसृभिः ऋग्भिः 'साम सम्भृतं' एकस्य साम्न महिमा तुल्यः संवृत्तः, तस्माल्लोकेऽपि 'एकस्य' पुरुषस्य सामस्थानीयस्य बह्वयो जाया ऋक्स्थानीया भवन्ति; न तु विपर्ययेण एकस्याः स्त्रियो 'बहवः' पतयः परस्परैकमत्येन 'मद्र' वर्तमाना दृश्यन्ते। यस्मादृगक्षरपदादिरूपा सत्यवचन शब्देनाभिधेया, समशब्देन सामाभिधेयं सत्यमद्रभद्रं सम्यक् तत्सामाभवत्, तस्मादुभयात्मकवस्तुनः 'साम' नाम सम्यक्त्वम् § ॥

उक्तार्थवेदनं प्रशंसति— "सामन् भवतीत्य एवं वेद"—इति। ऋक्सामयोरैकात्म्यवेदिता यः स सर्वैरभ्यर्चितः महतो भवति ॥

लौकिकदृष्टान्तादाहरणेनापि सामस्वरूपं प्रशंसति— "यो वै भवति, यः श्रेयसा मथ्नाति, स सामन् भवत्यसामन्य इति हि

---

* मैत्रायण्यामनयोर्ग्रन्थयोः ऐ साम छन्दस्सामेति च वेदसामेति च राणायनीयाख्येतृणाम्।

† तथाविधानानि ऋङ्मीमांसादर्शनानि, तादृशमानसमूहात्मकावेव हि तौ सामग्रन्थौ। ग्रन्थोः पौर्वापर्यं च वार्तिकेन मीमांसायाम् (जै० सू० ४ २ १ २ अधि० १ २४०)।

‡ ए. सी. सू. १ भा० १० पृ० दशमस्य एतद्दाहरणं द्रष्टव्यम्।

§ "साम सम्भृतं सत्यमद्रमेवाचं मद्र भद्रमिति वैदाना"—इति तित्ति० ७ १ १ ६ ।

निन्दन्ति"-इति। 'यः' पुमान् 'भवति' ऐश्वर्यं प्राप्नोति, यश्च विद्याद्वयाभ्यां श्रेष्ठत्वं प्राप्नोति, स सर्वोऽपि 'सामन् भवति' सर्वेषु स्वकीयत्वबुद्ध्या समदृष्टिर्भवति। अन्यथा सर्वे जनास्तम् 'असामन्यः' पक्षपातीति निन्दन्ति। अतः सामन्यरूपस्य लोके प्रशस्तत्वादध्याहारपाठस्य गानस्य चैकत्वेन सामत्वं प्रशस्तमित्यर्थः॥

नन्वस्त्वेवं सामत्वं प्रकृते निष्केवल्यशस्त्रे किं मायातमित्याशङ्क्य सामसादृश्येन शस्त्रप्रशंसां दर्शयति— "ते वै पञ्चान्यद् भूत्वा पञ्चान्यद् भूत्वा कल्पेता माहावश्च हिङ्कारश्च प्रस्तावश्च प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च"-इति। 'ते वै' ते एव वक्ष्यमाणा आहावादयः शस्त्रावयवाः पञ्चसङ्ख्याकाः 'अन्यत्' पृथगेव शस्त्ररूपं भूत्वा वर्त्तन्ते; तथा हिङ्कारादयः सामांशाः पञ्चसङ्ख्याकाः 'अन्यत्' पृथगेव सामस्वरूपं भूत्वा वर्त्तन्ते। ते च शस्त्रसामनी स्वावयवोपेते उभे 'कल्पेतां' स्वव्यापारसमर्थे भवतः। 'आहावः' शौंसावो मिति मन्त्रः। स्तोत्रिये ऋचे 'प्रथममध्यमोत्तमाः' तिस्र ऋचः। याज्यान्ते पठितव्यो 'वषट्कारः'। तदेतत् पञ्चकं शस्त्रस्वरूपम्। उद्गात्रा पठितव्यः साम्न आदौ "हिम्"-इत्येवं* शब्दो 'हिङ्कारः'। प्रस्तोत्रा गातव्यः सामावयवः 'प्रस्तावः'। उद्गात्रा गातव्यः 'उद्गीथः'। प्रतिहर्त्रा गातव्यः 'प्रतिहारः'। अन्ते सर्वैर्गातव्यो भागो 'निधनम्' †। तदेतत् पञ्चकं स्तोत्रस्वरूपम्। अतः सामसादृश्येन निष्केवल्यशस्त्रं प्रशस्तम्॥

---

* ४५० '*' टीप्पनी द्रष्टव्या।

† "प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनानि भक्तयः। तत्राद्यविधम्"-इति, "ओङ्कारहिङ्काराभ्यां द्वादविधम्"-इति, "अवसानं पूर्वं प्रस्तावः"-इत्यारभ्य "हिमन्तं पूर्वं सामा-

प्रकारान्तरेण प्रशंसति— "ते यत् पञ्चान्यद् भूत्वा पञ्चान्यद् भूत्वा कल्पेतां, तस्मात् दाक्षः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः इति"- इति। यस्मात् सामशस्त्रयोरुक्तप्रकारेण प्रत्येकं पञ्चावयवत्वं सम्भवम्, 'तस्मात्' पञ्चानां पङ्क्त्या योगादयं यज्ञः पाङ्क्त इत्येवं ब्रह्मवादिन आहुः। तथा गवादिपशवोऽपि चतुर्भिः पादैर्मुखेन च योगात् पाङ्क्ताः। अतो यज्ञे पाङ्क्तत्वप्रसिद्धिसम्पादनात् पशुसाम्याच्च शस्त्रं प्रशस्तम् ॥

पुनः प्रकारान्तरेण प्रशंसति— "यदु विराजं दशिनी अभि समपदेतां तस्मादाहुर्विराजि यज्ञो दशिन्यां प्रतिष्ठित इति"- इति। "दशाक्षरा विराट्"-इतिश्रुत्यन्तरात् * दशानां मन्त्राणां समूहो 'दशिनी' या विराडुक्ता, ता अभि लक्ष्य पञ्चकद्वयात्मके शस्त्रसामनी 'समपदेताम्' सम्भवतः, विराट्सद्दशे जाते इत्यर्थः। यदुभयसाम्यादेव कारणात् सङ्ख्या विराट्सादृश्यम्, तस्मादभिज्ञा एव आहुः,— दशसङ्ख्योपेतायां शस्त्रसामरूपायां विराजि यज्ञः 'प्रतिष्ठितः' व्यवस्थित इति ॥

पुनरपि गृहस्थपरुषसादृश्येन शस्त्रं प्रशंसति— "आत्मा वै स्रोत्रियः, प्रजानुरूपः पत्नी धाया, पशवः प्रगाथाः, गृहाः सूनम्"- इति। येन केन सामगाः स्तुवन्ति, सः 'स्रोत्रियः' तथा निष्के-वल्यशस्त्रस्य प्रारम्भे संमन्तव्यः। स च 'आत्मा वै' गृहस्थशरीर-स्थानीय एव। स्रोत्रियं तत्र मनुः द्वितीयो यस्तृचः शस्यते, सोऽयम् 'अनुरूपः'; स च 'प्रजा' पुत्रपौत्रादिस्थानीयः। येयं शस्त्रे

स्याम्"—इत्यस्य पर्यायधर्मश्रुत्यन्तरी द्रष्टव्यौ। छान्दोग्योपनिषद्भाष्ये च २५० १—२१ सङ्ख्या-समालोचनाः।

* ता० ब्रा० ६.५.४; ८.५.१३, अत० ब्रा० १.१.१-२२; इत्यपि पूर्वत्र। एवं परत्रापि।

प्रत्येषणीया 'धाय्या', सा पत्नीस्थानीया। यः 'प्रगाथः', स पशुस्थानीयः। यं निविद्धानीयं 'सूक्तं' तद् गृहस्थानीयम् * ॥

एतदेदनं प्रशंसति— "स वा अस्मिंश्च लोके ऽमुष्मिंश्च प्रजया च पशुभिश्च गृहेषु वसति य एवं वेद"-इति। पशुभिश्च सहित इति शेषः ॥ १२ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां द्वितीयाध्याये द्वादशः खण्डः ॥ १२ (२३) ॥

॥ अथ त्रयोदशः खण्डः ॥

स्तोत्रियं शंसत्यात्मा वै स्तोत्रियस्तं मध्यमया वाचा शंसत्यात्मान मेव तत्संस्कुरुतेऽनुरूपं शंसति प्रजा वा अनुरूपः स उच्चैस्तरा मिवानुरूपः शंसव्यः प्रजा मेव तच्छ्रेयसो मात्मनः कुरुते धाय्यां शंसति पत्नी वै धाय्या सा नीचैस्तरा मिव धाय्या शंसव्या प्रतिवादिनी ह्यस्य गृहेषु पत्नी भवति यचैवं विद्वान् नीचैस्तरां धाय्यां शंसति प्रगाथं शंसति स स्वर-

* १भा० ४३५ पृ० भा० द्रष्टव्यम्।

वत्या वाचा शंस्तव्यः पशवो वै स्वरः पशवः प्रगाथः पशूना मवरुध्या इन्द्रस्य नु वीर्याणि प्र वोच मिति सूक्तं शंसति तद्वा एतत् प्रिय मिन्द्रस्य सूक्तं निष्केवल्यं हैरण्यस्तूप मेतेन वै सूक्तेन हिरण्यस्तूप आङ्गिरस इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोक मजयदुपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद गृहा वै प्रतिष्ठामूक्तं तत्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्मादद्यापि दूर दूव पशूंल्लभते* गृहानेवैनानाजिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा ॥ १३ (२४) ॥

॥इत्यैतरेयब्राह्मणे तृतीयपञ्चिकायां द्वितीयोध्यायः ॥२॥

अथ निष्केवल्यशस्त्रभागाः स्वरविशेषाश्च वक्तव्याः ; तत्र प्रथमभागं विधत्ते -- "स्तोत्रियं शंसत्यात्मा वै स्तोत्रियः" इति। "अभि त्वा शूर नोनुम." इत्यस्मिन् (उ० आ० १.१.११.१,२.) प्रगाथे तृचं सम्पाद्य सामगाः स्तुवन्ति †। साऽयं स्तोत्रियस्तृचः, त मादौ शंसेत्। तस्य गृहस्थदेहस्वरूपत्वं पूर्वं मेवोक्तम् ॥ तस्मिन् स्तोत्रिये स्वरविशेषं विधत्ते — "तं मध्यमया वाचा शंसत्यात्मान मेव तत् संस्कुरुते"-इति। अत्युच्चत्व मतिनीचत्वञ्च यस्यां वाचि नास्ति, सा 'मध्यमा' तया। यावता 'वाचा' ध्वनिना देवयजन-

---

* 'पशूंल्लभते' क, 'पशूंनभते' ग, घ, 'पशूंल्लभत' ङ।

† ए. सी. मु. सा० सं० भा० मु० २८५० वर्ष० 'तथाहि'-इत्यादि द्रष्टव्यम्।

देशस्थाः शृण्वन्ति, न तु बहिर्देशस्थाः, तावन्तं ध्वनिं कुर्यात्। तेन 'आत्मान मेव' देह मेव संस्कुरुते ॥

ऋचान्तरं विधत्ते — "अनुरूपं शंसति ; प्रजा वा अनुरूपः"-इति। स्तोत्रियेण ऋचेन सदृशस्तृचः 'अनुरूपः' *। स चायं "अभि त्वा पूर्वपीतये इन्द्र स्तोमेभिरायवः"-इत्येष प्रगाथः (ऋ० भा० ७.३१.१, २.)। उभयोः प्रगाथयोः † समानच्छन्दस्त्वात् समानदेवताकत्वाच्चानुरूपत्वम्। त मिमं तृचं शंसेत्। तस्य च पुत्रादिप्रजास्थानीयस्य अनुरूपत्व मपेक्षितम् ; पितृपुत्रयोः कुल-शीलादिना समानरूपत्वात् ॥ तस्य ध्वनिविशेषं विधत्ते — "स उच्चैस्तरा मिवानुरूपः शंसव्यः ; प्रजा मेव तच्छ्रेयसी मात्मनः कुरुते"-इति। स्तोत्रियध्वनेरप्यधिकं ध्वनिं कुर्यात्। तथा सति स्वस्मादधिकं पुत्रादौ सम्पादितं भवति ॥

ततो यद्वावानेत्येतस्याः (सं० १०.७४.६.) धाय्यायाः शंसनं विधत्ते — "धाय्यां शंसति पत्नी वै धाय्या"-इति। पत्नीत्वं पूर्व मेवोक्तम् ॥ स्वरविशेषं विधत्ते — "सा नीचैस्तरा मिव धाय्या शंसव्या"-इति। अत्यन्तनीचो ध्वनिः कर्त्तव्यः ॥ होतुरेतद्वेदनं, प्रशंसति — "अप्रतिवादिनी ह्यस्य गृहेषु पत्नी भवति, यश्चैवं विद्वान् नीचैस्तरां धाय्यां शंसति"-इति। पत्युः प्रतिकूलं वद-तीति 'प्रतिवादिनी' तद्विपर्ययेण, अनुकूलवादिनी भवति ॥

---

* "पूर्वं सु चैव तदूप मपरेण रूपेणानुवदति ; यत् पूर्वꣳ रूप मपरेण रूपेणानुवदति, तदनुरूपस्यानुरूपत्वम्। अनुरूप एनं पुत्रो जायते य एवं वेद स्तोमीयानुरूपौ ऋचौ भवतः प्राणापानाना मवरुद्ध्यै"-इति ता० ब्रा० १२.६.४-६। प्रथमस्य स्तोमीयस्यैव सदृशान्तरं प्रतिपदिति ता० ब्रा० ६.९.१ ; १२.१.१. सा० भा० द्रष्टव्यम्।

† 'अभि त्वा पूर'-इति स्तोमीयस्य, 'अभि त्वा पूर्वपीतये'-इत्यनुरूपस्य वैलक्षण्यं।

"पिबा सुतस्य 'रसिनः'"-इत्येतं प्रगाथं (ऋ० सं० ६. २. १६.१,२.) विधत्ते— "प्रगाथं शंसति"-इति ॥ तत्र स्वर-विशेषं विधत्ते—"स स्वरवत्या वाचा शंस्यः; पशवो वै स्वरः, पशवः प्रगाथः, पशूना मवरुध्यै"-इति । 'स्वरवत्या' स्वरयुक्तया वाचेत्यर्थः । प्रगाथस्य पशुत्वं पूर्वं सुत्रम् ; स्वरस्य पशुत्वं सङ्ख्या-साम्यात्,— चत्वारः स्वराः, पशवोऽपि चतुष्पदाः ॥

निविद्धानीयं पञ्चदशर्चं सूक्तं विधत्ते— "इन्द्रस्य नु वीर्याणि प्र वोच मिति सूक्तं शंसति"-इति ॥ तदेतत्प्रशंसति— "तद्धा एतत् प्रिय मिन्द्रस्य सूक्तं निष्केवल्यं हैरण्यस्तूप मेतेन वै सूक्तेन हिरण्यस्तूप आङ्गिरस इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोक मजयत्"-इति । यदेतत् 'इन्द्रस्य नु वीर्याणि प्र वोचम्"-इति (सं० १.३२ १-१५.) निष्केवल्यशस्त्रं सूक्तम्, तदेतदिन्द्रस्य प्रियम्; हिरण्यस्तूपनाम्ना महर्षिणा दृष्टत्वाद् 'हैरण्यस्तूपम्' । तदेव 'एतेन' इत्यादिना स्तौत्यभिधीयते । अङ्गिरसः पुत्रो हिरण्यस्तूपाख्यो मुनिरेतेनैव सूक्तेनेन्द्रं स्तुत्वा तदीयं स्थानं प्राप्य ततोऽप्युत्तमं लोक मजयत् ॥

वेदनं प्रशंसति—"उपेन्द्रस्य प्रियं धाम गच्छति, जयति परमं लोकं य एवं वेद"-इति ॥

"सूक्ते ध्रुवनिर्विशेषं विधत्ते — "ध्रुवा वै प्रतिष्ठामूक्, तत्प्रति-ष्ठिततमया वाचा शंस्तव्यं ; तस्माद्यद्यपि दूर इव पशूनभ्यृच्छति, ध्रुवानेवैनानाजिगमिषति ; ध्रुवा हि पशूनां प्रतिष्ठा प्रतिष्ठा" -इति । "इन्द्रस्य नु वीर्याणि" इत्यस्मिन् सूक्ते शस्त्रस्य समा-पनेनावस्थानात् तस्य प्रतिष्ठारूपत्वम् । ध्रुवा अपि क्षितिहेतु-त्वात् प्रतिष्ठारूपाः ; तथा सतीदं सूक्तं 'प्रतिष्ठिततमया' इतिविश-

स्खलितत्वादिदोषरहितया आर्ष्येण ध्वनिनोपेतया वाचा शंसेत्। यस्माद् गृहस्थानीयस्य सूत्रस्य ध्वनिः प्रतिष्ठिततमः, तस्माल्लोके यद्यपि तृणभक्षणार्थं मरुस्थे गतान् दूरदेशे एवावस्थितान् पशून् दिवसे पुरुषो 'लभते' पश्यति, तथापि 'एनान्' पशून् सायं काले गृहानेव 'आजिगमिषति' आनेतुमिच्छति; यस्मात्पशूनां गृहाः 'प्रतिष्ठा' सुखेनावस्थातुं स्थानम्। चिरभ्यासोऽध्यायसमाप्त्यर्थः ॥१३॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
त्रयोदशः खण्डः ॥ १३ (२४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(३५)

॥ प्रथमः खण्डः ॥

॥ॐ॥ सोमो वै राजामुष्मिंल्लोक आसीत् तं देवाश्च ऋषयश्चाभ्यध्यायन् कथं मय मस्माल्लोमो राजा-ऽच्छेदिति ते ऽब्रुवंश्छन्दांसि यूयं न इमं सोमं राजान माहरतेति तथेति ते सुपर्णा भूत्वोदपतंस्ते यत्सुपर्णा भूत्वोदपतंस्तदेतत्सौपर्णं मित्याख्यानविद आचक्षते छन्दासि वै तत्सोमं राजान मच्छावरंस्तानि ह तर्हि चतुरक्षराणि चतुरक्षराण्येव छन्दाख्या-सन्त्सा जगती चतुरक्षरा प्रथमोदपतत्सा पतित्वार्द्ध मध्वनो गत्वाश्राम्यत्सा परास्य त्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च हरन्ती पुनरभ्यवापतत्तस्मा-त्तस्य वित्ता दीक्षा वित्तं तपो यस्य पशवः सन्ति जागता हि पशवो जगती हि तानाहरदथ त्रिष्टुबुद-पतत्सा पतित्वा भूयोऽर्द्धादध्वनो गत्वाश्राम्यत्सा परास्यैक मक्षरं त्र्यक्षरा भूत्वा दक्षिणा हरन्ती पुन-रभ्यवापतत्तस्मान्मध्यन्दिने दक्षिणा नीयन्ते त्रिष्टुभो लोके त्रिष्टुब्भि ता आहरत् ॥ १ (२५) ॥

वस्त्राद्यावप्रभेदं प्रतिगण्य यथानुहुभः शस्यमानाः,
मृत्योः सन्तरणातिक्रमण्य मथ मरुत्वदिधानप्रशंसा ।
तच्छेषा ये विशेषाः प्रतिपदनुचरप्रक्रमाः सप्तभागाः,
निष्क्रेवल्यं च शस्त्रं तदवयवकृताः स्तोत्रियाद्याश्च पञ्च ॥

अथ तृतीयसवनं वक्तु मादावाख्यायिका माह— "सोमो वै राजामुष्मिंल्लोक आसीत्, तं देवाश्च ऋषयश्चाभ्यध्यायन् ; कथं नय मस्मात्सोमो राजा ऽऽगच्छेदिति ; ते ऽब्रुवंश्छन्दांसि यूयं न इमं सोमं राजान माहरतेति ; तथेति ; ते सुपर्णा भूत्वोदपतंस्ते यत्सुपर्णा भूत्वोदपतंस्तदेतत्सौपर्णं मित्याख्यानविद आचक्षते"–इति। पुरा सोमवन्तौ द्युलोक एवासीत्, न त्वेतस्मिन् लोके। तदानीं सोम मभि लक्ष्य केन प्रकारेण सोमो न आगच्छेदिति देवा ऋषयश्च विचारितवन्तः। विचार्य गायत्र्यादीनि छन्दांसि प्रत्येव मब्रुवन्,— हे छन्दांसि ! अस्मदर्थं सोम माहरतेति। तानि च तदङ्गीकृत्य 'ते' लोकप्रसिद्धाः पक्षिणो भूत्वा द्युलोकं प्रत्युदपतन्। यस्मादेवं तस्मात् 'एतत्' सोमाहरणप्रतिपादकं यत्प्रजातं 'सौपर्णम्' आख्यान मिति 'आख्यानविदः' पौराणिकाः कथयन्ति ॥

अथोत्पतत्सु छन्दःसु मध्ये जगतीवृत्तान्त माह— "छन्दांसि वै तत्सोमं राजान मच्छाचरंस्तानि ह तर्हि चतुरक्षराणि चतुरक्षराण्येव छन्दांस्यासन्ता जगती चतुरक्षरा प्रथमोदपतत्ता पतित्वार्ई मध्वनो गत्वाश्राम्यत्ता पराख्य त्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षाञ्च तपश्च चरन्ती पुनरभ्यापतत्तस्मात्तस्य वित्ता दीक्षा वित्तं तपो यस्य पशवः सन्ति ; जागता हि पशवो जगती हि तानाहरत्"–इति। गायत्र्यादिच्छन्दांसि उत्पतने प्रवृत्तानि, तदानीं सोमम् 'अच्छ' प्राप्तुं द्युलोके तत्र-तत्रावतरत्। 'तानि' च छन्दांसि,

तस्मिन् काले चतुरक्षरोपेतानि, अतः पुरा सर्वदा चतुरक्षरा-ण्येवासन्,— न तु कस्मापि छन्दसो ऽधिकाक्षरतासीत् । ततः सा जगती चतुरक्षरा सती छन्दोऽन्तरेभ्यः सर्वेभ्यः प्रथमं प्रजापतिं सोमं प्रत्युदपतत् । तत्र मार्गस्थार्द्धं गत्वा अथ श्रान्ता सती श्रमवशात् त्रीण्यक्षराणि परित्यज्य स्वयं भेकाक्षरा भूत्वा सोमं मार्ष्टुं मयङ्गुधती सोमयागसम्बन्धिनीं 'दीक्षां' दीक्षणीयेष्ट्यादिरूपाम्, क्षीरपानादिरूपं 'तपः' च 'हरन्ती' तस्माल्लोकादानयन्ती पुनरेतं लोकमभि लक्ष्य 'अवापतत्' अधोमुखी समागता । यस्मादेवं तस्मिन्लोके यस्य पुरुषस्य पशवः सन्ति, तेन दीक्षा 'विप्ता' लब्धा भवति, तपश्च लब्धं भवति । न च दीक्षातपसोः जगत्या समानी-तयोः सतोः पशूनां तदुभयकारणत्वं कथं मिति यङ्गनीयम् ; पशूनां जागतत्वेन जगतीद्वारा दीक्षासम्बन्धसम्भवात् । जागतत्वं कथं मिति चेत्, जगत्या पशवो मानीतत्वादिति द्रष्टव्यम् । अत एव शाखान्तरे जगतीं प्रकृत्यैव साक्षात्कृतम्— "सा पशुभिश्च दीक्षया चागच्छत्तस्माज्जगती छन्दसां पशव्यतमा, तस्मात्पशुमन्तं दीक्षो-पनमति"-इति (तै० सं० ६.१.६.२.) ॥

त्रिष्टुभो दृष्टान्तमाह—"अथ त्रिष्टुबुदपतत्सा पतित्वा भूयो ऽर्द्धाध्वनो गत्वाश्राम्यत्सा परास्यैकं मत्सरं चात्वरा भूत्वा दक्षिणा हरन्ती पुनरभ्यवापतत्तस्मात्प्रत्यङ्दिशं दक्षिणा नीयन्ते त्रिष्टुभो लोके त्रिष्टुभ्यः ताः* आहरत्"-इति । सा त्रिष्टुप् द्युलोके भूयो भूयः पतित्वापि मार्गस्थार्द्धादेव अश्राम्यदित्यन्वयः‡ । यस्मादेव

---

* त्रिष्टुप् । इह इति सन्धिश्छंदः ।

† 'ताः'-इति क ।

‡ "अपतदित्यन्वयः"-इति ख ।

दक्षिणाः सर्वा आनीतवती, तच्चाग्निष्टुभः स्तोमे माध्यन्दिनसवने यजमानेदत्ताः सर्वा दक्षिणा ऋत्विग्भिर्नीयन्ते ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये प्रथमः खण्डः ॥ १ (२५) ॥

॥ अथ द्वितीयः खण्डः ॥

ते देवा अब्रुवन् गायत्री त्वं न इमं सोमं राजानं माहरेति सा तथेत्यब्रवीत्तां वै मा सर्वेण स्वस्त्ययनेनानुमन्त्रयध्व मिति तथेति सोदपतत्तां देवाः सर्वेण स्वस्त्ययनेनान्वमन्त्रयन्त प्रेति चेति चेत्येतद्वै सर्वं स्वस्त्ययनं यत् प्रेति चेति चेति तद्यो ऽस्य प्रियः स्यात् त मेतेनानुमन्त्रयेत प्रेति चेति चेति स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति सा पतित्वा सोमपालान् भीषयित्वा पद्भ्यां च मुखेन च सोमं राजानं समगृभ्णाद्यानि चेतरे छन्दसी अक्षराण्यजहितां तानि चोप समगृभ्णात्तस्या अनु विस्रस्य कृशानुः सोमपालः सव्यस्य पदो नख मच्छिदत्तच्छल्यकोऽभवत्तस्मात्स नख मिव यद्वश मस्रवत्सा वशाभवत् तस्मात्सा कविरिवाथ यः शल्यो यदनीक

मासीत् स सर्पो निर्दंश्यभवत् सहस्र स्रवा यानि पर्णानि ते मन्थावला यानि स्रावानि ते गण्डूपदा यत्तेजनं सोऽभ्याहिः सो सा तथेषुरभवत् ॥ २ (२६)॥

अथ गायत्रीवृत्तान्त माह— "ते देवा अब्रुवन् गायत्रीं,— त्वं न इमं सोमं राजानं माहरेति ; सा तथेत्यब्रवीत् ; तां वै मा सर्वेण स्वस्त्ययनेनानुमन्त्रयध्व मिति ; तथेति ; सोदपतत्तां देवाः सर्वेण स्वस्त्ययनेनान्वमन्त्रयन्त,—प्रेति चेति चेति ; एतद्वै सर्वं स्वस्त्ययनं यत् प्रेति चेति चेति ; तस्मोऽस्य प्रियः स्यात्, त मेते-नानुमन्त्रयेत प्रेति चेति चेति, स्वस्तेव गच्छति स्वस्ति पुनरा-गच्छति"—इति। जगतीत्रिष्टुभोः सोमानयनसामर्थ्याभावं दृष्ट्वा ते देवाः गायत्रीं प्रार्थितवन्तः। हे गायत्रि ! त्वं 'नः' अस्मदर्थं इमं सोम माहरेति। 'सा' च गायत्री तथेत्यङ्गीकृत्य देवान् प्रत्येव मब्रवीत्,—हे देवाः ! यदा अहं सोम मानेतुं गच्छामि, तदानीं मा मेवं गच्छन्तीं मां यूयं सर्वेऽपि यजागत्रि सर्वेण 'स्वस्त्ययनेन अनुमन्त्रयध्वं' क्षेमप्रापकं स्वस्त्ययनम्, तदर्थं माशी-र्वादरूपेण मन्त्रेण ममानुमन्त्रणं कुरुतेति। एव मुक्ता तथेति देवैरङ्गीकृते सति 'सा' गायत्री दुरालोकं प्रत्युत्पतन मकरोत्। तदानीं देवाः स्वागतप्रकारेण सर्वेणापि क्षेमप्रापकमन्त्रेण गायत्री मनुमन्त्रितवन्तः। कोऽसौ मन्त्रः ? इति—'प्र'-शब्द एको मन्त्रः, 'या'-शब्दो द्वितीयो मन्त्रः ; तदुभयप्रदर्शनार्थं मितिशब्दद्वयम्। उभयसमुच्चयार्थं चकारद्वयम्। क्षेमेण सोमं प्रायुधि, पुनरपि क्षेमेणागच्छेति। अथ माशीर्वादो मन्त्रद्वयस्यार्थः। एतदेव मन्त्र-द्वयं सर्वं स्वस्त्ययनं 'प्र'-इत्येकम्, 'या'-इति द्वितीयं पद मस्ति ;

इतोऽधिकं नान्यत् स्वस्त्ययन मस्ति। यस्मादिद मेव सर्वस्वेम-प्रापकम्, तस्मादिदानी मपि यः पुमान् ग्रामान्तरं जिगमिषुः 'अस्य' यष्टुस्वामिनः प्रियः स्यात् ; तं जिगमिषुं प्रेत्येतीतिमन्त्र-द्वयेनानुमन्त्रयेत ; तेनाग्नीर्वादप्रसादेनायं क्षेमेणैव गच्छति पुन-रागच्छति च ॥

इत्थं प्रासङ्गिकं लौकिकविधि मुक्त्वा प्रकृत मेव गायत्री-वृत्तान्त मनुसरति—"सा पतित्वा सोमपालान् भीषयित्वा पद्भ्यां च मुखेन च सोमं राजानं समग्रभ्णात्, यानि चेतरे छन्दसो अक्षराण्यजहितां तानि चोप समग्रभ्णात्"-इति। 'सा' गायत्री 'पतित्वा' उत्पतनेन सोमं प्राप्य गन्धर्वान् स्वानभ्राजादीन् सोमरक्षकान् आस्फोटनायुधप्रदर्शनादिना भीषयित्वा,—भीत्वा तेष्वपक्रमेषु स्वयं पक्षिरूपा सती स्वकीयाभ्यां पद्भ्यां मुखेन च सोमं सम्यग् गृहीतवती। स्वानभ्राजादीनां सोमपालकत्व माध्वर्यवे सोमप्रवरणे मन्त्र-तद्ब्राह्मणाभ्यां मवगम्यते। "स्वान भ्राजाद्गारे वश्चारे वृक्ष सुवृक्ष क्षयानवे ते वः सोमक्रयणास्तावद्भ्यम्"-इति (तै० सं० १.२.७.) मन्त्रः, "स्वानभ्राजेत्याहैते वा अमुष्मिंल्लोके सोम मरक्षन्"-इति (तै० सं० ६.१.१०.५.) ब्राह्मणम्। न केवलं गायत्री सोम मेव गृहीतवती, किन्तु 'इतरे' जगतीविष्टुभाख्ये छन्दसी 'यानि' चत्वार्यक्षराणि 'अजहितां' परित्यक्तवत्यौ, तानि चोपेत्य सम्यग् गृहीतवती ॥

अथ तस्या गायत्र्या गन्धर्वैश्च सह युद्धे यो वृत्तान्तस्तं दर्श-यति—"तस्या अनु विस्रस्य क्षयानुः सोमपालः सव्यक्ष पदो नक्ष मच्छिदत् तच्छ्यकोऽभवत्, तस्मात् नक्ष मिव ; यदस्य मक्ष-वत् सा वशाऽभवत्, तस्मात् क्षविरिव ; अथ यः शको यदनीक

आसीत् सर्पो निर्दंशभवत्; सङ्गसः खजो; यानि पर्णानि ते मज्जावलाः; यानि स्रावाणि ते गण्डूपदाः; यत् मेजर्ण सोऽश्नाति; सो सा संधेयुरभवत्"—इति। स्नानभाजादिषु सोमरक्षणेषु यः सप्तमो गन्धर्वः अयास्युनामकः, सोऽयं तस्या गायत्र्या चतु हरती साणं विसृज्य तदीयस्य वामपादस्यैकं नखं छिन्नवान्। तच्च नखं 'शल्यकः' मर्कटशरीरपरिमितः शल्यकाख्यो मृग आसीत्। यच्च मृगस्य पुच्छसमीपे बहवो रोमाः प्रादेशप्रमिताः तीक्ष्णाग्रा लौह-मया उत्पद्यन्ते, स शल्यकः। यस्मादयं नखादुत्पन्नवस्तस्माच्च नख मिव तीक्ष्णाग्ररोमोपेतः। तत्र छिन्ननखपादप्रदेशे यद् 'वर्ग' मेदोऽस्रवत्, सा 'वशा' मेध्या, क्वचिदजा अश्वादिपशुषु आसीत्। 'तस्मात्' मायत्र्या उत्पन्नत्वात् 'सा' वशा 'हविरिव' देवतायोग्यं हविरेवासीत्। तत्र हविष्ट्वं शाखान्तरे श्रूयते— "एता मेव वशा मादित्येभ्यः कामायालभेत" इति (मै० सं० २.१.२.१,४)। अथ नखच्छेदनाय गन्धर्वेण विसृष्टो बाणः, सोऽपि नखसङ्घट्टनेन कुण्ठि-ताग्रो बहुधा भग्नो भूमिपतितः। तस्य बाणस्य यः 'शल्यः' लोहायसनिर्मितो बाणाग्रे स्थापितः, तस्य च शल्यस्य यत् 'अनीकं' मुखं घट्टनेन कुण्ठितं आसीत्, 'सः' अयं शल्यः, तदनी-कात्मको बाणभागो 'निर्दंशो' दंशनासमर्थः सर्पो अभवत्;— जलमध्ये सञ्चरतो डुण्डुभाख्यस्य सर्पस्य विषरहितत्वाद् दंशन-सामर्थ्यं नास्ति। तस्मात्कुण्ठिताग्रस्य लोहस्य योऽयं 'सङ्गसः' वेगः, तस्मात् 'सङ्गसः' बाणवेगात् 'खजः' उभयतः-शिराः सर्पो अभवत्। तस्य बाणस्य मूले यानि 'पर्णानि' कङ्कपत्राणि, ते 'मज्जावलाः' अभवन्। ये जीवविशेषाः वयसाख्यास्थीनुक्षा भक्षयन्ति, ते मज्जावलाः। तस्मिन् बाणे यानि 'स्रावाणि' पक्षिमध्यगानि

आसुविग्रेषाः, ते 'गण्डूपदाः' अभुवन्। अवस्तारादिस्थानेषु ये सर्पा जायन्ते, ते गण्डूपदाः। तस्मिन् वाणे यत् 'तेजनं' लोहपत्रव्यतिरिक्तं काष्ठं, सः 'अन्धाहिरभवत्' दृष्टिरहितः सर्पोऽभूत्। 'तथा' तेनोक्तप्रकारेण 'इषुः' गन्धर्वेण सुतो वाणः 'सो सा' अभवत्। 'उ'-शब्दः समुच्चयार्थः; सा च सा चेत्युक्तं भवति। तथोक्ते सति तत्तज्जातिः निर्देशिसर्पादिरूपेत्युक्तार्थोपसंहारः॥ २॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां त्रयोदशाध्याये
द्वितीयः खण्डः॥ २ (२६)॥

॥ अथ तृतीयः खण्डः॥

सा यद्दक्षिणेन पदा समग्रभ्णात्तत्प्रातरुसवन मभवत्तद्गायत्री स्व मायतन मकुरुत तस्मात्तत्प्रातरुसवनतमं मन्यन्ते सर्वेषां सवनाना मग्रियो मुखो भवति श्रेष्ठता मश्नुते य एवं वेदाथ यत्सव्येन पदा समग्रभ्णात्तन्माध्यन्दिनं सवन मभवत्तद्विस्रंसत तद्विस्रंसं नान्वाप्नोत्पूर्वं सवनं ते देवाः प्राजिज्ञासन्त तस्मिंस्त्रिष्टुभं छन्दसा मदधुरिन्द्रं देवतानां तेन तत्समावद्वीर्यं मभवत्पूर्वेण सवनेनोभाभ्यां सवनाभ्यां समा-

अह्नोर्याभ्यां समावत्यामीभ्यां राध्नोति य एवं वेदाथ यन्मुखेन समगृभ्णात् तत्तृतीयसवन मभवत्तस्य पतन्ती रस मधयत्तद्गीतरसं नान्वाप्नोत्पूर्वे सवने ते देवाः प्राजिघ्रासन्त तत्पशुष्वपश्यंस्तद्वदाश्विर मवनयन्त्याज्येन पशुना चरन्ति तेन तत्समावद्दोर्यं मभवत्पूर्वाभ्यां सवनाभ्यां सर्वैः सवनैः समावद्दोर्यैः समावत्यामीभी* राध्नोति य एवं वेद ॥ ३ (२७) ॥

अथ तृतीयसवनार्थं सवनत्रयस्योत्पत्तिं दर्शयति—"सा यद्दक्षिणेन पदा समगृभ्णात्तत्प्रातस्सवन मभवत्तद्गायत्री स्व मायतन मकुरुत; तस्मात्तत्सर्वहुतमं मन्यन्ते सर्वेषां सवनानाम्; अथियो मुख्यो भवति, श्रेष्ठता मश्नुते य एवं वेदाथ यत्सव्येन पदा ससगृभ्णात्तन्माध्यन्दिनं सवन मभवत्तद्विरूपं, तद्विरूपं नान्वाप्नोत्पूर्वे सवने; ते देवाः प्राजिघ्रासन्त तस्मिंस्त्रिष्टुभं छन्दसा मदधुरिन्द्रं देवतानां; तेन तत्समावद्दोर्यं मभवत्पूर्वेण सवनेनोभाभ्यां सवनाभ्यां समावद्दोर्याभ्यां समावत्यामीभ्यां राध्नोति य एवं वेदाथ यन्मुखेन समगृभ्णात् तत्तृतीयसवन मभवत्"—इति। 'सा' गायत्री सोम मानयन्ती दक्षिणेन 'पदा' पादेन 'यत्' यावत् सोमस्य स्वरूपं गृहीतवती, 'तत्' तावत् प्रातस्सवन मभवत्। तच्च प्रातस्सवनं 'सा' गायत्री स्वकीयं स्थान मकरोत्। तस्मात् तत्सर्वेषां सवनानां मध्ये अतिशयेन समृद्ध मिति याज्ञिका मन्यन्ते; तच्च प्रयोगवाक्यस्य सद्भावात्। यः 'एवम्' उक्तार्थं वेद, स स्वकीयानां मध्ये 'मुख्यः'

* 'आमिभी' ट, टी० ग, घ।

श्रेष्ठः सन् विद्याढ्यत्वादिरूपां 'श्रेष्ठतां' प्राप्नोति। अथ सा गायत्री वामपादेन 'यत्' सोमस्य स्वरूपं गृहीतवती, तन्माध्यन्दिनं सवनं विस्रस्तमभूत्; वामपादात् 'तत्' तत्र 'विस्रस्तं' गलितं तत् माध्यन्दिनं सवनं पूर्वोक्तप्रातस्सवनानुगमनाय शक्तं नाभूत्। ते देवा विचार्य 'तस्मिन्' माध्यन्दिने सवने स्वामित्वेन छन्दसां मध्ये त्रिष्टुभं देवतानां मध्ये इन्द्रं च स्थापितवन्तः। तेन 'तत्' माध्यन्दिनं सवनं प्रातस्सवनेन सह 'समावद्वीर्यं' तुल्यसामर्थ्यं अभूत्। उक्तार्थस्य वेदिता तुल्यसामर्थ्याभ्यां मत एव तुल्यजातिभ्यां सखाया भवति। 'जामी'-शब्दो जातिवाची *; तुल्यजातिभ्यो मित्यर्थः॥

अथ गायत्री मुखेन यत्सोमस्वरूपं गृहीतवती, तत् तृतीयसवनं अभूत्। तस्मिन् सवने तु ऋजीषस्वरूपे निस्सारे सोमे आशिरादिकं विधत्ते— "तस्य पतन्ती रस मधयत्तद्धीतरसं नान्वाप्नोत्पूर्वे सवने; ते देवाः प्राजिज्ञासन्त तत्पशुष्वपश्यंस्तद्यदाशिर मवनयत्याज्येन पशुना चरन्ति, तेन तत्समावद्वीर्यं अभवत्पूर्वाभ्यां सवनाभ्याम्"-इति। सा गायत्री मुखेन तृतीयसवनरूपं सोमं गृहीत्वा द्युलोकादधः पतन्ती 'तस्य' सोमस्य 'रस मधयत्' सारं पीतवती। तत् तृतीयसवनं 'धीतरसं' पीतसारं भूत्वा पूर्वोक्ते प्रातस्सवनमाध्यन्दिनसवने इव अनुगन्तुं नाशक्नोत्। ते देवाः तत्प्रतीकारं विचार्य तत्साधनं 'पशुषु अपश्यन्' पशुषु क्षीरं यदस्ति, यच्चाज्य मस्ति, यदपि हृदयाद्यङ्ग मस्ति, तत्सर्वं सारम्। तस्माच्चत् पीतरसे सोमसम्बन्धिनि ऋजीषे 'आशिरं' क्षीरम् 'अवनयन्ति' सिञ्चन्ति याज्ञिकाः, तथा आज्यपशुभ्यां 'चरन्ति' अनुतिष्ठन्ति। तदानीं

* अतिरेकवाचिप्रसमानजातीयानां वाचकौ 'जामि-शब्दः'-इत्यादि देवराजयज्वनता निघण्टुवृत्तिः (३.१.३९.)। निरु० २.१.५.६।

'तेन' अनुष्ठानेन 'तत्' तृतीयसवनं पूर्वसवनाभ्यां तुल्यकालमेव भभूत्। अथ सर्वोऽपि शाखान्तरे सङ्गृह्यमाणः — "ब्रह्मवादिनो वदन्ति,— कस्मात् सत्यात् गायत्री कनिष्ठा छन्दसाम् सती यज्ञमुखं परीयायेति ; यदेवादः सोम माहरत्, तस्मादयज्ञमुखं पर्येत्, तस्मात्तेजस्विनीतमा पशूनां हे सवने समगच्छतामुखेनैवं ; यन्मुखेन समगच्छात्, तदधयत् ; तस्माद् हे सवने शुक्रवती प्रातश्चवनं च माध्यन्दिनं च ; तस्मात् तृतीयसवन ऋजीष मभिषुण्वन्ति,—धीत मिव हि मन्यन्त आशिर मवनयति सङ्गत्यायै" —इति (तै० सं० ६.१.६.३,४.) ॥

वेदनं प्रशंसति — "सर्वैः सवनैः समावद्वीर्यैः समावच्छामीभौराप्नोति य एवं वेद" इति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
तृतीयः खण्डः ॥ ३ (२७) ॥

॥ अथ चतुर्थः खण्डः ॥

ते वा इमे द्वे तरे छन्दसी गायत्री मध्यतो दधतो वित्तं नावच्छराण्यनु पर्यागुरिति नेत्यब्रवीद् गायत्री यथावित्त मेव न इति ते देवेषु प्रजा मैतां ते देवा अब्रुवन् यथावित्त मेव व इति तस्माद्याप्येतर्हि वित्थां व्याहुर्यथावित्त मेव न इति ततो वा अष्टाक्षरा

गायत्र्याभवत्त्र्यक्षरा त्रिष्टुबेकाक्षरा जगती सप्ताक्षरा गायत्री प्रातस्सवन मुदयच्छन्नाशक्नोत् त्रिष्टुप् त्र्यक्षरा माध्यन्दिनं सवन मुद्यन्तुं तां गायत्र्यब्रवीदायान्यपि मेऽत्रास्त्विति सा तथेत्यब्रवीत् त्रिष्टुप् तां वै मैतैरष्टाभिरक्षरैरुपसम्मेहीति तथेति ता मुप समदधादेतद्वै तद् गायत्र्यै माध्यन्दिने यन्मरुत्वतीयस्योत्तरे प्रतिपदो यश्चानुचरः सैकादशाक्षरा भूत्वा माध्यन्दिनं सवन मुदयच्छन् नाशक्नोज्जगत्येकाक्षरा तृतीयसवन मुद्यन्तुं ताङ्गायत्र्यब्रवीदायान्यपि मेऽत्रास्त्विति सा तथेत्यब्रवीज्जगती तां वै मैतैरेकादशभिरक्षरैरुपसम्मेहीति तथेति ता मुप समदधादेतद्वै तङ्गायत्र्यै तृतीयसवने यद्वैश्वदेवस्योत्तरे प्रतिपदो यश्चानुचरः सा द्वादशाक्षरा भूत्वा तृतीयसवन मुदयच्छत्ततो वा अष्टाक्षरा गायत्र्यभवदेकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती सर्वैश्छन्दोभिः सवावद्वीर्यैः समावज्जामिभी राप्नोति य एवं वेदैकं वै सत् तत्त्रेधाभवत्तस्मादाद्रियितव्य मेवं विदुष इत्येकं हि सत् तत्त्रेधाभवत् ॥ ४ (२८) ॥

नन्वु पूर्वत्र सर्वाणि छन्दांसि चतुरक्षराणीत्युक्तम्; तेष्वपि त्रिष्टुभ एक मक्षरं गतम्, जगत्याश्च त्रीण्यक्षराणि गतानि, तथा

सति सर्वश्रुत्यन्तरविरोधः ; तेषु च श्रुत्यन्तरेष्वष्टाक्षरा गायत्री, एकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा जगतीति सर्वत्र श्रूयते*; अनुष्ठानं च तथैव क्रियते ; तत्कथं विरोधपरिहारः ? इत्याख्यायिकया परिहारं दर्शयितुं प्रारभते- "ते वा इमे इतरे छन्दसी गायत्री मभ्यवदेतां,— वित्तमावत्तराण्यनुपर्यागुरिति ; नेत्यब्रवीद्गायत्री यथावित्त मेव न इति ; ते देवेषु प्रश्नमैतां ; ते देवा अब्रुवन्,— यथावित्त मेव इति ; तस्माद्याय्यताꣳ वित्त्यां व्याहृर्यथावित्त मेव न इति ; ततो वा अष्टाक्षरा गायत्र्यभवत्, त्र्यक्षरा त्रिष्टुबेकाक्षरा जगती" इति । ये त्रिष्टुब्जगत्यौ पुरा स्वकीयान्यक्षराणि परित्यक्तवत्यौ, ते एव इमे 'इतरे' गायत्रीव्यतिरिक्ते छन्दसी गायत्री मभि लक्ष्य ममागत्यैव मुक्तवत्यौ,— हे गायत्रि ! यत् त्वया 'वित्तं' लब्धम्, अधिकं मक्षरचतुष्टयम्, तदेतत् 'नौ' त्रिष्टुब्जगत्योरत्वयोः ; तस्मात् तानि चत्वार्यक्षराणि 'अनुपर्यागुः' यावां त्रिष्टुब्जगत्यावत् लब्धं पर्यायेण आगच्छेस्विति । गायत्री तयोर्वचनं नेति निराकृत्य तयैता सुपपत्तिं मब्रवीत्,—'नः' अस्माकं 'यथावित्त मेव' लब्ध मनतिक्रम्यैव स्वामित्वं युक्तम् । यद्वस्तु येन लब्धं तत् तस्यैवेति लौकिकन्यायः । ते न्यायं निर्णेतुं 'ते' त्रिष्टुब्जगत्यौ देवेषु प्रश्नम् 'ऐतां' प्राप्नुताम् । हे देवाः ! कथं न्यायः ? इति तयोः प्रश्नः । ते च देवा उत्तर मेव मब्रुवन् — 'यः' युष्माकं निर्मृतां यथावित्त मेवाक्षरलोकारो युक्त इति । यस्माद् देवैरेव मुक्तं 'तस्माद्' तत एव कारणादिदानीमपि 'वित्त्यां' कस्य चित् पुरुषस्य द्रव्यलब्धौ सत्यां 'व्याहृः' विप्रतिपन्नं प्रति न्यायाभिज्ञा एव भाहुः,— नः' अस्माकं सर्वेषा मपि लब्ध मनतिक्रम्यैव वस्तुलोकारो

* पु० ४१,४२ पृ० । अत० ब्रा० १ २.३.२३—२५। ता० ब्रा० ८. ७।

युक्त इति। युद्धादौ जये सति परसेनायां प्रविश्य येन यज्ञम्यते, तेनैव तद् गच्छत इति वक्तुमभिप्रायः। देवैर्न्यावे क्षिप्तेति सति तदूर्ध्वं गायत्री स्वकीयैः स्वभावसिद्धैश्चतुरक्षरैर्युक्तलब्धैश्चतुरक्षरैरपि स्वयं मष्टाक्षरा अभूत्। त्रिष्टुभः पूर्वं वर्त्तमानेषु चतुर्ष्वेकाक्षरस्य गतत्वात् त्र्यक्षरैव सा, तथा जगत्याश्चतुरक्षरेष्वक्षरत्रयस्य गतत्वादेकाक्षरैव सा अभवत्॥

इदानीं त्रिष्टुभोऽक्षरत्रयादधिकानां मन्त्राणां प्राप्तिप्रकारं दर्शयति— "साष्टाक्षरा गायत्री प्रातस्सवन मुदयच्छत्त्र्याक्षरोत् त्रिष्टुप् त्र्याक्षरा माध्यन्दिनं सवन मुद्यन्तुं; तां गायत्र्यब्रवीदायान्यपि मेऽक्षाख्यिति; मा तथेत्यब्रवीत् त्रिष्टुप् तां वै,— मैतैरष्टाभिरक्षरैरुपसमन्धेहीति; तथेति तां मुपसमदधात्; एतद्वै तत्तार्हि यत्रै मध्यन्दिने यन्मरुत्वतीयस्योत्तरे प्रतिपदो यथानुचरः सैकादशाक्षरा भूत्वा माध्यन्दिनं सवन मुदयच्छत्"—इति। या इयं मष्टाक्षरा गायत्री प्रातस्सवनम् 'उदयच्छत्' उद्यमनं निर्वोढुं तस्य प्रातस्सवनस्याकरोत्। या तु त्रिष्टुप्, सेयं 'त्र्याक्षरा' अक्षरत्रयमात्रेण युक्ता सती माध्यन्दिनं सवनम् 'उद्यन्तु' निर्वोढुं नाशक्नोत्। 'ताम्' अशक्तां त्रिष्टुभं दृष्ट्वा गायत्री एव मब्रवीत्,— 'आयानि' त्वत्सहायार्थं मह मागच्छानि 'मे' ममापि 'अत्र' अस्मिन् माध्यन्दिने सवने भागोऽस्तिति। तद्वचन मङ्गीकृत्य सा त्रिष्टुबेव मब्रवीत् 'तां वै' तादृशीं गायत्रीम्,— त्र्याक्षरा मेव 'मा' मां स्वकीयैरेतैरष्टाभिरक्षरैः 'उपसन्धेहि' सामीप्येन सन्धानं कुरु, प्रविशेत्यर्थः। तद्वचन मङ्गीकृत्य सा गायत्री 'तां' त्रिष्टुभम् 'उपसमदधात्' स्वकीयैरष्टाभिरक्षरैः प्राविशत्। कोऽसौ गायत्र्या लब्धो भाग इति, स उच्यते— 'मरुत्वतीयस्य'

शस्त्रस्य * 'उत्तरे प्रतिपदः' "आ त्वा रथम्"-इत्यस्मिन् प्रारम्भरूपे ऋचे प्रथमाया उत्तरे ये द्वे ऋची प्रतिपदौ प्रारम्भरूपे विदीते †, यच्च "इदं वसो सुतम्"— इत्यनुचरकपस्तृचः ‡; तदेवैतदृक्पञ्चकं माध्यन्दिनसवने गायत्रैः त्रिष्टुभा दत्तम्;— सप्त पञ्चमी गायत्रीच्छन्दस्काः §। ततो गायत्रीप्रवेशात् 'मा' त्रिष्टुप् एकादशाक्षरा भूत्वा माध्यन्दिनं सवनप्रयोगम् 'उदयच्छत्' निरवहत् ॥

अथ जगत्याः स्वकीयादेकस्मादक्षरादधिकानां मन्त्राणां प्राप्तिप्रकारं दर्शयति— "नाशक्नोज्जगत्येकाक्षरा तृतीयसवनं सम्पादयितुं, तां गायत्रीमुदायांस्तपि मेऽत्रास्यिति; सा तथेत्य त्रैष्टुभीज्जगतीं; तां वै मैत्रैरेकादशभिरक्षरैरुपमन्थेदिति; तथेति; त्वा मुपममदधादेतद् तद्गायत्रैव तृतीयसवने यद्वैश्वदेवशस्त्रोत्तरे प्रतिपदौ यद्यानुचरः; सा द्वादशाक्षरा भूत्वा तृतीयसवनं मुदयच्छत्" इति। वैश्वदेवशस्त्रस्य प्रतिपदनुचरावुपरिष्टादुदाहरिष्येते ‖ ॥

उक्तमर्थं निगमयति - "ततो वा अष्टाक्षरा गायत्र्यभवद् नैकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा जगती" इति ॥

वेदनं प्रशंसति — 'सर्वैश्छन्दोभिः समाप्तेर्यैः समाप्त्या-मिमौ राध्नोति य एवं वेद"-इति ॥

---

* ६५—८३ पृ० १ ... ८ खं० मर्केषां ... स्त्रोतीयसवनस्य

† ६७ पृ० २ पं० 'वैश्व'-इत्यादि ११२ पृ० '२' ३५० 'प्रथमस्य'-इत्यादि द्रष्टव्यम्।

‡ ६७ पृ० ३ पं० 'तदनन्तरास्तो'-इत्यादि द्रष्टव्यम्।

§ ऋ० सं० ८.६८.१, ३ इत्यत्र द, ऋ० १.२,३ इति निगमः, इति पक्षे।

‖ प्रथमादिषु स्तम्भेषु वैश्वदेवशस्त्रविधानाच्चैवम्।

गायत्रीं विशेषेण प्रशंसति— "एकं वै स तत् त्रेधाभवत्तस्मादाहुर्दानव्या मेवं विदुष इत्येकं हि स तत् त्रेधाभवत्"–इति। 'तत्' गायत्र्याः स्वरूपं पूर्वं चतुरक्षररूपेणैक मेव, तत्पश्चादधिकाक्षरचतुष्टयत्वसम्पादनेन स्वकीयानां मष्टाक्षराणां त्रिष्टुब्जगत्योः प्रवेशेन च त्रेधा अभवत्। यस्मादीदृशी गायत्र्या महिमा, तस्मात् 'एवं विदुषे' गायत्रीमहिमानं ज्ञातवते पुरुषाय लोके गोसुवर्णादिकं दातव्यम्,–'इति' एवं धर्मरहस्यविदः प्राहुः। यस्मात्रायत्रीस्वरूप मेक मेव सत् त्रेधाभवत्, तस्मात्तद्विदे दान मुचित मेवेत्युपसंहारार्थं पुनर्वचनम् ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
चतुर्थः खण्डः ॥ ४ (२८) ॥

॥ अथ पञ्चमः खण्डः ॥

ते देवा अब्रुवन्नादित्यान् युष्माभिरिदं सवन मुद्यच्छामेति तथेति तस्मादादित्यारब्धं तृतीयसवन मादित्यग्रहः पुरस्तात्तस्य यजत्यादित्यासो अदितिर्मादयन्ता मिति महत्या रूपसमृद्धया महद्वै तृतीयसवनस्य रूपं नानुवषट् करोति न भक्षयति संस्था वा एषा यदनुवषट्कारः संस्था भक्षः प्राणा

आदित्या नेत्प्राणान्त्संस्थापयानीति त आदित्या अब्रुवन्त्सवितारं त्वयेदं सह सवन मुदाच्छामेति तथेति तस्मात् सावित्री प्रतिपद् भवति वैश्वदेवस्य सावित्रग्रहः पुरस्तात्तस्य यजति दमूना देवः सविता वरेण्य इति महत्या रूपसमृद्धया महद्वै तृतीयभवनस्य रूपं नानुवषट् करोति न भक्षयति संस्था वा एषा यदनुवषट्कारः संस्था भक्षः प्राणः सविता नेत् प्राणं संस्थापयानीत्यभे वा एष एते सवने विपिबति यत् सविता प्रातस्सवनं च तृतीयसवनं च तद्यत्पिबत्सावित्रो निविदः पदं पुरस्ताद् भवति महदुपरिष्टादुभयोरेवैनं तत्सवनयोराभजति प्रातस्सवने च तृतीयसवने च बह्वाः प्रातर्वायव्याः शस्यन्त एका तृतीयसवने तस्माद्बह्वीः पुरुषस्य भूयांसः प्राणा यत्तावाञ्छो द्यावापृथिवीयं शंसति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठाऽसावमुत्र तद्यद् द्यावापृथिवीयं शंसति प्रतिष्ठयोरेवैनं तत् प्रतिष्ठापयति ॥ ५ (२८) ॥

एष तावत् तृतीयसवन सवितारमधिकृत्य सौमाश्वरणकथया वर्णितः। अथ तृतीयसवन मृच्यते, तत्र वैश्वदेवाग्निमारुतयोः कृतिः सङ्गृह्यते --

साद्वैश्वदेवे सवितुः पुनस्तुतिर्द्यावापृथिव्यार्भवैश्वदेविका ।
वैश्वानरीयं मरुतां च शंसनं स्वर्जानत्रैश्च मिहान्निमारुते ॥

तृतीयसवनस्यादावादित्यग्रहं विधत्ते— "ते देवा अब्रुवन्नादित्यान्,— युष्माभिरिदं सवन मुद्यच्छामेति ; तथेति ; तस्मादादित्यारब्धम्, तृतीयसवन मादित्यग्रहः पुरस्तात्तस्य"—इति । तृतीयसवनं निर्वक्तुम्या जगत्या अक्षररूपां मूर्त्तिं मवगतवन्तः * 'ते देवाः' 'आदित्यान्' द्वादशसङ्ख्याकान् प्रत्येव मब्रुवन्,— हे आदित्याः ! युष्माभिः सहिता वयम् 'इदं' तृतीयं सवनम् 'उद्यच्छाम' निर्वक्तुं करवामहै इति। आदित्याश्च तथेत्यङ्गीकृतवन्तः । यस्मादारभ्य देवैरादित्यमाहित्यं प्रार्थितम्, तस्माद् 'आदित्यारब्धम्' तृतीयसवनम्' आदित्यग्रहः 'आरब्धे' सर्वेषां ग्रहाणा मादौ यस्य सवनस्य, तदिद मादित्यारब्धम् । स एवार्थ आदित्यग्रह इत्यादिना स्पष्टीक्रियते— 'तस्य' तृतीयसवनस्य 'पुरस्तात्' आदौ आदित्यदेवताको ग्रहः कर्त्तव्यः ॥

तस्य ग्रहस्य याज्यां विधत्ते— "यजत्यादित्यासो अदितिर्मादयन्ता मिति मदत्या रूपसमृद्ध्या,— महद्वै तृतीयसवनस्य रूपम्"—इति । 'आदित्यासः अदितेः पुत्रा आदित्याः ; ते च तन्माता 'अदितिः' च 'मादयन्ताम्' अनेनानेन तुष्यन्तु । 'इति' एषा (सं० ७. ५१. २.) याज्या मदती ; "मदी हर्षे"—इत्यस्मादातोऽत्वेन मच्छब्देन युक्ता † । तस्या मादित्यानां मदितेश्च हर्षवर्णनात् विवक्षितदेवताविषयत्वेन रूपसमृद्धा । तृतीयसवनस्य स्वरूपम् 'महद्वै' हर्षोपेत मेव ; तत्समानौ देवतानां यजमानानाञ्च ऋत्विजां च हर्षोत्पत्तेः ॥

* 'अक्षरमस्मूर्त्तिं मवगतवन्तः' ग । † आश्व० श्रौ० ५. १० ३ ।

इतरग्रहवत्प्रसक्तावनुवषट्कारभक्षौ प्रतिषेधति— "नानुवषट् करोति, न भक्षयति, संस्था वा एषा यदनुवषट्कारः संस्था भक्षः, प्राणा आदित्या, नेत्प्राणान्त्संस्थापयानीति"-इति। अनुवषट्कारभक्षयोः ग्रहसमाप्तिरूपत्वादादित्यानां च प्राणरूपत्वादादित्यग्रहं समापयन्नहं प्राणानेव समापितवान् भविष्यामीति भीत्या तत्समाप्तिरूपावनुवषट्कारभक्षौ न कुर्यात्। 'नेत्'-इति परिभवद्योतनार्थो निपातः॥

अथ सावित्रं ग्रहं वैश्वदेवशस्त्रस्य प्रतिपदं च विधत्ते—"त आदित्या अब्रुवन्त्सवितारं त्वयेदं सह सवन मुद्यच्छामेति; तथेति; तस्मात्सावित्री प्रतिपद् भवति वैश्वदेवस्य, सावित्रग्रहः पुरस्तात्तस्य यजति, दमूना देवः सविता वरेण्य इति महत्या रूपसमृद्धया,—महद्वै तृतीयसवनस्य रूपं; नानुवषट् करोति, न भक्षयति; संस्था वा एषा यदनुवषट्कारः, संस्था भक्षः, प्राणः सविता नेत्प्राणान्त्संस्थापयानीति"-इति। वैश्वदेवशस्त्रस्य "तत्सवितुर्वृणीमहे"-इत्येषा (मं० ५.८२.१.) सवितृदेवताका 'प्रतिपत्' प्रारम्भरूपा कर्त्तव्या *। "दमूना देवः"-इत्यादिका ग्रहस्य याज्या। सा च संहितायां मनाङ्नातत्वात्सूत्रकारेण पठिता†। तस्यां च "अमदसेन सिष्यः"-इति 'मदि' धातुः प्रयुक्तः; तस्मादियं महती। अन्यत्सर्वं मादित्यग्रहवद् व्याख्येयम्॥

अथ निविद्व्यवधानेन सावित्रग्रहं प्रशंसति— "उभे वा एष एते सवने विपिबति यत्सविता,—प्रातस्सवनं च तृतीयसवनं च; तद्यत् पिबत्सावित्रीं निविदः पदं पुरस्ताद् भवति, महदुपरिष्टादुभयोरेवैनं तत्सवनयोराभजति, प्रातस्सवने च तृतीयसवने च"-इति।

* आश्व० श्रौ० ५. १८. ५। † आश्व० श्रौ० ५. १८. २।

ग्रहस्य देवता यः सवितास्ति, एष देवः प्रातस्सवनं तृतीयसवनं चैतेन उभे अपि सवने 'विपिबति' विलक्षणत्वेन पिबति। तत्कथम्? इति, तदेवोच्यते— वैश्वदेवशस्त्रे 'सवित्रे' सवितृदेवताकाया निविदः पदं 'पिबवत्' पिबतिधातुयुक्तं 'पुरस्तात्' आदौ भवति, 'महत्पदं' मदिधातुयुक्तम् 'उपरिष्टात्' अन्ते भवति। तेन 'प्रातस्सवने तृतीयसवने च' उभयोरपि सवनयोः 'एनं' सवितारम् 'आभजति' भागिनं करोति। "सविता देवः सोमस्य पिबतु"-इत्येतं (निवि० ४.१.) निविद आदौ प्रयुज्यमानं पदं 'पिबवत्पदं'; तथान्ते प्रयुज्यमानं "सविता देव इह अवदिह सोमस्य मत्सत्"-इति (निवि० ४.१५.) 'महत्पदम्' अप्युदाहरणीयम्: तयोरुभयोः पदयोः सवनद्वयरूपयोः विलक्षणत्वात्सवितुः पान मिति विलक्षण मिति च द्रष्टव्यम्। एवंविधसवितृदेवताकत्वात् प्रशस्तोऽयं ग्रह इत्यभिप्रायः। अथवा निवित्पदविधानार्थ मिदं वाक्यं द्रष्टव्यम्॥

अथ तस्मिन्नैश्वदेवशस्त्रे "एकया च दशभिश्च स्वभूते"-इत्येतां* वायुदेवताका मृचं विधत्ते— "वह्वः प्रातर्वायव्याः शस्यन्ते, एका तृतीयसवने; तस्माद्बह्वीः पुरुषस्य भूयांसः प्राणा यच्चावाञ्चः"-इति। "वायुरग्रेगाः"-इत्याद्याः (आश्व० श्रौ० ५.५.३.) वायव्या ऋचो 'वह्वः' प्रातस्सवने शस्यन्ते, तृतीयसवने तु एकैव पूर्वादाहृता; 'तस्मात् प्रातस्सवने वायुदेवताकानां भूयस्त्वात् पुरुषस्यापि प्रातःसवनस्थानीये मुखे वर्त्तमानत्वात् 'बह्वीः' चक्षुर्घ्राणादयः 'प्राणाः' भूयांसः, 'यच्च' ये केचित् 'अवाञ्चः' नाभेरर्वा-

* सा च संहितायां समाम्नातेति सूचकारेण पठिता। आश्व० श्रौ० ५. १८. ५. द्र०।

चीने तृतीयसवनस्थानीये देशे वर्त्तमानाः पायुगुह्यादयो ऽवाञ्चः प्राणाः, अल्पीयांस इति शेषः ॥

तस्मिन्नेव वैश्वदेवशस्त्रे द्यावापृथिवीदेवताकं सूक्तं विधत्ते—"द्यावापृथिवीयं शंसति, द्यावापृथिवी वै प्रतिष्ठे,—इय मेवेह प्रतिष्ठा ऽमावमुत्र ; तद्यद् द्यावापृथिवीयं शंसति, प्रतिष्ठयोरेवैनं तत् प्रतिष्ठापयति"—इति । 'इह' मनुष्यजन्मनि 'इय मेव' भूमिः 'प्रतिष्ठा' आश्रयः ; 'अमुत्र' जन्मान्तरे 'असावेव' द्यौर्लोकः 'प्रतिष्ठा' आश्रयः । एवं द्यावापृथिव्यावेव प्रतिष्ठे यस्मात्, तस्मात् तदीय-सूक्तशंसनेन 'एन' यजमानं प्रतिष्ठारूपयोर्द्यावापृथिव्योरेवावस्था-पयति ॥ ५ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
पञ्चमः खण्डः ॥ ५ (२९) ॥

॥ अथ षष्ठः खण्डः ॥

आर्भवं शंसत्यृभवो वै देवेषु तपसा सोमपीथ मभ्यजयंस्तेभ्यः प्रातस्सवने वाचि कल्पयिषंस्तानग्नि-र्वसुभिः प्रातस्सवनादनुदत तेभ्यो माध्यन्दिने सवने वाचि कल्पयिषंस्तानिन्द्रो रुद्रैर्माध्यन्दिनात्सवना-दनुदत तेभ्यस्तृतीयसवने वाचि कल्पयिषंस्तात् विश्वे देवा अनोनुद्यन्त नेह पाप्स्यन्ति नेहेति स

प्रजापतिरब्रवीत्सवितारं तव वा इमे ऽन्तेवासास् त्व मेवैभिः सम्पिबस्वेति स तथेत्यब्रवीत्सविता तान्वै त्व मुभयतः परि पिबेति तान् प्रजापतिरुभयतः पर्यपिबत् ते एते धाय्ये अनिरुक्ते प्राजापत्ये शस्येते अभित आर्भवं सूक्तं भवति मूतये ऽयं वेनश्चोदयत्पृश्नि-गर्भा इति प्रजापतिरेवैनांस्तदुभयतः परि पिबति तस्मादु श्रेष्ठी पाप्मे रोचयत्येव यं कामयते तं तेभ्यो वै देवा अपैवाबीभत्सन्त मनुष्यगन्धात् त एतं धाय्ये अन्तरदधत येभ्यो मातेवा पित्र इति ॥ ६ (३०) ॥

"प्र द्यावा यज्ञैः पृथिवीए ऋताबधा"-इत्येतत् द्यावापृथिवीयं सूक्तं (सं० १.१५९. १.) विधाय, "तच्चक्षुर्यं सुव्रतम्" इत्येतत् (सं० १.१११.१.) आर्भवं सूक्तं विधत्ते—"आर्भवं शंसति"-इति। ऋभुनामका देवा यस्मिन् सूक्ते सन्ति, तदिदम् 'आर्भवम्' ; तस्य सूक्तस्य प्रथमायां ऋचि तृतीयपादे "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्"-इति तद्देवताकत्वं प्रतीयते ॥

अथ धाय्ये विधातुं माख्यायिकां माह— "ऋभवो वै देवेषु तपसा सोमपीथं मभ्यजयंस्तेभ्यः प्रातस्सवने वाचि कल्पयित्वेन्द्रस्तानग्निर्वसुभिः प्रातस्सवनादनुदत, तेभ्यो माध्यन्दिने सवने वाचि कल्पयित्वेन्द्रो रुद्रैर्माध्यन्दिनात्सवनादनुदत, तेभ्यस्तृतीयसवने वाचि कल्पयित्वान्विन्दे देवा अनोनुद्यन्त नेह पाप्स्यन्ति नेहेति ; स प्रजापतिरब्रवीत्सवितारं,— तव वा इमेऽन्तेवासास्त्व

मेवैभिः सम्भिवस्वेति ; स तथेत्यब्रवीत्सविता,— तान्वै त्व मुभयतः परि पिबेति ; तान् प्रजापतिरुभयतः पर्यपिबत्"—इति । देवेषु सर्वेषु मध्ये ऋभुनामकाः केचन देवत्वं प्राप्ताः मनुष्यविशेषाः* प्रजापति मुद्दिश्य तपः कृत्वा तेन तपसा 'सोमपीथ मभ्यजयन्' सोमपान मभिलक्ष्य जितवन्तः, प्रजापतेः सकाशात् लब्धवन्त इत्यर्थः । स प्रजापतिरन्ये देवाश्च 'तेभ्यः' ऋभुभ्यः प्रातस्सवने वाचि 'कल्पयिषन्' सोमपानं कल्पयितु मैच्छन् । तदानीं प्रातस्सवनाभिमानी 'अग्निः' देवः स्वभृत्यैः 'वसुभिः' सह तस्मात् प्रातस्सवनात् तान् ऋभून् 'अनुदत' निराकरोत् । तथेन्द्रो रुद्रैः सह माध्यन्दिनात्सवनान्निराकरोत् । विश्वे देवास्तृतीयसवनात् 'अनोनुवन्त' इदं निराकुर्वन् । निराकरणप्रकारः स च 'नेहेति'-वाक्येन पुनःपुनरनूद्यते । 'इह' तृतीयसवने ऋभवो न पास्यन्ति । विश्वेषां देवानां प्रत्येकं निराकरणवाक्येन सम्बधात् नेहेति पुनरुक्तम् । ततः स प्रजापतिर्निराकृतानृभून् दृष्ट्वा सवितार मब्रवीत्,— हे सवितः ! तव 'इमे' ऋभवः 'अन्तेवासाः' समीपवासिनः शिष्याः, अतस्त्व मेवैभिः सह सम्यक् पिबस्व । तथेत्यङ्गीकृत्य सविता प्रजापति मिदमब्रवीत्,— हे प्रजापते ! त्वं 'तान्वै' तानेव ऋभून् 'उभयतः पिब' तेषा मृभूणा मुभयोः पार्श्वयोः स्थित्वा त्व मपि सोमपानं कुरु । एव मुक्तः प्रजापतिस्तथैवाकरोत् ॥

अथ धाय्ये विधत्ते— "ते एते धाय्ये अनिरुक्ते प्राजापत्ये आर्भवे ; —सरूपकृतु मूतये ऽयं वेनश्चोदयत् पृश्नि-

---

* "ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य वंशः पुत्रा बभूवुः । तेषां प्रथमोत्तमाभ्यां बहुवचिनाभ्यां भवन्ति, न मध्यमेन । तदेतदृभोश्च बहुवचनेन चमसस्य च संख्येन बहूनि दशतयीषु सूक्तानि भवन्ति । आदित्यरश्मयोऽप्यृभव इत्यपि"—इति निरु० ११.२.४।

नर्भा इति ; प्रजापतिरेवैनांस्तदुभयतः परि पिबति ; तस्मादु ज्येष्ठो पात्रे रोचयत्येव यं कामयते तम्"–इति। "सुरूपकृत्नुम्"–इत्येषा धाय्या (सं० १.४.१.), "अयं वेनः"–इति (सं० १०.१२३.१.) द्वितीया ; ते एते धाय्ये आर्भवसूक्तम् 'अभितः शंसेते'–"सुरूपकृत्नुम्"–इत्येषा सूक्तात् पूर्वं शंसनीया, "अयं वेनः"–इत्येषा सूक्तात् पश्चात् शंसनीया। कीदृश्यौ धाय्ये ? 'अनिरुक्ते' निःशेषेणोक्तो देवो निरुक्तः, तादृश्यो ययोर्धाय्ययोः नास्ति, ते अनिरुक्ते ; न खल्वनयोः ऋचोरीदृशो देव इति सहसा निर्वक्तुं शक्यते। प्रजापतेरपि जगत्सृष्टेः पूर्वं मूर्त्तस्य निर्वक्तुं मशक्यत्वात्सोऽप्यनिरुक्तः। अतो योग्यत्वात् ते उभे प्रजापतिदेवताके। एतयोर्धाय्ययोः शंसने प्रजापतिरेव 'एनान्' ऋभून् उभयतः परि पिबति। यस्मात् प्रजापतिरग्निर्वस्वादिदेवताना मृभुषु रूपभावे सति पितृद्वारा बलात् ऋचि सृत्यादितवान्, 'तस्मादु' तस्मादेव कारणात् लोकेऽपि 'ज्येष्ठो' कश्चित् धनपतिः 'यं' स्वकीयं भृत्यं मित्तरैरन्यैरीक्षित मिति सर्वेभ्यो रोचयितुं कामयते, 'तं' भृत्यं माधारहीनं 'पात्रे' प्रतिभृत्ययोग्यस्थाने बलात् सर्वेभ्यो रोचयत्येव ॥

अथापरं सूक्तद्वयं विधत्ते— "तेभ्यो वै देवा अपैवाबीभत्सन्त मनुष्यगन्धात्; त एते धाय्ये अन्तरदधत, येभ्यो मातैवा पित्र इति"–इति। अग्निवस्वादयो 'देवाः', 'तेभ्यः' ऋभुभ्यः 'अपैव' स्वयं मपगता एव सन्तः 'अबीभत्सन्त' एवं मनसि बीभत्सां कृतवन्तः। कस्मात्कारणादिति तदुच्यते— 'मनुष्यगन्धात्'–इति। एते मनुष्या अस्मत्यङ्क्तियोग्या न भवन्तीति शङ्कयेत्यर्थः। 'ते एते' वक्ष्यमाणे द्वे धाय्ये 'अन्तरदधत' ऋभूणा मन्यादीनां च मध्ये 'अन्तर्धानं' व्यवधान मकुर्वत। के ते धाय्ये इत्युच्यते— "येभ्यो

सातां मधुमतीं"-इत्येषा (सं० १०.६१.३), "इषा पित्रे विश्वे देवाय"-इत्यपरा (सं० ४.५०.६), "अयं वेनः"-इत्येतत्पूर्वमेतदुभयं शंसेदित्यर्थः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये षष्ठः खण्डः ॥ ६ (३०) ॥

॥ अथ सप्तमः खण्डः ॥

वैश्वदेवं शंसति यथा वै प्रजा एवं वैश्वदेवं तद्यथान्तरं जनता एवं सूक्तानि यथारण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याहृयते तस्मात्तान्यरण्यानि सन्त्यनरण्यानि मृगैश्च वयोभिश्चेति ह स्माह यथा वै पुरुष एवं वैश्वदेवं तस्य यथावान्तर मङ्गान्येवं सूक्तानि यथा पर्वाण्येवं धाय्यास्तदुभयतो धाय्यां पर्याहृयते तस्मात्पुरुषस्य पर्वाणि शिथिराणि सन्ति दृळ्हानि ब्रह्मणा हि तानि धृतानि मूलं वा एतद्यज्ञस्य यद्धाय्याश्च याज्याश्च तद्यदन्या अन्या धाय्याश्च याज्याश्च कुर्युरग्रमूल मेव तद्यज्ञं कुर्युस्तस्मात्ताः समान्य एव स्युः प्राञ्चमन्यं वा एत-

दुक्थं यद्वैश्व देवं सर्वेषां वा एतत्पञ्चजनानां मुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां चैतेषां वा एतत्पञ्चजनानां मुक्थं सर्व एनं पञ्चजना विदुरेनं पञ्चिन्यै जनतायै हविनो गच्छन्ति य एवं वेद सर्वदेवत्यो वा एष होता यो वैश्वदेवं शंसति सर्वा दिशो ध्यायेच्छंसिष्यन्त्सर्वास्वेव तद्दिक्षु रसं दधाति यस्या मस्य दिशि द्वेष्यः स्यान्न तां ध्यायेदनु-ह्वायैवास्य तद्वीर्यं आदत्ते ऽदितिर्द्यौरदितिरन्तरिक्ष मित्युत्तमया परिदधातीयं वा अदितिरियं द्यौरिय मन्तरिक्ष मदितिर्माता स पिता स पुत्र इतीयं वै मातेयं पितेयं पुत्रो विश्वे देवा अदितिः पञ्चजना इत्यस्यां वै विश्वे देवा अस्यां पञ्चजना अदिति-र्जात मदितिर्जनित्व मितीयं वै जात मियं जनित्व द्विः पक्षः परिदधाति चतुष्पादा वै पशवः पशूना मवरुद्ध्यै सकृदर्धर्चशः प्रतिष्ठाया एवं द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्वि प्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति सदैव पञ्च-जनीयया परिदध्यात् तदुपस्पृशन् भूमिं परिदध्यात् तद्यस्या मेव यज्ञं सम्भरति तस्या मेवैनं तदन्ततः प्रतिष्ठापयति विश्वे देवाः शृणुतेमं हवं म इति

वैश्वदेव सुक्तं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवताः प्रीणाति ॥ ७ (३१) ॥

अथ विश्वेदेवादेवताकम् "आ नो भद्रा"-इत्येतत्सूक्तं (सं० १. ८९. १.) विधत्ते —"वैश्वदेवं शंसति"-इति ॥

लौकिकदृष्टान्तेन प्रशंसन् आहावं * विधत्ते —"यथा वै प्रजा एवं वैश्वदेवं ; तद्यथान्तरं जनता एवं सूक्तानि, यथारण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते ; तस्मात्तान्यरण्यानि सन्त्यनरण्यानि मृगैश्च वयोभिश्चेति ह स्माह"-इति । लोके यथा प्रजा, एव मत्र 'वैश्वदेवं' शस्त्रम् ; प्रजाशब्देन तन्निवासस्थानं राज्य मुपलक्ष्यते, राज्यसदृशं शस्त्र मित्यर्थः । 'तत्' तत्र प्रजाशब्देन राज्ये विवक्षिते, 'अन्तरम्' अभ्यन्तरे 'जनताः' जनसमूहा यथा तिष्ठन्ति, एवं तस्मिन् शस्त्रे सूक्तानि तिष्ठन्ति ; यथा अरण्यानि राज्ये क्वचित् क्वचिद् भवन्ति, एव मस्मिन् शस्त्रे धाय्याः क्वचित् प्रक्षिप्यन्ते । तथा सत्यरण्यस्थानीयां धाय्या मुभयतः पर्याह्वयते। "शोंसावोम्"-इत्येष मन्त्रः 'पर्याह्वावः'। तस्या धाय्यायाः पार्श्वयोः यस्मात् पाठः, तस्मात् लोकेऽपि बहुवृक्षसङ्कीर्णानि स्थानानि स्वभावतोऽरण्यानि मनुष्यशून्यानि सन्त्यपि मृगैश्च पक्षिभिश्च सङ्कीर्णत्वाद् 'अनरण्यानि' अशून्यानि एवेति कश्चिदभिज्ञ आह स्म ॥

एव मेकेन दृष्टान्तेन पर्याह्वावं प्रशस्य पुनरन्येन प्रशंसति— "यथा वै पुरुष एवं वैश्वदेवं ; तस्य यथावान्तरमङ्गान्येवं सूक्तानि, यथा पर्वाण्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते ; तस्मात्पुरुषस्य

---

* "शोंसावो मित्रावरुणा तृणीशमं शंसेदुपांशु सप्तपद मसत्यन्नेव आहावः"-इति आश्व० श्रौ० ५. ८. १। 'आहाव आह्वानम्'-इति निघ० ५.४.८ ।

पर्वाणि शिथिराणि सन्ति, दृढानि ब्रह्मणा हि तानि दृप्तानि"* –इति। लोके यथा पुरुषो हस्तपादादिमान् मनुष्यदेहः, तद्वदिदं वैश्वदेवशस्त्रम्। 'तस्य' शरीरस्य 'अवान्तरम्' अभ्यन्तरप्रदेशम् 'अङ्गानि' अवयवा यथा वर्त्तन्ते, एवं शस्त्रस्याभ्यन्तरे सूक्तानि निविष्टानि। यथा तेषा मवयवानां सन्धयः, एव मेता धाय्याः शस्त्रे तिष्ठन्ति। तथा सति धाय्या उभयपार्श्वेपर्वाणि 'शिथिराणि' पूर्वं शिथिलानि सन्त्यपि पश्चात्प्रयत्नेन धारितानि दृढानि सम्पद्यते। "ब्रह्म वा आहावः"–इति*श्रुतत्वादाहावरूपेण ब्रह्मणैव धाय्यारूपाणि पर्वाणि दृप्तानि भवन्ति॥

अथ धाय्यानां शस्त्रयाज्यानां च प्रकृतौ विकृतौ चान्यत्वं निराकृत्यैकरूपत्वं विधत्ते— "मूलं वा एतद्यज्ञस्य यदाग्नेयाश्च याज्याश्च; तद्यदन्या अन्या धाय्याश्च याज्याश्च कुर्युरुन्मूल मेव तद्यज्ञं कुर्युस्तस्मात्ताः समाश्च एव स्युः"–इति। धाय्यानां शस्त्रयाज्यानां दृप्तमूलवद्यज्ञमूलता। तत् प्रकृतिगताः परित्यज्य विकृतावन्यस्वीकारे यज्ञरूपो वृक्ष उन्मूलितः स्यात्; तस्मात् प्रकृतौ याः सन्ति, ता एव विकृताविति*भयत्र 'समाश्च एव' एकविधा एव वर्त्तन्ताः॥

वैश्वदेवशस्त्र मवयवशः प्रशस्य समुदायाकारेण प्रशंसति— *"पाङ्क्तजन्यं वा एतदुक्थं यद्वैश्वदेवं; सर्वेषां वा एतत्पञ्चजनानां मुक्थं,*— देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां चैतेषां वा एतत्पञ्चजनानां मुक्थं; सर्व एनं पञ्चजना विदुः"–इति। यद्वैश्वदेवनामकम् 'उक्थं' शस्त्र मस्ति, तदेतत् 'पाङ्क्तजन्यं वै' पञ्चविधानां जनानां सम्बन्धि एव। स एवार्थः सर्वेषा मित्यादिना

* १ भा० ४३४ पृ० ५ पं० द्रष्टव्यम्।

ष्टीक्रियते,—ये पञ्चविधा जनाः सन्ति, तेषां सर्वेषा मेव [illegible] एतच्छस्त्रम् । पञ्चविधात्व मेव मनुष्यादिनोच्यते,— अग्नीन्द्रादि-देवगण एको वर्गः, ब्रह्मचर्यादिमनुष्यगणो द्वितीयो वर्गः, गन्धर्वाप्सरसां वर्गस्तृतीयः, सर्पाणां वर्गश्चतुर्थः, पितृणां वर्गः पञ्चमः * । एतेषां पञ्चविधानां जनानां तुष्टिहेतुत्वात् तदीय मेतच्छस्त्रम् । 'एनं' वैश्वदेवशस्त्रस्य शंसितारं होतारं सर्वे पञ्चजनाः 'विदुः' जानन्ति, तेषस्य कीर्तिः प्रसरतीत्यर्थः ॥

वेदनं प्रशंसति— "एनं पञ्चिन्यो जनतायै कविनो गच्छन्ति य एवं वेद"-इति । 'जनानां' देवमनुष्याणां समूहो 'जनता', सा च पञ्चसङ्ख्योपेतत्वात् 'पञ्चिनी' तस्यै, तत्प्रीत्यर्थं 'कविनः' होतुं कुशलाः पुरुषाः 'एनं' वेदितार मागच्छन्ति ॥

अथ शंसनपूर्वकाले दिग्ध्यानं विधत्ते — "सर्वदेवत्यो वा एष होता यो वैश्वदेवं शंसति, सर्वा दिशो ध्यायेच्छंसिष्यन्त्सर्वाभ्येव तद्दिग्भ्य स्वं दधाति" -इति । 'यः' होता 'वैश्वदेवं' शस्त्रं शंसति, एषः 'सर्वदेवत्यो वै' सर्वा देवता अस्येति, तत्परितोषहेतुरित्यर्थः । अतः सोऽयं शंसितु मनुद्यतः सर्वा दिशो मनसा ध्यायेत्, तेन शंसनेन सर्वाभ्येव तद्दिग्भ्य स्वं दधाति ॥

क्वचित् ध्यानं विधत्ते — "यस्या मस्य दिशि द्वेष्यः स्याच्च तां ध्यायेदनुहायैवास्य तदीयं मादत्ते" -इति । 'अस्य' होतुः 'द्वेष्यः' शत्रुर्यस्यां दिशि वसति, तां मैत्रां दिशं न ध्यायेत् । तथा सति 'अनुहायैव' द्वेष्यस्य पृष्ठतो गत्वैव तदीयं वीर्यं सर्वं स्वीकरोति ॥

शस्त्रस्य परिधानीया मृचं विधत्ते— "अदितिर्द्यौरदिति-

* "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादः पञ्चमः इतीपमन्यवः"-इति च निरु० ३ १२.२ ।

रन्तरिक्ष मित्युत्तमया परिदधातीयं वा अदितिरियं वीरिक्ष मन्तरिक्षम्"-इति। अखण्डितत्वाददीनत्वाद्वा * भूमिरेवादितिरित्युच्यते। सेयं भूमिरेव द्युलोकरूपान्तरिक्षरूपा च; अस्यां भूमौ कर्म कृत्वा तत्तल्लोकप्राप्तिं सम्पादयितुं शक्यत्वात्। द्वितीयपाद मनूद्य व्याचष्टे—"अदितिर्माता स पिता स पुत्र इतीयं वै मातेयं पितेयं पुत्रः"-इति। येय मदितिर्भूमिः, सैव माता, सोऽदितिरूप एव पिता, सोऽदितिरूप एव पुत्रः। 'इयं वा'-इत्यादिनोक्तार्थप्रसिद्धिरुच्यते; सत्यां भूमौ मातापितृपुत्रादिभिर्व्यवस्थातुं शक्यत्वात् तेषा मदितिरूपत्वं प्रसिद्ध मित्यर्थः। तृतीयपाद मनूद्य व्याचष्टे—"विश्वे देवा अदितिः पञ्चजना इत्यस्यां वै विश्वे देवा अस्यां पञ्चजनाः"-इति। विश्वेषां देवानां भूमौ मनुष्यैः पूज्यमानत्वात्, पञ्चजनानां च देवमनुष्यादीनां भूमावेवस्थानाददितेस्तत्तद्रूपत्वम्। चतुर्थपाद मनूद्य व्याचष्टे—"अदितिर्जात मदितिर्जनित्व मितीयं वै जात मियं जनित्वम्"-इति (सं० १. ८९. १०.)। 'जातम्' पूर्वं मुत्पन्नम् प्राणिरूपम्, 'जनित्वम्' इतः पर मुत्पत्स्यमानं प्राणिरूपम्; तयोरुभयोर्भूमौ सम्भवाददितेस्तत्तद्रूपत्वम्॥

परिधानीयाया अस्या ऋचः शंसने प्रकारविशेषं विधत्ते—"द्विः पञ्चः परिदधाति, चतुष्पादा वै पशवः पशूना मवरुद्ध्यै; सप्तदर्शगः प्रतिष्ठाया एव; द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमान मेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति"-इति। "त्रिः प्रथमां त्रिरुत्तमा मन्वाह"-इतिविधेः† सार्वत्रिकत्वादस्याः

* "अदितिरदीना"-इत्यादि निरु० ४.४.१. अपि ११.३.२. द्रष्टव्यौ।

† ऋग्० २१ सू० ४ मं० (तै० सं० २. ५. ७. १.)।

परिधानीयायाश्चिराद्दत्तिः प्राप्ता, तत्र द्वयोराहवनीयः 'पक्षः' शंसेत्, एकैकस्मिन् पादे ऽवसायावसाय शंसनं कुर्यात्। तत्र पादानां चतुष्टयेन पशुसाम्यात्पशुप्राप्तिर्भवति। किं च पुरुषोऽयं 'द्विप्रतिष्ठः' पादद्वयोपेतः, पशवश्चतुष्पादाः; तथा सत्युभयविध-शंसनेन द्विपादं यजमान मेव चतुष्पात्सु पशुषु प्रतिष्ठापयति॥

परिधानकाले भूमिस्पर्शं विधत्ते—"सदैव पञ्चजनीयया परि-दध्यात्तदुपस्पृशन् भूमिं परिदध्यात्तस्या मेव यज्ञं सम्भरति तस्या मेवैनं तदन्ततः प्रतिष्ठापयति"-इति। 'सदैव' सर्वेष्वपि यज्ञप्रयो-गेषु 'पञ्चजनीया' "विश्वे देवा अदितिः पञ्चजना."-इत्युक्तत्वादिय ऋक् 'पञ्चजनीया' तया 'परिधानं' समापनं यदा कुर्यात्, तदानीं भूमि मुपस्पृशन् परिदध्यात्। तथा सति 'यस्या मेव' भूमौ 'यज्ञं सम्भरति' अनुष्ठातुं यज्ञसाधनानि सम्पादयति, 'तस्या मेव' भूमौ 'एनं' यज्ञम् अनेनोपस्पर्शनेनान्ततः प्रतिष्ठापयति॥

शस्त्रयाज्यां विधत्ते— "विश्वे देवाः शृणुतेमं हवं म इति वैश्वदेव मुक्थं शस्त्वा वैश्वदेव्या यजति, यथाभागं सदेवताः वीणाति" इति। वैश्वदेवशस्त्रशंसनादूर्ध्वं "विश्वे देवाः शृणुत"-इत्येतां वैश्वदेवीं (सं० ६. ५२. १३.) याज्यां पठेत्। तस्यां "ये अन्तरिक्षे य उप द्यविष्ठाः"-इत्यादिना भिन्नवर्गाणां देवगणाना मभिधानात् तासां देवतानां स्वस्वभाग मनतिक्रम्य प्रीतिं करोति॥ ७॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
सप्तमः खण्डः॥ ७ (३१)॥

॥ अथ अष्टमः खण्डः ॥

आग्नेयी प्रथमा घृतयाज्या सौमी सौम्ययाज्या वैष्णवी घृतयाज्या त्वं सोम पितृभिः संविदान इति सौम्यस्य पितृमत्या यजति घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति तस्यैता मनुस्तरणीं कुर्वन्ति यत्सौम्यः पितृभ्यो वा अनुस्तरणी तस्मात्सौम्यस्य पितृमत्या यजत्यवधिषुवा एतत्सोमं यदभ्यसुषवुः[*] स्तदेनं पुनः सभावयन्ति पुनराप्याययन्त्युपसदां रूपेणोपसदां किल वै तद्रूपं यदेता देवता अग्निः सोमो विष्णुरिति प्रतिगृह्य सौम्यं होता पूर्वं छन्दोगेभ्यो ऽवेक्षेत तं हैके पूर्वं छन्दोगेभ्यो हरन्ति तत्तथा न कुर्यात्[†] वषट्कर्त्रा प्रथमः सर्वभक्षान् भक्षयतीति ह स्माह तेनैव रूपेण तस्माद्वषट्कर्त्रैव पूर्वो ऽवेक्षेतार्थैनं छन्दोगेभ्यो हरन्ति ॥ ८ (३२) ॥

अथ घृतयागसौम्ययागयोर्याज्या विधत्ते— "आग्नेयी प्रथमा घृतयाज्या, सौमी सौम्ययाज्या, वैष्णवी घृतयाज्या, त्वं सोम पितृभिः संविदान इति सौम्यस्य पितृमत्या यजति" इति। सौम्यचरोः उभयतो घृतसाध्यौ द्वौ यागौ अनुष्ठेयौ; तत्राग्निदेवताका विष्णुदेवताका चेति द्वे याज्ये। "घृतह्वनो घृतपृष्ठो

[*] "यदभ्यसुषवुः" क. टी० ग। [†] 'तत्तथानुकुर्याद्' क, ङ।

अग्निः"-इत्याग्नेयी प्रथमा याज्या (आश्व० श्रौ० ५.१८.१), "उरु विष्णो विक्रमस्व"-इति (आश्व० श्रौ० ५. १८. १.) वैष्णवी द्वितीया घृतयाज्या ; अस्मिन् सोमदेवताकत्वरुः, तस्य "त्वं सोमः"-इति (सं० ८.४८.१३.) सौमी याज्या ; तत्र "पितृभिः संविदानः"-इतिश्रुतत्वादियं पितृमती ; तां याज्यां सौम्यचरौ पठेत् । तस्य चरोः पुरस्तादाग्नेय्या याज्यया घृतयागः, उपरिष्टाद्वैष्णव्या याज्यया घृतयागः*। तदाज्ञाद्वय माश्वलायनेन पठितम् (श्रौ०५.१८.३.) ॥

सौमीं याज्यां प्रशंसति—"घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति, तस्यैता मनुस्तरणीं कुर्वन्ति,—यत्सौम्यः पितृभ्यो वा अनुस्तरणीं; तस्मात्सौम्यस्य पितृमत्या यजति"-इति । ऋत्विजः सोमं अभिषुण्वन्तीति यदस्ति, सोऽयं सोमस्य वध एव । तत्र यः सौम्यचरुर्वा १, एनां सौम्यचरुरूपां तस्य घृतस्य सोमस्य 'अनुस्तरणीं' कु ५ । घृतस्य दीक्षितस्य दहनकाले क्वाप्यद्ध्वर्यो वा ऋत्वा दं पावयवेषु गोरवयवानवस्थाप्य दहेत् । सेयं गौः घृतं दीक्षित म घृतत्वादिंसितत्वादनुस्तरणीत्युच्यते † । यस्मात्ता पितृभ्यो यं वा, तस्मात् 'पितृमत्या' याज्यया 'सौम्यस्य' चरोस्य हविर्यजेत् ॥

---

* "तं घृतयाज्यया सुगांशूभयतः परियजन्ति"-इति आश्व० श्रौ० ५. १८. २ ।

† "अनुस्तरणीया नाम वैकङ्कती कक्षा गौर्मयी वाही यज्ञानुसङ्कालयति । अनुस्तरणा वपा मांसिल शिरो मुखं पक्ष्मादी तन्नैवैनं पशौ गौर्भवयत्य (मै० सं० १०.१५.७.) ति"-इति आश्व० श्रौ० ६. २. ३ । "अनुस्तरणी चेत् पश्यात् कर्णं वाक्षम् पत्तोर्वपूर्वी । अङ्गप्रत्यङ्गानीति मांसकर्णे । न हास्यिसम्बन्धात् । वपया मुख मवच्छाद्यापिधिरादीपयन्ति"-इति च काण्वा० श्रौ० २५. ७. ३४-३७ । 'कर्णप्रदेशस्य पशोर्यो 'वाक्षनम' प्रहारं कृत्वा मारयित्वा तस्या. कुक्षिगोलकौ गृहीत्वा तयोर्मिश्रयेत्'-इत्यादि च तद्याख्यानं कर्कीचार्यैः कृतम् । पार० गृ० ३.१० । "तस्मात् पुरुषाय-पुरुषायानुस्तरणी क्रियते"-इति षड्. ब्रा० १.८।

घृतयागसहितं सौम्यं चरुं सङ्कृत्य प्रशंसति— "अवधिषुर्वा एतत्सोमं यदभ्यसुषवुस्तदेनं पुनः सम्भावयन्ति"–इति। 'अभ्यसुषवुः' अभितः सोमं सुतवन्त इति यदस्ति, एतेन सोमम् 'अवधिषुर्वै' ऋत्विजो हतवन्त एव। तस्मात् 'एनं' व्यथितं सोमं घृतचरुभ्यां व्यथापरिहाराय सम्भावयन्ति॥

सङ्कृत्य प्रशस्तदेवताद्वारा पुनर्विस्तरेण प्रशंसां दर्शयति— "पुनराप्याययन्त्युपसदां रूपेणोपसदां किल वै तद्रूपं यदेता देवताः,— अग्निः सोमो विष्णुरिति"–इति। योऽयं हतः सोमः, तं सोम सुपसदां रूपेण सम्यादितेन पुनराप्याययन्ति। अग्निः सोमो विष्णुरिति या एतास्तिस्रो देवताः, तदेतदुपसदा मेव स्वरूपम्; तत्राप्येतस्य देवतात्रयस्य विद्यमानत्वात्॥

अथ होतुराज्यावेक्षणं विधत्ते— "प्रतिगृह्य सौम्यं चरुं तावा पूर्वं छन्दोगेभ्यो ऽवेक्षेत"–इति। हुतशेषं 'सौम्यं' चरु मध्ये दत्तं होता प्रतिगृह्य चरुमध्ये मिश्रे बहुले घृते 'छन्दो' उद्गातृभ्यः स्वयं पूर्वभावी सन् स्वकीयां देहच्छाया मवेक्षेत।

अत्र पूर्वपक्षं समाप्य दूषयति— "तं चैक पूर्वं छन्दोगे ो हरन्ति, तत्तथा न कुर्याद्; वषट्कर्त्ता प्रथमः सर्वभक्षान् भक्षयतीति ह स्माह; तेनैव रूपेण तस्माद्वषट्कर्तैव पूर्वोऽवेक्षेताथैनं छन्दोगेभ्यो हरन्ति"–इति। केवलयाज्ञिकात् होतुराज्यावेक्षणात् पूर्व मेव 'तं' घृतयुक्तं सौम्यं चरुं छन्दोगेभ्यः समर्पयन्ति, 'तत्' समर्पणं तथा न कुर्यात्; हविःशेषभक्षणेषु 'वषट्कर्त्ता' होता 'प्रथमः' पूर्वभावी सन् 'सर्वभक्षान्' हविःशेषान् भक्षयति; 'इति'

" 'तस्मात्' अतएव लोके 'पुरुषाय-पुरुषाय' सर्वेभ्यः कृताय 'अनुसरणी [क्रियते' वैतरणी-नद्युत्तारिका गौः; दीयते"–इति तु तत्र सा० भा०।

एवमभिज्ञो महर्षिराह स्म । 'तस्मात्' कारणात् 'तेनैव रूपेण' भक्षणेनैव अवेक्षणेऽपि,— एतैव प्रथमो भूत्वावेक्षेत, अनन्तर मेव 'एनं' सौम्यं चरुं छन्दोगेभ्यः समर्पयेयुः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
अष्टमः खण्डः ॥ ८ (३२) ॥

॥ अथ नवमः खण्डः ॥

प्रजापतिर्वै स्वां दुहितर मभ्यध्यायद्दिव मित्यन्य आहुरुषस मित्यन्ये ता मृग्यो भूत्वा रोहितं भूता मध्येत् तं देवा अपश्यन्नकृतं वै प्रजापतिः करोतीति ते त मैच्छन् य एन मारिष्यत्येत मन्योऽन्यस्मिन्नाविन्दं-स्तेषां या एव घोरतमास्तन्व आसंस्ता एकधा सम-भरंस्ताः सम्भृता एष देवो ऽभवत्तदस्यैतद् भूतवन्नाम भवति वै स योऽस्यै तदेवं नाम वेद तं देवा अब्रुवन्नयं वै प्रजापतिरकृत मकरिमं विध्येति स तथेत्यब्रवीत्स वै वो वरं वृणा इति वृणीष्वेति स एत मेव वर मवृ-णीत पशुना माधिपत्यं तदस्यैतत्पशुमन्नाम पशुमान् भवति योऽस्यैतदेवं नाम वेद त मभ्यायत्याविध्यत्स

विद्ध ऋर्ह उदप्रपत त मेतं मृग इत्याचक्षते य उ एव मृगव्याधः स उ एव स या रोहित्सा रोहिणी यो एवेषुस्त्रिकाण्डा सो एवेषुस्त्रिकाण्डा तद्वा इदं प्रजापतेरेतः सिक्तं मधावत्तत्सरोऽभवत्तं देवा अब्रुवन् मेदं प्रजापते रेतो दुषदिति यदब्रुवन् मेदं प्रजापते रेतो दुषदिति तन्मादुष मभवत्तन्मादुषस्य मादुषत्वं मादुषं ह वै नामैतद्यन्मानुषं तन्मादुषं सन्मानुष मित्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः ॥ ६ (३३) ॥

अथाग्निमारुतं गवं वक्तव्यम्, तदर्थं मादौ उपाख्यान माह— "प्रजापतिर्वै स्वां दुहितर मभ्यध्यायद्, दिव मित्यन्य आहुरुषस मित्यन्ये; ता मृक्षो भूत्वा रोहितं भूता मभ्यैत्; तं देवा अपश्यन्नयं वै प्रजापतिः करोतीति; ते न मैच्छन्, य एन मारिष्यतीत मन्योऽन्यस्मिन्नाविन्दन्तेषां या एव घोरतमास्तन्व आसंस्ता एकधा समभरंस्ताः सम्भृता एष देवोऽभवत्तदस्यै तद् भूतवद्वाम"-इति। पुरा कदाचित् प्रजापतिः स्वकीयां दुहितर मभि लक्ष्य भार्यात्वेन ध्यान मकरोत्। तस्यां दुहितरि महर्षीणां मतभेद आसीत्,— 'अन्ये' केचन महर्षयः 'दिवं' द्युलोकदेवतां ध्यातवानित्याहुः; अपरे तु महर्षयः 'उषसं' उषःकालदेवतां ध्यातवानित्याहुः। 'ऋक्षः' मृगविशेषः। तथा चाभिधानकार आह— "गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः"-इति (अम० २,५,१०.)। स प्रजापतिः तद्वाविश्य ऋक्षो ऽभूत्, सा च दुहिता

'रोहितं भूता' लोहितं प्राप्ता, ऋतुमती जातेत्यर्थः। तादृशीं तां दुहितरम् 'अभ्यैत्' अभिगतवान्, मिथुनधर्मं प्राप्तवानित्यर्थः। 'तं' दुहितृगामिनं प्रजापतिं देवाः परस्पर मिद मब्रुवन्,— अयं प्रजापतिः 'अकृतं वै' अकर्त्तव्य मेव निषिद्धाचरणं करोतीति विचार्य, यः पुरुषः 'एनं' प्रजापतिम् 'आरिष्यति' आर्त्तिं प्रापयितुं क्षमः, तादृशं पुरुषम् 'ऐच्छन्' अन्वेषणं कृतवन्तः; कृत्वा चान्योऽन्यस्मिन् तेषां मध्ये 'तं' प्रजापतिघातकं 'न अविन्दन्' नालभन्त,— त्वं हन्तुं शक्नोषि, त्वं हन्तु मिति परस्परं पृष्ट्वा एकैकस्य शक्तिराहित्यं निश्चितवन्तः। सर्वेषु देवेषु या एव काश्चित् 'घोरतमाः तन्वः' अत्युग्राणि शरीराणि आसन्, ताः सर्वाः 'एकधा समभरन्' मेलयित्वैक मेव शरीरं कृतवन्तः। 'ताः' घोरतमाः तन्वः 'सम्भृताः' एकत्वेन सम्पादिताः सत्यः 'एष देवो ऽभवत्' एष इति हस्तेन प्रदर्श्य रुद्रोऽभिधीयते। 'तत्' तस्मादेव कारणात् 'अस्य' रुद्रस्य 'एतत्' लोकप्रसिद्धम् 'भूतवत्' भूतशब्दोपेतं नाम सम्भवम्। भूतपतिरिति भूतवन्नाम। तच्च तस्य भवत्यर्थानुगमादुक्तम्। एतन्नामवेदनं प्रशंसति— "भवति वै योऽस्यैतदेवं नाम वेद"— इति। वेदिता 'भवति वै' भूतिमानेव सम्पद्यते॥

अथ तेन रुद्रेण सह देवानां संवादं दर्शयति— "तं देवा अब्रुवन्नं वै प्रजापतिरकृत मकरिमं विध्येति; स तथेत्यब्रवीत्; स वै नो वरं वृणा इति; वृणोष्वेति; स एत मेव वर मवृणीत,— पशूना माधिपत्यं; तदस्यैतत्पशुमन्नाम"— इति। 'तं' रुद्रं देवा एव मब्रुवन्,— हे रुद्र! अयं प्रजापतिः 'अकृतम् अकः' निषिद्धाचरणं कृतवान्, तस्मादिमं 'विध्य' बाणेन प्रहरेति। 'सः' रुद्रः तदङ्गीकृत्य उल्लोचलेन पशूना माधिपत्यं कृतवान्। तस्मा-

कारणात् 'अस्य' रुद्रस्य 'एतत्' लोकप्रसिद्धं, पशुपतिरित्येतादृशं पशुशब्दोपेतं नाम सम्यक्तम्। तदेतदनं प्रशंसति— "पशुमान् भवति योऽस्यैतदेवं नाम वेद"–इति ॥

अथ रुद्रप्रजापत्योर्वृत्तान्तं दर्शयति— "त मभ्यायत्याविध्यत्; स विद्ध ऊर्ध्व उदप्रपत; त मेतं मृग इत्याचक्षते; य उ एव मृगव्याधः, स उ एव स; या रोहित्सा रोहिणी; यो एवेषुस्त्रिकाण्डा, सो एवेषुस्त्रिकाण्डा"–इति। स रुद्रः 'अभ्यायत्य' बाणयुक्तं धनुरभित आकृष्य 'तं' प्रजापतिम् 'अविध्यत्'। कृष्णमृगरूपः स प्रजापतिः विद्धः सन् ऊर्ध्वमुखः 'उदप्रपत' प्रकर्षेण उत्पतन मकरोत्। 'त मेतम्' उत्पतितं कृष्णमृगरूपं प्रजापतिं माकाशे दृष्ट्वा सर्वे एव एते जनाः 'मृग इत्याचक्षते' रोहिण्यार्द्रयोः-नक्षत्रयोर्मध्येऽवस्थितं मृगशीर्ष-नक्षत्रं कथयन्ति, नक्षत्ररूपेण निधत्त इत्यर्थः। 'य उ एव' यस्तु रुद्रः 'मृगव्याधः' मृगघाती, 'सः' रुद्रः आकाशे दृश्यमानः 'स उ एव' लोकप्रसिद्धो मृगव्याध आसीत्। 'या' दुहिता 'रोहित्' रक्तवर्णा मृगी, 'सा' इयं माकाशे 'रोहिणी' नक्षत्रमभूत्। 'या एव' या तु रुद्रेण प्रेरिता 'इषुः त्रिकाण्डा' अनोकं शल्यस्नेजन मित्यवयवत्रयोपेता, 'सा उ एव' सैव लोकप्रसिद्धा काण्डत्रयोपेता 'इषुः' बाणोऽभवत् ॥

अथ मनुष्योत्पत्तिं दर्शयति— "तद्धा इदं प्रजापतेः रेतः सिक्त मधावत्तत्सरोऽभवत्, ते देवा अब्रुवन्,— मेदं प्रजापतेः रेतो दुषदिति; यदब्रुवन् मेदं प्रजापतेः रेतो दुषदिति, तस्मादुष मभवत्तस्मादुषस्य मादुषत्वं; मादुषं ह वै नामैतत्सन्मानुषं; तस्मादुषं सन्मानुष मित्याचक्षते परोक्षेण; परोक्षप्रिया इव हि देवाः"–

इति । मृगरूपेण प्रजापतिना यद् रेतो मृष्टां क्षिप्तं, तदेतदति-बहुत्वाद्भूमौ पतितं सत् प्रलाहरूपेणाधावत् । तच्च कश्चिद्विभवदेशे अवस्थाय प्रौढं सरो ऽभूत् । ते देवा एव मनुवन्,— प्रजापतेरिदं रेतो 'मा दुषत्' दुष्टं मस्मृष्यं मा भूदिति । यस्मादुषदित्यब्रुवन् तस्माद्दोषरहितस्य रेतसो 'मादुष मिति' नाम सम्पन्नम् । अनादु दकारस्थाने नकारं प्रक्षिप्य 'मानुष मिति' ब्राह्मणक्षत्रियादि-शरीरम् आचक्षते । तदप्यनुतो दैवाचारेण दोषरहितत्वान्मादुष मेव । तथा सति मादुषनामयोग्य मपि तच्छरीरं परोक्षेण नाम्ना व्यवहर्त्तव्य मित्यभिप्रेत्य वर्णव्यत्ययेन मानुष मित्याचक्षते । यस्माल्लोके देववत्पूज्या उत्तमाः पुरुषाः 'परोक्षप्रिया इव हि' प्रत्यक्षे मातृपितृनिर्मिते देवदत्तादिनाम्नि न प्रीतिं कुर्वन्ति, किन्तु 'उपाध्यायः', 'आचार्यः', 'स्वामी'— इत्यादिके मातापित्रादीना मलक्षत्वेन परोक्षे नाम्नि प्रीतिं कुर्वन्ति, तस्मात्परोक्षत्वाय नकार-प्रक्षेपो युज्यते ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
नवमः खण्डः ॥ ९ (३३) ॥

॥ अथ दशमः खण्डः ॥

तदग्निना पर्यादधुस्तन्मरुतो धून्वंस्तदग्निर्न
प्राच्यावयत्तदग्निना वैश्वानरेण पर्यादधुस्तन्मरुतो

धन्वंस्तदग्निर्वैश्वानरः प्राच्यावयत्तस्य यद्रेतसः प्रथम मुददीप्यत तदसावादित्यो ऽभवद्यद् द्वितीय मासीत्तद् भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात् स भृगुर्वारुणिरथ यत्तृतीय मदीदेदिव त आदित्या अभवन् ये ऽङ्गारा आसंस्ते ऽङ्गिरसो ऽभवन् यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद् बृहस्पतिरभवद्यानि परिक्षाणान्यासंस्ते कृष्णाः पशवो ऽभवन् या लोहिनी मृत्तिकाः ते रोहिता अथ यद्भस्मासीत्तत्ररुष्यं व्यसर्पद् गौरो गवय ऋश्य उष्ट्रो गर्दभ इति ये चैते ऽरुणाः पशवस्ते च तान्वा एष देवो ऽभ्यवदत मम वा इदं मम वै वास्तुह मिति त मेतयर्चा निरवादयन्त यैषा रौद्री शस्यत आ ते पितर्मरुतां सुम्न मेतु मा नः सूर्यस्य सन्दृशो युयोथाः त्वं नो वीरो अर्वति क्षमेधा इति ब्रूयान्नाभि न इत्यनभिमारुको ह्येष देवः प्रजा भवति प्र जायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न रुद्रे-त्येतस्यैव नाम्नः परिहृत्यैतद् खलु शं नः करतीत्येव शंसेच्छ मिति प्रतिपद्यते सर्वस्मा एव शान्त्यै नृभ्यो नारिभ्यो गव इति पुमांसो वै नरः स्त्रियो नार्यः सर्वस्मा एव शान्त्यै सो ऽनिरुक्ता रौद्री शान्ता सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद

सो गायत्री ब्रह्म वै गायत्री ब्रह्मणैवैनं तं नमस्यति ॥ १० (३४) ॥

अथादित्यादिदेवतोत्पत्तिं दर्शयति— "तदग्निना पर्य्यादधुस्तन्मरुतो ऽधून्वंस्तदग्निर्न प्राच्यावयत्तदग्निना वैश्वानरेण पर्य्यादधुस्तन्मरुतो ऽधून्वंस्तदग्निर्वैश्वानरः प्राच्यावयत् ; तस्य यद्रेतसः प्रथम मुददीप्यत, तदसावादित्यो ऽभवद् ; यद् द्वितीय मासीत्, तद्गुरभवत् ; तं वरुणो न्यगृह्णीत ; तस्मात् स भृगुर्वारुणिरथ यत्तृतीय मदीदेदिव, त आदित्या अभवन्; ये ऽङ्गारा आमंस्तेऽङ्गिरसोऽभवन् ; यदङ्गाराः पुनरवशान्ता उददीप्यन्त, तद् बृहस्पतिरभवत्"—इति। प्रजापतेः सम्बन्धि यत् रेतो देवैर्दीपरहितं कृतम्, 'तत्' रेतो देवा अग्निना 'पर्य्यादधुः' परितो वेष्टितवन्तः, सरोरूपेणावस्थितस्य रेतसो दाहेन द्रवीभावं निवारयितुं परितोऽग्निं प्रज्वालितवन्त इत्यर्थः। यदाग्निः प्रज्वलितः, तदा 'मरुतः' वायवः 'तद्' रेतः 'अधून्वन्' शोषणाय वायुसंयुक्त मकुर्वत । सोऽग्निः 'तत्' रेतो 'न प्राच्यावयत्' द्रवीभावात् प्रच्युतं नाकरोत्, द्रवत्वाद्धत्वात् पिण्डाकारं कर्तुं नाशक्नोदित्यर्थः । 'वैश्वानरः' नाम कश्चिदग्निविशेषः प्राणिना मुदरं प्रविश्यान्नपानादिकं पाचयति । तथा च भगवतोक्तम् — "अहं वैश्वानरो भूत्वा प्राणिनां देह माश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्" इति (भग० गी० १५, १४.) । तेन वैश्वानरनामकेनाग्निविशेषेण 'तद्' रेतः पूर्ववत् 'पर्य्यादधुः' देवैरग्नौ परिक्षिप्ते सति मरुतस्तद्रेतः पूर्ववदधून्वन् । सोऽयं वैश्वानरो ऽग्निः 'तत्' रेतो द्रवीभावात्प्रच्युत मकरोत् । पिण्डीभूतस्य रेतसो यत्प्रथमं पिण्डरूपं 'उददीप्यत' उद्दीप्त मभूत्,

'तत्' रूपम् 'असौ' दिवि दृश्यमान आदित्योऽभवत्। द्वितीयं यत्पिण्डरूप मासीत्, तत् ऋषिर्भृगुरभवत्। 'तं' भृगुं वरुणो 'न्यगृह्णीत' निगृह्य स्वपुत्रत्वेन स्वीकृतवान्। तस्मात्स भृगुर्वारुणि-रित्युच्यते। वरुणस्यापत्यं 'वारुणिः'। एतदेवाभिप्रेत्य तैत्तिरीया आमनन्ति— "भृगुर्वै वारुणिः, वरुणं पितर मुपससार"-इति (आ० ८.१.=उप० २.१.)। 'अथ' अनन्तरं द्वतीयपिण्डरूपम् 'अदोदेदिव' अतिशयेन दीप्त मेवासीत्, ते 'आदित्याः' अदितेः पुत्रा देवविशेषाः अभवन्। पूर्वं आदित्यशब्देन मण्डलवर्त्ती सूर्य उक्तः, अत्र अदितेः पुत्रा इतरे देवा उच्यन्ते। 'ये' रेतःपिण्डा दग्धाः सन्तो ऽङ्गारा अभवन्, 'ते' सर्वे अङ्गिरोनामका ऋषयो ऽभवन्। पुनरपि तच 'यदङ्गाराः' ये केचिदङ्गाराः 'अवशान्ताः' शान्तिरहिताः सन्तः 'उददीप्यन्त' उत्कर्षेण दीप्ताः, 'तत्' सर्वं द्वद्वस्थतिरभूत्॥

अथ पशुसृष्टिं दर्शयति— "यानि परिच्छाद्यान्यासंस्ते कृष्णाः पशवो ऽभवन्; या लोहिनी मृत्तिका, ते रोहिताः; अथ यद्वस्मा-सीत्, तत्पुरुषं व्यसर्पत्,— गौरो गवय ऋश्य उष्ट्रो गर्दभ इति; ये चैते;रुणाः पशवस्ते च"-इति। अङ्गारेषु शान्तेषु 'यानि' कृष्ण-वर्णान्यासन् काष्ठानि, ते कृष्णवर्णाः पशवो ऽभवन्। अग्निदाहेन भूमौ या 'लोहिनी' रक्तवर्णा मृत्तिका तिष्ठति, 'ते' 'रोहिताः' रक्तवर्णाः पशवोऽभवन्। अथाग्निस्थाने यद्वस्मासीत्, तत् 'पुरुषं' पुरुषशरीरजातं भूत्वा 'व्यसर्पत्' विविध मरण्यादावगच्छत्। किम्पुरुष मिति तदेवोच्यते। 'गौरो गवय ऋश्यः'— इत्यते ऽरण्य-मृगाः, उष्ट्रगर्दभौ प्रसिद्धौ। एवमादिकं पुरुषशरीरम्। ये चैते अरुणाः पशवः, ते च व्यसर्पन्त॥

एवं सुपाख्यानेनाग्निमारुतशस्त्रस्योपोद्घातमभिधाय तस्मिन् शस्त्रे शंसनीया मेका मृचं विधत्ते— "तान्वा एष देवो ऽभ्यवदत, मम वा इदं, मम वै वास्तुरिति ; त मेतयर्चा निरवादयन्त ; यैषा रौद्री शस्यते"-इति। 'तान्वै' तानेव पशून् सर्वानभि लक्ष्य 'एषः' रुद्रो देवः 'इदं' सर्वं ममैवेत्यब्रवीत्। तत्रोपपत्तिं चोक्तवान्— 'वास्तुर्वै' वास्तौ यज्ञभूमौ क्षीनं यद् द्रव्यं मस्ति, तत्सर्वं ममेति। स्मृत्यन्तरेऽपि प्रसिद्धम्। तथाच तैत्तिरीया रुद्रवाक्यं समामनन्ति— "यद्यज्ञवास्तौ क्षीयते, मम वै तत्"-इति (सं० ३.१.९.५.)। 'तं' रुद्रं सर्वान् पशूनभिगच्छन्तम् 'एतया' वक्ष्यमाणयर्चा 'निरवादयन्त' निरपेक्षं मकुर्वन्त। तथा तुष्टो रुद्रः पशवपेक्षां परित्यजति। का सा ऋगिति, सोच्यते— यैषा 'रौद्री' रुद्रदेवताका शस्यते, सावगन्तव्या ॥

तस्या ऋचः पादत्रयं पठति—"आ ते पितर्मरुतां सुम्न मेतु, मा नः सूर्यस्य सन्दृशो युयोथाः, त्वं नो वीरो अर्वति क्षमेथाः"-इति (सं० २.३३.१.)। मरुतां देवानां पितः ! हे रुद्र ! 'ते' तव 'सुम्नं' सुखम् 'एतु' आगच्छतु। 'नः' अस्मान् 'सूर्यस्य सन्दृशः' सूर्यावलोकनात् 'मा युयोथाः' मा वियोजय, दृष्टियुक्तान् कुर्वित्यर्थः। तृतीयपादस्य "त्वं नो वीरः" इति अत्रत्यपाठः, "अभि नो वीरः" इति शाखान्तरपाठः *। तयोर्मध्ये स्वपाठं विधाय शाखान्तरपाठं निषेधति— "इति ब्रूयादभि न इत्यनभिमारुको ह्येष देवः प्रजा भवति"-इति। 'इति' अनेन

* "आ ते पितर्मरुतां सुम्न मेतु मा नः सूर्यस्य सन्दृशो युयोथाः। अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः !"-इत्येव पाठो दृश्यते मुद्रितशाखासंहितायाम् (१.२३.१.)। आश्व० श्रौ० २.८.१। ऋग्वि० १.३०।

पूर्वोक्तेन प्रकारेण "त्वं नो वीरः"-इति पाठमेव शंसनकाले ब्रूयात्, 'अभि नः'-इति पाठं न ब्रूयात्। "त्वं नो वीरः"-इति पाठे सति 'एष देवः प्रजा अनभिमारुको भवति'। 'अभिमारुकः' "अभि नः"-इति पाठान्तरे ऽभिशब्दस्य विद्यमानत्वात् पुत्रादिकाः प्रजाः 'अभि'लक्ष्य नाशयिष्यामीति रुद्रो 'मारुकः'; "त्वं नः"-इति पाठे तु न तथेत्यर्थः * ॥ चतुर्थपादेऽपि स्वाभिमतपाठविधिपूर्वकं पाठान्तरं विधत्ते— "प्र जायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न रुद्रेत्येतस्यैव नाम्नः परिहृत्यै"-इति। हे रुद्रिय! रुद्रसम्बन्धिभूत्य! त्वदनुग्रहया वयं 'प्रजाभिः प्र जायेमहि' पुत्रपौत्रादिरूपेणोत्पादेमहि। अस्मिन् पादे रुद्रियेत्येत मेव पाठं ब्रूयात्, न तु रुद्रेति पाठम्। 'एतस्यैव' रुद्रस्य नाम्न उग्रत्व परिहाराय रुद्रियेतिपाठादरः ॥

"आ ते पितः"-इत्यस्या ऋचः स्थाने काञ्चिदन्या मृचं विधत्ते —"तदु खलु शं नः करतीत्येव शंसेच्छ मिति प्रतिपद्यते, सर्वस्मा एव शान्त्यै; नृभ्यो नारिभ्यो गव इति, पुमांसो वै नरः स्त्रियो नार्यः, सर्वस्मा एव शान्त्यै"-इति। 'तदु खलु तत्रैव पूर्वा मृचं परित्यज्य तस्या एव स्थाने "शं नः करत्यर्वतः"-इत्येता मृचं शंसेत् (सं० १. ४३. ६.)। तथा सति को लाभ इति, तदुच्यते— तस्या ऋच आदौ यत् 'शम्', 'इति' अनेन पदेन 'प्रतिपद्यते' प्रारभ्यः क्रियते; तस्य पदस्य शान्तिवाचकत्वात् 'सर्वस्मै' सर्वस्यापि स्वकीयस्य वस्तुनः शान्तिर्भवति। सर्वस्मा इत्यस्य व्याख्यानं नृभ्य इत्यादि। तस्यापि व्याख्यानं पुमांस इत्यादि। सर्वस्मा एव शान्त्या इत्युपसंहारः ॥

* 'चमेत'-इत्येव मुद्रितब्राह्मणपाठः, ऐतरेयकविचिन्तनस्तु 'चमेद्या'-इत्यपि भ्रेयम्।

प्रकारान्तरेण तां ऋचं प्रशंसति— "सो ऽनिरुक्ता रौद्री शान्ता, सर्वायुः सर्वायुत्वाय"–इति । 'सो' साम्यृक् 'अनिरुक्ता' रुद्रवाचकपदाभावादस्पष्टदेवताका । तत एव 'रौद्री' रुद्रदेवताका सत्यपि घोरार्थवाचकरुद्रपदाभावादियं 'शान्ता' । तां शंसन् होता सर्वायुर्भवति । तच्च यजमानस्य सर्वायुत्वाय सम्पद्यते ॥

वेदनं प्रशंसति— "सर्वं मायुरेति य एवं वेद"–इति । पुनरपि प्रकारान्तरेण प्रशंसति— "सो गायत्री ; ब्रह्म वै गायत्री,— ब्रह्मणैवैनं त नमस्यति"–इति । 'सो' सा च ऋक् गायत्रीच्छन्दस्का ; गायत्री च 'ब्रह्म वै' ब्राह्मणजातिरेव ; उभयोः प्रजापतिमुखजत्वात् । अतो 'ब्रह्मणैव' ब्राह्मणेनैव 'एनं' रुद्रं नमस्करोति ॥ १० ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
दशमः खण्डः ॥ १० (३४) ॥

॥ अथैकादशः खण्डः ॥

वैश्वानरीयेणाग्निमारुतं प्रतिपद्यते वैश्वानरो वा एतद्रेतः सिक्तं प्राच्यावयत्तस्माद्वैश्वानरीयेणाग्निमारुतं प्रतिपद्यते ऽनवानं प्रथम ऋक् शंस्तव्याग्नेव्या एषोऽचीँष्यशान्तान् प्रसीदन्नेति य आग्निमारुतं

शंसति प्राणेनैव तदग्नींस्तरत्यधीयन्नुपवक्त्रादन्यं विवक्तार मिच्छेत्तं रेव तत्सेतुं कृत्वा तरति तस्मा-दाग्निमारुतेन व्युच्च मेष्टव्यो विवक्ता मारुतं शंसति मरुतो ह वा एतद्रेतः सिक्तं धून्वन्तः प्राच्यावयंस्त-स्मान्मारुतं शंसति यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति मध्ये योनिं चानुरूपञ्च शंसति तद्य-न्मध्ये योनिं चानुरूपञ्च शंसति तस्मान्मध्ये योनि-र्धृता यद् द्वे सूक्ते शस्त्वा शंसति प्रतिष्ठयोरेव तदु-परिष्टात् प्रजननं दधाति प्रजात्यै प्र जायते प्रजया पशुभिर्य एवं वेद ॥ ११ (३५) ॥

अथ "वैश्वानराय पृथु पाजसे विपः"-इत्यनेन (३.३.१—११.) सूक्तेनाग्निमारुतस्य शस्त्रस्य प्रारम्भं विधत्ते— "वैश्वानरीयेणाग्नि-मारुतं प्रतिपद्यते,— वैश्वानरो वा एतद् रेतः सिक्तं प्राच्यावयत्; तस्माद्वैश्वानरीयेणाग्निमारुतं प्रतिपद्यते"-इति। रेतसः प्राच्या-वनं काठिन्यापादनम् ॥

तस्मिन् वैश्वानरीयसूक्ते कञ्चिद्विशेषं विधत्ते— "अनवानं प्रथम ऋक् शंस्त्याग्नेया एषोचीरथशान्तान् प्रसीदन्नेति; य आग्निमारुतं शंसति, प्राणेनैव तदग्नींस्तरति"-इति। 'अन-वान'-शब्देनोच्छ्वासनिश्वासावुच्येते; तौ यथा न भवतस्तथा प्रथमा ऋक् शंस्त्या। तथा सति सर्वान् 'अग्नीन्वै' ज्वालारूपानग्नीनेव 'एषः' होता 'शान्तान्' कृत्वा 'प्रसीदन्' प्रसादं कुर्वन् 'एति' गच्छति। यः पुमान् आग्निमारुतं शस्त्रं शंसति, तस्य प्रसाद-

हेतुत्वं कथ मिति, तदुच्यते— उच्छ्वासनिश्वासनिरोधादसवानं शंसन् प्राणवायुनैव तानन्नीन् 'तरति' उल्लङ्घयति, अग्निजात मुपद्रवं शमयतीत्यर्थः ॥

शंसनकाले प्रामादिकस्य वर्णादिलोपरूपस्य अपराधस्य प्रतीकारं दर्शयति— "अधीयनुपहन्यादन्यं विवक्तार मिच्छेत्त मेव तत्सेतुं कृत्वा तरति"—इति । 'अधीयन्' अधीयानः, शंसनं कुर्वन् होता यदि 'उपहन्यात्' उपघातं वर्णलोपं कुर्यात्, तदानीम् 'अन्य' कञ्चित् पुरुषं 'विवक्तारं' विविच्य वक्तुं समर्थम् 'इच्छेत्' समीपे ऽवस्थापयेत् । तदानीं 'त मेव' पुरुष मपराधतरणोपायं सेतुं कृत्वा 'तम्' अपराध मुल्लङ्घयति ॥ अयं पक्षो ऽनुकल्पः ; मुख्यं तु पक्षं दर्शयति— "तस्मादाग्निमारुतं न व्युच्य मेष्ट्वो विवक्ता"—इति । यस्मात्प्रमादं कृत्वा विवक्तृपुरुषमन्यादनं न मुख्यम्, 'तस्मात्' 'आग्निमारुतं' शस्त्रं 'न व्युच्यम्' न पद्यादिवर्जनम्, किन्तु प्रथम मेव विविच्य वक्तुं समर्थो होता 'गृह्यः' प्रयत्नेन सम्पादनीयः ॥

अथ "प्रवत्वतः प्रवतम्"—इत्यारभ्य मरुद्देवताकं सूक्तं (मं० १. ८७.१ इ.) विधत्ते— 'मारुतं शंसति ; मरुतो ह वा एतद्देवः सित्रं धृत्वनाः प्राच्यावयंस्तन्मान्मारुतं शंसति" इति । मरुतां धृतव्रतेन प्रजापतिव्रतोपपन्नं पूर्वं मेवोक्तम् (१५५ पृ०) ॥

अथ प्रगाथद्वयं विधत्ते - "यज्ञायज्ञा वो अग्नये, देवो वो द्रविणोदा इति, मध्ये योनिं चानुरूपं च शंसति; तद्यन्मध्ये योनिं

* "अथ यथेतम् । अन्यथा साधुभाषितम् । तस्माद्यो पक्षः कल्पवानं पक्षः शस्त्रा चेत् । अवैदिकं इतरम् । मन्त्रान् मुखतस्तन्त्रेण'—इति आश्व० श्रौ० ५.२०. १-५ ।

† 'न' 'व्युच्यम्' क, ग, घ ।

चानुरूपञ्च शंसति, तस्माद्मध्ये योनिर्धृता"–इति। "यज्ञायज्ञा वः"–इत्येकः प्रगाथः (उ० आ० १.१.२०.१,२.), "देवो वः"–इति द्वितीयः (उ० आ० १.१.२०.१,२.)। यत्र प्रथमे प्रगाथे ह्रचः सम्पद्यते, सोऽयं स्तौत्रियः; तस्मिन् ह्रचे सामगैः स्तूयमानत्वात्। अत एवासौ द्वयोर्मध्ये प्रथमभावित्वाद् 'योनिः'–इत्युच्यते। द्वितीय-प्रगाथे सम्पद्यमानस्तूचोऽनुरूपः *। यादृशः स्तौत्रियः, तादृशत्वम् अनुरूपत्वम्। तदेतदुभयं शस्त्रस्य मध्ये शंसनीयम्; न तु शस्त्रा-न्तरेष्विव स्तौत्रियानुरूपयोरादौ शंसनीयम्। तथा सति यस्मा-दत्र सूक्तमध्ये योनेरनुरूपस्य च शंसनं, तस्माल्लोकेऽपि नारीणां शरीरमध्ये योनिर्धृता॥

शस्त्रमध्ये तयोः स्थानविशेषं दर्शयति— "यदु ह्वै मरुते शस्त्वा शंसति, प्रतिष्ठयोरेव तदुपरिष्टात्प्रजननं दधाति प्रजात्वै"–इति। 'यदु' यस्मादेव कारणाद् वैश्वानरीयं मारुतं चेति 'ह्वै सूक्ते' शस्त्वा पश्चादेतौ स्तौत्रियानुरूपौ शंसति, तस्मात् कारणाद् द्विपदभङ्गी-पेतयोः 'प्रतिष्ठयोः' स्थितिहेत्वोः पादयोरेव 'उपरिष्टात्' ऊर्ध्व-देशे 'प्रजननं' प्रजोत्पादकं मिथुनं दधाति। तत्र 'प्रजात्वै' प्रजोत्पादनाय सम्पद्यते॥

वेदनं प्रशंसति — "प्र जायते प्रजया पशुभिर्य एवं वेद"–इति॥११॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
एकादशः खण्डः॥ ११ (३५)॥

---

* "यज्ञायज्ञा–इति प्रगाथो स्तौत्रियानुरूपौ"–इतिकल्पाख्यानुरोधादेवैवं व्याख्यान मिति ध्येयम्। पञ्च० ब्रा० ५.२०.६ द्रष्टव्यम्।

॥ अथ द्वादशः खण्डः ॥

जातवेदस्यं शंसति प्रजापतिः प्रजा असृजत ताः सृष्टाः पराच्य एवायन्न व्यावर्तन्त ता अग्निना पर्यगच्छत्ता अग्निं सुपावर्तन्त त मेवाद्याप्युपाद्दत्ताः सो ऽब्रवीज्जाता वै प्रजा अनेनाविद मिति यदब्रवीज्जाता वै प्रजा अनेनाविद मिति तज्जातवेदस्य सभवत्तज्जातवेदसो जातवेदस्त्वं ता अग्निना परिगता निरुद्धाः शोचत्यो दीध्यत्यो ऽतिष्ठंस्ता अङ्गिरभ्यषिञ्चत्तस्मादपरिष्टाज्जातवेदस्यस्यापोहिष्ठीयं शंसति तस्मात्तक्रमयतेव शंस्यं ता अङ्गिरभिषिच्य निजास्यैवामन्यत तासु वा अहिना बुध्न्येन परोक्षात्तेजो ऽदधादेष ह वा अहिर्बुध्न्यो यदग्निर्गार्हपत्यो ऽग्निनैवासु तद्गार्हपत्येन परोक्षात्तेजो दधाति तस्मादाहुर्जुह्वदेवाजुह्वतो वसीयानिति ॥ १२ (३६) ॥

अथ "प्र तव्यसीम्"-इत्येतज्जातवेदोदेवताकं सूक्तं (सं० १. १४३. १ ८.) विधत्ते— "जातवेदस्यं शंसति"-इति * । तदेतत् प्रशंसति— "प्रजापतिः प्रजा असृजत, ताः सृष्टाः पराच्य एवायन्, न व्यावर्तन्त ; ता अग्निना पर्यगच्छत्, ता अग्निं सुपावर्तन्त ; त मेवाद्याप्युपाद्दत्ताः ; सोऽब्रवीज्जाता वै प्रजा अनेनाविद मिति ; यदब्रवीज्जाता वै प्रजा अनेनाविद मिति, तज्जात-

* आश्व. श्रौ० ४ १०. ६ ।

वेदस्य भवत् तज्जातवेदसो जातवेदस्त्वम्"-इति। पुरा प्रजापतिना सृष्टाः प्रजाः प्रजापतिं पृष्ठतः कृत्वा पराङ्मुखत्वेनैवागच्छन्, न पुनरावृत्ताः। तदानीं प्रजापतिः 'ताः' प्रजाः अग्निना 'पर्यगच्छत्' परितोऽग्निप्राकारं कृतवान्। अतः 'ताः' प्रजाः दूरङ्गत्वं ममत्वाः अग्निं मुपेत्य पुनरावर्त्तन्त। यस्मादेवं तस्मादद्यापि प्रीतास्तीः प्रजाः 'त मेव' अग्निम् 'उपावृत्ताः' परितो गच्छन्त्योऽपि अग्निं दृष्ट्वा ममेपि कृत्वा सेवितुं मावर्त्तन्ते। ततः 'सः' तुष्टः प्रजापतिरेव मवदीत्, - 'जाताः' उत्पन्ना या: प्रजास्ताः सर्वाः अहम् 'अनेन' अग्निना 'अविदं' लब्धवानस्मि, ज्ञातवानस्मीति वा। यस्मादेनाः अविद मनेनेतुक्तवान्, तस्मादग्निसम्बन्धि सूक्तं जातवेदस्य भवत्; — जातवेदसोऽग्नेरपि जातान् वेत्तय मिति श्रुत्वैवा नयास मस्यत्वम् ॥

"आपो हि ष्ठा मयोभुवः"-इत्यादिकं सूक्तं (मं० १०, ९, १-३,) विधत्ते— "ता अग्निना परिगता निरुद्धाः प्रीवत्यो दीर्घत्वो इतिरंस्ता अङ्गिरस्यधिशेत, तस्मादुपरिष्टाज्जातवेदस्यस्यापोहिष्ठीयं शंसति" इति। अग्निना 'परिगताः' परितो वेष्टिताः, 'निरुद्धाः' सन्तु मवन्, 'प्रीवत्यः' प्रीत्र प्राङ्गत्यः, 'दीर्घत्व' दीर्घमानाः, 'ताः' प्रजाः तत्रैवातिष्ठन्। प्रजापतिः 'ताः' प्रजाः सन्तापपरिहाराय अङ्गिरस्यधिशेत। यस्मादेवम् तस्माज्जातवेदस्याश्वस्यूर्ध्वपरिष्टादापोहिष्ठेत्यादिकं सूक्तं शंसेत् ॥

तत्र कञ्चिद्विधिं विधत्ते— "तस्मात्तच्छमयतेव शंस्तव्यं; ता अङ्गिरभिधिय निजा स्यैवामन्यत" इति। यस्मादापोहिष्ठीयं शान्तभवनकारणम्, 'तस्मात्' 'तच्छमयतेव' होत्रा शंसनीयम्,—

* निरु० ७ । १ ।

यथा वह्निं शमयति पुरुषः, शनैः शनैः क्रमेण जलं सिञ्चति, एव मनेनापि शनैः शंसनं कर्त्तव्यम्। ततः स प्रजापतिः 'ताः' प्रजा अङ्गिरभिविध्य 'निजा एव' स्वकीया एव 'स्या' ताः प्रजा इत्यमन्यत। 'स्य' शब्दस्तच्छब्दपर्यायः; एकवचनान्तोऽपि बहुवचनान्तत्वेन परिणमयितव्यः; तथा सति ताः प्रजाः इत्युक्तं भवति। तस्माच्छनैः शंसनेन शस्यस्य स्वकीयत्वं सम्पद्यत इत्यर्थः। यद्वा 'ता अङ्गिः'—इत्याद्यर्थवाद उत्तरशेषत्वेन योजनीयः ॥

"उत नोऽङ्गिर्बुध्नाः" इत्यस्या ऋचः (सं० ६.५०.१४.) शंसनं तद्देवतास्तुतिद्वारेणोन्नयति—"तासु वा अङ्गिना बुध्नेन परोक्षात्तेजोऽदधादेष ह ता अङ्गिर्बुध्नो यदग्निर्गार्हपत्योऽग्निनैवासु तद्गार्हपत्येन परोक्षात्तेजो दधाति; तस्मादाहुर्जुन्नटेराजुन्नतो वसीयानिति"- इति। 'तासु' अभिषवकादूर्ध्वं स्वकीयत्वेन स्वीकृतासु प्रजासु, प्रजापतिः 'अङ्गिना बुध्नेन' अङ्गिर्बुध्नशब्दवाच्यनामकाग्निविशेषेण † 'परोक्षात्' परोक्षरूपेण 'तेजोऽदधात्' प्रजानां भक्षणाभीरुत्वाय तां यथा नाग्निविशेषं पश्यन्ति, तथा तास्वग्निविशेषसम्बन्धि तेजः स्थापितवान्। यो गार्हपत्योऽग्निरस्ति, एष एव अङ्गिशब्देन बुध्नशब्देनाभिहितः; अतस्तादृशायाः शंसने सति गार्हपत्येनैवाग्निना प्रजासु परोक्षत्वेन तेजः स्थापयति। यस्मा-

* 'यार्पि' इति तिसृणां क्रियाणां मध्ये उपांशुग्रहणानन्तरभाविन्यपांशुयाजाख्यायाः, इदमादि मति प्रतीके मानम्'-इति आप० श्रौ० १.२२ ६।

† "अङ्गिरवनात्, एतत्तीर्थेऽङ्गिरस्" (सं०) इति, "बुध्नः बुध सत्त्वविषयः, तन्निवासात् (विद्वदग्नि.)"-इति व निरु० २.१ ३,४४ ४.७। 'अङ्गिरामौ बुध्नियस्य बुध्नः'-इति सा० भा० (ऋ० सं० ७.३४.१७.) तद्देवत्ये मन्त्रे उक्तेऽप्यग्नेर्गार्हपत्यस्याङ्गिर्बुध्नीऽवगम्यते। परम् "उत नोऽङ्गिर्बुध्नः"-इत्येषा तु निरुक्त इन्द्रवानामानेकचमात्रमरे एव निगमत्वेनोदृता दृश्यते (१२.३.१५)।

दाग्नेयं तेजोऽपेक्षितं, तस्मात् 'अशुद्धतः' होमरहितात् पुरुषात् 'शुद्धदेव' होमं कुर्वन्नेव * पुरुषो 'वलीयान्' अत्यन्तं श्रेष्ठ इत्येवं जना आहुः ॥ १२ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य द्वितीयपञ्चिकायां द्वितीयाध्याये
द्वादशः खण्डः ॥ १२ (३६) ॥

॥ अथ त्रयोदशः खण्डः ॥

देवानां पत्नीः शंसत्यनूचीरग्निं गृहपतिं तस्मा-दनूची पत्नी गार्हपत्य मास्ते तदाहू राकां पूर्वां शंसेज्जाम्ये वै पूर्वपेय मिति तत्तन्नाद्रत्यै देवाना मेव पत्नीः पूर्वाः शंसे देष ह वा एतत्पत्नीषु रेतो दधाति यदग्निर्गार्हपत्यो ऽग्निनैवासु तद् गार्हपत्येन पत्नीषु प्रत्यक्षाद् रेतो दधाति प्रजात्यै प्र जायते प्रजया पशुभिर्य एवं वेद तस्मात्ममानोदर्याः स्वसान्यो-दर्यायै जायाया अनुजीविनी जीवति राकां शंसति राका ह वा एतां पुरुषस्य सेवनीं सीव्यति यैषा शिश्नेऽधि† पुमांसोऽस्य पुत्रा जायन्ते य एवं वेद पावी-

* 'कर्माण एव' ग ।

† "शिश्नेऽधि"—इति भाष्यसम्मतः पाठः ।

रवीं शंसति वाग्वै सरस्वती पावीरवी वाच्येव तद्वाचं दधाति तदाहुर्यामीं पूर्वां शंसेऽत् पित्र्यां३ * इति यामी मेव पूर्वां शंसेदिमं यम प्रस्तर मा हि सीदंति राज्ञो वै पूर्वपेयं तस्माद्यामी मेव पूर्वां शंसेन्मातलीकव्यैर्यमो अङ्गिरोभिरिति काव्याना मनूचीं शंसत्य-वरेणैव वै देवान् काव्याः परेणेव पितॄंस्तस्मात्काव्याना मनूचीं शंसत्युदीरता मवर उत्परास इति पित्र्याः शंसत्युन्मध्यमाः पितरः सोम्यास इति ये चेवावमा ये च परमा ये च मध्यमास्तान्त्सर्वानन्त-रायं प्रीणात्यार्द्धं पितृन्त्सुविदत्राँ अवित्सीति द्वितीयां शंसति बर्हिषदो ये स्वधया सुतस्येत्येतद्व वा एषां प्रियं धाम यद् बर्हिषद इति प्रियेणैवैनंस्त-द्धाम्ना समर्द्धयति प्रियेण धाम्ना समृद्ध्यते य एवं वेद इदं पितृभ्यो नमो अस्त्वद्येति नमस्कारवती मन्वतः शंसति तस्मादन्वतः पितृभ्यो नमस्क्रियते तदाहुर्व्याहावं पित्र्याः शंसेऽत् अभ्याहावाँ३ इति व्याहाव मेव शंसेदसंस्थितं वै पितृयज्ञस्य साध्व-संस्थितं वा एष पितृयज्ञं संस्थापयति यो ऽभ्याहावं शंसति तस्माद् व्याहाव मेव शंसव्यम्॥ १३ (३७)

* 'पित्र्यां ३ ग।

अथ "देवानां पत्नी रुशतोरवन्तु नः"-इत्यृग्द्वयं देवपत्नी-देवताकं विधत्ते— "देवानां पत्नीः शंसत्यनूचीरग्निं गृहपतिं; तस्मादनूचो पत्नी गार्हपत्य आस्ते"-इति। 'देवानां पत्नीः'-इत्यनेन देवतावाचकेन शब्देन तत्प्रतिपादक मृग्द्वयं * विवक्षितम् (५.४१.७,८.)। ततश्च 'गृहपतिं मग्निम् अनूचीः' शंसेत्। गृहपतिरग्निरित्येताभ्यां शब्दाभ्यां तत्प्रतिपादिका "उत नोऽहिर्बुध्नियः" इति ऋग् विवक्षिता (१६५ पृ०)। तदपेक्षया देवपत्नीनामकस्य मन्त्रजातस्य पश्चाद्भावित्व मन्वक्त्वम्; अतः पूर्वोक्ताया ऋचः पश्चात् शंसेदित्यर्थः। यस्मादेवं 'तस्माद्' यज्ञशालायां पत्नी गार्हपत्यम् 'अनूचो आस्ते' पश्चादवतिष्ठत इत्यर्थः॥

अत्र कश्चित् पूर्वपक्षं मुत्थापयति— "तदाहू राकां पूर्वां शंसेज्जामि वै पूर्वेयं मिति" इति। सम्पूर्णचन्द्रमण्डलयुक्ता पौर्णमासी राका; तदभिमानिदेवताया: प्रतिपादिका ऋगपि 'राका' इत्युच्यते। तां राकां 'पूर्वां' देवपत्नीभ्यः पूर्वभाविनीं शंसेत्†। सेयं राका देवानां 'जामि' नाम भगिनी; तस्मात् तस्या एव 'पूर्वेयं' प्रथमतः सोमपानं युक्त मिति पूर्वपक्षः॥ तं निराकृत्य देवपत्नीनाम् एव पूर्वत्वं दर्शयति— "तत्तत्राद्दृत्यं, देवाना मेव पत्नीः पूर्वाः शंसेदेष ह वा एतत्पत्नीषु रेतो दधाति, यदग्निर्गार्हपत्योऽग्निनैवासु तद्गार्हपत्येन पत्नीषु प्रत्यक्षाद्रेतो दधाति प्रजात्यै"-इति। राकायाः पूर्वत्व मनादरणीयम्, देवपत्नीना मेव पूर्वत्वं युक्तम्; गार्हपत्योऽग्निः पत्नीष्वेव रेतः स्थापयति, न तु भगिन्याम्। तस्मात् पत्नीनां पूर्वशंसनेन प्रत्यक्ष

* "देवानां पत्नीरुशतोरवन्तु न इति द्वे"-इति आश्व० श्रौ० ५.२.१।

† राकायाः, शमनत्वादिकं मनुपदं वक्ष्यति (१६९ पृ०)।

मेव पत्नीषु गार्हपत्यमुखेन रेतः स्रग्पयति ; तच्च 'प्रजात्वै' सम्पद्यते ॥

वेदनं प्रशंसति— "प्र जायते प्रजया पशुभिर्य एवं वेद"—इति ॥

लौकिकोदाहरणेन पत्नीनां पूर्वभावित्वम् भगिन्याः पश्चाद्भावित्वं चोपपादयति— "तस्मात् समानोदर्याः स्वसाभ्योदर्याये जायाया अनुजीविनो जीवति"—इति । पुरुषाणा मेकोदरजापि भगिनी परस्मै दीयते, भिन्नोदरजापि जाया स्वार्थं स्वीक्रियते ; तथा सति परस्मै दत्तापि भगिनी यदा कदाचिद् भ्रातृगृह मागत्य तत्प्रायां मनुष्यैः अन्नपानाभ्यां जीवन्ती सती 'जीवति' किञ्चित्काल मवतिष्ठते ॥

"राका सहम्" इति ऋग्द्वयं विधत्ते - "राकां शंसति ; राका ह्येना एतां पुरुषस्य मेवनीं सीव्यति,—यैषा शिश्नेऽधि"—इति । देवतावाचिशब्देन तदभिधायिनी ऋगभिधीयते (सं० २.३२.४.), तां शंसेत् । पुरुषस्य 'शिश्नेऽधि' शिश्नस्योपरि स्थिता, शुक्रवहनयन्त्रोपरि व्याप्ता यैषा 'मेवनी' एतन्नाम्न्याभिधेया उपस्थशिरा अस्ति, 'एनां' शिरां राकाख्या देवता 'सीव्यति' दृढयति करोति ; तस्मात् तदीया मृचं शंसेत् ॥

वेदनं प्रशंसति— "पुमांसोऽस्य पुत्रा जायन्ते य एवं वेद"—इति ॥

"पावीरवी कन्या" इत्येना मृचं (सं० ६.४८.७.) विधत्ते— "पावीरवीं शंसति ; वाग्वै सरस्वती पावीरवी, वाचैव तद्रायं दधाति"—इति । यैषा वागभिमानिनी 'सरस्वती' देवता, सैव

---

* "गृहपतिपर्यन्ता" ग ।

† आश्वलायनेन तु ऋग्द्वयं विधीयते, 'राका मह मिति द्वे'—इति (४. २०.६.), षड्विंशब्राह्मणे तस्य भाष्ये 'राका मह मिति ऋग्द्वयं विधत्ते'—इति, तदेतद् विचार्यं सुधीभिः ।

'पावस्य' गोधनस्य हेतुत्वात् 'पावीरवी'; तत्पाठेन 'वाचि एव' देवतायां मन्त्ररूपां 'वाचं' स्थापयति ॥

अत्र विचार मवतारयति— "तदाहुर्यामीं पूर्वां शंसेदृत् पित्र्यां३इति"-इति। "इमं यम प्रस्तरम्"-इत्येषा (सं० १०.१४.४.) यमदेवताकत्वाद् 'यामी'; "उदीरता मवरः"-इत्येषा पितृदेवताकत्वात् 'पित्र्या'। उभयोः पौर्वापर्यकारणस्यानियमादिचारः; तदर्थं श्रुतिः। तत्र निर्णयं दर्शयति— "यामी मेव पूर्वां शंसेद्,— इमं यम प्रस्तर मा हि सीदेति; राज्ञो वै पूर्वपेयं तस्माद्यामी मेव पूर्वां शंसेत्"-इति। यमो हि राजा; "यमः पितॄणां राजा" इतियुत्पत्तरात् ३; राज्ञश्च प्रथमं पानं युक्तम् ॥

पूर्वोक्तायाः श्रुत्यां यामीं विधत्ते— "मानवी ऋच्यैयमो अङ्गिरोभिरिति काव्यानां मनूचीं शंसत्यवरेणैव वै देवान् काव्याः परेण पितॄंस्तस्मात्काव्यानां मनूची शंसति" इति। "ऋच्यैः"-इतिप्रतीकादिदं 'काव्यानाम्' ऋक् (सं० १०.१४.३.); या च पूर्वोक्ता मच अनु पश्चाद् गच्छतीति अनूची'; तां तत्रैव शंसेत्। 'काव्याः' देवानां श्रोतारः क्रविदृषभजातिविशेषाः, पितृभ्योऽप्युत्तमजातीयाः; एतदेव 'देवान् अवरेण, पितॄन् परेण'-इत्युक्तम्। अत एव पूर्वे मुक्तायां याम्यां, वक्ष्यमाणायाः पित्र्याश्च मध्ये मनूच्यं युक्तम ॥

अथ निम्न पितृदेवताका ऋचो विधत्ते— 'उदीरता मवर उत्परास उति (सं० १०.१५.१.) पित्र्या. शंसत्युत्तमाः पितरः सोम्यास इति'-इति। यादृशं व्याचष्टे— "ये देवानामा ये च परमा ये च मध्यमास्तान्त्सर्वान्नमन्नरायं प्रीणाति"-इति। 'अवरे'

* "अन्नो वै मनुष्यानन्नाद्यमेव यजमानेऽधिपत्यं परीप्सति"-इति तै० सं० ५. १. ८. २।

निकृष्टाः पितरः 'उदीरताम्' उत्कर्षेण गच्छन्तु ; 'पराः' उत्कृष्टाः पितरः उदीरताम् ; तथा 'मध्यमाः' निकृष्टोत्कृष्टमध्यवर्त्तिनः पितरः उदीरताम् । ते त्रिविधाः पितरः 'सोम्यासः' सोमयोग्याः 'इति' एतस्य पादद्वयस्य पाठेन त्रिविधानपि पितॄन् 'अनन्तरायं' कस्याप्यन्तरायो यथा न भवति तथा तर्पयति ॥

विहितासु तिसृष्वृक्षु प्रथमायाः उदाहृतत्वादनन्तरभाविनीं द्वितीयां मृचं दर्शयति— "आहं पितृन्त्सुविदत्राँ अवित्सीति (सं० १०,१५.३.) द्वितीयां शंसति"–इति । तस्या ऋचस्तृतीयपाद मनूद्य व्याचष्टे— "बर्हिषदो ये स्वधया सुतस्येत्येतद्व वा एषां प्रियं धाम, यद् बर्हिषद इति प्रियेणैवैनांस्तद्धाम्ना समर्द्धयति"–इति । बर्हिषि दर्भे सीदन्ति उपविशन्तीति 'बर्हिषदः' पितरः । अत्र "बर्हिषदः"–इति यदुच्यते 'एतद्व वै' एतदेव बर्हिषदाम् 'एषां' पितॄणां प्रियं स्थानम् ; तस्मादेतत्पदपाठेन 'एनान्' पितॄन् प्रियेणैव 'धाम्ना' स्थानेन समृद्धान् करोति ॥

वेदनं प्रशंसति— "प्रियेण धाम्ना समृद्धाते य एवं वेद"–इति ॥

तृतीया मृचं दर्शयति— 'इदं पितृभ्यो नमो अस्त्वद्येति नमस्कारवती मन्त्रतः शंसति ; तस्मादन्ततः पितृभ्यो नमस्क्रियते"–इति । अस्या मृचि "नमो अस्तु"–इतिश्रूयमाणत्वादियं 'नमस्कारवती' (सं० १०. १५. २.) ; ता मेतां तिसृणां पित्र्याणां मन्त्रे शंसेत् ; यस्मादेवं तस्मात् प्रातरन्वाहे "नमो वः पितरः"–इत्यादिना (वा० सं० २०. ३२.) पितृभ्यो नमस्कारः क्रियते ॥

एतासु पित्र्यासु ऋक्षु विशेषं विचार्य निर्णयं दर्शयति— "तदाहुर्व्याहावं पित्र्याः शंसेदनूत्र अव्याहावँ३ इति ? व्याहाव मेव शंसेदसंस्कृतं वै पित्र्यस्य साध्वसंस्कृतं वा एष पित्र्यं शंसा-

पयति यो व्याहावं शंसति ; तस्मात् व्याहाव मेव शंस्तव्यम्"-इति। "शंसावोम्"-इति मन्त्र आहावः ; अनेन मन्त्रेण प्रत्यृचं 'व्याहावं' विशेषेणाहूयाहूय किं तिस्रः पित्रया: शंसेत्, आहोस्विद् 'अव्याहावं' पृथक्-पृथगाहावमन्त्रं विना शंसेदिति विचारं ब्रह्मवादिन आहुः। अत्र 'पित्रया: शंसति"-इत्येकेनैव विधिना विहितत्वात् पृथक्-पृथगाहावो नास्तीति पक्षः प्रतिभाति ; पुनरपि "द्वितीयां शंसति", "नमस्कारवतीं शंसति" इति पृथग्विधिदर्शनात् प्रत्येक माहावः कर्त्तव्य इत्यपि प्रतिभाति। विचारार्थं श्रुतिद्वयम्। तत्र पृथक् पृथक् आहाव एव सिद्धान्तः। तत्रैव युक्तिः,—पित्र्यस्य सम्बन्धि यदङ्गम् 'अमंस्थितम्' एव वर्त्तते, असमाप्तं तिष्ठति ; तदङ्गं 'साधु' समाप्तं कर्त्तव्यम्। 'यः' कोना पृथक् पृथगाहावं कृत्वा शंसति, 'एषः' कोना पूर्वम् 'अमंस्थितम्' असमाप्तं पितृयज्ञं संस्थापयति। तस्मात् पृथगाहावमन्त्रं पठित्वैव शंस्तव्यम् ॥ १३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
त्रयोदशः खण्डः ॥ १३ (३७) ॥

॥ अथ चतुर्दशः खण्डः ॥

स्वादुष्किलायं मधुमाँ उतायं सोमेन्द्रस्येन्द्रो-
नुपानीयाः शंसत्येताभिर्वा इन्द्रस्तृतीयसवन मन्वपि-

वत्तदनुपानीयाना मनुपानीयात्वं माद्यन्तीव वै तर्हि देवता यदेता होता शंसति तस्मादेतासु मदन्ति-गीर्यं ययोरोजसा स्कभिता रजांसीति वैष्णवारुणो मृचं शंसति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं तयोरुभयोरेव शान्त्यै विष्णोर्नु कं वीर्याणि प्र वोच मिति वैष्णवीं शंसति यथा वै मत्य मेवं यज्ञस्य विष्णुस्तद्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सु-मतीकृतं कुर्वन्नियादेव मेवैतद्यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं सुशस्तं कुर्वन्नेति यदेतां होता शंसति तन्तु तन्वन्रजसो भानुमन्विहोति प्राजापत्यां शंसति प्रजा वै तन्तुः प्रजा मेवाऽऽत्मा एतत्सन्ननोति ज्योतिष्मतः पथो रक्ष धिया कृतानिति दैवयाना वै ज्योतिष्मन्तः पन्थानस्तानेवाऽऽत्मा एतद्वितनोत्यनुल्बणं वयत जोगुवा मपो मनुर्भव जनया दैव्यं जन मित्येवैनं तन्मनोः प्रजया सन्तनोति प्रजात्यै प्र जायते प्रजया पशुभिर्य एवं वेदै वा न इन्द्रो मघवा विरप्शीत्युत्तमया परि दधातीयं वा इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वतीयं वै सत्या चर्षणीधृदनर्वा त्वं राजा जनुषां धेह्यस्मे इतीयं वै राजा जनुषा मधिश्रवो माहिनं यज्जरित इतीयं वै माहिनं यज्ञश्रवो यज-

मानो जरिता यजमानायैवैता माशिष माशास्ते तदुपस्पृशन् भूमिं परि दध्यात्तद्यथा मेव यज्ञं सम्भरति तथा मेवैनं तदन्ततः प्रतिष्ठापयत्यग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्याग्निमारुत मुक्थं शस्त्वाग्निमारुत्या यजति यथाभागं तद्देवताः प्रीणाति प्रीणाति ॥ १४ (३८) ॥

॥ इत्यैतरेयब्राह्मणे तृतीयपञ्चिकायां तृतीयोऽध्यायः ॥

अथ चतस्र ऋचो विधत्ते— "स्वादुष्किलायं मधुमाँ उतायमितीन्द्रस्यैन्द्रीरनुपानीयाः शंसत्येताभिर्वा इन्द्रस्तृतीयसवन मन्वपिवत्तदनुपानीयाना मनुपानीयात्वम्"–इति । "स्वादुष्किलायम्"–इत्यादिका ऋचः (सं० ६. ४७. १–४) 'ऐन्द्राः' इन्द्रदेवताकत्वात् ; "पपिवांस मिन्द्रम्"–इतीन्द्रः तृतीयपादे श्रूयते । तास्व 'इन्द्रस्यानुपानीयाः' भोजनादूर्ध्वं यत्यानं, तत्पद्याद्राविवादनुपानम्; तत्स्थानीया एता ऋचः ; ताः शंसेत् । कथ मिवासा मनुपानीयात्वम् ? इति तदुच्यते— अथ मिन्द्रः तृतीयसवनम् 'अनु' पश्चाद् 'एताभिः' ऋग्भिः शंस्यमानः सन् सोम मपिबत्, तस्मादनुपानीयेति नाम सम्पन्नम् ॥

एतच्छंसनकालेऽध्वर्योः प्रतिगरमन्त्रे विशेषं विधत्ते—"माध्यन्दीव वै तर्हि देवता यदेता होता शंसति ; तस्मादेतास्व महत्प्रतिगीर्यम्"–इति । तस्मिन्ननुपानीयाना ऋचां शंसनकाले होतुः शंसनं श्रुत्वा देवताः सर्वाः 'माध्यन्दि इव वै' सर्वथा ह्यथस्त्येव ;

'तस्मात्' कारणात् 'एतासु' ऋक्षु गीयमानासु अध्वर्युणा 'मद्रत् प्रतिगीर्यम्' मदिधातुयुक्तं प्रतिगरणं पठनीयम् । "मदा मोदैव"-इत्ययं मदिधातुयुक्तः प्रतिगरणमन्त्रः * ॥

ऋगन्तरं विधत्ते— "ययोरोजसा स्कभिता रजांसीति वैष्णवारुणी मृचं शंसति; विष्णुर्वै यज्ञस्य दुरिष्टं पाति, वरुणः क्लिष्टं; तयोरुभयोरेव शान्त्यै"-इति । विष्णुवरुणौ मिलित्वा देवता यस्या ऋचः, सा 'वैष्णवारुणी'; तां शंसेदित्यर्थः । तस्यास्तृतीयपादे "विष्णुरगन्वरुणा"-इतिश्रवणात् वैष्णवारुणीत्वम् । सा चाश्वलायनेन पठिता (५, २०, ६) † । 'दुरिष्टम्' अङ्गविकलं यदनुष्ठितम्, तद्विष्णुः 'पाति' वैकल्यं निवारयतीत्यर्थः । 'क्लिष्टं' साकल्येन यदङ्गमनुष्ठितम्, तद्वरुणः 'पाति' तस्य फलप्रतिबन्धं निवारयतीत्यर्थः । तस्मादियं मृक् 'तयोः उभयोः' विष्णुवरुणयोरेव 'शान्त्यै' प्रीत्यै सम्पद्यते ॥

ऋगन्तरं विधत्ते— "विष्णोर्नु कं वीर्याणि प्र वोच मिति वैष्णवीं शंसति; यथा वै मत्यं मेवं यज्ञस्य विष्णुस्तद्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सुमतीकृतं कुर्वन्नियादेव मेवैतद्यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं सुशस्तं कुर्वन्नेति, यदेनां होता शंसति"-इति । "विष्णोः"-इतिश्रूयमाणत्वादियं 'वैष्णवी' (सं०१.१५४.१.) । तुष्टौ सम्यक्त्वेन प्रतिभातं कार्यं 'मत्यम्'; अयं दृष्टान्तः, विष्णुर्दार्ष्टान्तिकः । यथा मत्यं कार्यं लोके फलपर्यवसायि भवति,

* "सादयध्वमिति चतसृणां मध्ये चतसृणां मदा मोदैव मादा मोदैवा मित्यासां प्रतिगरौ"-इति आश्व० श्रौ० ५,२०,६ ।

† "यथोरोजसा स्कभिता रजांसि वीर्येभिर्विमिता क्रत्वेमा ।
या पत्यन्ते अमृतेना सप्तीभिर्वैष्णवम् वदथा पूर्वथूतौ ॥"-इति ।

तथा विष्णुरपि फलपर्यवसायी इत्यर्थः। उक्तयोः दृष्टान्त-दार्ष्टान्तिकयोः तात्पर्यं तद्ययेत्यादिना प्रपञ्चयते। यथा लोके 'दुष्कृष्टं' कर्षकैः सस्यस्थाने दोषयुक्तं यथा भवति तथा कर्षणं कृतम्, यत्किञ्चिद्राजकार्यं ममात्यैः 'दुर्मतीकृतं' दुष्टं मत मन्यथा चिन्तितम्, पूर्वं तत्कार्यं मदुर्मतं सत् पश्चाद् बुद्धिप्रसादात् दुर्मतं सम्पादितम्; तत्र कश्चिद् बुद्धिमान् कर्षकः क्षेत्रस्थाने दुष्टस्य तृणादेरपनयनेन 'सुकृष्टं कुर्वन्' 'इयात्' कर्षकस्य पृष्ठतो गच्छेत्, राजकार्यं मपि दुर्बुद्धिनामात्येन दुर्मतीकृतं कथित्सुबुद्धिरमात्यः सुमतीकुर्वन् गच्छेत्। यथैतदुभयं लोके, एव मेवास्मिन् कर्मणि यज्ञस्य सम्बन्धि यत् स्तोत्र मक्षुशलैरुद्गातृभिर्दोषसहितं कृतम्, यदपि होत्रभिः शस्त्रं दोषसहितम् पठितम्; तदुभय मपि विष्णुः क्रमेण सुष्टुतं सुशस्तं कुर्वन् 'एति' गच्छति, तच्चत्यदोषं परिहरतीत्यर्थः। 'यद्' यदा वैष्णवो मैतां होतां शंसति, तदा तदुभयसमाधान मिति द्रष्टव्यम्॥

अगल्तरं विधत्ते —"तन्तु तन्वन्रजसो भानु मन्विहीति प्राजापत्यां शंसति; प्रजा वै तन्तः, प्रजा मेवास्मा एतत्सन्तनोति"—इति। अस्यां सृचि कांचिदपि देवतां साक्षाद्वाचकशब्देन नोक्ता, तस्मादिय मनिरुक्ता (मं० १०. ५३. ६.); तादृश्यश्च प्रजापतिदेवता; तद्देवताकत्वं पूर्वं मेव निरूपितम्*; तां मैतां 'प्राजापत्यां' शंसेत्। हे प्रजापते! 'तन्तु तन्वन्' पुत्रपौत्रादिसन्ततिं विस्तारयन् 'रजसः' रञ्जनात्मकस्य जगतः 'भानुं' भासकमादित्यम् 'अन्विहि' अनुगच्छ। आदित्यो हि पुनः पुनः सञ्चरन् अहोरात्रनिर्वृत्तिं करोति, तत्कालानुसारेणैव त्व मपि सन्ततिवृद्धिं कुर्वित्यर्थः। अस्मिन् पादे 'तन्तु'-शब्देन पुत्रपौत्रादिः प्रजा विव-

* १३३ पृ० ६ पं० अग्निर्ने इत्यादि द्रष्टव्यम्।

क्षिता ; तन्तुवत् विस्तार्यमाणत्वात् । तस्मादेतत्पादयाठेन 'अस्मै' यजमानाय प्रजा मेव 'सन्तनोति' अविच्छिन्नां करोति ॥ द्वितीयं-पाद मनूद्य व्याचष्टे— "ज्योतिषतः पथो रक्ष धिया कृतानिति,— देवयाना वै ज्योतिषन्तः पन्थानस्तानेवास्मा एतद्वि तनोति"—इति। हे प्रजापते ! 'धिया कृतान्' यागाद्यनुष्ठानबुद्धया सम्पादितान् 'ज्योतिषतः' प्रकाशयुक्तान् 'पथः' स्वर्गमार्गान् 'रक्ष' विघ्नपरि-हारेण पालय । अत्र 'ज्योतिषत्-पथि'-शब्दाभ्यां देवयानमार्गो विवक्षितः । देवा येषु मार्गेषु यान्ति गच्छन्ति, ते 'देवयानाः' । 'सर्वेषां देवानां तेजस्वित्वात्तन्मार्गेषु न कदाप्यन्धकारोऽस्ति । तस्मादेतत्पादपाठेन 'अस्मै' यजमानाय 'तान्' एव मार्गान् होता विस्तारयति ॥ उत्तरार्द्धं मनूद्य व्याचष्टे— "अनुल्बणं वयत जोगुवा मपो मनुर्भव जनया दैव्यं जन मित्येवैनं तन्मनोः प्रजया सन्त-नोति प्रजात्यै"—इति । पुनः-पुनः कर्मसु गच्छेति प्रवर्त्तस्व इति अनुष्ठानशीलाः 'जोगु'-शब्देनोच्यन्ते । तादृशानां 'जोगुवाम्' अत्यन्तसन्ततावुत्पन्नानां पुत्रादीनाम् 'अपः' अनुष्ठीयमान मेतत् कर्म 'अनुल्बणम्' अनतिरिक्तं 'वयत' हे प्रजापते ! 'वय' निर्वह । बहुवचनं पूजार्थम् । 'मनुर्भव' त्वमेष मनुष्योत्पादनार्थं मनुरूपो भव । ततो 'दैव्यं' देवताराधनयोग्यं 'जनं' पुत्रादिरूपं मनुष्यं 'जनय' उत्पादय । 'तत्' तेनार्हपाठेन 'एनं' यजमानं 'मनोः' सम्बन्धिन्या 'प्रजया' मनुष्यरूपया 'सन्तनोति' संयोजयति । तच्च 'प्रजात्यै' यजमानस्य प्रजोत्पादनाय सम्पद्यते ॥

वेदनं प्रशंसति— "प्र जायते प्रजया पशुभिर्य एवं वेद"—इति ॥

ऋगन्तरेण शस्त्रसमाप्तिं विधत्ते— "एवा न इन्द्रो मघवा विरप्शीत्युत्तमया परि दधातीयं वा इन्द्रो मघवा विरप्शी"—इति।

योऽयं मिन्द्रोऽस्मि, सोऽयं 'नः एव' अस्मदर्थ मेव, करोत्विति द्वितीय-पादेन वक्ष्यमाणेन सम्बन्धः। कीदृश इन्द्रः ? 'मघवा' धनवान्, तथा 'विरप्शी' "रभ राभस्ये"-इत्यस्माद्धातोरुत्पन्नोऽयं शब्दः, विशे-षेण राभस्यवान्, सर्वदोद्युक्त इत्यर्थः। अनयर्चा (सं० ४.१७.२०) 'उत्तमया' शस्त्रापेक्षया अन्तिमया परिधानं कुर्यात्। उदा-हृते प्रथमपादे इन्द्रादिशब्दैः सर्वैरपि 'इयं वै' भूमिरेवोपलक्ष्यते ; अन्यथा भूमिसर्वनस्य विधास्यमानत्वात्॥ प्रथमपादं व्याख्याय द्वितीयपाद मनूद्य व्याचष्टे -- "करत्सत्या चर्षणीधृदनर्वेतीयं वै सत्या चर्षणीधृदनर्वा"-इति। 'चर्षणी'-शब्दो मनुष्यवाची, तां धारयति पोषयतीति 'चर्षणीधृत्' इन्द्रः। सोऽयम् 'अनर्वा' रथं परित्यज्य यागभूमावुपविष्टत्वादश्वरहितः। तादृशः सन् 'सत्या' फलप्रदानस्यावश्यम्भावेन सत्यानि कर्माणि 'करत्' करोतु, विघ्न-परिहारेण सम्पादयतु। अस्मिन्नपि पादे सत्यादिपदैः पूर्ववदियं भूमिरेवोपलक्षणीया॥ तृतीयपाद मनूद्य व्याचष्टे— "त्वं राजा जनुषां धेह्यस्मे तृतीयं वै राजा जनुषाम्"-इति। 'जनुषां' जना-नाम् 'अस्मे' अस्माकं सन्निधौ हे इन्द्र! त्वं राजा भूत्वा 'धेहि' वक्ष्यमाणं ममोष्टं सम्पादय। अस्मिन्नपि पादे 'राजा जनुषाम्'-इति पदद्वयेन पूर्ववदियं भूमिरेवोपलक्षणीया॥ चतुर्थं पाद मनूद्य व्याचष्टे— "अधि श्रवो माहिनं यज्जरित्र इतीयं वै माहिनं यज्ञ श्रवो यजमानो जरिता यजमानायैवैतां माशिष माशास्ते"-इति। 'जरित्रे' स्तोत्रे यजमानाय 'यत्' प्रसिद्धं 'माहिनं' महित्वं 'श्रवः' कीर्त्तिं च 'अधि' धेहीतिपूर्वेणान्वयः ; हे इन्द्र! ममाधिक्येन सम्पादयेत्यर्थः। अस्मिन्नपि पादे 'माहिनम्'-इत्यनेनेयं भूमिरे-वोपलक्षणीया। यज्ज्ञब्दो नपुंसकलिङ्गो य इति पुंलिङ्गत्वेन परि-

यमयिष्यः; तेन यो 'यज्ञः' इति प्रसिद्धं यज्ञं माचष्टे, सोऽपि इयं वै भूमिरेव । कीर्त्तिवाचिना 'अवः'-शब्देनापि भूमिरेवोपलक्ष्यते । यजमानो 'जरितृ'-शब्देनाभिधेयः । एतत्पादचतुष्टयपाठेन होता यजमानार्थं मेव आग्नामनीयं सर्वं प्रार्थयते ॥

परिधानकाले होतुर्भूमिस्पर्शनं विधत्ते—"तदुपस्पृशन् भूमिं परि दध्यात्तस्या मेव यज्ञं समारभति, तस्या मेवैनं तदन्ततः प्रतिष्ठापयति"—इति । 'तत्' तदा शस्त्रसमाप्तिकाले भूमिं स्पृशन्नेव 'परि दध्यात्' समापयेत् । 'तत्' तेन स्पर्शनेनानेन यस्या मेव भूमौ यज्ञ मनुष्ठातुं साधनं 'समारभति' सम्पादयति । तस्या मेव भूमौ 'एनं' यज्ञं 'तदन्ततः' तत्समाप्तिपर्य्यन्तं प्रतिष्ठापयति ॥

अथ शस्त्रयाज्यां विधत्ते—"अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्याग्निमारुत मुक्थं शस्त्वाग्निमारुत्या यजति, यथाभागं तद्देवताः प्रीणाति प्रीणाति"—इति । अग्निमरुतश्च यस्य 'उक्थस्य' शस्त्रस्य देवता, तत् 'आग्निमारुत मुक्थम्', पूर्वोक्तप्रकारेण शस्त्वा पठेत् ऋचम् "अग्ने मरुद्भिः"—इत्येतया 'आग्निमारुत्या यजेत' । आग्निमारुतीं याज्यां (मं० ५. ६०. ८.) पठेदित्यर्थः ॐ । तथा सति

ॐ "अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरिति याज्या । इत्यनोऽग्निष्टोमोऽग्निष्टोमः"—इति आश्व० श्रौ० ५. २. ८. । यदुक्तं भाष्ये "तस्य ज्योतिष्टोमस्य प्रथमसंस्थोपेतस्याग्निष्टोमः, उक्थ्यः, षोडश्युक्थातिरात्रश्चेत्येतावत्सः संस्थाः अचानुक्रमेण भवन्ति"—इति (१ भा० ६ ५० १ पं०), तत्र प्रथमसंस्थात्वेनाग्निष्टोमस्य श्रौतेषु सूत्रेषु प्रथमं समाप्तिः; अत एव आश्वलायनेन श्रौतसूत्रे वाजपेयानि, आप्तर्यामाणि तु शतपथादौ दर्शितानि । तत्र शतपथे तृतीयचतुर्थ्याभ्यां काण्डाभ्यां मैकाहिकहीनसत्रसत्रसत्रसोमयागप्रकृतिभूतोऽयं अग्निष्टोमोऽभिहितः । तथा कात्यायनश्रौतसूत्रेऽपि "वसन्तेऽग्निष्टोमः (७. १. ४.)"—इत्यारभ्य "एष प्रथमः सोमः (१०. ९. २५.)"—इत्यन्तो द्रष्टव्यः । एवं सामब्राह्मणे षड्विंशे, मन्त्रब्राह्मणेषु "प्रजापतिरकामयत (ता० ब्रा० ६. १. १.)"—इत्यादिभिः अग्निष्टोमीयानि ऐतिहासानि विहितानि ।

तस्मिन् ग्रन्थे प्रतिपादिता यावत्यो देवताः सन्ति, ताः सर्वा-
स्वप्तद्वाग मनतिक्रम्य तर्पयति ॥ ग्रन्थासोऽध्यायसमाप्तार्थः ॥ १४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयाध्याये
चतुर्दशः खण्डः ॥ १४ (३८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(तव)

॥ अथ प्रथमः खण्डः ॥

॥ॐ॥ देवा वा असुरेर्युद्धमुप प्रायन् विजयाय तानग्नि-
र्नान्वकामयतैतुं * तं देवा अब्रुवन्नपि त्व मेह्यस्माकं
वै त्व मेकोऽसीति स नास्तुतोऽन्वेष्यामीत्यब्रवीत् स्तुत
नु मेति तथेति तं ते समुत्क्रम्योपनिवृत्यास्तुवंस्तान्
स्तुतोऽनु प्रैत्त्रि श्रेणिर्भूत्वा व्रानीको ऽसुरान् युद्ध
मुप प्रायद् विजयाय त्रिश्रेणिरिति छन्दांस्येव
श्रेणीरकुरुत व्रानीक इति सवनान्येवानीकानि
तानसभाव्यं पराभावयत् ततो वै † देवा अभवन्
परासुरा भवत्यात्मना परास्य द्विषन् भ्रातृव्यो
भवति य एवं वेद सा वा एषा गायत्येव यद-
ग्निष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंशति-
रग्निष्टोमस्य स्तुतशस्त्राणि तद्वै यदिद माहुः सुधायां
ह वै वाजी सुहितो दधातीति गायत्री वै तन्न ह
वै गायत्री क्षमा रमत ऊर्ह्वा ह वा एषा यजमान
मादाय स्वरेतीत्यग्निष्टोमो वै तन्न ह वा अग्निष्टोमः

* "नाकामयतैतुं" क । † नात्रेतत् पदं क पुस्तके ।

क्षमा रमत ऊर्ग्वै ह वा एष यजमानमादाय स्वर्गं इति स वा एष संवत्सर एव यदग्निष्टोमश्चतुर्विंशत्यर्द्धमासो वै संवत्सरश्चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि तं यथा समुद्रं स्रोत्या एवं सर्वे यज्ञक्रतवोऽपि यन्ति ॥ १ (३९) ॥

त्रयोदशे सोमकथा प्रकीर्त्तिता,
राजक्रयार्था सवनान्विताऽपि ।
स्याद्दैवदेवश्च मरुत्वतीयं
तत्सद्विधेया उदिताः क्रमेण ॥

अथ पूर्वाध्यायेषूक्तोऽग्निष्टोमः, सर्वयज्ञक्रतूनां प्रकृतित्वेन श्रूयते । तदर्थं सुपाख्यान माह— "देवा वा असुरैर्युद्ध सुप प्रायन्विजयाय ; तानग्निर्नान्वकामयतैतुं ; तं देवा अब्रुवन्नपि त्व मेषामाकं वै त्व मेकोऽसीति ; म नास्तोऽन्वेष्यामीत्यब्रवीत्,— स्तुत सु मेति ; तथेति ; तं ते समुल्क्यायोपनिहत्यास्तुवंस्तान् स्तोऽन् प्रैत्"—इति । देवाः स्वर्जिजयार्थं मसुरैः सह युद्धम् 'उप प्रायन्' उपक्रान्तवन्तः । तदाऽग्निः 'तान्' देवान् 'अनु' पश्चात् 'एतुम्' आगन्तुं नाकामयत । अग्नि मिच्छारहितं देवा एव मब्रुवन्,— हे अग्ने ! त्व मपि 'एहि' आगच्छ, अस्माक मेव मध्ये 'त्व मेकोऽसि', न त्वन्मत्तोऽन्य इति । ततः 'सः' अग्निरेव मब्रवीत्,— युष्माभिरस्तुतः सन्नहं 'मान्वेष्यामि' युष्माकं पृष्ठतो न गमिष्यामि,— तस्मात् 'मा' माम् 'नु' क्षिप्र मेव 'स्तुत' स्तोत्रं कुरुतेति । देवास्तथेत्यङ्गीकृत्य 'समुल्क्य' उत्थाय 'उपनिहत्य' अग्नेरभिमुखत्वेन

निहत्य' इत्वा 'तम्' अग्निं मरुत्वन्। सोऽप्यग्निः सुतः सन् 'तान्' देवान् 'अनु'सृत्य 'प्रैत्' युद्धार्थं प्रकर्षेणागच्छत्॥

अग्नेर्युद्धप्रकारं दर्शयति—"स त्रिश्रेणिर्भूत्वा त्रानीको ऽसुरान् युद्ध मुप प्रायद् विजयाय;— त्रिश्रेणिरिति च्छन्दांस्येव श्रेणीरकुरुत, त्रानीक इति सवनान्येवानीकानि, तानसभाव्यं पराभावयत्; ततो वै देवा अभवन् परासुरा"—इति। 'सः' अग्निः विजयाय 'त्रिश्रेणिः' सोमयागपङ्क्तित्रययुक्तः, 'त्रानीकः' त्रिभिरनीकैः सेनापतिरूपैः सेनामुखैर्युक्तो ऽसुरान् प्रति युद्धम् 'उप' एत्य 'प्रायद्' तत्समीपं प्रकर्षेण गतवान्। त्रिश्रेणिरिति यदुक्तं, तत्र गायत्री-त्रिष्टुभ्-जगतीरूपाणि छन्दांस्येव तिस्रः श्रेणीरकुरुत। त्रानीक इति यदुक्तं, तत्र प्रातस्सवन-माध्यन्दिनसवन-तृतीयसवनान्येव त्रीण्यनीकानि सेनामुखान्यकुरुत। ततः 'तान्' असुरान् पुनः शत्रुशेषो यथा न सम्भाव्यते तथा 'परा भावयत्' पराभूतान् अकरोत्। ततो युद्धाद् देवा विजयिनो ऽभवन्, असुराः पराभूताः॥

वेदनं प्रशंसति—"भवत्यात्मना परास्य द्विषन् भ्राता भ्रातृव्यो भवति य एवं वेद"—इति॥

एवं अग्निः छन्दस्त्रय-सवनत्रययुक्तो ऽग्निष्टोमरूपो ऽभवदित्येकेन प्रकारेणाग्निष्टोमं स्तुत्वा पुनरपि प्रकारान्तरेण स्तौति—"सा वा एषा गायत्रीव यदग्निष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि"—इति। योऽयं पूर्वोक्तो ऽग्निष्टोमो ऽस्ति, 'सा वा एषा गायत्रीव' अग्निष्टोमगायत्र्योः सङ्ख्यासाम्यात्—गायत्रीगतेषु अक्षरेषु या सङ्ख्या, सैवाग्निष्टोमगतेषु स्तोत्रशस्त्रेषु। तथा,—बहिष्पवमानः, माध्यन्दिनपवमानः, आभरणपवमानः, इति त्रीणि पवमानस्तोत्राणि; चत्वार्याज्य-

स्तोत्राणि ; चत्वारि पृष्ठस्तोत्राणि ; एकं यज्ञायज्ञीयं स्तोत्रम् ; एव मेतानि द्वादश सम्पद्यन्ते । शस्त्राण्यपि तावन्त्येव,— आज्य-प्रउगे, निष्केवल्ये, मरुत्वतीये, वैश्वदेवाग्निमारुते इति होतुः शस्त्राणि षट् ; तथा मैत्रावरुणस्यापि * षट् । एवं स्तोत्रशस्त्र-सङ्ख्याग्निष्टोमस्य गायत्रीरूपत्वम् ॥

प्रकारान्तरेण गायत्रीसाम्यं सम्पाद्य स्तौति— "तद्वै यदिद-माहुः सुधायां ह वै वाजी सुहितो दधातीति, गायत्री वै तत्र ह वै गायत्रो क्षमा रमत, ऊर्ह्वा ह वा एषा यजमान मादाय स्वरे-तीत्यग्निष्टोमो वै तत्र ह वा अग्निष्टोमः क्षमा रमत, ऊर्ह्वो ह वा एष यजमान मादाय स्वरेति"-इति । 'तद्वै' तत्रैव यज्ञसभायां वेदवादिनो 'यदिदं' वचन माहुः । किं वचन मिति, तदुच्यते— सुष्ठु, धीयते सुक्षितिनो यस्यां दिवि, सा द्यौः 'सुधा' ; तस्या मेव 'वाजी' वाजोऽयं सोमरूपं तदभिन्नस्तोत्यग्निष्टोम उच्यते । स च 'सुहितः' साङ्गुष्ठेनानुष्ठितः 'दधाति' सुधाशब्दवाच्यायां दिवि यजमानं स्थापयति ; 'इति' यद्वेदवादिनां वचनं, तद् 'गायत्री वै' गायत्रीसाम्य मभिप्रेत्यैवोक्त मित्यर्थः । 'न ह वै' इत्यादिना तदेव स्पष्टीक्रियते । क्षमेति सप्तम्यर्थो विवक्षितः ; क्षमायां भूमौ गायत्र्याख्या देवता 'न ह वै रमते' नैव क्रीडति, किन्त्वेषा गायत्री 'ऊर्ह्वा ह वै' ऊर्ध्वगामिन्येव भूत्वानुष्ठितवन्तं यजमान मादाय 'स्वरेति' स्वर्गं प्रापयति । 'इति' एवम्प्रकारेण येयं गायत्री वर्णिता, 'तत्' गायत्रीरूपो ऽग्निष्टोम एव ; तयोः समत्वात् ।

---

* अर्धाभावो मैत्रावरुणादयः । तथाहि— "तदिमं मानुषꣳ होतारं प्रथमेते इडोता पैष पुरोधेतर्हि होता"-इति शत० ब्रा० १. ५. १. १३ ।

अग्निष्टोमोऽपि क्रमायां न रमते, किन्त्वनुष्ठित अहीनगामी सर्वेण यजमान मादाय स्वर्गं माप्नोति ॥

इत्थं गायत्रीसाम्येन स्तुत्वा संवत्सरसाम्येन स्तौति— "स वा एष संवत्सर एव यदग्निष्टोमश्चतुर्विंशत्यर्द्धमासो वै संवत्सरश्चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि"–इति। योऽय मग्निष्टोमः, स एष संवत्सर एव; अर्द्धमाससङ्ख्यायाः स्तोत्रशस्त्रसङ्ख्यायाश्च समानत्वात् ॥

समुद्रसाम्येन प्रशंसति— "तं यथा समुद्रं स्रोत्या एवं सर्वे यज्ञक्रतवोऽपि यन्ति"–इति। 'स्रोत्याः' प्रवाहरूपा नद्यो यथा लोके समुद्रं प्राप्नुवन्ति, तथैवोक्थ्यषोडश्यतिरात्राहीनसत्ररूपाः सर्वे क्रतवो विकृतिरूपाः प्रकृतिरूप मग्निष्टोमम् 'अपि यन्ति' प्राप्नुवन्ति। अग्निष्टोमात् प्राचीना दृष्टिपशुबन्धादयोऽपि त मग्निष्टोमं प्राप्नुवन्ति। तथा सति सर्वशब्दो मुख्यार्थः सम्पद्यते, न तु सङ्कोचः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
प्रथमः खण्डः ॥ १ (३८) ॥

॥ अथ द्वितीयः खण्डः ॥

दीक्षणीयेष्टिस्तायते ता मेवानु याः काश्चेष्टयस्ताः सर्वा अग्निष्टोम मपि यन्तीळा मुपह्वयत इळाविधा

वै पाकयज्ञा इळा मेवानु ये के च पाकयज्ञास्ते सर्वे ऽग्निष्टोम मपि यन्ति सायं प्रातरग्निहोत्रं जुह्वति सायं प्रातर्व्रतं प्र यच्छन्ति स्वाहाकारेणाग्निहोत्रं जुह्वति स्वाहाकारेण व्रतं प्रयच्छन्ति स्वाहाकार मेवान्वग्निहोत्र मग्निष्टोम मप्येति पञ्चदश प्रायणीये सामिधेनीरन्वाह पञ्चदश दर्शपूर्णमासयोः प्रायणीय मेवानु दर्शपूर्णमासावग्निष्टोम मपीतः सोमं राजानं क्रीणन्त्योषधो वै सोमो राजौषधिभिस्तं भिषज्यन्ति यं भिषज्यन्ति सोम मेव राजानं क्रीयमाण मनु यानि कानि च भेषजानि तानि सर्वाण्यग्निष्टोम मपि यन्त्यग्नि मातिथ्ये मन्थन्त्यग्निं चातुर्मास्येष्वातिथ्य मेवानु चातुर्मास्यान्यग्निष्टोम मपि यन्ति पयसा प्रवर्ग्यं चरन्ति पयसा दाक्षायणयज्ञे प्रवर्ग्य मेवानु दाक्षायणयज्ञोऽग्निष्टोम मपेति पशुरुपवसथे भवति त मेवानु ये के च पशुबन्धास्ते सर्वेऽग्निष्टोम मपि यन्त्योळादधो नाम यज्ञक्रतुस्तं दध्ना चरन्ति दध्ना दधिघर्मं दधिघर्मं मेवान्वेळादधो ऽग्निष्टोम मपेति ॥ २ (४०) ॥

अग्निष्टोमादर्वाचीनानां यज्ञाना मग्निष्टोमप्राप्तिं दर्शयति-- "दीक्षणीयेष्टि स्त्रायते, ता मेवानु याः काश्चेष्टयस्ताः सर्वा अग्नि-

ष्टोम मपि यन्ति"-इति । अग्निष्टोमस्य प्रारम्भे येयं दीक्षणीयेष्टिः 'तायते' विस्तार्यते, 'ता मनु' तत्सादृश्येन वेदोक्ताः सर्वा अपीष्टयः अग्निष्टोमं प्राप्नुवन्ति। अत्र विकृतिरूपा एवेष्टयो विवक्षिताः; प्रकृतिरूपयोर्दर्शपूर्णमासयोर्वक्ष्यमाणत्वात् ॥

दीक्षणीयेष्टिगतचोदकप्राप्तेडोपह्वानसादृश्येन पाकयज्ञाना मग्निष्टोमप्राप्तिं दर्शयति – "इळा मुपह्वयत, इळाविधा वै पाकयज्ञा, इळा मेवानु ये के च पाकयज्ञास्ते सर्वेऽग्निष्टोम मपि यन्ति"-इति। पाकयज्ञाश्च समस्संज्ञाकाः,—हुतः, प्रहुतः, आहुतः, शूलगवः, बलिहरणम्, प्रत्यवरोहणम्, अष्टकाहोम इति। सोऽयं सूत्रान्तरकारस्य पक्षः; आश्वलायनस्तु हुतादींस्त्रीनेव पाकयज्ञानाह *। ते च पाकयज्ञा 'इळाविधाः' इळासदृशाः; "इळा खलु वै पाकयज्ञः" इति (तै० सं० १. ७. ३. १.) श्रुत्यन्तरात्। ततो दीक्षणीयेष्टेः इडोपह्वानेन तत्सदृशाः पाकयज्ञाः सर्वेऽप्यग्निष्टोमं प्राप्नुवन्ति ॥

अग्निहोत्रस्य प्राप्तिं दर्शयति--"सायं प्रातरग्निहोत्रं जुह्वति, सायं प्रातर्व्रतं प्र यच्छन्ति, स्वाहाकारेणाग्निहोत्रं जुह्वति, स्वाहाकारेण व्रतं प्र यच्छन्ति स्वाहाकार मेवान्वग्निहोत्र मग्निष्टोम मप्येति"-इति। यथा प्रतिदिनं कालद्वयेऽग्निहोत्रहोमः, तथा दीक्षितस्य कालद्वये क्षीरपानरूपं व्रतदानम्। "अग्निर्ज्योति र्ज्योतिरग्निः स्वाहा"-इति यथा स्वाहाकारेणाग्निहोत्रहोमः, तथा "ते नः पान्तु, ते नो ऽवन्तु, तेभ्यो नमस्तेभ्यः स्वाहा"- इति

---

* "तयः पाकयज्ञाः,—हुता अहुता प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः"-इति आश्व० गृ० १. १। मनु० सं० २. ८६।

स्वाहाकारेण हौत्रितो व्रतप्रदान माचरति। अतो व्रतगतस्वाहाकार मेवानुसृत्याग्निहोत्रस्याग्निष्टोमप्राप्तिः ॥

अग्निष्टोमगतप्रायणीयेष्टिसाहश्येन दर्शपूर्णमासयोरग्निष्टोमप्राप्तिं दर्शयति— "पञ्चदश प्रायणीये सामिधेनीरन्वाह, पञ्चदश दर्शपूर्णमासयोः, प्रायणीय मेवानु दर्शपूर्णमासावग्निष्टोम मपीतः" -इति। प्रायणीयकर्मणि वाग्व्यापाररहितत्वात्सामिधेन्यश्चोदकप्राप्ताः पञ्चदशैव। तथा प्रकृतिभूतयोर्दर्शपूर्णमासयोरपि ॥

अग्निष्टोमगतसोमद्वारा लौकिकाना मपि सर्वेषा मोषधीना मग्निष्टोमप्राप्तिं दर्शयति— "सोमं राजानं क्रीणन्त्योषधो वै सोमो राजौषधिभिस्तं भिषज्यन्ति यं भिषज्यन्ति, सोम मेव राजानं क्रीयमाण मनु यानि कानि च भेषजानि, तानि सर्वाण्यग्निष्टोम मपि यन्ति"-इति। लोके 'यं' व्याधियस्तं चिकित्सकाः 'भिषज्यन्ति' चिकित्सन्ति, 'तं' पुरुषम् 'औषधिभिः' अमृतवल्लतादिभिश्चिकित्सन्ते। सोमस्याप्योषधत्वात्तमनु सर्व्वाण्यप्योषधान्यग्निष्टोमं प्राप्नुवन्ति ॥

अग्निष्टोमगतातिथ्यकर्मद्वारा चातुर्मास्ययागानां तत्प्राप्तिं दर्शयति— "अग्नि मातिथ्ये मन्थन्त्यग्निं चातुर्मास्येष्वातिथ्य मेवानु चातुर्मास्यान्यग्निष्टोम मपि यन्ति"-इति। आतिथ्याया मग्निमन्थनं विहितम्, चातुर्मास्यपर्वस्वपि मन्थनं विहितम्; उभयत्र मन्थनधर्मसाम्यादातिथ्यसदृशानि चातुर्मास्यान्यप्यग्निष्टोमं 'यन्ति' प्राप्नुवन्ति ॥

प्रवर्ग्यसाम्येन दाक्षायणयज्ञस्याग्निष्टोमप्राप्तिं दर्शयति—"पयसा प्रवर्ग्यं चरन्ति, पयसा दाक्षायणयज्ञे, प्रवर्ग्ये मेवानु दाक्षायणयज्ञोऽग्निष्टोम मप्येति"-इति। दर्शपूर्णमासयोरिव गुणविकृतिरूपः

कश्चिद्दाक्षायणाख्यो यज्ञः । तथा च शाखान्तरे दर्शपूर्णमास-सन्निधौ श्रूयते— "दाक्षायणयज्ञेन स्वर्गकामो यजेत"-इति *। तस्य च प्रवर्ग्यस्य च क्षीरद्रव्यसाम्येन प्रवर्ग्यसङ्गो दाक्षायण-यज्ञोऽप्यग्निष्टोम मेति ॥

पशुबन्धाना मग्निष्टोमप्राप्तिं दर्शयति—"पशुरुपवसथे भवति; त मेवानु ये के च पशुबन्धास्ते सर्वे ऽग्निष्टोम मपि यन्ति"-इति । सुत्यादिवसात् पूर्वो दिवस उपवसथाख्यः । तस्मिन्नग्नीषोमीयः पशुरनुष्ठीयते । तद्विकृतिरूपा वेदोक्ताः सर्वे पशुबन्धाः । पशु-द्रव्यसाम्यादग्नीषोमीयसङ्गाः सर्वे पशुबन्धा अप्यग्निष्टोमं यन्ति ॥

इळादधनामकस्य यज्ञान्तरस्याग्निष्टोमप्राप्तिं दर्शयति— "इळादधो नाम यज्ञक्रतुस्तं दध्ना चरन्ति ; दध्ना दधिघर्मे दधि-घर्म मेवाग्निळादधो ऽग्निष्टोम मप्येति"-इति । दर्शपूर्णमास-विकृतिरूप एव कश्चिदिळादधनामको यज्ञोऽस्ति । अतएवा-पस्तम्बो दर्शपूर्णमाससन्निधावेव माह— "एतेनेळादधः सार्वसेनि-यज्ञो वसिष्ठयज्ञः शौनकयज्ञश्च व्याख्याताः"-इति (आप० श्रौ० २. १७. १२.) †। "दधिघर्मनामकस्तु अग्निष्टोमगतः कश्चिद्

---

*, † दाक्षायणेन दृष्टो यज्ञो दाक्षायणयज्ञः । स च श्रुतपथप्राप्तेषु "आजिं वा एते यावन्ति, ये दर्शपूर्णमासाभ्यां यजन्ते"-इत्याद्यभिधाय (११. १. २. १०) तत्सन्निधावेव "दद्यु दाक्षायणयज्ञो स्यादथो अपि पञ्चदशैव वपाणि यजेत"-इत्यादाम्नात मिति दर्शपूर्ण-मासतो नान्यत्कर्मेति सिद्धान्तितं कार्तीयमूचे "गुणविधान वा सन्निधिसम्बन्धनाभ्याम्"-इति (श्रौ० ४. ४. २.) । "चिंयतं वपाणि दर्शपूर्णमासाभ्यां यजेत ; पञ्चदश दाक्षा-यणयज्ञो"-इत्यादि च पार्थक्यं द्रष्टव्यम् (काल्या० श्रौ० ४. २. ४७, ४८.) । दाक्षायण-यज्ञेन सुवर्गकामः"-इत्यारभ्य "सन्तिष्ठते दाक्षायणयज्ञः"-इत्यन्त आपस्तम्बीययज्ञस्यैव-मर्थकः (श्रौ० ६. १७. ४-११.) । इत उत्तर मेत तर्वोक्तम् "एतेनेळादधः सार्वसेनियज्ञो वसिष्ठयज्ञः शौनकयज्ञश्च व्याख्याताः"-इति (१२ सू०) ।

दधियाग ; तेन माध्यन्दिनं चरन्ति ; दृळादधोऽपि दरिद्रव्यकः । अतस्तयोरुभयोर्दधिद्रव्येण साम्यम् । दधिधर्मसदृश दृळादधोऽपि अग्निष्टोम मेति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
द्वितीयः खण्डः ॥ २ (४०) ॥

॥ अथ तृतीयः खण्डः ॥

इति नु पुरस्तादथोपरिष्टात् पञ्चदशोक्थ्यस्य स्तोत्राणि पञ्चदश शस्त्राणि स मासो मासधा संवत्सरो विहितः संवत्सरोऽग्निर्वैश्वानरोऽग्निरग्निष्टोमः संवत्सर मेवानूक्थ्योऽग्निष्टोम मपेत्यूक्थ्य मपि यन्त मनु वाजपेयोऽपेत्यत्यूक्थ्यो हि स भवति द्वादशरात्रेः पर्यायाः सर्वे पञ्चदशास्ते द्वौ द्वौ सम्पद्य त्रिंशदेकविंशं षोळशसाम चित्वत्सम्भिः सा त्रिंशत्मासस्त्रिंशन्मासस्य रात्रयो मासधा संवत्सरो विहितः संवत्सरोऽग्निर्वैश्वानरोऽग्निरग्निष्टोमः संवत्सर मेवान्वतिरात्रोऽग्निष्टोम मपेत्यतिरात्र मपि यन्त मन्वसोर्यामोऽपेत्यतिरात्रो हि स भवत्येतद्वै ये च पुर-

स्ताद्यो चोपरिष्टाद्यक्त्रक्रतवस्ते सर्वेऽग्निष्टोम मपि यन्ति तस्य संस्तुतस्य नवतिशतं स्तोचियाः सा या नवतिस्ते दश विवृतोऽथ या नवतिस्ते दशाथ या दश तासा मेका स्तोचियोदेति विवृत्परि शिष्यते सोऽसावेकविंशोऽध्याहितस्तपति विषुवान्वा एष स्तोमानां दश वा एतस्मादर्वाञ्चस्त्रिवृतो दश पराञ्चो मध्य एष एकविंश उभयतोऽध्याहितस्तपति तद्यासौ स्तोचियोदेति सैतस्मिन्नध्यूढ्हा स यजमानस्तद् दैवं चत्रं सहो बलं मश्नुते ह वै दैवं चत्रं सहो बलं मेतस्य ह सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद ॥ ३ (४१) ॥

क्रत्वन्तराणा मग्निष्टोमप्राप्तिं दर्शयति— "इति नु पुरस्तादशोपरिष्टात्, पञ्चदशोक्थ्यस्य स्तोत्राणि, पञ्चदश शस्त्राणि ; स मासो मासधा संवत्सरो विहितः ; संवत्सरोऽग्निर्वैश्वानरोऽग्निरग्निष्टोमः संवत्सर मेवानूक्थ्योऽग्निष्टोम मभ्येत्युक्थ मपि यन्त मनु वाजपेयो ऽभ्येत्युक्थ्यो हि स भवति"-इति । 'इति नु' पूर्व खण्डोक्तेनैव प्रकारेण 'पुरस्तात्' अग्निष्टोमात् प्राचीनस्य कर्मजातस्याग्निष्टोमप्रवेशः, उक्त इति शेषः । 'अथ' अनन्तर मुपरिष्टाद् अग्निष्टोमादितरेषां क्रतूनां * प्रवेश उच्यते । तत्र योऽयम् 'उक्थ्यः'

* ज्योतिष्टोमसंस्थाविशेषाणा मिति यावत् । तदाहापस्तम्बः— "उक्थ्याः षोडशिवाजपेयाग्निष्टोमस्य गुणविकाराः"-इति (यो० १२, १, १ ।

क्रतुः, तस्य पञ्चदशसङ्ख्याकानि स्तोत्राणि; अग्निष्टोमविकृति-त्वात्तदीयानि द्वादश स्तोत्राण्यतिदिश्यन्ते, तत्र जघन्यं त्रीणि उक्थ्यसञ्ज्ञकानि स्तोत्राणि च, एवं पञ्चदश सम्पद्यन्ते। अक्षैर-ध्वर्यं न्यायो योज्यः। तानि स्तोत्राणि अक्षाणि च मिलित्वा मासगतां रात्रिसङ्ख्यां प्राप्नुवन्ति। अतः सोऽयं स्तोत्रअक्षसमूहो मासः सम्पद्यते। 'मासधा' मासप्रकारेण मासाङ्क्या संवत्सरो 'विहितः' सम्पादितो भवति। स च संवत्सरो वैश्वानराग्निरूपः; गर्भे प्रविष्टस्य पुरुषस्य संवत्सरमात्रेण वैश्वानराख्यस्यौदर्याग्नेः पाटवसम्भवात्। अग्निश्चाग्निष्टोमस्वरूपः; पूर्वोक्तया रीत्या श्रेणि-त्रयरूपेणानीकत्रयरूपेण चाग्नेरेवाग्निष्टोमरूपेणाविर्भूतत्वात्। एवं सति स उक्थ्याख्यः क्रतुः स्तोत्रअक्षादिपरम्परया संवत्सर मेवानु प्रविश्य तद्वाराग्निष्टोमं प्रविशति। तं प्रविशन्त मुक्थ्य मनु वाजपेयाख्योऽपि क्रतुरग्निष्टोम मपि 'एति' प्राप्नोति। 'स हि वाजपेयोऽत्युक्थ्यो भवति; उक्थ्याख्यं क्रतु मतिक्रम्य वर्त्त-मानत्वात्। उक्थ्ये यानि पञ्चदश स्तोत्राणि, तत्र जघन्यं वाज-पेये स्तोत्रद्वयम्, सोऽय मुक्थ्यातिक्रमः। तस्मादुक्थ्यद्वारा वाज-पेयस्य तत्प्राप्तिः॥

अथातिरात्रास्तोर्यामयोः क्रत्वोरग्निष्टोमप्रवेशं दर्शयति— "द्वादशरात्रेः पर्यायाः सर्वे पञ्चदशास्ते द्वौ द्वौ सम्पद्य त्रिंशदेक-विंशं षोडशिनाम त्रिवृत्सन्धिः, सा त्रिंशत्क मासस्त्रिंशन्मासस्य रात्रयो मासधा संवत्सरो विहितः। संवत्सरोऽग्निर्वैश्वानरोऽग्नि-रग्निष्टोमः संवत्सर मेवान्वतिरात्रोऽग्निष्टोम मप्येत्यतिरात्र मपि यन्त मन्वस्तोर्यामो ऽप्येत्यतिरात्रो हि स भवति"—इति। अतिरात्र-यागे द्वादशसङ्ख्याका रात्रेः पर्यायाः। ते चापस्तम्बेनैवं अष्टी-

क्रताः— "अतिरात्रेत् षोड़शिचमसानुन्नयंस्त्रयोदश्यश्चमसगणेभ्यो* राजान मति रेचयति । षोडशिना प्रचर्य रात्रिपर्य्यायैः प्रचरति । होट्चमसमुख्यः प्रथमो गणो मैत्रावरुणचमसमुख्यो द्वितीयो ब्राह्मणाच्छंसिचमसमुख्यस्तृतीयोऽच्छावाकचमसमुख्यश्चतुर्थः ।०—०प्रथमाभ्यां गणाभ्यां मध्यर्युश्चरति, उत्तराभ्यां प्रतिप्रस्थाता, एष प्रथमः पर्य्यायः । एवं विहितौ द्वितीयतृतीयश्च"—इति (श्रौ० १४. ३. ८-१६.) । अस्याय मर्थः । अतिरात्रक्रतुं यदानुतिष्ठति, तदानीं चोदकप्राप्तं सर्वं मनुष्ठाय अनन्तरं सायं काले षोड़शिग्रहसम्बन्धिनश्चमसान् पूरयित्वा तत जर्ह्वां त्रयोदशचमसगणपर्य्याप्तं सोम मवस्थाप्य षोड़शिग्रहप्रचारं कृत्वा तत जर्ह्वां रात्रिपर्य्यायैः प्रचरेत् । तेषु पर्य्यायेषु च होट्चमस मादिं कृत्वा यश्चमसगणः प्रवर्त्तते, सोऽयं प्रथमः । मैत्रावरुणचमसस्यादित्वे द्वितीयश्चमसगणो भवति । ब्राह्मणाच्छंसिचमसस्यादित्वे तृतीयश्चमसगणो भवति । अच्छावाकचमसस्यादित्वे चतुर्थश्चमसगणो भवति । तेषु चतुर्षु गणेषु प्रथमद्वितीयाभ्यां गणाभ्यां मध्यर्युरनुतिष्ठेत्, तृतीयचतुर्थाभ्यां प्रतिप्रस्थातानुतिष्ठेत् । एवं गणचतुष्टयानुष्ठान मेकः पर्यायो भवति । पुनरपि द्वितीयतृतीयपर्य्यायौ तथैवानुष्ठेयौ । तेषु पर्य्यायेषु द्वादश गणाः सम्पद्यन्ते । एतत्सर्वं मभिप्रेत्य 'द्वादशरात्रेः पर्य्यायाः' इत्युक्तम् ।

'ते सर्वे' अपि प्रजाः 'पञ्चदशाः' तदीयस्तोत्रेषु तृचगतानां मृचां मावृत्तिविशेषेण पञ्चदशस्तोमस्य सामगैः सम्पादितत्वात्ते पञ्चदशस्तोमयुक्ता द्वादश पर्य्यायाः सन्ति । तेषु 'द्वौ द्वौ' पर्य्यायौ 'सम्पद्य' मिलित्वा पञ्चदशसङ्ख्याया विरावृत्त्या त्रिंशत्सङ्ख्यायां ते

* "षोड़शिचमस मुन्नयन् त्रयोदश्यश्चमसगणेभ्यो"—इति ग, घ ।

सर्वे पर्यवस्यन्ति। किञ्च षोडशिस्तोत्रे यत्सामास्ति, तदेकविंशं भवति; तदीयटचगतानां ऋचां माहात्म्यात् सामगैरेकविंशतिस्तोमसम्पादनात् (ता०ब्रा० २.१४-१७)। योऽयं मतिरात्रस्यान्ते 'सन्धिः' एतन्नामकं स्तोत्रम्, तत्र त्रिवृत् स्तोमः सामगैः पठ्यते *। तस्य च स्तोमस्य त्रिषु टचेष्वावृत्तिरहितेषु निष्पन्नत्वादृचां नवत्वं सम्पद्यते। एकविंशतिसङ्ख्या नवसङ्ख्या च मिलित्वा त्रिंशत्सङ्ख्या भवति। अनया त्रिंशत्सङ्ख्यया वा पूर्वोक्तत्रिंशत्सङ्ख्यया वा मासरात्रिमास्याभासः सम्पद्यते। मासधेत्यादि पूर्ववद्योजनीयम् (१९२पृ० ६पं०)। एवं सति संवत्सरद्वारातिरात्रो ऽग्निष्टोमं प्रविशति; प्रविष्टस्य मतिरात्रस्य तद्द्वारेणाप्तोर्यामोऽपि प्रविशति। स चातिरात्रो मतिरात्रस्य स्तोत्राधिक्येन वर्त्तमानत्वात् 'अत्यतिरात्रः'। एकोनविंशत् स्तोत्राण्यतिरात्रे, आप्तोर्यामे तु त्रयस्त्रिंशदित्याधिक्यम्; अतोऽतिरात्रद्वारा आप्तोर्यामस्याग्निष्टोमे प्रवेशः॥

उक्तं सर्वयज्ञक्रतुत्वन्तर्भाव मुपसंहरति— "एतद्वै ये च पुरस्ताद् ये चोपरिष्टाद्यज्ञक्रतवस्ते सर्वे ऽग्निष्टोम मपि यन्ति" इति। 'एतद्वै' एतेनैवोक्तप्रकारेणाग्निष्टोमस्य पूर्वभाविन इष्ट्यग्निहोत्रादयो ये यज्ञक्रतवः, ये चोत्तरभाविन उक्थ्यवाजपेयादयो यज्ञक्रतवः; ते सर्वे ऽग्निष्टोमं प्राप्नुवन्ति॥

अथ प्रकारान्तरेणाग्निष्टोमं प्रशंसति— "तस्य संस्तुतस्य नवतिशतं स्तोत्रियाः; सा या नवतिस्ते दश त्रिवृतो ऽथ या नवतिस्ते दशाथ या दश, तासा मेका स्तोत्रियोदेति, त्रिवृत्परि शिष्यते; सोऽसावेकविंशोऽध्याहितस्तपति, विपुवान्वा एष स्तोमानां दश वा एतस्मादर्वाञ्चस्त्रिवृतो दश पराञ्चो मध्य एष

* ता० ब्रा० ९.१.२०; ३.४; 'त्रिवृत्सन्धिः' २०.१.१।

एकविंश उभयतो ऽभ्याहितस्तपति ; तथासौ स्तोत्रियोदेति, सैतस्मिन्नध्यूळहा, स यजमानस्तद् दैवं क्षत्रं सहो बलम्"—इति । 'तस्य' अग्निष्टोमस्योक्तलक्षणैः संस्तुतस्य 'स्तोत्रियाः' स्तोत्रसम्बन्धिन्य ऋचो नवत्यधिकं शतं सम्पद्यते ॥

कथ मिति चेत्, तदुच्यते—"प्रातस्सवने बहिष्पवमानाख्य मेकं यत् स्तोत्रम्, तस्य त्रिवृत् स्तोमः क्रियते। त्रिवृत्त्वाद्वृत्तिरहितत्वाद्विद्यमानेषु त्रिषु वृचेषु विद्यमाना नवर्चः स्तोत्रिया भवन्ति। तत ऊर्ध्वं चत्वार्याज्यस्तोत्राणि। तेष्वेकैकस्मिन्विद्यमानानां तिसृणा मृचा मावृत्तिविशेषेण पञ्चदशः स्तोमः सम्पादनीयः। तथा सत्येकैकस्मिन् स्तोत्रे पञ्चदशर्च इत्येवं चतुर्षु स्तोत्रेषु मिलित्वा षष्टिः सम्पद्यते। तदेवं प्रातस्सवने एकोनसप्ततिः। माध्यन्दिनसवने माध्यन्दिनपवमानाख्य मेकं स्तोत्रम्, तस्यापि पञ्चदशस्तोमयुक्तत्वात् स्तोत्रियाः पञ्चदश सम्पद्यन्ते। चत्वारि पृष्ठस्तोत्राणि। तेषु सप्तदशस्तोमे कृते सत्यष्टषष्टिसङ्ख्याकाः स्तोत्रिया भवन्ति। उभयं मिलित्वा माध्यन्दिनसवने त्र्यशीतिः सम्पद्यते। तृतीयसवने आर्भवपवमानस्तोत्रस्य सप्तदशस्तोमोपेतत्वात् तस्मिन् सप्तदशर्चः। यज्ञायज्ञीयस्तोत्रस्यैकविंशस्तोमोपेतत्वात् तत्रैकविंशतिः। मिलित्वा तृतीयसवनेऽष्टाविंशत्। एवं सवनत्रये मिलित्वा नवत्यधिकशतसङ्ख्याकाः स्तोत्रिया भवन्ति ॥

तत्र या नवतिः, ते दशसङ्ख्याकास्त्रिवृत्-स्तोमाः सम्पद्यन्ते। एकैकस्मिन्दशके अन्तिमा मेकां परित्यज्य अवशिष्टानां नवसङ्ख्योपेतत्वात् त्रिवृत्स्तोमत्वम्। ततो नवसु दशकेषु नव त्रिवृत्-स्तोमाः। यास्तु तेषु दशकेषु * परित्यक्ता नवर्चः, ता एकस्मिन्त्रिवृत्-

* "नवकेषु" ग ।

स्तोमः। एवं दशसङ्ख्याकास्त्रिवृत्-स्तोमाः। 'अथ' अनन्तरं यज्ञस्य मध्ये, तस्मिन्नपि या नवतिरृचो पूर्वन्यायेन दश त्रिवृत्-स्तोमा गणनीयाः। अथ नवत्या ऊर्ध्वभाविन्यो 'याः' ऋचो दश, 'तासां' दशानां ऋचां मध्ये एका स्तोत्रिया 'उदेति' अतिरिच्यते। अवशिष्टासु स्तोत्रियासु त्रिवृत्-स्तोमः परिशिष्यते। एवं सत्येकविंशतिसङ्ख्याकास्त्रिवृत्-स्तोमाः, तेभ्योऽतिरिक्ता काचिदृगिति, एतावत्तात्पर्यम्। तत्रैकविंशतित्रिवृत्-स्तोमसङ्घो योऽस्ति, स सर्वोऽपि 'असौ' मण्डले दृश्यमानः, एकविंशतिसङ्ख्यापूरकः 'अध्याहितः' मण्डले स्थापितः आदित्यः 'तपति' प्रकाशते। आदित्यस्यैकविंशतिसङ्ख्यापूरकत्वं मन्त्रे श्रुतम्— "द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः"—इति (तै०सं०५.१.१०.४.)॥

यत्तु सत्रं गवामयनाख्यम्, तत्र यान्येकविंशत्यहानि, तत्साहश्यादपि यथोक्तत्रिवृत्स्तोमसम्बन्धः प्रशस्तः। कथं सादृश्यमिति, तदुच्यते— तस्मिन् सत्रे यन्मध्यमं महः, तद्विषुवन्नामकं दिवा-कीर्त्यं भवति। तस्य पुरस्ताद्दशाहानि, उपरिष्टाद्दशाहानि। एवं सत्रापि पूर्वोक्तरीत्या मध्यादितानां मेकविंशतिसङ्ख्याकानां त्रिवृत्स्तोमानां मध्यवर्त्ती यस्त्रिवृत् स्तोमः, स एव विषुवान् भवति। एतस्मात्तद्वदुपात्तत्रिवृत्स्तोमात् 'अर्वाञ्चः' पूर्वभाविनो दश त्रिवृत्स्तोमाः, 'पराञ्चः' उत्तरभाविनोऽपि दश त्रिवृत्स्तोमाः; उभयोर्दशकयोर्मध्ये एष एकविंशतिसङ्ख्यापूरकत्रिवृत्स्तोमः 'उभयतोऽध्याहितः' पार्श्वद्वये दशकव्याप्तः सन् 'तपति' आदित्यवत्प्रकाशते। 'तत्' तत्रैकविंशतित्रिवृत्स्तोमेभ्य ऊर्ध्वं 'यासौ' ऋगेका स्तोत्रिया 'उदेति' अतिरिक्ता भवति, सेयम् 'एतस्मिन्' एकविंशति-सङ्घे 'अधूढा' अधिकत्वेनावस्थापिता, 'स यजमानः' अतिरिक्तः

सौत्रियारूपो यजमानत्वेनावगन्तव्यः । किञ्च 'तत्' सौत्रिया-रूपं 'दैवं क्षत्रं' देवसम्बन्धिनी क्षत्रियजातिरिन्द्रवरुणादिरूपा । तत् क्षत्रं 'सहः' पराभिभवक्षमं 'बलं' सैन्यम् । एव मग्निष्टोमः सौत्रियद्वारा प्रशस्तः ॥

उक्तार्थवेदनं प्रशंसति— "अश्नुते ह वै दैवं क्षत्रं सहो बल मेतस्य ह सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद"—इति । उक्तार्थवेदिता पराभवसहिष्णुसैन्योपेता मिन्द्रादिदेवक्षत्रियजातिम् 'अश्नुते' प्राप्नोति । तत्र तेन क्षत्रेणेन्द्रादिना 'सायुज्यं' सहवासम्, 'सरूपतां' समानरूपत्वम्, 'सलोकताम्' एकलोकावस्थितिं च प्राप्नोति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
तृतीयः खण्डः ॥ २ (४१) ॥

॥ अथ चतुर्थः खण्डः ॥

देवा वा असुरैर्विजिग्यानाः ऊर्ध्वाः स्वर्गं लोक मायन्त्सोऽग्निर्दिविस्पृगूर्ध्व उदश्रयत स * स्वर्गस्य लोकस्य द्वार मवृणोदग्निर्वै स्वर्गस्य लोकस्याधिप-तिस्तं वसवः प्रथमा आगच्छंस्त एन मब्रुवन्नेति नोऽर्ज-

---

* 'सः'—इति क ।

स्याकाशं नः कुर्विति स नास्तुतो ऽतिस्तब्ध इत्यब्रवीत् स्तुत नु मेति तथेति तं ते त्रिवृता स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत ते यथालोक मगच्छंस्त रुद्रा आगच्छंस्त एन मब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतो ऽतिस्तब्ध इत्यब्रवीत् स्तुत नु मेति तथेति तं ते पञ्चदशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत ते यथालोक मगच्छंस्त मादित्या आगच्छंस्त एन मब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतो ऽतिस्तब्ध इत्यब्रवीत् स्तुत नु मेति तथेति तं ते सप्तदशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत ते यथालोक मगच्छंस्त विश्वेदेवा आगच्छंस्त एन मब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतो ऽतिस्तब्ध इत्यब्रवीत् स्तुत नु मेति तथेति तं त एकविंशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत ते यथालोक मगच्छन्नेकैकेन वै तं देवाः * स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत ते यथालोक मगच्छन्य हैन मेष एतैः सर्वैः † स्तोमैः स्तौति यो यजते यश्चैन मेवं वेदातो तु त मर्जाता अति ह वा एन मर्जत स्वर्गं लोक मभि य एवं वेद ॥ ४ (४२) ॥

---

*, † अतिरिक्तसर्वमलपुस्तकेषु निर्धिसर्गपाठः ।

अथ त्रिवृदादिस्तोमचतुष्टयद्वारेणाग्निष्टोमं स्तोतु माख्यायिका माह— "देवा वा असुरैर्विजिग्याना अर्हाः स्वर्गं लोकमायन्त्साऽग्निर्दिविस्पृगूर्ध्व उदश्रयत; स स्वर्गस्य लोकस्य द्वार मवृणोदग्निर्वै स्वर्गस्य लोकस्याधिपतिस्तं वसवः प्रथमा आगच्छंस्त एनं मन्वत यो ऽर्जस्याकाशं नः कुर्विति; स नास्तुतो ऽतिस्रक्ष्य इत्यब्रवीत् स्तुत मु मेति; तथेति; तं ते त्रिवृता स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत, ते यथालोक मगच्छन्"—इति। ये देवा अग्निसहिताः पूर्वं मनुष्यैः सह युद्धं कृत्वा 'विजिग्यानाः' विजयं प्राप्ताः, ते देवा अर्हणागमिनः सन्तः स्वर्गं लोकम् 'आयन्' प्राप्नुवन्। तदानीम् 'अग्निः' स्वस्थान एव स्थित्वा 'दिविस्पृक्' द्युलोकं स्पृशन् 'अर्ध्वः' उन्नतः सन् 'उदश्रयत' उपरितनं देश माश्रितवान्, द्युलोकपर्य्यन्तं स्वकीयां ज्वालां वर्द्धितवानित्यर्थः। ततः 'सः' अग्निः स्वर्गलोकद्वारम् 'अवृणोत्' तयाच्छादित मकरोत्। न चेतरेषु देवेषु स्थितेषु कथ मग्नेः ईदृक् माभर्थ्य मिति वाच्यम्; यस्माद् 'अग्निः स्वर्गस्य लोकस्य अधिपतिः'; अग्नौ हि अग्निष्टोमादिकर्माणि अनुष्ठाय स्वर्गं प्राप्नुवन्ति। 'तं' स्वर्गद्वारनिरोधिन मग्नि मष्टौ वसवः 'प्रथमाः' पुरोगामिनो भूत्वा 'आगच्छन्' प्राप्तवन्तः। प्राप्य च 'एनम्' अग्निम् 'ते' वसव एव मन्वत,— हे अग्ने! त्वं 'नः' अस्मान् 'अत्यर्जसि' स्वदीयां ज्वाला मतिलङ्घ्य 'अर्जयितुं' स्वर्गं प्रापयितु मर्हसि, 'नः' अस्माकं तदर्थम् 'आकाशं' त्वदीयज्वालोपशमनेनावकाशं कुर्विति। ततः 'सः' अग्निरेव मब्रवीत्,— युष्माभिरस्तुतोऽहं 'न अतिस्रक्ष्ये' द्वारावरोधं न परित्यक्ष्यामि। तस्मादवरोधपरित्यागाय 'तु' क्षिप्रं मेव 'मा' मां मग्निं 'स्तुत' स्तौत

कुरुतेति। 'ते' वसवः तथेत्यङ्गीकृत्य त्रिवृत्नामकेन स्तोमेनाग्निं अस्तुवन्।

तस्य च त्रिवृत्स्तोमस्तोत्रस्य विधायकं छन्दोगब्राह्मणं मेव माम्नायते— "तिसृभ्यो हिङ्करोति स प्रथमया, तिसृभ्यो हिङ्करोति स मध्यमया, तिसृभ्यो हिङ्करोति स उत्तमयोद्यतो त्रिवृतो विष्टुतिः"–इति (ता० ब्रा० २.१.१.)। अस्याय मर्थः। "उपाक्षे गायता नरः"–इति यः प्रथमः ऋचः, "दविद्युतत्या"–इति यो द्वितीयः ऋचः, "पवमानस्य ते कवे"–इति यः तृतीयः ऋचः, एतेषु त्रिषु ऋचात्मकेषु सूक्तेषु (उ० ब्रा० १.१.१–३.) विद्यमानानां नवानां ऋचां त्रिभिः पर्यायैर्गानं कर्त्तव्यम्। तत्र प्रथमे पर्याये त्रिषु सूक्तेषु आद्यास्तिस्र ऋचो गातव्याः, द्वितीये पर्याये मध्यमा ऋचो गातव्याः, उत्तमे पर्याये उत्तमा ऋचो गातव्याः। 'तिसृभ्यः'–इति तृतीयार्थे पञ्चमी। 'हिङ्करोति'–इत्यनेन गान मुपलक्ष्यते। सेयं यथोक्तप्रकारोपेता गीतिस्त्रिवृत्स्तोमस्याद्या 'विष्टुतिः' स्तुतिप्रकारविशेषः। तस्या विष्टुतेः 'उद्यतो'–इत्येवं नामधेय मिति। ईदृशस्तोमेन स्तुतोऽग्निः 'तान्' देवान् 'अत्यार्जत' निरुद्यं हार मतिलङ्घ्य स्वर्गमध्ये प्रापितवान्। 'ते' च वसवो देवाः 'यथालोकं' स्वोचितं 'लोकं' स्थानविशेष मतिक्रम्य तत्रागच्छन्॥

अथ पञ्चदशस्तोमेन स्तुतिं दर्शयति— "तं रुद्रा आगच्छं-स्त एन मब्रुवन्नेति नो ऽर्जस्याकाम्यं नः कुर्विति; स नास्तुतो ऽतिस्तस्थ इत्यब्रवीत् स्तुत नु मेति; तथेति; तं ते पञ्चदशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत, ते यथालोक मगच्छन्"–इति। पञ्चदशनामकस्य स्तोमस्य स्वरूपं छन्दोगैरेव माम्नायते— "पञ्चभ्यो

हिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः"–इति (ता० ब्रा० २.४.१.)। अस्याय मर्थः। ढचात्मक मेकं सूक्तं द्विरावर्त्तनीयम्। तत्र प्रथमाङ्गुली प्रथमायाः ऋचस्त्रिरभ्यासः, द्वितीयाङ्गुली मध्यमायाः, तृतीयाङ्गुलीपुरुषमायाः। सोऽयं पञ्चदशस्तोम इति। अन्यत् पूर्ववद् व्याख्येयम्॥

अथ सप्तदशेन स्तोमेन स्तुतिं दर्शयति—"त मादित्या आगच्छंस्त एन मब्रुवन्नति नोऽर्जस्याकाश्यं नः कुर्विति; स नासुतो ऽतिस्तस्थ इत्यब्रवीत् स्तुत नु मेति; तथेति; तं ते सप्तदशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत; ते यथालोक मगच्छन्"–इति। सप्तदशस्तोमस्य स्वरूपं छन्दोगैरेव मान्नायते—"पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः"–इति (ता० ब्रा० २. ७. १.)। अत्र प्रथमाङ्गुली प्रथमायास्त्रिरभ्यासः, द्वितीयाङ्गुली मध्यमायाः, तृतीयाङ्गुली मध्यमोत्तमयोः। सोऽयं सप्तदशस्तोम इति। अन्यत् पूर्ववद् व्याख्येयम्॥

एकविंशस्तोमेन स्तुतिं दर्शयति— "तं विश्वे देवा आगच्छंस्त एन मब्रुवन्नति नोऽर्जस्याकाश्यं नः कुर्विति; स नासुतो ऽतिस्तस्थ इत्यब्रवीत् स्तुत नु मेति; तथेति; तं त एकविंशेन स्तोमेनास्तुवंस्तान् स्तुतो ऽत्यार्जत, ते यथालोक मगच्छन्"–इति। एकविंशस्तोमस्य स्वरूपं छन्दोगैरेव मान्नायते— "सप्तभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः, सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स

तिसृभिः"-इति (ता० ब्रा० २.१४.१.)। प्रथमपर्य्याये हृच-स्तोमाया ऋचः सकृत्पाठः, द्वितीयपर्य्याये प्रथमायाः सकृत्पाठः, तृतीयपर्य्याये मध्यमायाः सकृत्पाठः, अवशिष्टानां तु त्रिरावृत्तिः। सोऽयं त्रिकविंशस्तोम इति। अन्यत् पूर्ववद् व्याख्येयम्॥

स्तोमचतुष्टय मुपसंहरति—"एकैकेन वै तं देवाः स्तोमे-नास्तुवंस्तान् स्तुतो ऽत्यार्जत; ते यथालोक मगच्छन्"-इति॥

अग्निष्टोमप्रयोगे उक्तानां चतुर्णां स्तोभानां विकल्पप्राप्ता-व्यावृत्त्यर्थं समुच्चयं विधत्ते—"अथ हैन मेष एतैः सर्वैः स्तोमैः स्तौति यो यजते"-इति। अर्थवादवैलक्षण्येन विधित्वं द्योत-यितुम् 'अथ'-शब्दः;—योऽग्निष्टोमेन यजते, स एतैश्चतुर्भिरपि स्तोमैः स्तुवीत॥

अनुष्ठातुः स्वर्गप्राप्तिफलस्य सिद्धत्वात् तेन सह समुच्चित्य वेदितुरपि तत् फलं दर्शयति—"यश्चैन मेवं वेदाती तु त मर्जाते"-इति। यजमानो येन प्रकारेण यजते, अनेनैव प्रकारेण 'एनम्' अग्निष्टोमं 'यश्च' वेदिता, 'तम्' अपि वेदितारं द्वारनिरोधन मतिलङ्घ्य 'मर्जाते' प्रापयत्येव। 'अती तु'-इति दीर्घश्छान्दसः॥

वेदनमात्रेणानुष्ठानसमानफलं दृढ़यितुं* पुनरप्याह—"अति ह वा एन मर्जाते स्वर्गं लोक मभि य एवं वेद"-इति। वेदन-मात्रेण सिद्धेऽपि फले "कर्मभूयस्त्वात् फलभूयस्त्वम्"-इतिन्याये-नानुष्ठानवैय्यर्थं नास्ति॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
चतुर्थः खण्डः॥ ४ (४२)॥

* "०समानफलत्वं प्रतिपादयितुं" ग।

॥ अथ पञ्चमः खण्डः ॥

स वा एषोऽग्निरेव यदग्निष्टोमस्तं यदस्तुवंस्तस्मादग्निस्तोमस्तं मग्निस्तोमं सन्तं मग्निष्टोम इत्याचक्षते* परोक्षेण परोक्षप्रिया इव हि देवास्तं यच्चतुष्टया देवाश्चतुर्भि†स्तोमैरस्तुवंस्तस्माच्चतु†स्तोम स्तंचतु†स्तोमं सन्तं चतुष्टोम इत्याचक्षते* परोक्षेण परोक्षप्रिया इव हि देवा अथ यदेन मूर्ध्वं सन्तं ज्योतिर्भूत मस्तुवंस्तस्माज्ज्योति†स्तोमस्तं ज्योति†स्तोमं सन्तं ज्योतिष्टोम इत्याचक्षते* परोक्षेण परोक्षप्रिया इव हि देवाः स वा एषोऽपूर्वोऽनपरो यच्चक्रतुर्यथा रथचक्रमनन्तमेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथोदयनं तदेषाभि यज्ञगाथा गीयते यदस्य पूर्वमपरं तदस्य यदस्यापरं तदस्य पूर्वम् अष्टेरिव सर्पणं शाकलस्य न वि जानन्ति यतरत्परस्तादिति यथा ह्येवास्य प्रायणमेव मुदयनमसदिति तदाहुर्यत् चिदत्प्रायणमेकविंशमुदयनं केन ते समे इति यो वा एकविंशस्त्रिवृदे सोऽयो यदुभौ ह्यौ ह्यचिनाविति ब्रूयात्तेनेति ॥ ५ (४३) ॥

---

* "मित्याचक्षते" क ।

† एषु स्थानेषु सविसर्गपाठः क पुस्तके ।

अथाग्निष्टोमादिशब्दं निर्वचनतः प्रशंसति— "स वा एषोऽग्निरेव यदग्निष्टोमस्तं यदस्तुवंस्तस्मादग्निस्तोमस्तं मग्निस्तोमं सन्तमग्निष्टोम इत्याचक्षते परोक्षेण ; परोक्षप्रिया इव हि देवाः"—इति। योऽयमग्निष्टोमोऽस्ति, स एष साक्षात् 'अग्निरेव' स्वशरीरमेव ; त्रिभिश्छन्दोभिस्त्रिभिः सवनैश्च विभज्य क्रतोर्निष्पादितत्वात्। 'तं' क्रतुरूपमग्निं 'यद्' यस्मात् कारणाद् देवा अस्तुवन्, 'तस्मात्' अग्निविषयस्तुतियुक्तत्वादयं क्रतुः 'अग्निस्तोमः'—इत्येतन्नामकः। तन्नामयुक्तं क्रतुं परोक्षनाम्ना व्याहर्तुं मकारतकारयोः षकारटकारावादिश्य 'अग्निष्टोमः'—इति वैदिका आचक्षते। वर्णान्तरेण व्यवहितत्वात् शीघ्रप्रतीतिरहितं नाम परोक्षमित्याचक्षते। यस्माल्लोके 'देवाः' पूज्या आचार्यादयः परोक्षनामप्रिया एव, तस्मात् क्रतोरपि तदुक्तम् ॥

नामान्तरस्य निर्वचनं दर्शयति— "तं यच्चतुष्टया देवाश्चतुर्भिस्तोमैरस्तुवंस्तस्माच्चतुस्तोमस्तं चतुस्तोमं सन्तं चतुष्टोम इत्याचक्षते परोक्षेण ; परोक्षप्रिया इव हि देवाः"—इति। 'चतुष्टयाः' चतुर्विधाः,—वसवो रुद्रा आदित्या विश्वेदेवाश्चेति। स्तोमाश्च त्रिवृत्पञ्चदश सप्तदश एकविंश इत्येवं चत्वारः। चतुष्टोमनामनिर्वचनं पूर्ववद्योजनीयम् ॥

ज्योतिष्टोमनामनिर्वचनं * दर्शयति— "अथ यदेनं मूर्ध्नं सन्तं ज्योतिर्भूत मस्तुवंस्तस्माज्ज्योतिस्तोमस्तं ज्योतिस्तोमं सन्तं ज्योतिष्टोम इत्याचक्षते परोक्षेण ; परोक्षप्रिया इव हि देवाः"—इति। 'अथ' नामद्वयकथनानन्तरं, तृतीयं नाम कथ्यत इति शेषः। अथ मन्निर्भूमिं मारभ्य द्युलोकपर्यन्तं मूर्ध्नावस्थितः,

* "नामान्तरनिर्वचनं" घ, च।

तथा प्रकाशमानत्वात् ज्योतिर्भूतः । तं तादृशं देवा असृजन्; 'तस्माद् ज्योतिस्तोमः' ज्योतिषः 'स्तोमः' स्तुतिः यस्मिन् क्रतौ, स क्रतुर्ज्योतिस्तोमः । अन्यत् पूर्ववत् ॥

नामनिर्वचनेन प्रशस्य पुनरप्याद्यन्तरहित्येन प्रशंसति— "स वा एषो ऽपूर्वो ऽनपरो यज्ञक्रतुर्यथा रथचक्र मनन्त मेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथोदयनम्"—इति । 'सः एषः' अग्निष्टोमः पूर्वापररहितः,—'पूर्वः' आदिः, 'अपरः' अन्तः, आद्यन्तरहितो यज्ञक्रतुः । यथा लोके 'रथचक्र मनन्तं' पुनः पुनः परिवर्त्तमानस्य रथचक्रस्य अय मादिरय मन्त इति विभागः कर्त्तुं न शक्यते, तस्मादिद मन्तरहितम् (आदिरहितस्याप्येतदुपलक्षणम्), एवं क्रतुरपि । नन् प्रायणीयेष्टिरादिः, उदयनीयेष्टिरन्त इति चेत्, नैवम् ;— योऽग्निष्टोमोऽस्ति, तस्य यादृशं प्रायणीयं कर्म, तादृश मेवोदयनीयं कर्म ; तयोर्यागधर्मसाम्यात् * । अतो विवेतु मशक्यत्वादाद्यन्तरहितः क्रतुः ॥

उक्त मर्थं मन्त्रोदाहरणेन दृढयति— "तदेषाभि यज्ञगाथा गीयते,—यदस्य पूर्वं मपरं तदस्य यदस्यापरं तदस्य पूर्वम्, अहेरिव सर्पणं शाकलस्य न वि जानन्ति यतरत्परस्तादिति"—इति । सर्वैरपि सुभाषितत्वेन गीयत इति 'गाथा' ; यज्ञविषया गाथा । 'तत्' तच्चिदग्निष्टोमस्याद्यन्तयोः प्रायणीयोदयनीययोरेकविधत्वेन† काचिदेषा 'यज्ञगाथा' 'अभि गीयते'‡ सर्वतः पठ्यते । यदस्येत्यादि गाथा । 'अस्य' अग्निष्टोमस्य यत् 'पूर्वम्' उपक्रमरूपं कर्मास्ति, तदेवास्य 'अपरं' समाप्तिरूपं कर्म ; 'यदु' यदेवास्य

* "तयोः समानधर्मकत्वात्" ग ।

† "०रेकविधये" ग । ‡ "अभिगीयते" ग ।

'अपरं' समाप्तिरूपम्, 'तद्' तदेवास्य 'पूर्वम्' उपक्रमरूपम्। आदित्यः प्रायणीयश्चरुरादित्य उदयनीयश्चेति द्रव्यदेवतयोरुभयत्रैकविधत्वात् तयोरेकत्वोपचारः। आद्यन्तयोरपरिज्ञाने पूर्वं ब्राह्मणे रथचक्रदृष्टान्तो दर्शितः; मन्त्रे त्वन्यो दृष्टान्त उच्यते। 'शाकल'-शब्दः सर्पविशेषवाची। शाकलनात्रः 'अहेः' सर्पविशेषस्य यथा 'सर्पणं' गमनम्, तथैवाय मग्निष्टोमः। स तु सर्पणकाले मुखेन पुच्छस्य दंशनं कृत्वा वलयाकारो भवति, तत्र किं मुखं किं वा पुच्छ मिति न ज्ञायते; एव मत्राप्यदितिदेवताकस्य चरोः साम्ये सति प्रायणीयोदयनीययोः 'यतरत्' कर्म 'परस्तात्' पश्चाद्भावि, यतरच्च पूर्वभावीति किं मपि न विजानन्ति॥

अस्या गाथायास्तात्पर्यं सङ्क्षिप्य दर्शयति—"यथा ह्येवास्य प्रायण मेव मुदयन मसदिति"-इति। 'अस्य' अग्निष्टोमस्य प्रायणं प्रारम्भो यादृशः, एवम् 'उदयनं' समाप्तिः 'असत्' अस्ति, भवतीत्यर्थः॥

अत्र कश्चिदाक्षेप मुद्भावयति—"तदाहुर्यत् त्रिवृत्प्रायण मेकविंश मुदयनं, केन ते समे इति?"-इति। पूर्वोदाहृतत्रिवृत् स्तोमः प्रातस्सवनादौ प्रयोज्यत्वात् 'प्रायणम्' उपक्रमरूपम्, एकविंशस्तोमस्तृतीयसवनाङ्गे प्रयोज्यत्वात् 'उदयनं' समाप्तिरूपम्। 'केन' कारणेन 'ते' प्रायणोदयने 'समे' भवेता मित्याक्षेपः॥

तत्र परिहारं दर्शयति—"यो वा एकविंशस्त्रिवृदेव सोऽथो यदुभौ वृचौ वृचिनाविति ब्रूयात्तेनेति"-इति। योऽयं मेकविंशस्तोमोऽस्ति, स एव त्रिवृदवगन्तव्यः; स्तोमत्वाकारेण तयोरेकविधत्वात्। 'अथो' अपि च 'यत्' यस्मात्कारणात् स्तोमद्वयात्मयभूतौ 'उभौ वृचौ', 'वृचिनौ' वृचित्वधर्मयुक्तौ। तत्र त्रिवृत्-स्तोमा-

अथस्य "उपाग्नये गायता नरः"-इतिसूक्तस्य (उ० आ० १.१.१.) तृचत्वधर्मः प्रसिद्ध एव, एकविंशस्तोमाश्रयस्य "यज्ञा यज्ञा वो अग्नये"-इतिसूक्तस्य (उ० आ० १.१.२०.) प्रगाथत्वाद् यद्यपि तस्मिन् द्वे एव ऋचावाज्यायेते, तथापि स्तोत्रकाले प्रगथनेन पादानामवश्यं तृचत्वं सम्पाद्यते; 'तेन' तृचत्वधर्मोपेतत्वकारणेन द्वयोः स्तोमयोरेकविधत्व मित्युत्तरं ब्रूयात् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
पञ्चमः खण्डः ॥ ५ (४३) ॥

॥ अथ षष्ठः खण्डः ॥

यो वा एष तपत्येषोऽग्निष्टोम एष साङ्गस्तं सहैवाङ्गा संस्थापयेयुः साङ्गो वै नाम तेनासन्त्वरमाणाश्चरेयुर्यथैव प्रातस्सवन एवं माध्यन्दिन एवं तृतीयसवन एव मु ह यजमानो ऽप्रमायुको भवति यत्र वा इदं पूर्वयोः सवनयोरसन्त्वरमाणाश्चरन्ति तस्मादेदं प्राच्यो ग्रामता बहुलाविष्टा अथ यत्रेदं तृतीयसवने सन्त्वरमाणाश्चरन्ति तस्मादेदं प्रत्यञ्चि दीर्घारण्यानि भवन्ति तथाह यजमानः प्रमायुको भवति तेनासन्त्वरमाणाश्चरेयुर्यथैव प्रातस्सवन एवं माध्यन्दिन एवं तृतीयसवन एव मु ह यजमानो

ऽप्रमायुको भवति स एत मेव शस्त्रेणानुपर्यावर्त्तेत यदा वा एष प्रातरुदेत्यथ मन्द्रं तपति तस्मान्मन्द्रया वाचा प्रातस्सवने शंसेदथ यदाभ्येत्यथ बलीयस्तपति तस्माद्बलीयस्या वाचा मध्यन्दिने शंसेदथ यदाभितरा मेत्यथ बलिष्ठतमं तपति तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेद्देवं शंसेद्यदि वाच ईश्वीत वाग्घि शस्त्रं यया तु वाचोत्तरोत्तरिण्यो-त्सहेत भमापनाय तया प्रतिपद्येतैतत्सुशस्ततम मिव भवति स वा एष न कदाचनास्त मेति नोदेति तं यदस्त मेतीति मन्यन्ते ऽह्न एव तदन्त मित्त्वाथात्मानं विपर्यस्यते रात्री मेवावस्तात्कुरुते ऽहः परस्तादथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्त मित्त्वाथात्मानं विपर्यस्यते ऽहरेवावस्तात्कुरुते रात्रीं परस्तात् स वा एष न कदाचन निम्रोचति न ह वै कदाचन निम्रोचत्येतस्य ह सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद य एवं वेद॥ ६ (४४) ॥

॥ इत्येतरेयब्राह्मणे तृतीयपञ्चिकायां चतुर्थोऽध्यायः ॥

पुनरादित्यसाम्येन प्रशंसति — "यो वा एष तपत्येषोऽग्निष्टोम एष साङ्गस्तं सर्वैराङ्गा संस्थापयेयुः ; साङ्गो वै नाम"-इति। य एव प्रसिद्धः 'एषः' अस्मदुत्थश्च आदित्यः तपति, 'एषो-

ऽग्निष्टोमः'; तयोरादित्याग्निष्टोमयोः सदृशत्वात् । कथं ज्ञायत इति, तदुच्यते— 'एषः' अग्निष्टोमः आदित्यवत् 'साङ्गः', यथा आदित्यो ऽङ्गैः सह वर्त्तते, तथा; 'तम्' अग्निष्टोमम् अपि एवं साङ्गं सहैव 'संस्थापयेयुः' समापयेयुः । तस्मादादित्यत्वेन 'साङ्गः'—इति क्रतोर्नाम सम्पन्नम् ॥

इदानीं अग्निष्टोमानुष्ठाने त्वरां निषेधति—"तेनासन्त्वरमाणा-श्चरेयुर्यथैव प्रातस्सवन एवं माध्यन्दिन एवं तृतीयसवन एव मु ह यजमानो ऽप्रमायुको भवति"—इति । यस्मादेवं सङ्गः साङ्गत्वेनानुष्ठानाय पर्य्याप्तम्, 'तेन' कारणेन सर्वे ऽत्विजः 'असन्त्वरमाणाः' त्वरां अकुर्वन्त उत्तरोत्तरानुष्ठेयं सम्यक् पर्य्या-लोचयन्तः 'चरेयुः' अनुतिष्ठेयुः । यथैव प्रातस्सवने मध्यरात्रादूर्ध्वं मारभ्य मध्याह्नात् पूर्वकालस्यानुष्ठानाय पर्य्याप्तत्वान्नास्ति त्वरा, एव मुत्तरयोरपि सवनयोः । 'एव मु ह' अनेनैव प्रकारेण अग्नी-रनुष्ठाने सति बुद्धिसमाधानेनाङ्गलोपाभावाद्यजमानः 'अप्रमायुकः' अपमृत्युरहितो भवति ॥ विपक्षे बाधं दर्शयति— "यद्व वा इदं पूर्वयोः सवनयोरसन्त्वरमाणाश्चरन्ति, तस्मादेतं प्राच्यो ग्रामता बहुलाविष्टा, अथ यदेतं तृतीयसवने सन्त्वरमाणाश्चरन्ति, तस्मादेतं प्रत्यञ्चि दीर्घारण्यानि भवन्ति; तथा ह यजमानः प्रमायुको भवति"—इति । 'यद्व वै' यदि प्रथमद्वितीययोः सवनयोः काल-सङ्कोचाभावात् असन्त्वरमाणाः 'इदं' कर्म्म 'चरन्ति' अनुतिष्ठेयुः, तदानीं 'तस्माद्व' तस्मादेवाङ्गलोपाभावात् कारणादिदं दृश्यते । किं मिद मिति, तदुच्यते— 'प्राच्यो ग्रामताः' पूर्वदिग्वर्त्तिनो ग्रामसमूहाः 'बहुलाविष्टाः' बहुभिर्जनैः सम्पूर्णा भवन्ति । 'अथ' तद्विपर्य्ययेण 'यद्व' यदि तृतीयसवने कालसङ्कोच सम्भवात् 'सन्त्वर-

माणाः' अतित्वरया युक्ताः 'इदं' कर्म 'चरन्ति' अनुतिष्ठन्ति, तदानीं तस्मादङ्गवैकल्यसम्भवादेवेदं लोके दृश्यते,— 'प्रत्यञ्चि' पश्चिमदिग्वर्त्तीनि 'दीर्घारण्यानि' जनशून्यानि भवन्ति। 'तथा ह' तादृशेन सम्भाविताङ्गवैकल्ययुक्तेनानुष्ठानेन यजमानः 'प्रमायुको भवति' अपमृत्युना म्रियत इत्यर्थः॥ विपक्षे बाधक मुक्त्वा स्वपक्षं निगमयति— "तेनासम्त्वरमाणाश्चरेयुर्यथैव प्रातस्सवन एवं माध्यन्दिन एवं तृतीयसवन एव मु ह यजमानो ऽप्रमायुको भवति"-इति॥

अथ त्रिषु सवनेषु शस्त्रस्योत्तरोत्तरं ध्वन्याधिक्यं विधत्ते— "स एत मेव शस्त्रेणानु पर्यावर्त्तेत ; यदा वा एष प्रातरुदेत्यथ मन्द्रं तपति, तस्मान्मन्द्रया वाचा प्रातस्सवने शंसेदथ यदाभ्येत्यथ बलीयस्तपति, तस्माद्बलीयस्या वाचा माध्यन्दिने शंसेदथ यदाभितरा मेत्यथ बलिष्ठतमं तपति ; तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेदेवं शंसेद्यदि वाच ईशीत ; वाग्घि शस्त्रं ; यया तु वाचोत्तरोत्तरिण्योत्सहेत समापनाय, तया प्रतिपद्येतैतत्सुशस्ततम मिव भवति"-इति। 'सः' होता 'एत मेव' आदित्य मनुसृत्य 'शस्त्रेण पर्य्यावर्त्तेत' यथायथादित्य उत्तरोत्तराधिक्येन तपति, तथातथोत्तरोत्तरध्वन्याधिक्येन होता शंसेत्। "यदा वै"-इत्यादिना तदेव स्पष्टीक्रियते। यस्मिन्नेव काले 'एषः' आदित्यः 'प्रातरुदेति' प्रातःकाल मभिव्यञ्जयितु मुदियात्, 'अथ' तदानीं 'मन्द्रम्' अल्पं यथा भवति तथा तपति ; तस्मादादित्य मनुवर्त्तमानो होता प्रातस्सवने 'मन्द्रया' स्वल्पध्वन्युपेतया वाचा शंसेत्। 'अथ' प्रातःकालादूर्द्धं सूर्य्यो 'यदाभ्येति' मध्याह्नकालं निष्पादयितु मभिमुख्येनोर्द्धं गच्छति, 'अथ' तदानीं सूर्य्यो 'बलीयः' प्रबलं यथा भवति तथा तपति ; तस्माद्धोतापि 'बलीयस्या' प्रबलध्वनियुक्तया

वाचा माध्यन्दिने सवने शंसेत् । 'अथ' मध्याह्नादूर्ध्वं यदा सूर्यः 'अभितरा मेति' पश्चिमाभिमुखानां पुरुषाणां मत्यन्त माभिमुखेन गच्छति, 'अथ' इदानीं मादित्यो 'बलिष्ठतमं तपति' मध्याह्नतापादपि अत्यन्तप्रबलस्तापो भवति ; भूमौ दिक्षु चोष्णत्वबाहुल्यात् । तस्मात्तदानीं होता माध्यन्दिनसवनध्वनेरप्यधिकध्वनियुक्तया वाचा तृतीयसवने शंसेत् । यद्ययं होता वाचः 'ईशीत' ईश्वरो भवेत्,— तस्य वाक् यदि श्लेष्मादिदोषेण ध्वनेर्मान्द्यं न प्राप्नुयात्, तदानीं येन ध्वनिना तृतीयसवने प्रारब्धः कृतः, 'एवं' तेनैव ध्वनिना शंसेत् । किमर्थं ध्वन्याधिक्य मिति, तदुच्यते— यस्माद् 'वागेव शस्त्रं' वाङ्निष्पाद्यत्वात् । तस्माद् 'यया तु' यादृशध्वनियुक्तयैव वाचा 'उत्तरोत्तरिण्या' उत्तरोत्तराभिवृद्धिभाजा 'समापनायोत्सहेत' समापयितु मुत्साहवान् भवेत्, 'तया' तथाविधध्वन्युपेतया वाचा शस्त्रं 'प्रतिपद्येत' प्रारभेत,— न तु आद्या नीचध्वनिर्भवेत् । तदेतदुत्तालक्षणोपेतं शस्त्रं 'सुशस्ततम मिव भवति' श्रुतिवैकल्यराहित्येनात्यन्त' शस्त मेव भवति ॥

ननु तृतीयसवने त्वरा मन्तरेण शनैः शंसेदिति पूर्वमुक्तम्, तथा सति कालस्याल्पत्वेन समापनात् प्रागेव सूर्योऽस्त मियात् ? इत्याशङ्क्य वस्तुतोऽस्तमयाभावान्नास्ति दोष इत्यभिप्रेत्याह— "स वा एष न कदाचनास्त मेति नोदेति"-इति । 'अस्तमयः' सूर्यस्वरूपनाशः, 'उदयः' सूर्योत्पत्तिः ; न हि सूर्यस्य कदाचिदपि स्वरूपनाशोत्पत्ती विद्येते ॥

कथं तर्हि जनानां सूर्यास्तमयव्यवहारः ? इत्याशङ्क्याह— "तं यदस्त मेतीति मन्यन्ते, अह्न एव तदन्त मित्त्वाथात्मानं विपर्यस्यते,—रात्री मेवावस्तात्कुरुते अहः परस्तात्"-इति । 'यत्' यदा

प्राणिनः सूर्योदयादूर्ध्वं यामचतुष्टयानन्तरं सूर्यो ऽस्त मेतीति 'तं' सूर्यं मस्तमितं मन्यन्ते, 'तत्' तदानीं सूर्यः तत्प्राणियुक्ते देशे प्रकाशरूपस्याऽऽत्मन एव * 'अन्त मित्त्वा' समाप्तिं प्राप्य 'अथ' अनन्तरं स्वात्मानं 'विपर्यस्यते' विपर्यस्तं करोति। कथं विपर्यास इति, तदुच्यते—'अवस्तात्' अतीते देशे रात्रि मेव कुरुते, 'परस्तात्' आगामिनि देशे ऽहः कुरुते। अय मर्थः। मेरोः प्रदक्षिणं कुर्वन्नादित्यो यद्देशवासिनां प्राणिनां दृष्टिपथ मागच्छति, तद्देशवासिभिरय मुदेतीति व्यवह्रियते; यद्देशवासिनां दृष्टिपथ मतिक्रम्य सूर्ये गते मति सूर्योऽस्त मेतीति तद्देशवासिभिर्व्यवह्रियते; अतस्तस्मिन् देशे रात्रिर्भवति, आदित्येन गन्तव्ये देशान्तरे तद्देशवासिभिः प्राणिभिः सूर्यस्य दृष्टत्वादहर्भवति। एवं च सति सूर्यस्य विनाशरूपोऽस्तमयः कदाचिदपि नास्तीति सिद्धम्॥

अनेनैव न्यायेन सूर्यस्य स्वरूपोत्पत्तिलक्षणोदयाभावं दर्शयति— "अथ यदेनं प्रातरुदेतीति मन्यन्ते, रात्रेरेव तदस्त मित्त्वाथात्मानं विपर्यस्यते; अहरेवावस्तात् कुरुते रात्रीं परस्तात्"—इति। पूर्ववद् व्याख्येयम्॥

परमार्थतो ऽस्तमयस्याभावं दर्शयति— "स वा एष न कदाचन निम्रोचति"—इति। निम्रोचन मस्तमयः। एतस्योपलक्षणत्वान्न कदाचिदुदेतीत्यपि द्रष्टव्यम्॥

वेदनं प्रशंसति— "न ह वै कदाचन निम्रोचत्येतस्य ह सायुज्यं सरूपतां सलोकता मश्नुते य एवं वेद य एवं वेद"—इति। वेदितुरस्तमयाभावो नामापमृत्युराहित्यम्; इह जन्मनि तादृशो भूत्वा पश्चादेतस्यादित्यस्य सहवास-समानरूपत्व-समानलोकत्वानि

* "प्रकाशयुक्तस्यात्म एव" ख, घ।

प्राप्नोति । न च सहवासेनैव समानलोकत्वं सिद्धयतीति वाच्यम् ; कदाचिदपि स्वेच्छया पृथगवस्थानेऽपि तल्लोकभ्रंशो नास्तीतिविवक्षया समानलोकत्व मुच्यते ॥ अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ६(४४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां चतुर्थाध्याये
षष्ठः खण्डः ॥ ६ (४४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुरुषार्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायाः चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ यज्ञो वै देवेभ्यो ऽन्नाद्य मुदक्रामत् ते देवा अब्रुवन् यज्ञो वै नो ऽन्नाद्य मुदक्रमीदन्विमं यज्ञ मन्न मन्विच्छामेति ते ऽब्रुवन् कथ मन्विच्छामेति ब्राह्मणेन च छन्दोभिश्चेत्यब्रुवंस्ते ब्राह्मणं छन्दोभि-रदीक्षयंस्तस्मान्तं यज्ञ मतन्वतापि पत्नीः समयाजयं-स्तस्माद्वाप्येतर्हि दीक्षणीयाया मिष्टावान्त मेव यज्ञं तन्वते ऽपि पत्नीः सं याजयन्ति त मनुन्याय मन्व-वायंस्ते प्रायणीय मतन्वत तं प्रायणीयेन नेदीयो ऽन्वागच्छंस्ते कर्मभिः समत्वरन्त तच्छंय्वन्त मकुर्व-स्तस्माद्वापेतर्हि प्रायणीयं शंयुक्त मेव भवति त मनुन्याय मन्ववायंस्त आतिथ्य मतन्वत त मातिथ्येन नेदीयो ऽन्वागच्छंस्ते कर्मभिः समत्वरन्त तदिळान्त मकुर्वंस्तस्माद्वाप्येतर्ह्यातिथ्य मिळान्त मेव भवति त मनुन्याय मन्ववायंस्त उपसदो ऽतन्वत त मुपसद्भिर्नेदीयो ऽन्वागच्छंस्ते कर्मभिः समत्वरन्त ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता अयजंस्त-

ऽग्नाग्नेयावुपसत्सु तिस्र एव सामिधेनीरनूच्य तिस्रो देवता यजन्ति त मनुन्याय मन्ववायंस्त उपवसथ मतनुत त मुपवसथ्येऽहन्याप्नुवंस्त माप्नुवन्तं यज्ञ मतन्वतापि पत्नीः समयाजयंस्तस्माद्ग्नाग्नेयावुपवसथ आन्त मेव यज्ञं तन्वते ऽपि पत्नीः सं याजयन्ति तस्मादेतेषु पूर्वेषु कर्मसु शनैस्तरां शनैस्तरा मिवानुब्रूयादनूत्सार मिव हि ते त मायंस्तस्मादुपवसथे यावत्या वाचा कामयीत तावत्यानुब्रूयादाग्नो हि स तर्हि भवतीति त माप्नुवंस्तिष्ठस्व नो ऽन्नाद्याये ति स नेत्यब्रवीत्कथं वस्तिष्ठेयेति तानीक्षतव त मब्रुवन् ब्राह्मणेन च नश्छन्दोभिश्च सयुग् भूत्वान्नाद्याय तिष्ठस्वेति तथेति तस्माद्ग्नाग्नेयावुपवसथे यज्ञः सयुग् भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन च छन्दोभिश्च ॥ १ (४५) ॥

अग्निष्टोमः सर्वयज्ञक्रतूनां योनित्वेनास्तूयत प्राक् परश्च ।
देवैः स्तोमैः संस्तुतो यजतुर्भिर्वाचां मन्द्रैर्मध्यमैरुत्तमैश्च ॥

अथेष्टिसंस्थादिकं वक्तव्यम्; तच्च दीक्षणीयेष्टेः संस्था माख्यायिकया दर्शयति— "यज्ञो वै देवेभ्यो ऽन्नाद्य मुदक्रामत्, ते देवा अब्रुवन्,—यज्ञो वै नोऽन्नाद्य मुदक्रमीदन्विमं यज्ञ मन्वि च्छामेति; ते ऽब्रुवन् कथ मन्विच्छामेति; ब्राह्मणेन च छन्दोभिश्चेत्य-

वुर्वंस्ते ब्राह्मणं छन्दोभिरदीक्षयंस्तस्यान्तं यज्ञ मतन्वतापि पत्नीः समयाजयंस्तस्माद्याप्येतर्हि दीक्षणीयाया मिष्टावान्त मेव यज्ञं तन्वते, ऽपि पत्नीः संयाजयन्ति ; त मनुन्याय मन्ववायन्"—इति। पुरा कदाचिद् 'यज्ञः' ज्योतिष्टोमाख्यः केनापि निमित्तेनापरक्तः सन् 'देवेभ्यः' सकाशात् 'उदक्रामत्' निष्क्रान्तवान्। तस्मिन्नुत्क्रान्ते तत्स्वरूपम् 'अन्वाध्यम्' अप्युदक्रामत्। ततो देवाः परस्पर मिद मब्रुवन्,—यदेतदुभय मस्मदीय मुदक्रामीत्, तदेतदुभयं सर्वत्र 'अन्विच्छाम' अन्वेषणं करवाम। तत्र कथ मन्वेषण मित्युपायं विचार्य्य, ऋत्विग्यजमानरूपं ब्राह्मणम्, गायत्र्यादिच्छन्दांसि च तदन्वेषणोपायत्वेन निश्चित्य, तैश्छन्दोभिः 'ब्राह्मणं' यजमानम् 'अदीक्षयन्' दीक्षणीयेष्ट्या संस्कृतवन्तः। 'तस्य' ब्राह्मणस्य 'यज्ञं' दीक्षणीयेष्टिरूपम् 'आन्तं' समाप्तियर्य्यन्तम् 'अतन्वत' विस्तारितवन्तः। तं यज्ञ मनुष्याय 'पत्नीः' तन्नामिका देवता अपि * 'समयाजयन्' पत्नीसंयाजानुष्ठान मपि ज्ञातवन्त इत्यर्थः। यस्मादेवं देवैः ज्ञातम्, तस्मादेव कारणादिदानी मपि दीक्षणीयाया मिष्टौ चोदकप्राप्तं यज्ञसमाप्तिपर्य्यन्त मनुतिष्ठन्ति। उत्तरकालीनाङ्गव्याहत्यर्थं पत्नीसंयाजयज्ञकम्। पत्नीसंयाजैरेव समाप्तिरित्यभिप्रेत्य 'आन्तम्†'—इत्युक्तम्। 'तं' देवैः ज्ञातम् 'अनुन्यायं' अनुक्रमगत मनुष्ठानम्, 'अनु' पश्चादनुष्ठाः अपि 'आयन्' अवगतवन्तः, अनुष्ठितवन्त इत्यर्थः। 'त मनुन्यायम्'—इति वाक्य मुत्तरशेषत्वेन वा योज्यम्॥

दीक्षणीयेष्टेः पत्नीसंयाजेषु समाप्तिं दर्शयित्वा प्रायणीयेष्टेः संस्तुवाके समाप्तिं दर्शयति—"ते प्रायणीय मतन्वत, तं प्रायणीयेन

* ऋग्० १२.७.१०,११। निरु० ५.६.११। † 'आ.अन्त'।

नैदीयोऽन्वागच्छंस्ते कर्मभिः समत्वरन्त, तच्छंयुन्त मकुर्वंस्तस्माद्याप्येतर्हि प्रायणीयं शंयुन्त मेव भवति, त मनुष्याय मन्ववायन्"—इति। 'ते' देवाः प्रायणीयाख्यं कर्मानुष्ठितवन्तः। 'प्रायणीयेन' कर्मणा 'तं' पूर्वोक्तं दीक्षणीयेष्टिरूपं ज्योतिष्टोमरूपं वा यज्ञं 'नेदीयः' अत्यन्तसमीपे यथा भवति तथैव 'अन्वगच्छन्' अनुष्ठितवन्तः। दीक्षणीयेष्टेरूर्ध्वं चिरं व्यवधानं मत्वा प्रायणीय मनुष्ठितवन्त इत्यर्थः। 'ते' देवाः 'कर्मभिः' प्रायणीयाङ्गरूपैः 'समत्वरन्त' सम्यक् त्वरां कृतवन्तः। दीक्षणीयेष्टिवत्पत्नीसंयाजपर्यन्तं नान्वतिष्ठन्, किन्तु त्वरां कृत्वा पत्नीसंयाजेभ्यः पूर्वं मेव शंयुवाकपर्यन्तं कृत्वोपरताः। तस्माद्येत्यादि पूर्ववत्॥

अथातिथ्येष्टेरन्तं दर्शयति—"त आतिथ्य मतन्वत; त मातिथ्येन नेदीयो ऽन्वागच्छंस्ते कर्मभिः समत्वरन्त; तदिळान्त मकुर्वंस्तस्माद्याप्येतर्ह्यातिथ्य मिळान्त मेव भवति, त मनुष्याय मन्ववायन्"-इति। अनुयाजेभ्यः पूर्वं यदिड़ोपह्वानं, तदन्त मेवातिथ्येष्टिरूपं कर्म कृत्वोपरताः। अन्यत् पूर्ववद् व्याख्येयम्॥

अथोपसत्सु अनुष्ठेयं दर्शयति—"त उपसदो ऽतन्वत; त मुपसद्भिर्नेदीयो ऽन्वागच्छंस्ते कर्मभिः समत्वरन्त; ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता अयजंस्तस्माद्याप्येतर्ह्युपसत्सु तिस्र एव सामिधेनीरनूच्य तिस्रो देवता यजन्ति, त मनुष्याय मन्ववायन्"—इति। तिस्रः सामिधेन्य आश्वलायनेन दर्शिताः—"उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानम्ताः सामिधेन्यः"—इति (श्री० ४. ८.५.)। अग्निः सोमो विष्णुश्चेत्येतास्तिस्रो देवताः। शिष्ट मन्यत्॥

अथाग्नीषोमीयपशावनुष्ठेयं दर्शयति—"त उपवसथ मतन्वत; त मुपवसथेऽहन्याप्रुवंस्त माप्नुवन्तं यज्ञ मतन्वतापि पत्नीः समया-

जयंस्तस्माद्याप्येतर्ह्युपवसथ आन्त मेव यज्ञं तन्वते ऽपि पत्नीः संयाजयन्ति"-इति। उपवसथशब्देन सोमयागसमीपवासित्वात् पूर्वस्मिन्नहनि अनुष्ठेयाग्नीषोमीयपशुर्विवक्षितः। 'ते' पशुं देवा 'उपवसथ्येऽहनि' सोमयागदिनात् पूर्वेद्युः 'प्राप्नुवन्' प्राप्तवन्तः 'यज्ञं' समाप्तिपर्यन्तं मन्त्रतिष्ठन्; पत्नीसंयाजानप्यन्वतिष्ठन्। दीक्षयेष्टित्वत्पत्नीसंयाजान्तत्व मेव द्रष्टव्यम्। स्पष्टं मन्यत्॥

उक्तास्विष्टिषु होतुरनुवचनस्य मन्द्रस्वरं विधत्ते—"तस्मादेतेषु पूर्वेषु कर्मसु अनैस्तरां अनैस्तरा मिवानुब्रूयात्"-इति। यस्मादग्नीषोमीयात् पूर्वभावित्वेन उपक्रमरूपा दीक्षणीयादयः, 'तस्मात्' 'एतेषु पूर्वेषु' दीक्षणीयादुपसदन्तेषु कर्मसु 'अनैस्तरा मिव' अत्यन्तनीचस्वरेणैव होतानुब्रूयात्॥

अग्नीषोमीये पशौ होतुरनुवचनध्वनेरिच्छानुसारित्वं विधत्ते —"अनूत्तार मिव हि ते त मायंस्तस्मादुपवसथे यावत्या वाचा कामयेत, तावत्यानुब्रूयादाप्तो हि स तर्हि भवतीति"-इति। 'अनूत्तारम् उत्तरोत्तरभावी सार उत्सारः, त मनुसृत्यानुसृत्येति तस्यार्थः। दीक्षणीयेष्टेः सारभूता प्रायणीयेष्टिः; तदपेक्षया सोमयागस्य समीपवर्त्तित्वात्। एव मातिथ्यादिषु द्रष्टव्यम्। ईदृश मनुसृतोत्तरसार मनुसृत्य 'ते' देवाः 'तं' सोमयागम् 'आयन्' प्राप्तवन्तः। तस्मादत्यन्तसारे 'उपवसथे' ऽग्नीषोमीये पशौ होता 'यावत्या' वाचा 'कामयेत' यावन्त मुच्चध्वनि मिच्छेत्, तावता ध्वनिनानुवचनं कुर्यात्। 'तर्हि' तस्मिन्नग्नीषोमीयपशुकाले 'सः' सोमयागः प्राप्तो भवतीति होतुरभिप्रायः। लोके ऽप्यभीष्टवस्तुनि बन्धौ वा चिरकालेन प्राप्ते सति हर्षद्योतनायोच्चध्वनिना वार्त्तां कुर्वन्ति, तद्वदत्रापि द्रष्टव्यम्॥

देवानां यज्ञप्रासुपाय मभिधाय अन्नाद्यप्रासुपायं दर्शयति—"त मान्नाब्रुवंस्तिष्ठस्व नो ऽन्नाद्यायेति ; स नेत्यब्रवीत्कथं वस्तिष्ठेयेति ; तानीक्षतैव ; त मब्रुवन्,—ब्राह्मणेन च नस्छन्दोभिश्च सयुग् भूत्वान्नाद्याय तिष्ठस्वेति ; तथेति ; तस्मादाप्येतर्हि यज्ञः सयुग् भूत्वा देवेभ्यो हव्यं वहति, ब्राह्मणेन च छन्दोभिश्च"–इति । 'ते' देवाः 'तं' ज्योतिष्टोमं यज्ञं प्राप्येद मब्रुवन्,—हे यज्ञ ! 'नः' अस्माकम् अन्नाद्यमिद्यर्थं 'तिष्ठस्व' स्थितिं कुर्विति । 'सः' यज्ञस्तद्वाक्यं निराकरोत्,—मम निषादकं साधन मन्तरेण 'वः' युष्मदर्थं कथं स्थितः स्या मिति स्वाभिप्राय मब्रवीत् । तेष्वनुग्रहद्योतनाय 'तान्' देवान् 'ईक्षतैव' पश्यन्नेवास्त, न तूपेक्षा मकरोत् । ततो देवा यज्ञस्याभिप्रायं ज्ञात्वा 'तं' देवास्तं यज्ञ मिद मब्रुवन्,—हे यज्ञ ! 'नः' अस्मदर्थं त्वत्साधनेन ऋत्विग्यजमानरूपेण ब्राह्मणेन तत्तन्मन्त्रगतैश्छन्दोभिश्च 'सयुग् भूत्वा' सहावस्थितो भूत्वा पश्चादन्नाद्याय 'तिष्ठस्व' अङ्गीकुर्विति । तथा यज्ञोऽप्यङ्गीचकार । यस्मादेवं तस्मादिदानी मपि यज्ञो ब्राह्मणमन्त्रसहितो भूत्वा देवेभ्योऽन्नाद्यरूपं हविर्वहति ॥ १ (४५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां पञ्चमाध्याये
प्रथमः खण्डः ॥ १ (४५) ॥

॥ अथ द्वितीयः खण्डः ॥

त्रीणि ह वै यज्ञे क्रियन्ते जघ्रं गोर्णं वान्तं तद्वै-तदेव जघ्रं यदा ऽऽशंसमान मार्त्विज्यं कारयत उत

वा मे दद्यादुत वा मा वृणीतेति तद्ध तत्पराङेव यथा जग्धं न हैव तद्यजमानं भुनक्त्याथ हैतदेव गौर्ण यद्भिभ्यदार्त्विज्यं कारयत उत वा मा न बाधेतोत वा मे न यज्ञवेशसं कुर्यादिति तद्ध तत्पराङेव यथा गौर्णं न हैव तद्यजमानं भुनक्त्याथ हैतदेव वान्तं यदभिशस्यमान आर्त्विज्यं कारयते यथा ह वा इदं वान्तान्मनुष्या बीभत्सन्त एवं तस्माद् देवास्तद्ध तत्पराङेव यथा वान्तं न हैव तद्यजमानं भुनक्ति स एतेषां त्रयाणां माशान्नेयात्तं यद्येतेषां त्रयाणां मेकं चिदकाम मभ्याभवेत्तस्यास्ति वामदेव्यस्य स्तोत्रे प्रायश्चित्तिरिदं वा इदं वामदेव्यं यजमानलोको ऽमृतलोकः स्वर्गो लोकस्तत् त्रिभिरक्षरैर्न्यूनं तस्य स्तोत्र उपसृप्य चेधात्मानं विगृह्णीयात्पुरुष इति स एतेषु लोकेष्वात्मानं दधात्यस्मिन् यजमानलोके ऽस्मिन्नमृतलोके ऽस्मिन्त्स्वर्गे लोके स सर्वान् दुरिष्टि मत्येत्यपि यदि समृद्धा इव ऋत्विजः स्युरिति ह स्माहाथ हैतज्जपेदेवेति ॥ २ (४६) ॥

दौक्षणीयादिष्वग्निषोमीयान्तेषु होतुर्ध्वनिविशेषं विधायान्ते ब्राह्मणेनर्त्विजा यज्ञनिष्पत्तिरित्युक्तम् ; तत्र वर्ज्यब्राह्मणविशेषं दर्शयितुं प्रस्तौति—"त्रीणि ह वै यज्ञे क्रियन्ते,— जग्धं गौर्णं

वान्तम्"–इति । 'जग्धं' भक्षितावशिष्टं भोजनपात्रे स्थितम् ; 'गीर्णम्' उदरे प्रविष्टम् ; 'वान्तं' सकृदुदरे प्रविश्य पुनर्निर्गतम् ; तान्येतानि 'त्रीणि' दुर्बुद्धिभिर्यज्ञे क्रियन्ते ; जग्धादिस्थानीयानि त्रीणि वर्ज्यानीत्यर्थः ॥

तत्र जग्धस्थानीयं दर्शयित्वा निषेधति—"तदेतदेव जग्धं,—यदा ऽऽशंसमान मार्त्विज्यं कारयत उत वा मे दद्यादुत वा मा वृणीतेति ; तद्ध तत्पराङ्ेव यथा जग्धं ; न ह्येव तद्यजमानं भुनक्ति"–इति । कश्चिद्ब्राह्मण आर्त्विज्यम् 'आशंसते' कामयते । केनाभिप्रायेणेति, तदुच्यते—आर्त्विज्यार्थं यज्ञशालां मयि गते सति यजमानो 'मे' मह्यम् 'उत वा दद्यात्' किञ्चिद्धनं वा प्रयच्छेत्, 'उत वा मा वृणीत' अथवा मां प्रयोगाभिज्ञं दृष्ट्वा त्व मार्त्विज्यं कुर्विति वृणीते 'इति' एवं धनार्जनलम्पटः सन् अनुष्ठानतात्पर्यरहितो निरन्तर मार्त्विज्यं कामयते, तादृशं कामयमानं पुरुषं यजमान आर्त्विज्यं कारयत इति यदस्ति,तदेव 'जग्धम्',—यथा लोके 'जग्धं' पात्रस्थितं भक्षितावशिष्ट मुच्छिष्टत्वादितरैरस्पृश्यम, तथा । 'तत्' तस्मिन्नेव यागे 'तत्' धनलम्पट स्यार्त्विज्यं 'पराङ् एवं निकृष्ट मेव ; 'तत्' तादृश मार्त्विज्यं यजमानं 'न भुनक्ति' न पालयति, यज्ञो विकलो भवतीत्यर्थः ॥

गीर्णं मुदाहृत्य निषेधति—"अथ ह्येतदेव गीर्णं,—यद्भिय-दार्त्विज्यं कारयत उत वा मा न बाधेतोत वा मे न यज्ञवेशसं कुर्यादिति; तद्ध तत्पराङ्ेव यथा गीर्णं; न ह्येव तद्यजमानं भुनक्ति"–इति । यजमानो यस्मिन् यागे यजते, तत्र कश्चिद् ब्राह्मणो 'ग्रामणीः' प्रभुर्भूत्वा प्रयोगकौशलरहितो ऽवतिष्ठते, त मार्त्विज्ये वर्जयितु मयं यजमानो बिभेति । केनाभिप्रायेणेति, तदुच्यते—अय मत्र प्रभुर्मयि द्वेषं कृत्वा कालान्तरे मां बाधेत'; अथवेदानीं

मेव 'यज्ञवेशसं' यज्ञविघातं कुर्य्यात्। तदुभयं मा भूदित्यनेनाभिप्रायेण तस्माद्वोतिं प्राप्नुवन्नार्त्विज्यं तेन प्रभुणा कारयत इति यदस्ति, तदेतद् 'गोर्णम्',—यथा लोके 'गोर्णम' उदरस्थं पुनर्भोगयोग्यं न भवति, तथा। 'तद्' तस्मिन् यागे तद्गौर्णं भौतिमात्रप्रयुक्तं मार्त्विज्यम्. 'पराङ्देव' निकृष्टं मेव। 'तत्' तादृशं प्रयोगकौशलरहितेन प्रभुणा कृतं मार्त्विज्यं यजमानं न पालयति॥

वान्तं दर्शयित्वा निषेधति—"अथ हैतदेव वान्तं,—यदभिशस्यमानं मार्त्विज्यं कारयते; यथा ह वा इदं वान्ताञ्जुघ्वा बीभत्सन्त, एवं तस्माद् देवास्तद्व तत्पराङ्देव यथा वान्तं, न हैव तद्यजमानं भुनक्ति"—इति। यः कश्चित् पुरुषः प्रयोगकुशलोऽपि केनचित् पातित्यापवादेन सर्वैर्निन्द्यते, तादृशम् 'अभिशस्यमानं' यजमानं स्वकीयबन्धुत्वादिदाक्षिण्याभिमानेनापवादपरिहाराय मार्त्विज्यं कारयते इति यदस्ति, तदेतद् 'वान्तम्'। तत्रेदं निदर्शनं मुच्यते,—यथा लोके मनुष्याः 'वान्ताद् बीभत्सेयुः' वान्तं दृष्ट्वा कश्मल मेतदिति निष्ठीवनं कुर्युः, एवं देवाः 'तस्माद्' अभिशस्यमानकृतादार्त्विज्याच्चैवं बीभत्सन्ते। ततो यथा लोके वान्त मिति निकृष्टम्, तथा तस्मिन् यज्ञे तदार्त्विज्यं निकृष्टम्। तच्च यजमानं सर्व्वथा न पालयति॥

वर्ज्यत्वेनोक्तं त्रिविध मुपसंहरति—"स एतेषां त्रयाणा मार्त्विज्यं नेयात्"—इति। 'सः' यजमानः 'एतेषां' पूर्वोक्तानां धनलम्भाद्यर्थत्वेनाभिशस्तानां त्रयाणा मार्त्विज्यार्थं मनस्यपेक्षा मपि न कुर्य्यात्॥

अथ प्रमादकृतस्य प्रायश्चित्तं दर्शयति—"तं यद्येतेषां त्रयाणा मेकं विदकाम मभ्याभवेत्तस्यास्ति वामदेव्यस्य स्तोत्रे प्रायश्चित्तिः"

–इति । यदि कदाचित् 'एतेषां' धनलम्भटादीनां त्रयाणां मध्ये वर्त्तमानं तं पुरुषम् 'एकश्चित्' एक मपि 'अकामम्' अबुद्धिपूर्वम् 'अभ्याभवेत्' अभिलक्ष्यात्विज्यं भवेत्, तदानीं 'तस्य' वैकल्यस्य प्रायश्चित्तिरस्ति । कुत्रास्तीति, तदुच्यते—'वामदेव्यस्य स्तोत्रे' वामदेवमहर्षिणा दृष्टं साम वामदेव्यम्*, "कया नश्चित्र आ भुवत्" –इत्येतस्या मृच्युत्पन्नम् †। तच्च साम तृचे गायन्त उद्गातारः पृष्ठस्तोत्रमनुतिष्ठन्ति ‡। तत्र कश्चित्प्रयोगविशेषः प्रायश्चित्तिः ॥

उक्तं साम प्रशंसति—"इदं वा इदं वामदेव्यं, यजमानलोको ऽमृतलोकः स्वर्गो लोकः"–इति। यजमानस्य लोको 'पृथिवी', 'अमृतलोकः' मुक्तिपदम्, 'स्वर्गः' देवलोकः। 'इदं वै' उक्तलोकत्रय मिदं सर्वमपीदं 'वामदेव्यं' "कया नश्चित्रः"–इत्यस्या मृच्युत्पन्नं मिदं साम्नगानां प्रसिद्धं वामदेव्याख्यं साम (गे० गा० ५. १. २५.) ॥

तस्मिन् साम्नि कर्त्तव्यं प्रायश्चित्तप्रकारं दर्शयति—"तत् त्रिभिरक्षरैर्न्यूनं; तस्य स्तोत्र उपसृप्य त्रेधामानं विगृह्णीयात् पुरुष इति"–इति। 'तद्' वामदेव्यं साम 'त्रिभिरक्षरैर्न्यूनम्',—"कया नश्चित्रः"–इत्यादिकस्तृचो गायत्रीच्छन्दस्कः; तस्य च छन्दसः त्रिषु पादेषु प्रत्येक मष्टावक्षराणि अपेक्षितानि; "अभी षु णः"–इत्येतस्या मृचि यस्मात् प्रतिपादं समैवाक्षराणि, अतस्त्रिभिरक्षरैर्न्यूनत्वम्। 'तस्य' वामदेव्यसाम्नः सम्बन्धिनि स्तोत्रे 'उपसृप्य'

---

* "वामदेवाड्यड्यौ"–इति पा० ४. २. ९।

† ऋ० भा० २. २. ३. ५; गे० गा० ५. १. २५।

‡ उ० भा० १. १. १२. १–२; ऋ० गा० १. १. ५। "यो वै सवस्य सदेद सद्यवति वामदेव्यं वै साम्नां सद्"—इत्यादीनि च तद्ब्राह्मणवचनानि। ता० ब्रा० ४. ८. १०।

समीपं प्रक्रम्य 'आत्मानं' स्ववाचकं 'पुरुषः'-इतिशब्दं 'त्रेधा विष्टृ-ह्येत्' प्रत्यक्षरं विभज्य एकैकस्मिन् पादे प्रक्षिपेत्। तद्यथा— "अभी षु णः सखीनां पु, अविता जरितॄणां कु, शतभवास्तिभिः षः"-इति प्रक्षिप्य गायेत् (उ०आ०१.१.१२.१.) ॥

उक्तप्रकारेणार्त्विज्ये वैकल्यपरिहारं दर्शयति— "स एतेषु लोकेष्वात्मानं दधात्यस्मिन् यजमानलोके ऽस्मिन्नमृतलोके ऽस्मिन् स्वर्गे लोके स सर्वां दुरिष्टिं मत्येति"-इति। 'सः' कृतप्रायश्चित्तो यजमानः 'एतेषु' लोकेष्वात्मानं स्थापयति। त एव तु लोका अस्मिन्नित्यादिना स्पष्टोक्रियन्ते। 'सः' यजमानः सर्वां दुरिष्टिं दोषोपेतं यज्ञम् 'अत्येति' अतिक्रामति ॥

एवं नैमित्तिक मक्षरत्रयप्रक्षेपं विधाय नित्यप्रयोगेऽपि तं विधत्ते — "अपि यदि समृद्धा इव ऋत्विजः स्युरिति ह स्माहाथ हैतज्जपेदेवेति"-इति। होत्रादयः 'ऋत्विजः' यद्यपि 'समृद्धा इव' धनलाभ्यत्वादिपूर्वोक्तवैकल्यरहिता एव स्युः, तथापि 'एतत्' पुरुष इत्यक्षरत्रयं स्तोत्रे जपेदेवेत्यैतरेयो मुनिराह स्म ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां पञ्चमाध्याये
द्वितीयः खण्डः ॥ २ (४६) ॥

॥ अथ तृतीयः खण्डः ॥

छन्दांसि वै देवेभ्यो ह्व्य मूढ्वा श्रान्तानि जघनार्धे यज्ञस्य तिष्ठन्ति यथाश्वो वाग्वतरो वोढ्वां-

* "गाय" ब।

स्तिष्ठेदेवं तभ्य एतं मैत्रावरुणं पशुपुरोळाशं मनु देविका हवींषि निर्वपेद् धात्रे पुरोळाशं द्वादशकपालं यो धाता स वषट्कारो ऽनुभत्यै चरुं यानुमतिः सा गायत्री राकायै चरुं या राका सा त्रिष्टुप् सिनीवाल्यै चरुं या सिनीवाली सा जगती कुह्वै चरुं या कुहूः सानुष्टुबेतानि वाव सर्वाणि छन्दांसि* गायत्रं त्रैष्टुभं जागत मानुष्टुभं मन्वन्यान्येतानि हि यज्ञे प्रतमा मिव क्रियन्त एतैर्ह वा अस्य छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद तद्वै यदिद माहुः सुधायां ह वै वाजी सुहितो दधातीति छन्दांसि वै तत्सुधायां ह वा एनं छन्दांसि दधत्यननुध्यायिनं लोकं जयति य एवं वेद तदेक आहुर्धातार मेव सर्वासां पुरस्तात्पुरस्तादाज्येन परि यजेत्तदासु सर्वासु मिथुनं दधातीति तदु वा आहुर्जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्या मृग्भ्यां समानेऽहन्यजतीति यदि ह वा अपि बह्वा इव जायाः पतिर्वाव तासां मिथुनं तद्यदासां धातारं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधातीति नु देविकानाम् ॥ ३ (४७) ॥

* "छन्दांसि" ग, घ। एव मन्यच च।

पूर्वत्र यज्ञो ब्राह्मणेन छन्दोभिश्च सयुग् भूत्वा हव्यं वहतीत्युक्तम्; तत्र ब्राह्मणप्रयुक्तो वक्तव्यविशेषोऽभिहितः; अथ छन्दःप्रयुक्तं विशेष आह— "छन्दांसि वै देवेभ्यो हव्यं मूढ्वा श्रान्तानि जघनार्द्धे यज्ञस्य तिष्ठन्ति, यथाश्वो वाऽश्वतरो वोद्विवांस्तिष्ठेदेवं; तेभ्य एतं मैत्रावरुणं पशुपुरोळाशं मनु देविका हवींषि निर्वपेत्"—इति। गायत्र्यादीनि छन्दांसि देवेभ्यो 'हव्यं मूढ्वा' हव्यवहनं कृत्वा श्रमं प्राप्य यज्ञस्य 'जघनार्द्धे' पश्चिमभागे क्वचित्तूष्णीं तिष्ठन्ति। यथा लोके कश्चिदश्वो वा, गर्दभाश्वसाङ्कर्य्येण जातः 'अश्वतरः' वा 'उद्विवान्' भारवहनं कृतवान् (सन्*) दूरदेशे वहनेन श्रान्तस्तिष्ठेत्, एव मेतानि छन्दांस्यपि; 'तेभ्यः' श्रान्तेभ्यः श्रमपरिहारार्थं हवींषि निर्वपेत्†। 'देविकाः'—इति तेषां हविर्विशेषाणां नाम। कस्मिन् काले निर्वप इति, तदुच्यते— यज्ञस्यावसाने योऽयं 'पशुः' अनूबन्ध्याख्यः, तस्य पशोः सम्बन्धी मित्रावरुणदेवताको यः पुरोडाशः, तम् 'अनु' तस्मिन्ननुष्ठिते पश्चान्निर्वपेत्॥

तत्र प्रथमं हविर्विधत्ते— "धात्रे पुरोळाशं द्वादशकपालं, यो धाता स वषट्कारः"—इति। धात्रनाम्ने देवाय द्वादशसु कपालेषु संस्कृतं 'पुरोळाशं' निर्वपेत्। योऽयं धात्रनामको देवः, स वषट्कारस्वरूपः; तेन पुरोळाशेन वषट्कारदेवतायाः श्रमोऽपगच्छति॥

द्वितीयं हविर्विधत्ते— "अनुमत्यै चरुं, यानुमतिः सा गायत्री"—इति। "कलाहीने सानुमतिः पूर्णे राका निशाकरे"

* नास्त्येतत् पदं ग-पुस्तके।

† "पशुपुरोडाशं मनूबन्ध्यस्य देविका हवींषि निर्वपति यज्ञमेवाशि"—इति काण्वा० श्रौ० १८ । २०।

-इति (अम० १.४.८) अभिधानाच्चतुर्दश्यामिन्द्रा पूर्णिमा 'अनुमति'-शब्दवाच्या *। तदभिमानिन्या देवतायाः अपि तदेव नाम † तस्माच्चानुमतेर्गायत्रीरूपत्वात्तदीयः अमोऽपगच्छति ॥

तृतीयं हविर्विधत्ते-- "राकायै चरुं, या राका सा त्रिष्टुप्"-इति। पूर्ववद् व्याख्येयम् ॥

चतुर्थपक्षमे हविषी विधत्ते-- "सिनीवाल्यै चरुं, या सिनीवाली सा जगती; कुह्वै चरुं, या कुहूः सानुष्टुप्"-इति। "सा दृष्टेन्दुः सिनीवाली, सा नष्टेन्दुकला कुहूः"-इति (अम० १.४.९) अमावास्याद्वैविध्यमभिहितम् ‡। तदभिमानिदेवतायास्तदेव नामेति पूर्ववद्योजनीयम् ॥

इतरेषां छन्दसां कथं अमपरिहार इत्याशङ्क्य सर्वेषां मन्त्रेषां भूम्नाच्छन्दोऽनुवर्त्तित्वात्तावतैव भ्रान्तिपरिहार इत्यभिप्रेत्याह--- "एतानि वाव सर्वाणि च्छन्दांसि,---गायत्री त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येतानि हि यज्ञे प्रतिमा मिव क्रियन्ते"-इति। 'एतानि' एव गायत्र्यादीनि चत्वारि सर्वच्छन्दोरूपाणि, 'अन्यानि' ऋषिगादीनि गायत्र्यादिकं अनुसृत्यैव वर्त्तन्ते। यस्मादेतानि चत्वारि यज्ञप्रयोगे 'प्रतिमा मिव' प्राबल्यातिशयेनैव 'क्रियन्ते' प्रयुज्यन्ते, तस्मादेतदनुसारित्व मितरेषां युक्तम् ॥

---

* "अनुमती राकेति देवपत्न्याविति नैरुक्ताः; पौर्णमास्याविति याज्ञिकाः। या पूर्वा पौर्णमासी सानुमतियोत्तरा सा राकेति विज्ञायते"-इत्यादि निरु० ११. ३. ८। इह श्रीपरिष्टात् ७. २. १०।

† "सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ताः; अमावास्ये इति याज्ञिकाः। या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते"-इत्यादि निरु० ११. ३. १०। इह श्रीपरिष्टात् ७. २. १०।

उक्तार्थवेदनपूर्वक मनुष्ठानं प्रशंसति— "एतैर्ह वा अस्य च्छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्ट भवति य एवं वेद"—इति। 'एतैः' गायत्र्यादिभिः 'सर्वैः' उष्णिगादिभिः ॥

विहितप्रसिद्धा छन्दांसि प्रशंसति— "तद्ध यदिद माहुः,—सुधायां ह वै वाजी सुहितो दधातीति *; छन्दांसि वै तत्सुधायां ह वा एनं छन्दांसि दधति"—इति। वाजोऽन्नं हविर्लक्षणम्, तद्युक्तो ज्योतिष्टोमो 'वाजी', स च 'सुहितः' सम्यगनुष्ठितः 'सुधायाम्' अमृते स्वर्गे यजमानं स्थापयतीति शेषः। अनेन प्रकारेण 'तद्ध' तस्मिन्नेव यज्ञप्रतिपादके शास्त्रे 'यदिदं' वचन मभिज्ञा आहुः, तत्तु 'छन्दांसि वै' तद्वचनं यथोक्तगायत्र्यादिच्छन्दांस्येवाभिलक्ष्योक्तम्। यस्माच्छन्दांसि 'एनं' यजमानं 'सुधायां' स्वर्गे स्थापयन्ति †, तस्माच्छन्दोऽभिप्रायेणैतद्वचनं युक्तम् ॥

वेदनं प्रशंसति— "अननुध्यायिनं लोकं जयति य एवं वेद"—इति। अनमापि ध्यातु मनर्हं मत्यपूर्वमुखोपेतं लोक माप्नोति ॥

अत्र कश्चित् पूर्वपक्ष मुद्भावयति— "तद्वैक आहुर्धातार मेव सर्वासां पुरस्तात्-पुरस्तादाज्येन परि यजेत्तदासु सर्वासु मिथुनं दधातीति" इति। 'तद्' तस्मिन्नेव छन्दसां भ्रमपरिहारार्थं हविर्यज्ञे केचित् पूर्वपक्षिण एव माहुः,—'सर्वासाम्' अनुमत्यादीनां स्वोदेवतानां पुरस्तात् पुरुषदेवतारूपं धातार मेवाज्यद्रव्येण परितो यजेत्। सर्वसङ्ग्रहार्थं पुरस्तादिति वीप्सा ‡। 'तत्' तेन

---

* "सुधाया॰ ह वै वाजी सुहितो दधातीत्यग्निर्वा वाजी, त मेव तत् प्रीणाति; स एनं प्रीतः प्रीणाति बलीयान् भवति"—इति तै॰ सं॰ ५.५.१०.७।

† "सुधायां मा धेहि परमे व्योमन्"—इति यजु॰ सं॰ १७.१.९।

‡ "नित्यवीप्सयोः"—इति (पा॰ ८.१.४.) द्विर्वचनम्।

सर्वत्र धात्रदेवतायप्रयोगेण 'आसु' सर्वासु स्त्रीदेवतासु मिथुनं सम्पादयति ॥

तत्र इमं पूर्वपक्षं दूषयति— "तदु वा आहुर्जामि वा एतद्यत्रैक क्रियते, यत्र समानीभ्यां मृग्भ्यां समानेऽहन् यजतीति"-इति। 'तदु वै' तत्रैव पूर्वोक्तविषये केचिदभिज्ञा एव माहुः,—'यत्र' यस्मिन् प्रयोगे 'समानीभ्याम्' एकविधाभ्यां मृग्भ्यां 'समाने ऽहन्' एकस्मिन्नेवाहनि यजति, 'तदेतत्' अनुष्ठानं 'जामि वै' आलस्य मिव 'क्रियते' सम्पाद्यते ; प्रयुक्तयोरेवयोः पुनःप्रयोगस्य चर्वितचर्वण-सदृशत्वेनानुचितत्वात्। धात्रदेवताके प्रथमे पुरोडाशे "धाता ददातु दाशुषे"-इति * पुरोनुवाक्या, "धाता प्रजानाम्"-इति † याज्या। तत्र य एतत्परिहरणा अपि चतुर्णां हविषां पुरस्तादाज्येन धातारं यजेत्, तदानीमिदं मृग्द्वयं पुनरपि चतुर्वार मावर्त्त-नीयम्। तथा सति नीरसो यज्ञः फलं दातुं समर्थो न भवेदित्यर्थः ॥

कथं तर्हि मिथुनसिद्धिः स्यादित्याशङ्क्य लौकिकदृष्टान्तेन तत्सिद्धिं उपपादयति — "यदि ह वा अपि बह्व इव जायाः पतिर्वाव तासां मिथुनं, तद्यदासां धातारं पुरस्तादाजति, तदासु सर्वासु मिथुनं दधाति"-इति। 'यदि ह वा' यद्यपि लोके जायाः 'बह्व इव' बहुसङ्ख्याका एव स्युः, तथापि 'पतिर्वाव' परिरेक एव सन् तासां मिथुनं सम्पादयति ; तथा सति यदि 'आसाम्' अनु-मत्यादीनां पुरस्तात् धातारं सकृदेव यजति, तदानीम् 'आसु सर्वासु' अनुमत्यादिषु स एक एव धाता मिथुनं सम्पादयति ‡ ॥

वक्ष्यमाणैर्हविर्भिः साङ्ग्यमङ्गानां वारयितुं मुक्तार्थं विविच्य निग-

* , † इमौ मन्त्रावन्यत्रौदौ दर्शपूर्णमासायनेन पठितौ। (६.१७.१६.)।

‡ "इडिका निर्वपेत्"-इत्यादि च सै० सं० १. ४. ९ अनु०।

मयति— "इति तु देविकानाम्"-इति। अनेन प्रकारेण देविकाभिधानां देवतानां हवींष्युक्तानीति शेषः * ॥ २ (४७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां पञ्चमाध्याये
तृतीयः खण्डः ॥ २ (४७) ॥

अथ चतुर्थः खण्डः।

अथ देवीनां सूर्याय पुरोळाश मेकैकपालं यः सूर्यः स धाता स उ एव वषट्कारो दिवे चरुं या द्यौः सानुमतिः सो एव गायत्र्युषसे चरुं योषाः सा राका सो एव त्रिष्टुब् गवे चरुं या गौः सा सिनीवाली सो एव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः सो एवानुष्टुबेतानि वाव सर्वाणि छन्दांसि गायत्रं त्रैष्टुभं जागत मानुष्टुभ मन्वन्यान्येतानि हि यज्ञे प्रतमा सिव क्रियन्त एतैर्ह वा अस्य छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद तद्वै यदिद माहुः सुधायां ह वै वाजी सुहितो दधा-

* "अथानूचश्च पञ्चपुरोडाश मन्त्र देविका हवींषि निर्वपेयुः ;— धाता ऽनुमती राका सिनीवाली कुहूः"-इति भाव० श्रौ० ६,१४,१५। "अनुमतिराकासिनीवालीकुहूभ्यस्त्वष्टा धात्रे द्वादशकपालः सर्वदेवत्यः"-इति कात्या० श्रौ० १८, ६, २१।

तीति छन्दांसि वै तत्सुधायां ह वा एनं छन्दांसि दधत्यननुध्यायिनं लोकं जयति य एवं वेद तद्वैक आहुः सूर्य मेव सर्वासां पुरस्तात्पुरस्तादाज्येन परि यजेत्तदासु सर्वासु मिथुनं दधातीति तदु वा आहुर्जामि वा एतद्यत्ते क्रियते यत्र समानीभ्या मृग्भ्यां समाने ऽहन्यजतीति यदि ह वा अपि बह्वा इव जायाः पतिर्वाव तासां मिथुनं तद्यदासां सूर्यं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधाति ता या इमास्ता अमूर्या अमूस्ता इमा अन्यतराभिर्यावं तं काम माप्नोति य एतासूभयीषु ता उभयीर्गतश्रियः प्रजातिकामस्य सन्निर्वपेन्नेत्वेषिष्यमाणस्य* यद्वेना एषिष्यमाणस्य† सन्निर्वपेदीश्वरो ह्यस्य विक्ते देवा अरन्तोर्यद्वा अयं मारमने ऽल ममंस्तेति ता ह शुचिव्रतो गौपालायनो वृद्धद्युम्नस्याभिप्रतारिणस्योभयीर्यत्ते सन्निरवाप तस्य ह रथगृत्सं गाहमानं दृष्ट्वोवाचेत्थ मह मस्य राजन्यस्य देविकाश्च देवीश्चोभयीर्यत्ते सममादयं यदस्येत्थं रथगृत्सो गार्हत इति चतुष्षष्टिं ह वचनः शतब्रह्मास्ते पुचनत्मार आसुः ॥ ४ (४८) ॥

---

* † "एषिष्यमाणस्य" घ ।

हविरन्तराणि प्रतिजानीते—"अथ देवीनाम्"-इति। 'अथ' अनन्तरं 'देवीनां' देवीनामिकानां देवतानाम्, हवींषि निर्वपेदिति शेषः॥

तत्र प्रथमं हविर्विधत्ते— "सूर्याय पुरोळाश मेककपालं,—यः सूर्यः स धाता, स उ एव वषट्कारः"—इति। 'एककपालं' निर्वपेदिति शेषः। सूर्यस्य पूर्वोक्तं धातृस्वरूपत्वम्, तद्वारा वषट्-कारस्वरूपत्वं चोपपर्यं तदीयत्वमापनयो द्रष्टव्यः॥

उक्तानि * चत्वारि हवींषि विधत्ते—"दिवे चरुं,—या द्यौः सानुमतिः, सो एव गायत्र्युषसे चरुं,— योषाः सा राका, सो एव त्रिष्टुब्; गवे चरुं,— या गौः सा सिनीवाली, सो एव जगती; पृथिव्यै चरुं,— या पृथिवी सा कुहूः, सो एवानुष्टुप्"-इति। प्रथमहविर्वद् व्याख्येयम्॥

एतेषां हविषां प्रशंसार्थं पूर्वोक्त मेवार्थवादं (२२७पृ०) पुनरपि पठति—"एतानि वाव सर्वाणि छन्दांसि,—गायत्रं त्रैष्टुभं जागत मानुष्टुभ मन्वन्यान्येतानि हि यज्ञे प्रतमा मिव क्रियन्त; एतैर्ह वा अस्य छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद; तद्ध यदिद माहुः,—सुधायां ह वै वाजी सुश्रितो दधातीति; छन्दांसि वै तत्सुधायां ह वा एनं छन्दांसि दधत्यनसुधायिनं लोकं जयति य एवं वेद; तद्धैक आहुः,—सूर्य मेव सर्वासां पुरस्तात् पुरस्तादाज्येन परि यजेत्, तदासु सर्वासु मिथुनं दधा-तीति; तद् वा आहुः— जामि वा एतद् यज्ञे क्रियते, यच्च समानीभ्या मृग्भ्यां समाने ऽहन् यजतीति; यदि ह वा अपि बभ्रु इव जायाः पतिर्वाव तासां मिथुनं तद् यदासां सूर्यं

* "उक्तानि च" ग।

पुरस्ताद् यजति, तदासु सर्वासु मिथुनं दधाति"–इति । धातार मित्यस्य स्थाने सूर्य मित्येतावानेव विशेषः । अन्यत् सर्वं पूर्ववत् ॥

देविकानाम्नां देवीनाम्नां च हविषां तुल्यं सामर्थ्यं मभिप्रेत्य विकल्पं दर्शयति—"ता या इमास्ता अमूर्या अमूस्ता इमा अन्यतराभिर्वाव तं काम माप्नोति य एतासूभयीषु"–इति । 'ताः' देवीनाम्ना प्रसिद्धाः 'इमाः' इदानीं मुक्ताः (२३२ पृ० ४ पं०) "सूर्याय पुरोडाशम्"–इत्यादयो याः सन्ति, 'ताः अमूः' प्राक्तन-ग्रन्थेनोक्ताः (२२६ पृ० १५ पं०) "धात्रे पुरोळाशम्"–इत्यादयो देविकाः । एव देवीरुद्दिश्य देविकातादात्म्य मुक्तम्, अथ देविका मुद्दिश्य देवीतादात्म्य मुच्यते—'अमूः' पूर्वमुक्ता देविकाः सन्ति, ताः 'इमाः' इदानीं मुक्ता देव्यः । एव मन्योन्यतादात्म्ये सति यः काम एतासूभयविधासु लभ्यते, 'तं' कामम् 'अन्यतराभिर्वाव' एकविधाभिरेव प्राप्नोति । तस्माद् विकल्पेन प्रयोग इत्यर्थः ॥

अथ नैमित्तिकं समुच्चयं विधत्ते—"सा उभयीर्गतश्रियः प्रजातिकामस्य सन्निर्वपेत्"–इति । अनूचानाटीनां मध्ये कश्चिद् 'गतश्रीः' । तथा च श्रुत्यन्तरे श्रूयते—"त्रयो वै गतश्रियः,—श्रुतवान्, यामणीः, राजन्यः"–इति (तै० सं० २. ५. ४. ४. *) । तादृशी गतश्रीः यदि 'प्रजातिं' प्रजोत्पादनसामर्थ्यं कामयते, तदानीं तस्य 'साः' देविका देवीश्च 'उभयीः' 'सन्निर्वपेत्' समुच्चित्य निर्वपेत् ॥

---

* 'श्रुतवान्—वेदतदर्थवेत्ता श्रुतवान्, यामणी—ऐश्वर्यविशेषः, राजन्य—क्षत्रिय'—इति, 'गता प्राप्ता श्रीर्येन स गतश्रीः'–इत्यादि चाह षड्विंशः (आप० श्रौ० १ १४. ६०)। 'गता प्राप्ता श्रीर्येनासौ, गता श्रीर्यं मिति वा'–इति च याज्ञिकदेवः (कात्या० श्रौ० ४. १३. ५. ४०)। माहात्म्य० श्रौ० २. ६. ५ ।

धनकामस्य समुच्चयं निषेधति—"नेत्वेषिष्यमाणस्य"-इति। धनमपेक्ष्यमाणस्य तु 'न सन्निर्वपेत्' उभयविधानां समुच्चित्य निर्वापो न कार्य्यः ॥

विपक्षे बाधं दर्शयति— "यदेना एषिष्यमाणस्य सन्निर्वपेदीश्वरो ह्यस्य वित्ते देवा अरन्धोर्यद्वा अथ मात्मने ऽल मर्मंस्तेति"-इति। वित्तमेषिष्यमाणस्य यदि 'एनाः' उभयीः समुच्चित्य निर्वपेत्, तदानीम् 'अस्य' धनकामस्य वित्ते देवाः सर्वेऽपि 'अरन्धोः' ईश्वराः, अरन्तु मक्षोडितुं समर्था भवन्ति ; एतदपेक्षितं वित्तं क्षिपन्धीत्यर्थः ; तत्र हेतुरुच्यते,— 'यद्वै' यस्मादेव कारणादयं धनार्थी 'आत्मने' स्वार्थ मेव 'अल मर्मंस्त' सम्पूर्णं वित्तं मनसा ध्यातवान् धनलोभेन यागादिषु प्रवृत्तत्वात् ; एतदपेक्षितं धने देवानां द्वेषो युज्यते ॥

धनकामस्य समुच्चयं निषिध्य प्रजाकामस्य पूर्वत्र विहितं समुच्चयं मर्थवादेन प्रशंसति— "ता ह शुचिब्रह्मो गौपालायनो दृढदाम्नस्याभिप्रतारिणस्त्रीभयोर्यज्ञे सन्निरुवाप ; तस्य ह रथगृत्सं गायमानं दृष्ट्वोवाचेत्थ मह मस्य राजन्यस्य देविकाश्च देवीर्त्रीभयोर्यज्ञे सममादयं ; यदस्येत्थं रथगृत्सो गायति धनि चतुष्पष्टि कवचिनः शश्वदास्य ते पुत्रजनार आसु."-इति। 'शुचयः' शुद्धाः समीचीनपुष्पफलोपेता वृक्षाः यस्य महर्षेराश्रमे सन्ति, सोऽयं 'शुचिब्रह्म'-नामकः ; सम्यक् तृणोदकप्रदानेन गोश्रेयूषं करोतीति गोपालायननामा कश्चिदृषिः, तस्यापत्यं 'गौपालायनः' ; पूर्वोक्तनामकः शुचिब्रह्मः। 'दृढं' प्रभूतं 'दाम्नं' धनं यस्य राज्ञः सोऽयं 'दृढदाम्नः' अभितः शत्रून प्रकर्षेण 'तरति' निराकरोतीति 'अभिप्रतारी' कश्चिद्राजा, तस्य पुत्रः 'आभिप्तारिणः' ; पूर्वोक्तो

हृद्द्युम्नः । तस्य राज्ञो यज्ञे देविकायै देवीभ्यां 'इत्यम्' अनेन शास्त्रोक्तप्रकारेण 'सममादयम्' समञ्जित्य मादितवानस्मि, समुच्चयानुष्ठानेन तद्देवता हर्षितवानस्मि । तत्प्रसादादयं 'रथ-गृत्सः' राजपुत्रः क्रीडार्थं जले गाहते इति । न केवलं शुचि-द्रुक्षेण दृष्टो रथगृत्स एवैकः, किन्तु चतुष्षष्टिसङ्ख्याकाः 'शश्वत्-कवचिनः' सर्वदा युद्धार्थं सज्जिताः शूराः । 'अस्य' हृद्द्युम्नस्य राज्ञः 'ते' तथाविधा एव पुत्राः पौत्राश्च आसुः ॥ ४ (४८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपञ्चिकायां पञ्चमाध्याये
चतुर्थः खण्डः ॥ ४ (४८) ॥

॥ अथ पञ्चमः खण्डः ॥

अग्निष्टोमं वै देवा अभ्ययन्त्सोक्थान्यसुरास्ते समावद्वीर्या एवासन् न व्यावर्त्तन्त तान् भरद्वाज ऋषीणा सपश्यदिमे वा असुरा उक्थेषु श्रितास्तानेषां न कश्चन पश्यतीति सोऽग्निं मुदङ्मयदेच्छू षु ब्रवाणि तेऽग्न इत्येतरा गिर इत्यमुर्या ह वा इतरा गिरः सोऽग्निरुपोत्तिष्ठन्नब्रवीत् किंस्विदेव मह्यं क्रणो दीर्घः पलितो वक्ष्यतीति भरद्वाजो ह वै क्रणो दीर्घः पलित आस स ऽब्रवीदिमे वा असुरा उक्थेषु

थितास्तान्वो न कश्चन पश्यतीति तानग्निरश्वो भूत्वाभ्यत्यद्रवद्यदग्निरश्वो भूत्वाभ्यत्यद्रवत्तत्साकमश्वः सामाभवत्तत्साकमश्वस्य साकमश्वत्वं तदाहुः साकमश्वेनोक्थानि प्रणयेदप्रणीतानि वाव तान्युक्थानि यान्यन्यत्र साकमश्वादिति प्रमंहिष्ठीयेन प्रणयेदित्याहुः प्रमंहिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदन्त तत्राहैव प्रमंहिष्ठीयेन नयेत्र साकमश्वेन ॥ ५ (४६) ॥

ज्योतिष्टोमस्तावत् 'सप्तसंस्थः' समाप्तिभेदात् सप्तविधः ; "अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्यामः इति सप्त संस्थाः"-इति (श्रौ० ६. ११. १.) आश्वलायनेनाभिहितत्वात् । तत्राग्निष्टोमसाम्ना यज्ञायज्ञीयाख्येन यत्र समाप्तिः, सोऽयं प्रथमरूपो ऽग्निष्टोमः । स सर्वोऽपि पूर्वत्रोक्तः ॥

अथोक्थसंस्थारूपो ज्योतिष्टोमो वक्तव्यः, तदर्थं माख्यायिका माह — "अग्निष्टोमं वै देवा अयजन्तोक्थान्यमुरास्ते समावद्वीर्या एवासन् न व्यावर्तन्त, तान् भरद्वाज ऋषीणां सपश्यदिमे वा असुरा उक्थेषु । तास्तानेषां न कश्चन पश्यतीति सोऽग्निमदन्नयद्" इति । यदा देवा अग्निष्टोम माश्रितवन्तः, तदानीं असुरा अपि उक्थनामकानि स्तोत्राणि शस्त्राणि चाश्रित्यावस्थिताः । ततश्च 'ते' देवाश्चासुराश्च यत्ते तुल्यवीर्या एवासन्, न तु देवाः शौर्याधिक्येन व्याहर्त्तुं प्रभाः । तदानीं ऋषीणां मध्ये सूक्ष्मदर्शी भरद्वाजः 'तान्' असुरान् रहस्युक्थपरानपश्यत् ; दृष्ट्वा

च एव सुवाच,— 'इमे' रहस्यवस्थिता असुराः 'उक्थेषु' स्तोत्रशस्त्रेषु आश्रिताः । 'तान्' असुरान् 'एषां' देवानां ऋषीणां मध्ये न कोऽपि पश्यतीति । तथोक्तः स भरद्वाजो ऽसुरनिराकरणार्थं केनचिन्मन्त्रेणाग्निम् 'उदद्रवयत्' उच्चध्वनिनाह्वानं कृतवान् ॥

तं मिमं मन्त्रं दर्शयति – "एष्टू षु ब्रवाणि ते ऽग्न इत्येतरा गिर इत्यसुर्या ह वा इतरा गिरः"–इति । हे अग्ने ! 'एष्टि' आगच्छैव । 'ते' तव 'सु ब्रवाणि' शोभनं कार्यं कथयानि । 'इतराः' देववाक्यार्थव्यतिरिक्ताः 'गिरः' असुरवाचः 'इत्था' इत्थं मनेन प्रकारेण, अन्यत्तराहितीति शेषः । अस्मिन्मन्त्रे (सं० ६.१६.२.) इतरशब्दार्थं दर्शयति –'असुर्या ह वा इतरा गिरः'–इति । असुरेभ्यो हिताः 'असुर्याः', ताश्च गिरः देववाक्यादितराः, देवविरोधिन्य इत्यर्थः ॥

तथाग्निवाक्यं दर्शयति –"सो ऽग्निरुपोत्तिष्ठन्नेव मन्त्रवोक्किंस्विदेव मङ्क्षु क्षणो दीर्घः पनितो वक्ष्यतीति" इति । भरद्वाजेनाहूतो योऽयमग्निः 'सोऽग्निः' तत्समीपं प्रत्यागन्तुमुत्तिष्ठन्नेव मन्त्रयते,— 'मङ्क्षु' अग्नये स ऋषिः 'किंस्विदेव' किन्नाम वक्ष्यति, क्षणो दीर्घः पनित इति ॥

ऋषिविशेषणानि तानि च स्पष्टीकरोति — "भरद्वाजो ह वै क्षणो दीर्घः पनित आस" इति । स्पष्टोऽर्थः ॥

किंस्वित्पनितो वक्ष्यतीत्यग्निना पृष्टस्य भरद्वाजस्योत्तरं दर्शयति — "सो ऽब्रवीदिमे वा असुरा उक्थेषु श्रिताश्चान्यो न कश्चन पश्यतीति"– इति । 'सः' भरद्वाजो ऽग्निं प्रत्येव मन्त्रवीत्,— 'इमे वा असुरा उक्थेषु श्रिताश्चान्यो न कश्चन पश्यतीति' । पूर्ववद् व्याख्येयम् ॥

अथोक्थस्तोत्रस्य साधनभूतं 'साकमश्व'-नामकं साम यदस्ति, तदीयं नाम निर्वक्ति — "तानग्निरश्वो भूत्वाभ्यत्यद्रवद्, यदग्निरश्वो भूत्वाभ्यत्यद्रवत्तत्साकमश्वं सामाभवत्, तत्साकमश्वस्य साकमश्वत्वम्"–इति। सोऽग्निर्भरद्वाजस्योत्तरं श्रुत्वा तत ऊर्ध्वं स्वय मश्वाकारो भूत्वा 'तान्' असुरान् 'अभि' लक्ष्य 'अद्रवत्' अतिशयेनागच्छत्; असुराणा मुपरि वेगवन्त मात्मरूप मश्वं प्रवर्त्यासुरान् मारितवानित्यर्थः। यस्मात् स्वय मश्वो भूत्वा तैरसुरैः साकं युद्धं कृत्वा जितवान्, तस्मादेतद्दृष्टान्तसूचनाय प्रवृत्तायाम् "एष्टा पु त्रवाणि ते"–इत्यादिकाया मृचि (क्र०आ० १.१.१.७.) उत्पन्नस्य साम्नः (गे०गा०१.१.१४.) साकमश्व मिति नाम सम्यक्तम् * ॥

तस्य साम्न उक्थस्तोत्रनिष्पादकत्वं विधत्ते—"तदाहुः साकमश्वेनोक्थानि प्रणयेदप्रणीतानि वाव तान्युक्थानि यान्यन्यत्र साकमश्वादिति"–इति। 'तत्' तत्र साकमश्वविषये प्रयोगाभिज्ञा एव माहुः,—साकमश्वनामकेन साम्ना स्तोत्राण्युक्थनामकानि प्रणयेत् †; साकमश्वादन्यत्र सामान्तरेण यान्युक्थानि स्तोत्राणि प्रणीयन्ते, तान्यप्रणीतान्येव भवन्ति। तस्मादिद मेव सामोक्थस्तोत्रनिष्पादकम् ‡ ॥

पक्षान्तरं विधत्ते—"प्रमंहिष्ठीयेन प्रणयेदित्याहुः; प्रमंहिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदन्त"–इति। "प्र मंहिष्ठाय गायत"–इत्यस्या मृचि (क्र०आ०२.१.२.१.) उत्पन्नं साम

---

* नामविधिः आ० ब्रा० १.२१।

† उ० आ० १.१.२१.१—३; ऊ० गा० १.१.१५।

‡ "तस्मात् साकमश्वेनोक्थानि प्रणयेत्"–इत्यादि विधायकं ब्राह्मणम् (ता०८.८.)।

'प्रमंहिष्ठीयम्' (गे०गा०३.१.२६.) ; तेन साम्नोक्थस्तोत्राणि * निष्पादयेत् । उक्थेष्वाश्रितानसुरान् देवा एतेन साम्ना उक्थेभ्यो निराक्रामयन्त ॥

एतयोः साम्नोरैच्छिकविकल्पं दर्शयति—"तमाहैव प्रमंहिष्ठीयेन नयेत् प्र साकमश्वेन" इति । 'अह' इत्ययं शब्दोऽन्यत्र निषेधार्थोऽप्यत्र विकल्पार्थः ; निपातानामनेकार्थत्वात् । तान्युक्थस्तोत्राणि 'प्रमंहिष्ठीयेन' साम्ना प्रणयेत्, 'अहैव' अथवा 'साकमश्वेन' साम्ना प्रणयेत् ॥ ५ (४८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य तृतीयपत्रिकायां पञ्चमाध्याये
पञ्चमः खण्डः ॥ ५ (४८) ॥

॥ अथ षष्ठः खण्डः ॥

ते वा असुरा मैत्रावरुणास्तोक्थ्य मथ्नयन्त सो ऽब्रवीदिन्द्रः कस्याहं चेमानितो ऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीदरुणास्तस्मादैन्द्रावरुणं मैत्रावरुणस्तृतीयसवने शंसतीन्द्रश्च हि तान्वरुणश्च ततो नुदेतां ते वै ततो ऽपहता असुरा ब्राह्मणाच्छंसिन उक्थ मथ्नयन्त सो ऽब्रवीदिन्द्रः कस्याहं चेमानितो

* त० आ० २.२.१२.१.२ ; ऋ० गो० २.२.२ । मामोवाय. -आ० श्रौ० १.२३ । विधायकं ब्राह्मणम्—ता० ब्रा० १२.६ ।

ऽसुरान्नोल्यावहा इत्यहं चेत्यब्रवीद् बृहस्पतिस्तस्मा-
दैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंसतीन्द्रश्च हि तान् बृहस्पतिश्च ततो नुदेतां ते वै ततोऽपहता असुरा मच्छावाकस्योक्थ मशयन्त सोऽब्रवीदिन्द्रः कस्माहं चेमानितो ऽसुरान्नोल्यावहा इत्यहं चेत्यब्रवीदिष्णुस्तस्मादैन्द्रावैष्णव मच्छावाकस्तृतीयसवने शंसतोन्द्रश्च हि तान्विष्णुश्च ततो नुदेतां इन्द्र मिन्द्रेण देवताः शमयन्ते इन्द्रं वै मिथुनं तस्माद् इन्द्रान्मिथुनं प्र जायते प्रजात्यै प्र जायते प्रजया पशुभिर्य एवं वेदाथ हैते पोचीयाश्च * नेष्ट्रीयाश्च † चत्वार ऋतुयाजाः षळ् ऋचः सा विराड् दशिनी तद्विराजि यज्ञं दशिन्यां प्रतिष्ठापयन्ति प्रतिष्ठापयन्ति ॥ ६ (५०) ॥

॥इत्यैतरेयब्राह्मणे तृतीयपञ्चिकायां पञ्चमोऽध्यायः॥

उक्थस्तोत्रेषु सामविशेषं विधाय उक्थशस्त्रेषु सूक्तविशेषान् विधातु मादौ मैत्रावरुणस्य शस्त्रे किञ्चित् सूक्तं विधत्ते— "ते वा असुरा मैत्रावरुणस्योक्थ मशयन्त ; सोऽब्रवीदिन्द्रः कस्माहं चेमानितो ऽसुरान्नोल्यावहा इत्यहं चेत्यब्रवीद् वरुणस्तस्मादैन्द्रावरुणं मैत्रावरुणस्तृतीयसवने शंसतीन्द्रश्च हि तान्वरुणश्च ततो

* "पोचियाश्च" क, टी० ग, टी० घ। † "नेष्टियाश्च" टी० घ।

नुदेताम्"-इति। उक्थ्यस्य क्रतोरग्निष्टोमविकृतित्वात्* अतिदिष्टमग्निष्टोमप्रयोग मनुष्ठाय तत ऊर्ध्वं मुक्थ्यपर्यायाखयोऽनुष्ठेयाः। तथा चापस्तम्ब आह— "उक्थ्यषदग्निष्टोमचमसानुवर्यक्षिभ्यश्चमूसगणेभ्यो राजान मति रेचयति"-इति (श्रौ० १४.१.१६.)। तत्र प्रथमचमसगणे मैत्रावरुणस्य यज्ञस्य मस्ति, उक्थ्यस्तोत्रेषु धात्रा निराकृतास्त एव असुराः 'इदं मैत्रावरुणयज्ञस्य मुपयन्त। 'तत्' तदानीं तत्रावस्थितः स इन्द्र इतरदेवान् प्रत्येव मब्रवीत्,— असुराणा मपनोदने मम सहायो ऽपेक्षितः, ततो हे देवाः! युष्माकं मध्ये कथाहं च 'इमान्' असुरान् 'इतः' मैत्रावरुणयज्ञात् 'नोत्सावहै' अपनोदनं करिष्याव इति। देवेष्ववस्थितो वरुणः 'अहं च' इत्यब्रवीत्; हे इन्द्र! त्वं चाहं चेत्यर्थः। यस्मादेवं तस्मादुभयोर्मेलनेन तेषा मसुराणा मपनोदनार्थम् 'ऐन्द्रावरुणं' सूक्तं तृतीयसवने 'मैत्रावरुणः' एतन्नामक ऋत्विक् शंसेत्। "इन्द्रावरुणा युव मध्वराय नः"— इत्येतदृगर्थं सूक्तम् (सं ७. ८२.) ऐन्द्रावरुणम्; तेन तुष्टः इन्द्रश्च वरुणश्च 'तान्' असुरान् 'ततः' यज्ञात् 'अप नुदेतां' निराकुर्याताम्॥

द्वितीये चमसगणे किञ्चिन्मूलादयं विधत्ते,— "ते वै ततो ऽपहता असुरा ब्राह्मणाच्छंसिन उक्थ मयन्त; सो ऽब्रवीदिन्द्रः कथाहं चेमानितो ऽसुरान्नोत्सावहा इत्यहं चेत्यब्रवीद् बृहस्पतिस्तस्मादैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंसतीन्द्रश्च हि तान् बृहस्पतिश्च ततो नुदेताम्" इति। 'ततः' मैत्रावरुणयज्ञाविराकृता असुरा ब्राह्मणाच्छंसिनः यज्ञ मास्थितवन्तः।

* तदुक्तं सायणभाष्ये—"उक्थ्यो ऽग्निष्टोमविकृतिरतो ऽग्नीषोमीयपशुविशिष्टोमस्य गुणविकारः। ०—०। तेषा मग्निष्टोमवत् कल्पः"-इति १४. १. १, ३।

"उदप्रुतो न वयो रक्षमाणाः"-इत्येतद् बृहस्पतिदेवताकं द्वादशर्चं सूक्तं (सं० १०.६८.), "अच्छा म इन्द्र मतयः स्वर्विदः"-इति एकादशर्चं मैन्द्रं सूक्तम् (सं० १०.४३.); तदुभयं मिलितं सदैन्द्राबार्हस्पत्यं सम्पद्यते। तदेतद् ब्राह्मणाच्छंसी ब्रूयात्। अन्यत् पूर्ववद् व्याख्येयम्॥

तृतीयचमसभगणे सूक्तं विधत्ते—"ते वै ततो ऽपहता असुरा अच्छावाकस्योक्थ मशयन्त ; सो ऽब्रवीदिन्द्रः कथाहं चेमानितो ऽसुरान्नोल्बणवहा इत्यहं चेत्यब्रवीद्विष्णुस्तस्मादैन्द्राविष्णव मच्छावाकस्तृतीयसवने शंसतीन्द्रश्च हि तान् विष्णुश्च ततो नुदेताम्"-इति। "मं वां क्रमेण स मिषा"-इत्यर्धं मैन्द्राविष्णवं सूक्तम् (सं० ६. ६९.)। अन्यत् पूर्ववद् व्याख्येयम्॥

सूक्तानां द्विदेवताकत्वं प्रशंसति—"इन्द्र मिन्द्रेण देवताः शस्यन्ते ; इन्द्रं वै मिथुनं, तस्माद् इन्द्रान्मिथुनं प्र जायते प्रजात्यै"-इति। इन्द्रेण सह 'इन्द्रं' युग्मं भूत्वा वरुण-बृहस्पति-विष्णुदेवताः क्रमेण शस्यन्ते। इन्द्रं च लोके स्त्रीपुरुषरूपं 'मिथुनम्' तादृगान्मिथुनात् अपत्यरूपं 'मिथुनं' प्र जायते। ततो इन्द्रशंसनं यजमानस्य प्रजात्यै भवति। वेदनं प्रशंसति—"प्र जायते प्रजया पशुभिर्य एवं वेद"-इति॥

अस्मिन्नां त्रयाणां होत्रकाणां * सूक्तानि विधाय, पोतुर्नेष्टुश्च मन्त्रान्तराणि विधत्ते—"अथ हैते पोत्रीयाय नेष्ट्रीयाय चत्वार ऋतुयाजाः षळ् ऋचः"-इति। प्रैषयन्त्ये पञ्चमे सूक्ते "होता यक्षत्" इत्यादिको द्वितीयाष्टमौ मन्त्रौ पोतुर्हविर्ऋतुयाजौ, तथा तत्रैव प्रैषसूक्ते तृतीयनवमौ मन्त्रौ नेष्टुर्हविर्ऋतुयाजौ ; एवं चत्वार

* "प्रशास्ता ब्राह्मणाच्छंसस्सावाक इति अस्मिन् होत्रकाः"-इति आप० श्रौ० ५.१.१०।

ऋतुयाजाः ; ते मिलित्वा पोतृसम्बन्धान्नेष्टृसम्बन्धाच्च 'पोत्रीयाः नेष्ट्रीयाश्च' भवन्ति । तथा प्रस्थितयाज्या. पोतुस्तिस्र ऋचः, नेष्टुस्तिस्र ऋचः ; इत्येवं षऽ् ऋचः' भवन्ति ९ ॥

तदेतन्मन्त्रदशकं प्रशंसति -"सा विराड् दशिनो, तद्विराजि यज्ञं दशिन्यां प्रतिष्ठापयन्ति प्रतिष्ठापयन्ति"-इति । 'सा' पूर्वोक्ता मन्त्रसमष्टिः 'दशिनो' दशसङ्ख्यायुक्ता मतो विराट् छन्दः सम्पद्यते ; "दशाक्षरा विराट्" इतिश्रुत्यन्तरात् । 'तत्' तेन दशसम्पद्योगेण दशिन्यां' दशसङ्ख्योपेतायां विराजि यज्ञं ऋत्विजः प्रतिष्ठापयन्ति ॥ । अभ्यासो ऽध्यायपरिसमाप्त्यर्थः ॥ ६ (५०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
तैत्तिरीयसंहितायां तृतीयपञ्चिकायां पञ्चमाध्याये
षष्ठः खण्डः ॥ ६ (५०) ॥

वेदार्थेभ्य प्रकाशेन तमो हार्दं निवारयन् ।
अनर्घोऽनुग्रहो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कप्रभोराज्यधुरन्धरमाधवाचार्यविरचिते
भगवत्सायणाचार्यकृते वेदार्थप्रकाशनाम्नि भाष्ये
तैत्तिरीयसंहितायां तृतीयपञ्चिकायां पञ्चमोऽध्यायः ॥

* उक्थ्यसंस्थाकेषु सोमेषु [illegible] विहितानि प्राय. सामान्यतन्त्रकार्याणि [illegible] तदेवमुक्त्वा [illegible] पञ्चमाध्यायस्य [illegible] समाप्तवान्. । तथाच लाट्यायनेनाप्य [illegible] तन्त्रकार्याणि [illegible] उक्थ्य' इति (लाट्या. ६.१.) उक्थ्यास्थिता विशेषविधय एवोक्ता ।

† 'अग्निष्टोमे वैश्व [illegible] [illegible] प्रकृतप्रस्तुत्य [illegible] समाप्तवान् (२३५—२३५०) 'उक्थ्येन पशुकामो यजेत'-इति तु आप. श्रौ. १४. १. २ ।

ग्रहोक्थ मेकादश[1]। देवविशस्त्रयोदश[2]। सोमो वै राजामुष्मिंश्चतुर्दश[3]। देवा वा असुरैः षट्[4]। यज्ञो वै देवेभ्यः षट्[5] ॥ ३ * ॥

ग्रहोक्थं, सौर्या वै, इन्द्रो वै, वैश्वदेवं शंसति, इति नु दश ॥ ३ † ॥

॥ इति तृतीयपञ्चिका समाप्ता ॥

---

* १ भा० २१६ पृ० टीप्पनीदयं द्रष्टव्यम्।

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ चतुर्थपञ्चिका ॥

(८८)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरंस्तं द्वितीयेनाह्नाभिव्यंस्तृतीयेनाह्ना प्रायच्छंस्तं चतुर्थेऽहन् प्राहरत् तस्माच्चतुर्थेऽहन् षोळशिनं शंसति वज्रो वा एष यत् षोळशी तद्यच्चतुर्थेऽहन् षोळशिनं शंसति वज्र मेव तत्स्वरति द्विषते भ्रातृव्याय वधं योऽस्य स्तृत्यस्तस्मै स्तुत्तये वज्रो वै षोळशी पशव उक्थानि तं परस्तादुक्थानां पर्यस्य शंसति तं यत्परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव तत् षोळशिना पशून् परि गच्छति तस्मात्पशवो वज्रेणैव षोळशिना परिगता मनुष्यानभ्युपावर्त्तन्ते तस्मादश्वो वा पुरुषो वा गौर्वा हस्ती वा परिगत एव स्वयं मात्मने ऽत एवं वाचाभिषिक्त उपावर्त्तते वज्र मेव षोळशिनं पश्यन्वज्रेणैव षोळशिना परिगतो वाग्वै वज्रो वाक् षोळशी

तदाहुः किं षोळशिनः षोळशित्व मिति षोळश स्तोत्राणां षोळश शस्त्राणां षोळशभिरक्षरै रादत्ते षोळशभिः प्र णौति षोळशपदां निविदं दधाति तत् षोळशिनः षोळशित्वं द्वे वा अक्षरे अतिरिच्येते षोळशिनोऽनुष्टुभ मभिसम्पन्नस्य वाचो वात्र तौ स्तनौ सत्यानृते वाव ते अवत्येनं सत्यं नैन मनृतं हिनस्ति य एवं वेद ॥ १ ॥

संस्थेष्टीनां वाग्यमर्त्विजां च
यागा देवोदेविकानां विशेषाः ।
संस्थोक्थस्य स्तोत्रशस्त्रप्रकृतिः
शस्त्राण्याहुः शस्त्रिणां शौचकाम्यम् ॥

ज्योतिष्टोमभेद उक्थः समाप्तः, अथ षोड़शी * उच्यते ; तद्विषयं शंसनं विधत्ते— "देवा वै प्रथमेनाङ्क्रियाय वज्रं समभरंस्तं द्वितीयेनाङ्गामित्रंस्तृतीयेनाङ्गा प्रायच्छंस्तं चतुर्थेऽहन् पाहरत् ; तस्माच्चतुर्थेऽहन् षोळशिनं शंसति"—इति । अग्निष्टोमोक्थ्यादिसंस्थाविशेषः † स्वतन्त्रक्रतुत्वात् ‡ यथा पृथग्यजुष्टानु योग्यस्तथा षोड़शी न § स्वतन्त्रः क्रतुः । तथा च शाखान्तरे पठन्ति— "न वै षोड़शी नाम यज्ञोऽस्ति ; यद्वाव षोड़शः स्तोत्रं

---

* , † "षोऽशः" ग, घ, ङ, ज, झ, ट ।

‡ "षोळशी" क, घ, ङ, । एवं सर्वत्रापि तत्र सर्वत्र भाष्ये ।

२ "अग्निष्टोमोक्थ्यादिसंस्था सस्थाविशेषः" क, घ, ङ ।

§, ¶ "स्वतन्त्रः क्रतुत्वात्"—इति पाठो मद्दृष्टसर्वेषुपुस्तकेषु ; "न"—इति च पदं न दृश्यते क्वापादर्शे, तदत्र प्रकृतपाठः सुधीभिः स्वसमुच्चया निर्णेतव्यः ।

षोड़शए शस्त्रं तेन षोड़शी"-इति (तै० सं० ६.६.११.१.) । तथा सत्ययं संस्थाविशेषः पृष्ठ्यषड़हचतुर्थेऽहनि प्रयुज्यते, अतस्तत्रैवैतच्छंसनविधानम् । देवाः पुरा पृष्ठ्यषड़हे 'प्रथमेनाङ्गा' प्रथमदिवसनिष्पादेन सोमप्रयोगेण इन्द्रार्थं वज्रं 'समभरन्' सम्पादितवन्तः । अत्र सर्वत्राहःशब्दोऽङ्गा निष्पाद्यं सोमप्रयोग मभिधत्ते । तत्र सम्पादितं वज्रं द्वितीयेनाङ्गा 'अभिषुन्' । सेचनं नाम लोहमयानां शङ्कुकुठारादीनां तीक्ष्णत्वाय दार्ढ्याय चाग्नौ प्रताप्य यथोचितं तोरे स्थापनम् ; तदिदं सेचनं वज्रे कृतवन्तः । कृत्वा च तृतीयेनाङ्गा 'तं वज्रं मित्राय 'प्रायच्छन्' दत्तवन्तः । स चेन्द्रस्तं वज्रं चतुर्थेऽहनि गवीरुपरि प्राहरत् । तस्मात्पृष्ठ्यषड़हस्य चतुर्थमहःप्रयोगं (१) षोड़शिनं शस्त्रं शंसेत् । "असावि सोम इन्द्र ते"-इत्यादिकं (सं० १.८४.१---२०.) षोड़श्याख्यं शस्त्रम् । तथा चाश्वलायन आह— "अथ षोड़श्यसावि सोम इन्द्र त इति स्तोत्रियानुरूपौ" इति (श्रौ० ६.२.१,२.) ॥

षोड़शिशंसनं प्रशंसति— "वज्रो वा एष यत् षोळशी ; तद्यच्चतुर्थेऽहन् षोळशिनं शंसति, वज्र मेव तत्प्रहरति, द्विषते भ्रातृव्याय वधं, योऽस्य स्तृत्यस्तस्मै स्तर्त्तवै" इति । षोड़शिनो वज्रस्वरूपत्वाद् 'यः' पुमान् 'अस्य' यजमानस्य 'स्तृत्यः' हिंसनीयः 'तस्मै स्तर्त्तवै' तस्य हिंसार्थं वधहेतुं वज्र मेव भ्रातृव्याय प्रहरति ॥

तस्य शस्त्रस्य कालं विधत्ते - "वज्रो वै षोळशी पशव उक्थानि ; तं परस्तादुक्थानां पर्यस्य शंसति" इति । यथा पूर्वत्राग्निष्टोमप्रयुक्तानां द्वादशशस्त्राणा मुपरि त्रीणि उक्थशस्त्राणि प्रयुक्तानि, तथात्रापि त्रयाणा मुक्थशस्त्राणां 'परस्तात्' उपरि पर्यस्य षोड़शिन मवशंसेत् ॥

उक्थानां पशुरूपत्वात् षोडशिनो वज्ररूपत्वाच्चार्थं क्रम उपपन्नः ; तां मैत्रा सुपपत्तिं प्रकटयति— "तं यत्परस्तादुक्थानां पर्यस्य शंसति, वज्रेणैव तत् षोऽशिना पशून् परि गच्छति ; तस्मात् पशवो वज्रेणैव षोऽशिना परिगता मनुष्यानभ्युपावर्त्तन्ते ; तस्मादश्वो वा पुरुषो वा गौर्वा हस्ती वा परिगत एवस्य आत्मने ऽत एव वाचाभिधिद्ध उपावर्त्तते, वज्र मेव षोऽशिनं पश्यन् वज्रेणैव षोऽशिना परिगतो वाग्वै वज्रो वाक् षोऽशी"- इति । 'तं' षोडशिनं 'यत्' यस्मात्कारणादुक्थशस्त्राणां परस्तात् पर्यस्य शंसति, 'तत्' तेन शंसनेन षोड़शिरूपेण वज्रेणैवोक्तरूपान् पशून् 'परि गच्छति' परितो नियमेन याति । 'तस्मात्' लोकेऽप्यरण्ये सङ्घशार्थं गताः पशवः षोऽशिना वज्रेणैव नियमितत्वात्, सायं काले प्रत्यागत्य अभिलक्ष्य तत्तद्गृहेषु उपावर्त्तन्ते : अन्यथा तस्मादरण्यादरण्यान्तर मेव गच्छेयुः । न केवलं तृणचारणार्थं मरण्ये गतानां सायं काले पुनरागमनाय वज्ररूपेण नियमितत्वं, किं तर्हि यात्रेष्वपि तस्मात् षोड़शिवज्रनियमितत्वादश्वपुरुषगोहस्त्यादीनां मध्यतमः 'स्वयं मेव' परंपरया मध्यरेणैव 'परिगतः' नियमितः, आत्मना स्वयं वन्यनाय तत्स्थानं समागच्छति । किञ्च 'अत एव' षोड़शिवज्रनियमितत्वादेव 'वाचा' शीघ्रं मागच्छेत्यादिवाक्येन 'अभिधिद्धः' अभितो बद्धः पुरुषो वर्त्तते । यथा पक्षी बद्धो वर्त्मावर्दं आनीयमान आगच्छति, तद्वद्वाचा बद्धः पुरुषः । अत एवारण्यकाण्डे वक्ष्यति—"तस्य वाक् तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्"- इति (२.१. ६.) । यात्रातेणागमने कारणमुच्यते,— षोड़शिनं वाग्वज्ररूप मेव पश्यन्, षोड़शिना वज्रेणैव नियमितो भवति, तदा तस्य

वज्रत्वम् ; षोड़शी च वायूनां मुक्तादिभिर्निष्पन्नत्वात् स्वयं मपि वायूपो भवति, वाचश्च वज्रत्वं लोके प्रसिद्धम् ; राजादीनां भर्त्सनादौ वज्रप्रहारेणेव चित्ते व्यथोदयात् । तदेव सर्वनियामकत्वात षोड़शिनः प्रशस्तत्वं सिद्धम् ॥

यदुक्तं 'परस्ताद्युक्तयानां पर्येषु शंसति' इति, तत्रोक्थशस्त्रेभ्य उत्तरकालावस्थान मेव 'पर्येषु' इतिशब्देन विवक्षित मिति व्याख्यानम् ; अग्नीषोमीयकालस्य परस्तादितिशब्देनैव सिद्धत्वात् पर्येष्वितिशब्देन प्रस्तुतानां सूक्ता मध्ययनपाठादिपर्यायोऽभिधीयते ; विहितं षोड़शिशस्त्रम् — विहृत मविहृतं च । तत्राविहृतं नामाध्ययनक्रमेणैव शंसनम्, विहृतन्तु ऋचां परस्परव्यतिषङ्गः । स तु याज्ञवल्क्येन दर्शितः — "ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्त्रं विहरेत्, पादान् व्यवधायार्द्धर्चशः शंसेत्, पूर्वाभिः पूर्वाणि पदानि, गायत्र्याः पङ्क्तिभिः, पङ्क्तीनां तु द्वे द्वे पदे निधेते ताभ्यां शंसेत्" इति (या० ६.३.२-६.) । तदेतद्दृष्टान्तस्य प्रदर्शनं — "इमा धाना घृतस्नुवा हरी इहोप वक्षतः । इन्द्रं सुखतमे रथे तनेया गायत्री (सं० १.१६.२), "सुसंदृशं त्वा वयं मघवन् वन्दिषामहि । प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी" इति (सं० १.८२.३) । यास्य मध्ययनपाठः सोऽत्रोक्तः । विहृतपाठस्त्वृचं — "इमा धाना घृतस्नुव हरी इहोप वक्षतो मघवन् वन्दिषामहेन्द्रं सुखतमे रथे प्र नूनं पूर्णवन्धुरः । स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी" इति। अनेन प्रकारेण विपर्यस्य शंसेत् ।

अथ प्रथमोत्तराभ्यां षोड़शिशब्दं निर्वक्ति — "तदाहुः किं

षोळशिनः षोळशित्व मिति ? षोळश स्तोत्राणां षोळश शस्त्राणां, षोळशभिरक्षरैरादत्ते षोळशभिः प्रणौति षोळशपदां निविदं दधाति, तत् षोळशिनः षोळशित्वम्"-इति । षोड़शिशब्दो ग्रह-विशेषं स्तोत्रविशेषं शस्त्रविशेषं चाभिधत्ते *। तेषा मेकैकस्वरूप-वतां षोड़शशब्दवाच्यत्व मयुक्तम् ? तच्छब्दप्रवृत्तौ निमित्तान्तरं तु न पश्याम इति ब्रह्मवादिना मभिप्रायः । षोड़शसङ्ख्यायुक्तत्वात् षोड़शित्व मित्युत्तरम् । तत्र कथ मिति, तदुच्यते—अग्निष्टोम-संस्थो ज्योतिष्टोमः द्वादशस्तोत्रोपेतः । तथा च शाखान्तरे श्रूयते —"द्वादशाग्निष्टोमस्य स्तोत्राणि"-इति (ता० ब्रा० ६.३.३.) । तद्गर्भित उक्थ्यसंस्थश्चिभिः स्तोत्रैरतिरिच्यते ; तस्मात् पञ्चदश स्तोत्राणि भवन्ति । तद्गर्भितः षोड़शिसंस्थ एकेन स्तोत्रेणाति-रिच्यते ; ततः स्तोत्राणां मध्ये एतत्स्तोत्रप्रयोगः षोड़शसङ्ख्यापूरको भवति । तथा शस्त्राणां मध्येऽप्येतच्छस्त्रप्रयोगः षोड़शसङ्ख्यापूरकः । किञ्चाभिच्छस्ते होता सम्पादिताया अनुष्टुभः पूर्वार्धगतानि षोड़शाक्षराण्युच्चार्य अवस्थति, उत्तरार्धगतानि षोड़शाक्षराण्यु-च्चार्य 'प्रणौति' प्रणव मुच्चारयति । किञ्च "अस्य मदे जरितः"-इत्यादिका षोड़शपदोपेता निवित् (निवि० ११.१—१६.) शस्त्र-मध्ये प्रक्षिप्यते । अतो बहुधा षोड़शसङ्ख्यायोगात् अयं प्रयोगः षोड़शिनामोपेतः ॥

प्रकारान्तरेण षोड़शिनं प्रशंसति — "द्वे वा अक्षरे अति-रिच्येते षोड़शिनोऽनुष्टुभ मभिसम्पन्नस्य वाचो वावतौ स्तनौ, सत्यानृते वाव ते"-इति । योऽयं षोड़शी, सोऽयं द्वाक्षराधिका मनुष्टुभं यदा सम्प्राप्तो भवति, तदानीं द्वे एवाक्षरे अधिके भवतः ।

* "एतत् सर्वं सह क्रियते यद्धः स्तोत्रं शस्त्रम्"-इति श्रुतः ब्रा० ८.१.३.४।

तथा हि सूत्रकारः—"विहृतस्य"-इत्युपक्रम्य शाखान्तरीया मिन्द्र जुषस्वेत्यादिका ऋचः पठितवान् (आश्व० श्रौ० ६.३.१.)। तस्याः पूर्वस्मिन्नर्धर्चे षोडशाक्षराणि, उत्तरे ऽर्धर्चे अष्टादश; ततो ऽक्षरद्वयाधिक्यम्। "वाग् वा अनुष्टुप्"-इतिश्रुत्यन्तरेण (६. ५.१०.) तस्या वाचो ऽनुष्टुब्वयवत्वात्तदात्मिकायाः वाग्देवतायाः स्त्रीरूपायाः अधिकाक्षररूपौ 'स्तनौ' सम्पद्येते;—यदेतत् लोके सत्यवदनम्, यच्चानृतवदनम्, तदुभय मपि वाचः स्तनरूपम्; अतोऽधिकाक्षरायाः सत्यानृतरूपत्वम्॥

उक्तार्थवेदनं प्रशंसति – "अवत्येनं सत्यं नैन मनृतं हिनस्ति य एवं वेद" इति। 'एनं' वेदितारं सत्यवाक् पालयति, सुकृतोत्पादकत्वात्; अनृतवाक् न हिनस्ति, दुरितस्यानुदयात्॥ १॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये
(षोडशाध्याये) प्रथमः खण्डः॥ १॥

॥ अथ द्वितीयः खण्डः॥

गौरिवीतं षोऽशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं गौरिवीतं तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गौरिवीतं षोऽशिसाम कुरुते नानदं षोऽशिसाम कर्त्तव्य मित्याहु-

रिन्द्रो वै वृत्राय वज्रं मुदयच्छत्त मस्मै प्राहरत्त मभ्यहनत्सोऽभिहतो व्यनदद्यद् व्यनदत्तं नानदं सामाभवत्तन्नानदस्य नानदत्व मभ्रातृव्यं वा एतद् भ्रातृव्यहा साम यन्नानद मभ्रातृव्यो भ्रातृव्यहा भवति य एवं विद्वान्नानदं षोळशिसाम कुरुते तद्यदि नानदं कुर्युरविहृतः षोळशी शंस्तव्यो ऽविहृतासु हि तासु स्तुवते यदि गोरिवीतं विहृतः षोळशी शंस्तव्यो ऽविहृतासु हि तासु स्तुवते ॥ २ ॥

षोडशिग्रहं विधाय षोडशिस्तोत्रनिष्पादकं सामविशेषं विधत्ते— "गोरिवीतं षोळशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं गोरिवीतं तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गोरिवीतं षोळशिसाम कुरुते"—इति। अत्र चित्रमहर्षिणा गोरिवीतनाम्ना दृष्टत्वात्सामापि गोरिवीतनामकम्। तत्तु, "अभि प्र गोपतिं गिरा"—इत्यस्या सूचि उत्पन्नम्*; तदत्र षोळशिस्तोत्रे साम कुर्वीत †। 'तेजः' शरीरकान्तिः। 'ब्रह्मवर्चसं' श्रुताध्ययनसम्पत्तिः॥

सामान्तर विधत्ते — "नानदं षोळशिसाम कर्तव्य मित्याहु रिन्द्रो वै वृत्राय वज्रं मुदयच्छत्, त मस्मै प्राहरत्,त मभ्यहनत्; सोऽभिहतो व्यनदद्; यद् व्यनदत्तन्नानदं सामाभवत्, तन्नानदस्य नानदत्वम्; अभ्रातृव्यं वा एतद् भ्रातृव्यहा साम यन्नानदम्"—

* ऋ० आ० २.२.३, ४; गे० गा० ४.१.२०।

† उ० आ० ३.१.२२.१—३; ज० गा० ३.१.२; ग्रा० ग्रा० १२, १३.९।

इति । नानदाख्यं किञ्चित् साम ; तत्तु "प्रत्यश्वै पिपीषते"-इत्यस्या ऋचि उत्पन्नम्*, तदेतत्साम षोडशिस्तोत्रे† कर्त्तव्य मित्यन्ये केचिदाहुः‡ । तस्य नानदत्वं कथ मिति, तदुच्यते—वज्रप्रहारेणाभिहतो वृत्रो 'व्यनदत्' विशिष्ट मुच्चैर्ध्वनिं नादं कृतवान् । स च ध्वनिर्नानदसामाकारेण सम्पन्नः । ततो नादोत्पन्नत्वान्नानद मिति नाम । तत्साम भ्रातृव्यरहितम् ;—तत्परिशीलनवन्तः सर्वेऽपि मैत्री मेव प्रतिपद्यन्ते, न तु कञ्चिदपि द्वेषम् । किञ्चैतत्साम 'भ्रातृव्यघ्न' पूर्वं विद्यमानस्य शत्रोर्घातकम् ॥

वेदनं प्रशंसति—"अभ्रातृव्यो भ्रातृव्यघ्ना भवति य एवं विद्वान्नानदं षोळशिसाम कुरुते"-इति । गौरिवीतं नानदं वा सामेत्येतं पक्षद्वयं सम्पन्नम् § ॥

द्वयोः पक्षयोः शस्त्रविशेषव्यवस्थां विधत्ते—"तथदि नानदं कुर्युरविकृतः षोळशी शंस्तव्यो ऽविकृतासु हि तासु स्तुवते ; यदि गौरिवीतं विकृतः षोळशी शंस्तव्यो विकृतासु हि तासु स्तुवते"-इति । अविकृतरूपः परस्परव्यतिषङ्गरहितो यथाधीतपाठः ; सोऽयं नानदपक्षे कर्त्तव्यः । यतः सामगा अपि 'अविकृतासु' व्यतिषङ्गरहितासु नानदसाम्ना स्तुवते, तस्मादविकृतत्व मेवात्र योग्यम् ; "यथा वाव स्तोत्र मेवं शस्त्रम्"-इतिन्यायात् । गौरिवीतपक्षे शस्त्र मपि परस्परव्यतिषङ्गेण विकृतं पठनीयम् ;

---

* ऋ० सा० ४.२.२.१ ; गे० गी० ९.२.१३ ।

† उ० सा० १.१.१८.१–२ ; ऊ० गी० २.२.१८ ।

‡ "कौपालपुत्र उपोदितिर्नाम ऋषिरुवाच"-इति ता० ब्रा० १२. १३.११.सा० भा० ।

§ देशभेदेन चानयोर्भेदस्थेऽपि ज्ञापिता (ता० ब्रा० १२.१३.११.) सा० भा० ।

सामगैः "विकृतासु" व्यतिषक्तासकृच्च गौरिवीतसाम्ना स्तूय-मानत्वात् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये (षोड़शाध्याये) द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

अथातश्छन्दांस्येव व्यतिषजत्या त्वा वहन्तु हरय उपो षु शृणुही गिर इति गायत्रीश्च पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः पशवः पुरुष मेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदु गायत्री च पङ्क्तिश्च ते द्वे अनुष्टुभौ तेनो वाचोरूपा-दनुष्टुभोरूपाद्जगत्यै रूपान्नैति यदिन्द्र पृतनाज्ये ऽयन्त अस्तु हर्यत इत्युष्णिहश्च बृहतीश्च व्यतिषजत्यौष्णिहो वै पुरुषो बार्हताः पशवः पुरुष मेव तत्पशुभिर्व्यति-षजति पशुषु प्रतिष्ठापयति यदुष्णिक् च बृहती च ते द्वे अनुष्टुभौ तेनो वाचोरूपादनुष्टुभोरूपाद्जगत्यै रू-पान्नैत्या धूर्ष्वस्मै वृह्मन्वीर वृह्मकृतिं जुषाण इति द्विपदां च त्रिष्टुभं च व्यतिषजति द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्पुरुष मेव तद्वीर्येण व्यतिषजति वीर्ये

प्रतिष्ठापयति तस्मात्पुरुषो वीर्ये प्रतिष्ठितः सर्वेषां पशूनां वीर्यवत्तमो यदु द्विपदा च विंशत्यक्षरा त्रिष्टुप् च ते हे अनुष्टुभौ तेनो वाचोरूपादनुष्टुभो रूपाद्गरूपान्नैत्येष ब्रह्म प्र ते महे विदथे शंसिषं हरी इति द्विपदाश्च जगतीश्च व्यतिषजति द्विपाद्वै पुरुषो जागताः पशवः पुरुष मेव तत्पशुभिर्व्यति-षजति पशुषु प्रतिष्ठापयति तस्मात्पुरुषः पशुषु प्रतिष्ठितोऽत्ति चैनानधि च तिष्ठति वशेचास्य यदु द्विपदा च षोऽशाक्षरा जगती च ते हे अनुष्टुभौ तेनो वाचोरूपादनुष्टुभोरूपाद्गरूपान्नैति चिकद्रु-केषु महिषो यवाशिरं प्रोष्ठश्चै पुरो रथ मित्यतिच्छ-न्दसः शंसति छन्दसां वै यो रसो ऽत्यक्षरत्सोऽतिच्छ-न्दस मभ्यत्यक्षरत्तदतिच्छन्दसोऽतिच्छन्दस्त्वं सर्वेभ्यो वा एषच्छन्दोभ्यः सन्निर्मितो यत् षोऽशी तद-तिच्छन्दसः शंसति सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्मिमीते सर्वेभ्यश्छन्दोभ्यः सन्निर्मितेन षोऽश-शिना राध्नोति य एवं वेद ॥ ३ ॥

अथ विहरणप्रकारं विधत्ते— "अथातश्छन्दांस्येव व्यतिष-जति; आ त्वा वहन्तु हरय, उपो षु शृणुही गिर इति गायत्रीश्च पङ्क्तीश्च व्यतिषजति ; गायत्रो वै पुरुषः, पाङ्क्ताः पशवः पुरुष मेव

तत्पशुभिर्व्यतिषजति, पशुषु प्रतिष्ठापयति यदु गायत्री च पङ्क्तिश्च, ते हे अनुष्टुभौ, तेनो वाचोरूपादनुष्टुभोरूपाद्बृहतीरूपाच्चेति"—इति। 'अथ' सामदयविधानानन्तरम्, 'अतः' गोरिवीतपक्षे विकृतस्यापेक्षितत्वात्, तदुच्यत इति शेषः। स्वस्वस्थानादिभज्यान्यत्र नयनं 'विहरणम्'। तच्च समानच्छन्दस्कयोरेव भवति, तदभावस्यार्थं मुच्यते— 'छन्दांस्येव व्यतिषजति'-इति। परस्परविलक्षणानि छन्दांस्येव व्यतिषिक्तानि कुर्युरिति। तत्र कस्य छन्दसः केन छन्दसा सह व्यतिषङ्ग इति, तदेतदुदाहरणपूर्वकं प्रदर्श्यते— "आ त्वा वहन्तु"—इत्यादिकास्तिस्र ऋचः (सं० १. १६. १–३.) गायत्रीच्छन्दस्काः; "उपो षु" इति (सं० १.८२.१.), "सुसन्दृशम्"—इति हे (सं०१.८२.३,४.); एतास्तिस्रः पङ्क्तिच्छन्दस्काः; ता उभयीः परस्परं व्यतिषजन्निमयत्। गायत्र्याः प्रथमपाद मुद्धृत्य तेन सह पङ्क्तेः प्रथमपाद मुद्धारयेत्। सोऽयं प्रकारोऽस्माभिः पूर्वं मेवोदाहृतः (२४९ पृ०)। लोके 'पुरुषो गायत्रः' उपनीतेन गायत्र्या अनुष्ठेयत्वात्, 'पशवश्च पाङ्क्ताः' चतुर्भिः पादैर्मुखेन च पञ्चमङ्क्त्युपेतत्वात्। तत्र गायत्रीपङ्क्तयोर्मेलनेन पुरुषस्य पशूनां च मेलनं भवति। अतः पुरुषं पशुषु प्रतिष्ठापयति। किं च तदूर्ध्वेण कारणेन गायत्री च पङ्क्तिश्च मिलिते सत्यते हे अनुष्टुभौ सम्पद्येते; गायत्र्यास्त्रिपादत्वात्, पङ्क्तेश्च पञ्चपादत्वात्, मिलित्वाष्टानां पादानां विद्यमानत्वात्। 'तेनो' तेनैव मेलनेन कारणेनायं पुरुषो वाग्रूपादनुष्टुब्रूपाद्बृहतीरूपाच्च 'नैति' कदाचिदपि वियुक्तो न भवति। अक्षरात्मकत्वेन वाग्रूपत्वम्, अष्टपादसम्पत्तावनुष्टुब्रूपत्वम्, षोडशिनः पक्षादिनियामकत्वेन बृहद्रूपत्वम्; अतो नास्ति त्रिविधवियोगम्॥

छन्दोन्तरयोर्विहरणं विधत्ते—"यदिन्द्र प्रागपागुदग्वा, अयं ते अस्तु हर्यत इत्युष्णिहश्च बृहतीश्च व्यतिषजत्यौष्णिहो वै पुरुषो बार्हताः पशवः, पुरुष मेव तत् पशुभिर्व्यतिषजति, पशुषु प्रतिष्ठापयति ; यदुष्णिक् च बृहती च ते वे अनुष्टुभौ, तेनो वाचोरूपादनुष्टुभोरूपाद्ऋरूपावैति" इति । "यदिन्द्र"-इत्यादिकास्तिस्र उष्णिक्छन्दस्का ऋचः (सं० ८.१२.२५-२७), "अयं ते अस्तु"-इत्यादिकास्तिस्रो बृहतीच्छन्दस्काः (सं० ३.४४.१-३) ; उपनीतः पुरुषो व्याहृत्यक्षरचतुष्टयोपेतां चतुर्विंशत्यक्षरां गायत्रीं व्यतिषजति, उष्णिक् चाष्टाविंशत्यक्षरा, ततः पुरुषस्यौष्णिहत्वं पशूनां बार्हतत्वम् । शास्त्रान्तरे श्रुतम्—"छन्दांसि पशवोऽजि मयुस्तान् बृहत्युदजयत् ; तस्माद्बार्हताः पशव उच्यन्ते"-इति (तै० सं० ५.३.२.३) । बृहती च षट्त्रिंशदक्षरा, तस्या उष्णिग्योगे सति पञ्चत्रिंशमन्यत्तरनुष्टुब्द्वयम् ॥

छन्दोन्तरयोर्विहरणं विधत्ते—"आ धूर्षदस्मै, ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति द्विपदां च त्रिष्टुभं च व्यतिषजति ; द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्पुरुष मेव तद्वीर्येण व्यतिषजति, वीर्यं प्रतिष्ठापयति ; तस्मात्पुरुषो वीर्ये प्रतिष्ठितः, सर्वेषां पशूनां वीर्यवत्तमो यदु द्विपदा च त्रिंशत्यक्षरा त्रिष्टुप् च, ते वे अनुष्टुभौ, तेनो वाचोरूपादनुष्टुभोरूपाद्ऋरूपावैति"-इति । "आ धूर्षदस्मै"-इत्येषा (सं० २.३४.४) पादद्वयोपेता, "ब्रह्मन् वीर"-इत्येषा (सं० ७.२८.२) त्रिष्टुप्छन्दस्का ; पुरुषस्य द्विपादत्वं प्रसिद्धम्, त्रिष्टुभो वीर्यहेतुत्वाद्वीर्यवत्त्वं ; तस्मादुभयसम्बन्धेन पुरुषं वीर्ये प्रतिष्ठापयति । तस्मात् लोकेऽपि सर्वेषां द्विपदां चतुष्पदानां पशूनां मध्ये पुरुषस्य शक्त्याधिक्यात् पुरुषो वीर्ये प्रतिष्ठितः ।

द्विपदा चेयं विंशत्यक्षरा ; अष्टाक्षरे प्रथमे पादे संयुक्ताक्षरयोर्विभागेन पञ्चाक्षरत्वे सति दशसङ्ख्यापूर्त्तेः । एवं पञ्चाक्षरैस्त्रिष्टुभश्चतुर्णां पादानां सन्धानम् । त्रिष्टुप् चत्वारिंशदक्षरा । मिलित्वा चतुष्षष्टिसम्पत्त्यानुष्टुब्द्वयं सम्भवति ॥

छन्दोन्तरयोर्विहरणं विधत्ते — "एष ब्रह्म, प्र ते मह्ने विदथे शंसिषं हरो इति द्विपदाश्च जगतीश्च व्यतिषजति; द्विपाद्वै पुरुषो जागताः पशवः, पुरुष मेव तत्पशुभिर्व्यतिषजति, पशुषु प्रतिष्ठापयति ; तस्मात् पुरुषः पशुषु प्रतिष्ठितो ऽत्ति चैनानधि च तिष्ठति वशे चास्य; यदु द्विपदा च षोडशाक्षरा जगती च, ते द्वे अनुष्टुभौ, तेनो वाचोरूपादनुष्टुभोरूपाद्वाग्रूपान्नैति" इति । "एष ब्रह्म" - इत्यादिकास्तिस्रो द्विपदाः, "प्र ते मह्ने" इत्यादिकास्तिस्रो जगत्यः (सं० १०.९६.१-३.) ; पशूनां जागतत्वं शाखान्तरे सोमाहरण-कथायां श्रूयते - "सा पशुभिश्च दीक्षया चागच्छत् ; तस्माज्जगतीच्छन्दसां पशव्यतमा" - इति (तै० सं० ६.१.६.२.) । यस्मात् मेलनेन पुरुषं पशुषु प्रतिष्ठापयति, तस्मादयं पुरुषः पशुषु प्रतिष्ठितः, तस्मिन् चौरादिक मत्ति च, 'एनान्' पशून् 'अधितिष्ठति' नियमयति च ; तस्मात् 'अस्य' पुरुषस्य वशे सर्वे पशवो वर्त्तन्ते । 'यदु' यस्मादेव कारणादियं द्विपदा षोड़शाक्षरा, जगती चाष्टा-चत्वारिंशदक्षरा, ततो मिलित्वा चतुष्षष्टित्वादनुष्टुब्द्वयम् ॥

छन्दोन्तरसंयुक्ताः काश्चिदृचो विधत्ते — "त्रिकद्रुकेषु महिषो यवाशिरं, प्रो ष्वस्मै पुरो रथ मित्यतिच्छन्दसः शंसति; छन्दसां वै यो रसो ऽत्यक्षरस्सो ऽतिच्छन्दस मथ्यत्यक्षरत्वदतिच्छन्दसो ऽतिच्छन्दस्त्वं ; सर्वेभ्यो वा एष छन्दोभ्यः सन्निर्मितो यत् षोळशी, तद्यदतिच्छन्दसः शंसति सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्मिमीते" -

इति । "त्रिकद्रुकेषु"-इतिऋचे यास्तिस्रः (सं० २.३२.१-३.) ऋचस्ता अतिच्छन्दोयुक्ताः, तथा "प्रो ष्वस्मै"-इति (सं० १०. १३३.१-३.) ऋचोऽपि ; ता उभयीः शंसेत् । 'छन्दसां' गायत्र्यादीनां यो 'रसः' सारः 'अत्यक्षरत्' अतिशयेनास्रवत्, तदानीं स रसोऽतिच्छन्दस मभिलक्ष्यातिशयेनास्रवत् । 'तत्' तस्माच्छन्दोरसस्यातिशयेन स्रवणादतिच्छन्दस्त्वं नाम सम्पन्नम् । षोडशी षोडशप्रकारेण सर्वेभ्यः छन्दोभ्यः सम्यक् निर्मितः ; तस्माद् अतिच्छन्दसां शंसनेनायं होता 'एनं' यजमानं सर्वेच्छन्दोभ्यो निर्मिमीते ॥ वेदनं प्रशंसति— "सर्वेभ्यश्छन्दोभ्यः सन्निर्मितेन षोळशिना राध्नोति य एवं वेद" इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये (षोड्याध्याये) तृतीयः खण्डः ॥ ३ ॥

॥ अथ चतुर्थः खण्डः ॥

महानाम्नीना मुपसर्गानुपसृजत्ययं वै लोकः प्रथमा महानाम्न्यन्तरिक्षलोको द्वितीयासौ लोकस्तृतीया सर्वेभ्यो वा एष लोकेभ्यः सन्निर्मितो यत् षोळशी तद्यन्महानाम्नीना मुपसर्गानुप सृजति सर्वेभ्य एवैनं तल्लोकेभ्यः सन्निर्मिमीते सर्वेभ्यो लोकेभ्यः सन्निर्मितेन षोळशिना राध्नोति य एवं वेद

प्र प्र वस्त्रिष्टुभ मिष मर्चत प्रार्चत यो व्यतीँरफाण-
यदिति प्रस्तुता अनुष्टुभः शंसति तद्यथेह चेह
चापथेन चरित्वा पन्थानं पर्यवेयात्तादृक्तद्यत्प्रस्तुता
अनुष्टुभः शंसति स यो व्याप्तो गतश्रीरिव मन्येता-
विहृतं षोळशिनं शंसयेन्नेच्छन्दसां क्रुच्छादवपद्या
इत्यथ यः पाप्मान मप जिघांसुः स्यादिहृतं षोळ-
शिनं शंसयेद् व्यतिषक्त इव वै पुरुषः पाप्मना
व्यतिषक्त मेवास्मै तत्पाप्मानं शमल मपहन्त्यप
पाप्मान हते य एवं वेदोद्यद् ब्रध्नस्य विष्टप मित्युत्त-
मया परि दधाति स्वर्गो वै लोको ब्रध्नस्य विष्टपं
स्वर्ग मेव तल्लोकं यजमानं गमयत्यपाः पूर्वेषां
हरिवः सुताना मिति यजति सर्वेभ्यो वा एष
सवनेभ्यः सन्निर्मितो यत् षोळशी तद्यदपाः पूर्वेषां
हरिवः सुताना मिति यजति पीतवद्वै प्रातस्सवनम्
प्रातस्सवनादेवैनं तत्सन्निर्मिमीते ऽथो इदं सवनं
केवलं त इति माध्यन्दिनं वै सवनं केवलं माध्य-
न्दिनादेवैनं तत्सवनात्सन्निर्मिमीते ममद्धि सोमं
मधुमन्त मिन्द्रेति मदवद्वै तृतीयसवनं तृतीयसव-
नादेवैनं तत्सन्निर्मिमीते सखा वृषञ्छठर आ वृष-
स्वेति वृषण्वद्वै षोळशिनो रूपं सर्वेभ्यो वा एष सव-

नेभ्यः सन्निर्मितो यत् षोऽशी तदादपाः पूर्वेषां हरिवः सुताना मिति यजति सर्वेभ्य एवैनं तत्सव-नेभ्यः सन्निर्ममीते सर्वेभ्यः सवनेभ्यः सन्निर्मितेन षोऽशिना राध्नोति य एवं वेद महानाम्नीनां पञ्चा-च्चरानुपसर्गानुपसृजत्येकादशाच्चरेषु पादेषु सर्वेभ्यो वा एष च्छन्दोभ्यः सन्निर्मितो यत् षोऽशी तद्यन्महानाम्नीनां पञ्चाच्चरानुपसृजत्येकादशाच्चरेषु पादेषु सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्ममीते सर्वेभ्यश्छन्दोभ्यः सन्निर्मितेन षोऽशिना राध्नोति य एवं वेद ॥ ४ ॥

अथ पूर्वोक्तानां मतिच्छन्दसां मनुष्टुप्सम्पादनाय मेलनं विधत्ते — "महानाम्नीना मुपसर्गानुपसृजति"-इति। "विदा मघ-वन्"-इत्यस्मिन्ननुवाके प्रोक्ता ऋचो 'महानाम्न्यः' (आर० ४.१. १-९.) ; तासां सम्बन्धिन उपसर्गाः पञ्चविधाः। ते चाश्वलायनेन दर्शिताः - "प्र चेतन, प्र चेतया, आ याहि पिब मत्स्व, ऋतुश्छन्द ऋतं बृहत्, सुत्र आ धेहि नो वमवित्यनुष्टुप्" - इति (श्रौ० ६.२.९.)। तत्र 'प्र चेतनेत्येकः प्रथम उपसर्गः, 'प्र चेतयेति द्वितीयः ; तावु-भावपि द्वितीयस्यां महानाम्न्यां मात्रातौ। 'आ याहि पिब मत्स्वेति तृतीय उपसर्गस्तृतीयस्यां महानाम्न्यां मात्रातः। 'ऋतु-श्छन्द ऋतं बृहदित्ययं चतुर्थ उपसर्गः ; स च षष्ठ्यां महानाम्न्यां मात्रातः। 'सुत्र आ धेहि नो वमवितिं पञ्चम उपसर्गः ; स

चाष्टम्यां महानाम्न्या मात्राताः। एतेषु पञ्चसूपसर्गेषु मिलित्वा द्वात्रिंशदक्षरसङ्गावादिय मेकानुष्टुबिति सूत्रस्यार्थः। इयं चानुष्टुबविकृतषोडशिनि तथैव पठनीया, अन्यत्र तु विकृतषोडशिनि पञ्चाप्युपसर्गान्विभज्यातिच्छन्दःसु पञ्चसु योजनीयाः। अतएवोपसृज्यमानत्वादुपसर्गा इत्युच्यन्ते। तदेतत्संयोजन मत्र 'उपसृजति' -इति शब्देन विधीयते। "विकटुकेषु"-इति येयं प्रथमा अतिच्छन्दाः, तस्याश्चतुष्षष्ट्यक्षरत्वात् परानपेक्षेणैव अनुष्टुब्द्वयसम्पत्तिः शक्येति द्वितीयस्या ऋचि तदनुष्टुब्द्वयं पूरयितुं 'प्र चेतन'-इत्यक्षरचतुष्टयं योजनीयम्, तृतीयस्या ऋचि 'प्र चेतया'-इति योजनीयम्। "प्रो ष्वस्मै"-इत्यादिषु तिसृषु अवशिष्टास्तय उपसर्गाः क्रमेण योजनीयाः। सोऽयं प्रकार आश्वलायनेनोक्तः — "ता मनुष्टुभ मतिच्छन्दःस्ववधाय द्वितीयतृतीययोः पादयोरवसानत उपदध्यात्;—प्र चेतनेति पूर्वस्याम्, प्र चेतयेत्युत्तरस्याम्, उत्तराखितरान् पादान् षष्ठान् कृत्वानुष्टुप्कारं शंसेत्"-इति (श्रौ० ६.३.११.१२.)॥

अथ महानाम्नीः प्रशंसति— "अयं वै लोकः प्रथमा महानाम्न्यन्तरिक्षलोको द्वितीयासौ लोकस्तृतीया; सर्वेभ्यो वा एष लोकेभ्यः सन्निर्मितो यत् षोळशी तथ्यमहानाम्नीना मुपसर्गानुप्रसृजति; सर्वेभ्य एवैनं तल्लोकेभ्यः सन्निर्ग्मीमीते"-इति। प्रथमत्वादिसाम्येन लोकत्रयरूपत्वं ऋचां द्रष्टव्यम्; षोडशिनो लोकत्रये निर्ग्मितत्वात्। महानाम्नीना मुपसर्गैः संयोजने सति तन्निर्ग्माणं सिध्यति॥

वेदनं प्रशंसति— "सर्वेभ्यो लोकेभ्यः सन्निर्ग्मितेन षोडशिना राध्नोति य एवं वेद"-इति॥

अथ विहरणनेरपेक्ष्येणाध्यापकैः प्रज्ञाताः नवानुष्टुभो लिख्यते —"प्र प्र वस्रिष्टुभमिष मर्चत प्रार्चत, यो व्यतीँरफाण्यदिति प्रज्ञाता अनुष्टुभः शंसति"-इति। "प्र प्र वः"-इत्येकस्तृचः प्रथमः (सं० ८.६८.१ ३.), "अर्चत"-इति द्वितीयः (सं० ८.६८.८-१०.), "यो व्यतीन्"-इति तृतीयः (सं०८.६८.१२-१५)। यथा लोके कश्चिन्मार्गानभिज्ञः तत्र तत्र केनचिदपथेन चरित्वा पश्चादन्यमुखेन विज्ञाय समीचीनं पन्थानं परिगच्छेत्, एव मत्रापि पूर्वोक्तरीत्या कृत्रिमा अनुष्टुभः शस्त्वा पश्चादेतासां स्वतःसिद्धानां अनुष्टुभां शंसनं द्रष्टव्यम् ॥

पूर्वत्र सामविशेष मुपजीव्य विकृताविकृतयोः शस्त्रविशेषयोर्व्यवस्था दर्शिता ; इदानीं पुरुषविशेष मुपजीव्य तां व्यवस्थां दर्शयति— "स यो व्याघ्रो गतश्रीरिव मन्येताविकृत षोळशिनं शंसयेन्नेक्न्दसां कृच्छ्रादवपद्या इत्यथ यः पाप्मान मप जिघांसुः स्यादविकृतं षोळशिनं शंसयेद् ; व्यतिषक्त इव वै पुरुषः पाप्मना व्यतिषक्त मेवास्मै तत् पाप्मानं शमल मप हन्ति"-इति। 'सः' लोकप्रसिद्धः, यः पुरुषः पुत्रपौत्रादिभिः व्याप्तो 'गतश्रीरिव' प्राप्तश्रीवत् समृद्धधन एवाहं मिति मन्यत, स पुमान् 'अविकृतं' विकरणरहितं षोडशिनं 'शंसयेत्' अविकृते शस्त्रे होतारं प्रेरयेत्। तस्य कोऽभिप्राय इति, स उच्यते—'छन्दसां कृच्छ्रात्' पूर्वोक्तानां गायत्र्यादीनां विहरणक्लेशात् 'अवपद्यं' अवपत्तिं आपदं प्राप्नुयात् तस्मा भूदिति। विहरणप्रयुक्तभीतिद्योतनार्थो 'नेत्'-इति शब्दः। अथ यः पुमान् पुत्रधनराहित्यरूपं 'पाप्मानम्' 'अप जिघांसुः' अपहन्तु मिच्छन् स्यात्, स पुमान् विकृते शस्त्रे होतारं प्रेरयेत्। अयं पुरुषो दारिद्र्यादिरूपेण 'पाप्मना' 'व्यतिषक्त इव वै'

मिश्रित एव। तस्मात् विकृतप्रयोगेण पापरूपं 'शमलं' मालिन्य-हेतुं 'व्यतिषक्तं' दारिद्र्यादिसम्बन्धं च पशवो हन्ति॥ वेदनं प्रशंसति— "अप पाप्मानं हते य एवं वेद"-इति॥

अथ शस्त्रसमापनीयां काञ्चिदृचं विधत्ते— "ब्रध्नस्य विष्टप मित्युत्तमया परि दधाति; स्वर्गो वै लोको ब्रध्नस्य विष्टपं, स्वर्ग मेव तल्लोकं यजमानं गमयति"-इति। अस्या ऋचि "ब्रध्नस्य विष्टपम्"-इति (सं० ८. ६९. ७.) श्रूयते,— आदित्यो 'ब्रध्न'-शब्दवाच्यः; "असौ वा आदित्यो ब्रध्नः"-इति श्रुत्यन्तरात् (तै० सं० ५.३.३.५.); तस्य 'विष्टपं' स्थानं स्वर्गलोकः; अतस्तत्पाठेन यजमानं स्वर्गं प्रापयति॥

शस्त्रयाज्यां विधत्ते— "अपाः पूर्वेषां हरिवः सुतानां मिति यजति"-इति। 'हरिवः' हे इन्द्र! षोडशिनः पूर्वेषां 'सुतानां' सोमानां, रस मिति शेषः; 'अपाः' पीतवानसीति प्रथमपादस्यार्थः (सं० १०.९६.१३.)॥ तं मिमं पादं प्रशंसति— "सर्वेभ्यो वा एष सवनेभ्यः सन्निर्मितो यत् षोऽशी; तदपाः पूर्वेषां हरिवः सुतानां मिति यजति, पीतवद्वै प्रातस्सवनं; प्रातस्सवनादेवैनं तत्सन्निर्मिमीते"-इति। यः षोडशी विद्यते, एष सर्वेभ्यः सवनेभ्यः सम्यक् निर्मित इत्येवं सम्पादनीयम्। तथा सति यद्यपाः पूर्वेषा मिति पादं पठेत्, तदानीं तच्च प्रातस्सवनं 'पीतवत्' इन्द्रेण पीत मेवेत्थं मन्त्रः प्रतीयते; तस्मात् 'एनं' षोडशिनं प्रातस्सवनादेव निर्मितवान् भवति॥

तस्या ऋचो द्वितीयपाद मनूद्य व्याचष्टे—"अथो इदं सवनं केवलं त इति, माध्यन्दिनं वै सवनं केवलं, माध्यन्दिनादेवैनं तत्सवनात्सन्निर्मिमीते"-इति। 'अथो' अपि च हे इन्द्र! 'इदं' माध्य-

स्तुनं सवनं 'ते केवलं' तवैव सर्वम् । अस्मिन् पादे केवलं सवन मघोन्द्रस्येत्येतदुपपन्नम् ; इन्द्रेण पुरो द्वारं दृखता माद्येन्द्रं यहं माध्यन्दिनं सवनानां निष्केवल्यादीनां स्वार्थ मेव कृतत्वात् । अत एतत्पादपाठेन माध्यन्दिनसवनात् षोडशी निर्मितो भवति ॥

तृतीयपाद मनूद्य व्याचष्टे —"ममद्धि सोमं मधुमन्त मिन्द्रेति ; मद्दद्दे तृतीयसवनं, तृतीयसवनादेवैनं तत्सन्निर्मिमीते"–इति । हे इन्द्र ! 'मधुमन्तं' माधुर्यैरसोपेतं सोमं पीत्वा 'ममद्धि' मदं हर्षं प्राप्नुहि । अस्मिन् पादे मदिधात्वर्थः श्रूयते, तृतीयसवन मपि 'मद्दद्दे' मदिधातूपेतम् ; निवित्पदेषु * मदिधातोर्विद्यमानत्वात् । तस्मादेतत्पादपाठेन षोडशी तृतीयसवनान्निर्मितो भवति ॥

चतुर्थं पाद मनूद्य व्याचष्टे —"मत्रा हृषस्व जठर आ हृषस्वेति हृषस्वद्दे षोळशिनो रूपं, सर्वेभ्यो वा एष सवनेभ्यः सन्निर्मितो यत् षोळशी ; तद्यदाह पूर्वेषां हरिवः सुतानामिति यजति, सर्वेभ्य एवैनं तत्सवनेभ्यः सन्निर्मिमीते"–इति । हे 'हृषन्' वर्षणसमर्थ ! 'मत्रा' सोमयागरूपे सत्रे 'जठरे' स्वकीय उदर 'आ हृषस्व'समन्तात् सोमरसवृष्टिं कुरु । अत्र चतुर्थपादे 'हृषन्'-शब्दो विद्यते, षोडशिस्वरूप मपि 'हृषद्वत्' वर्षणोपेतम् ; तन्निष्केतृत्वात् । यः षोडशी विद्यते, सोऽय मुक्तेन प्रकारेण सर्वेभ्यः सवनेभ्यो हि निर्मितः, तस्मादेतत् पूर्वेषा मिति याज्यापाठेन सर्वसवनेभ्य एवैनं निर्मितवान् भवति ॥ वेदेन प्रशंसति —"सर्वेभ्यः सवनेभ्यः सन्निर्मितेन षोळशिना राध्नोति य एव वेद"–इति ।

अस्या याज्यायाः पादेषु पूर्ववदुपसर्गान् विधत्ते — "मद्धानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु ; सर्वेभ्यो

* "अस्य मदे"–इत्यादिषु (निरु० ११ । २६.) ।

वा एव छन्दोभ्यः सन्निर्मितो यत् षोऽशी ; तच्चतुर्महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु, सर्वेभ्य एवैनं तच्छन्दोभ्यः सन्निर्मिमीते"-इति। महानाम्नीना ऋचां सम्बन्धिनस्तदीयानुवाके समाम्नाताः "एवा ह्येवा"-इत्यादयः पञ्चाक्षरा उपसर्गाः (आर० ४.१.१०-१५.) तानेकादशाक्षरेष चतुर्ष्वपि पादेषु संयोजयेत् ; तथा सति चतुष्षष्ट्याक्षरत्वादनुष्टुब्वयं सम्पद्यते। एवं सति यः षोडशी सर्वेभ्यः छन्दोभ्यो निर्मातव्यः, सोऽय मेतत्संयोजनेन तथैव निर्मितो भवति॥ वेदनं प्रशंसति— "सर्वेभ्यश्छन्दोभ्यः सन्निर्मितेन षोडशिना राध्नोति य एवं वेद"-इति ※ ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये
(षोडशाध्याये) चतुर्थः खण्डः ॥ ४ ॥

॥ अथ पञ्चमः खण्डः ॥

अहर्वै देवा अश्रयन्त राज्ञी मसुराल्ले समावद्वीर्या एवासन्न व्यावर्तन्त सोऽब्रवीदिन्द्रः कथाहं चेमानितो

※ षोडशिसंस्थस्य ज्योतिष्टोमस्य विशेषविधय एवेष प्रथमादिचतुःखण्डेषु निर्दिष्टाः, एष्वेवंषु स्थितिर्भवत् ; २४१ पृ० '※' द्रष्टव्यम्। आश्वलायनेनापि "अथ षोडशी"-इत्यारभ्य "भक्षजपः"-इत्यन्तेन ग्रन्थेन (६. २, १.) तथैवोक्ताः। "षोडशिना वीर्यकामः"-इति वाजसनेयिविधिसूत्रम् (१४.१.२.)।

ऽसुरान् रात्री मन्ववेष्याव इति स देवेषु न प्रत्यविन्ददबिभयूरात्मन्मसो मृत्योस्तस्माद्याप्येतर्हि नग्नं यावन्मात्र मिवैवापाक्रम्य बिभेति * तम इव हि रात्रिर्मृत्युरिव तं वै छन्दांस्येवान्ववायंस्त यच्छन्दांस्येवान्ववायंस्तस्मादिन्द्रश्चैव छन्दांसि च रात्रौ वह्नि न निविक्षयते न पुरोरुड् न धाय्या नान्या देवतेन्द्रश्च ह्येव छन्दांसि च रात्रौ वह्नि तान्वै पर्यायैरेव पर्याय मनुदन्त यत् पर्यायैः पर्याय मनुदन्त तत्पर्यायाणां पर्यायत्वं तान्वै प्रथमेनैव पर्यायेण पूर्वराचादनुदन्त मध्यमेन मध्यराचादुत्तमेनापरराचादपिशर्वर्या अनु स्वसोत्यब्रुवन्नपिशर्वराणि खलु वा एतानि छन्दांसीति ह स्माहैतानि ह्येन्द्रं रात्रेरात्मन्मसो मृत्योर्बिभ्यत मत्यपारयंस्तदपिशर्वराणा मपिशर्वरत्वम् ॥ ५ ॥

षोड़शो समाप्तः, अथातिरात्रो वक्तव्यः; तत्रेन्द्रस्य छन्दसां च प्राधान्यं कथयितु मितिहास माह — "असुरैर्वै देवा अभ्रयन्त रात्रौ मसुरास्ते समावद्दोर्या एवामत्र व्यावर्तन्त, सोऽब्रवीदिन्द्रः, वाश्वाहं चेमानितो असुरान् रात्रौ मन्ववेष्याव इति ; स देवेषु न प्रत्यविन्ददबिभयूरात्मन्मसो मृत्योस्तस्माद्याप्येतर्हि नग्नं यावन्मात्र मिवैवापक्रम्य बिभेति ; तम इव हि रात्रिर्मृत्युरिव"—इति ।

* "बिभेति" क ।

पुरा कदाचिदहोरात्रयोर्मध्ये देवा अहरेवाश्रितवन्तः, असुराश्च रात्रिमाश्रितवन्तः ; 'ते' देवाश्च असुराश्च समानबला एवासन् ; बलाधिक्येन वर्गान्तराद् व्यावृत्त मितरवर्गस्थानं नाप्नुवन् । तदानीं इन्द्रो देवान् प्रत्यब्रवीत्,—मम सहायोऽपेक्षितः, हे देवाः ! भवतां मध्ये कश्चाहं च 'इमान्' असुरान् रात्रौ मनुगतान् 'इतः' रात्रेः 'अवेष्यावः' अपसारयिष्यावः ? इति । ततो विचार्य्य स इन्द्रो देवेषु मध्ये तादृशं शूरं कमपि प्रतीक्ष्य 'नाविन्दत्' न लब्धवान् । रात्रेः सम्बन्धि यत्तमो मृत्युसदृशम्, तस्मात्तमसो मृत्योरिव सर्वे देवाः 'अबिभयुः' भीता अभवन् । यस्माद्देवानां भीतिस्तस्मादिदानीमपि 'यावन्मात्र मिवेव' यत्किञ्चिदपि वा दूरं रात्रौ गृहादपक्रम्य सर्वपुरुषो ('बिभेति') बिभेति ; 'तम इव हि' तमोरूपैव रात्रिस्तस्मात् मृत्युरिव भयहेतुः ॥

अथ छन्दसा मिन्द्रसहकारित्वं दर्शयति— "त वै छन्दांस्येवान्ववायंस्तं यच्छन्दांस्येवान्ववायंस्तस्मादिन्द्रश्चैव छन्दांसि च रात्रीं वहन्ति ; न निविच्छस्यते, न पुरोरुक्, न धाय्या, नान्या देवतेन्द्रश्चैव छन्दांसि च रात्रीं वहन्ति"-इति । 'तं वै' असुरनिराकरणाय प्रवृत्तं त मेवेन्द्र मेकं गायत्र्यादिच्छन्दांस्येव 'अन्ववायन्' अनुगम्य निराकर्त्तुं गताः ; यस्मादेवं तस्मादिन्द्रच्छन्दांस्येवाङ्गतया अतिरात्रप्रयोगे 'रात्रीं वहन्ति' रात्रिप्रयोगस्य निर्वाहकाणि भवन्ति । इन्द्रविषयच्छन्दांस्येव तत्र शस्यन्ते, न तु निविद्वा पुरोरुग्वा धाय्या वा देवतान्तरं वा किञ्चिच्छस्यते ; तस्मादिन्द्रः छन्दांसि चेत्येतावन्त एव निर्वाहकाः ॥

तेषा मिन्द्रच्छन्दसा मसुरान्निराकरणसाधनं दर्शयति—"तान्वै पर्य्यायैरेव पर्य्याय मनुदन्त ; यत् पर्य्यायैः पर्य्याय मनुदन्त,

तत् पर्य्यायाणां पर्य्यायत्वम्"-इति। 'तान्वै' रात्रि सम्बन्धितान् असुरान् 'पर्य्यायैः' चमसगणानां क्रमानुष्ठानैरेव पर्य्यायैः, तत्र तत्र यतमाना यागभूमौ परीत्य 'अनुदन्त' निराकृतवन्तः। यत्र यत्रासुराः सुमा अवस्थिताः, तत्र तत्र प्रयत्नेनावेक्ष्य निःसारितवन्तः। द्वादशानाञ्चमसगणाना मनुष्ठानाय त्रयः पर्यायाः; एकैकस्मिन् पर्याये चत्वारो गणा अनुष्ठीयन्ते। यस्मात्परितो गत्वा गत्वा चममपर्यायैर्निराकृतवन्तः, तस्मात्परिगम्य निराकरणसाधनत्वात्पर्य्यायत्वं सम्यक्॥

क्रमेण निराकरणप्रकारं दर्शयति--"तान्वै प्रथमेनैव पर्य्यायेण पूर्वरात्रादनुदन्त, मध्यमेन मध्यरात्रादुत्तमेनापररात्राद्"-इति। दश दश घटिका एकैको भागः; इत्येवं रात्रेस्त्रयो भागाः; चत्वारश्चमसगणा एकः पर्य्यायः, इत्येव द्वादशानाञ्चमसगणानां त्रयः पर्य्यायाः; तैः क्रमेण रात्रिभागत्रयादसुरानपानुदन्त॥

तस्मिन्विराकरणे छन्दसां सौकर्य्याधिक्येन प्रशंसां दर्शयति—"अपि शर्वर्या अनु स्मसोत्यब्रुवन्नपिशर्वराणि खलु वा एतानि छन्दांसीति ह स्माहैतानि होन्द्रं रात्रेस्तमसो मृत्योर्बिभ्यत मत्यपारयंस्तदपिशर्वराणा मपिशर्वरत्वम्"-इति। हे इन्द्र! वयमपि 'शर्वयोः' छत्स्नाया रात्रेः सकाशादसुरानपसारयितुं त्वा मनु गम्य 'स्मसि' तिष्ठामः, इत्येवं छन्दांस्यब्रुवन्। तदेतद्वाक्यं मैत्रेयः श्रुत्वा तदानीं मेवैतानि छन्दांसि 'अपिशर्वराणि' एवेति नाम्ना व्यवहृतवान्*। एतच्च युक्तम्,—यस्मात् मृत्योरिव रात्रेस्तमसो बिभ्यत मिन्द्रम् 'एतानि' छन्दांसि 'अत्यपारयन्', यस्मात् हेतो रात्रि

* "अपिशर्वरे--शर्वरीमुखे प्रथिविहरणकालेऽपि"-इति (का० सं० ३.१.७.), "अपिशर्वरे— शर्वरी रात्रि मपिगत: कालोऽपिशर्वर:"-इति च (ऋ० सं० ८.१.२४.) सा०भा०।

मतीत्य नीतवन्ति, तस्मात्कारणाच्छ्वर्याः सर्वेभ्योऽपि पारुनयनं द्योतयितुम् 'अपिशर्वराणि'-इति नाम छन्दसां युक्तम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये (षोडशाध्याये) पञ्चमः खण्डः ॥ ५ ॥

॥ अथ षष्ठः खण्डः ॥

पात्त मा वो अभ्यस दूत्यभ्यख्यानुष्टुभा रात्रीं प्रतिपद्यत आनुष्टुभी वै रात्रिरेतद्रात्रिरूपं मध्यख्यः पीतवत्यो भद्रत्यस्त्रिष्टुभो याज्या भवन्त्यभिरूपा यद्यस्त्रिष्टुभोऽभिरूपं तत्समृद्धं प्रथमेन पर्यायेण स्तुवते प्रथमान्येव पदानि पुनरादत्ते * यदेवैषा मघवा गाव आसंस्तदेवैषां तेनादत्ते मध्यमेन पर्यायेण स्तुवते मध्यमान्येव पदानि पुनरादत्ते यदेवैषा मनो रथा आसंस्तदेवैषां तेनादत्त उत्तमेन पर्यायेण स्तुवत उत्तमान्येव पदानि पुनरादत्ते यदेवैषां वासो हिरण्यं मणिरध्यात्म मासीत्तदेवैषां तेनादत्त आ द्विषतो वसु दत्ते निरेनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं

* ख ङ सर्वत्र "आदर्श"-इति पाठः ।

वेद पवमानवदहरित्याहुर्न रात्रिः पवमानवती कथ मुभे पवमानवती भवतः केन ते समावङ्गाजौ भवत इति यदैवेन्द्राय मदने सुत मिदं वसो सुत सर्ग इदं घ्नन्वोजसा सुत मिति स्तुवन्ति च शंसन्ति च तेन रात्रिः पवमानवती तेनोभे पवमानवती भवतस्तेन ते समावङ्गाजौ भवतः पञ्चदशस्तोत्र महरित्याहुर्न रात्रिः पञ्चदशस्तोत्रा कथ मुभे पञ्चदशस्तोत्रे भवतः केन ते समावङ्गाजौ भवत इति द्वादशस्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः सन्धिना राथन्तरेण स्तुवते तेन रात्रिः पञ्चदशस्तोत्रा तेनोभे पञ्चदशस्तोत्रे भवतस्तेन ते समावङ्गाजौ भवतः परिमितं स्तुवन्त्यपरिमित मनु शंसति परिमितं वै भूत मपरिमितं भव्य मपरिमितस्यावरुध्या इत्यति शंसति स्तोत्र मति वै प्रजात्मान मति पशव स्तयत् स्तोत्र मति शंसति यदैवास्यात्मानं तदैवास्तेनावरुन्धेऽवरुन्धे ॥ ६ ॥

॥ इत्यैतरेयब्राह्मणे चतुर्थपञ्चिकायां प्रथमोध्यायः ॥१॥

इन्द्रस्य छन्दसां च प्राधान्य मभिहितम् ; अथ शस्त्रं विधातव्यम् । षोडशिपर्यन्तं पूर्ववदनुष्ठाय षोडशिन ऊर्ध्वं रात्रिपर्यायाः

शंसनीयाः। त्रयस्त्रयः पर्यायाः। तत्रैकपर्यायस्तुःशस्त्रोपेतः। होतुरेकं शस्त्रम्, होत्रकाणां च त्रयाणा मेकैक मिति चतुष्टयम्।

अत्र प्रथमपर्य्याये होतुः शस्त्रं विधत्ते—"पान्तमावो अन्धस इत्यन्धस्त्यानुष्टुभा रात्रीं प्रतिपद्यते"—इति। 'अन्धः'-शब्दो यस्या सृच्यस्ति, सेय मन्धस्वती सा चानुष्टुप्छन्दस्का; तया 'रात्रीं' रात्रिशस्त्रं 'प्रतिपद्यते' प्रारभेत॥ तस्या ऋचि छन्दः प्रशंसति—"आनुष्टुभो वै रात्रिरेतद्रात्रिरूपम्"—इति। गायत्री त्रिष्टुब्जगत्यनुष्टुभां मध्ये गायत्र्यादीनां त्रयाणां सवनत्रयगतानां महनि प्रयुक्तत्वादनुष्टुभः प्रयोगाय रात्रिरेव कालः परिशिष्यते। तस्मादात्रेरनुष्टुप्सम्बन्धत्वादिय मनुष्टुप् रात्रेः स्वरूपम्॥

अथ त्रिषु पर्यायेषु शस्त्रयाज्यां विधत्ते—"अन्धस्त्यः पोतवत्यो महत्यस्त्रिष्टुभो याज्या भवन्त्यभिरूपा; यद्यन्नेऽभिरूपं तन्मृदम्" इति। 'अन्धः'-शब्दो यास्वृच्वस्ति, ताः 'अन्धःस्त्यः'; तादृश्यश्चतस्रः ऋचः प्रथमपर्य्याये होत्रादीनां चतुर्णां शस्त्रयाज्याः कर्त्तव्याः। तार्य त्रिष्टुप्छन्दस्का एव। तत्र "अध्वर्यवो भरतेन्द्राय सोमम्" इत्येषा (सं० २.१४.१) होतुः शस्त्रयाज्या। सा चान्धस्वती त्रिष्टुप्छन्दस्का च। तस्या द्वितीयपादे "सिञ्चता मध्व मन्धः"—इति अन्धः-शब्दः श्रूयते। एव मितरेषां त्रयाणां शस्त्रयाज्या उदाहरणीयाः। पिबतिधातुर्यास्वृच्वस्ति, ताः 'पीतवत्यः'; तादृश्यो मध्यमपर्य्याये याज्याः कर्त्तव्याः। "अपाय्यस्यान्धसो मदाय"—इति (सं० २.१९.१.) होतुः शस्त्रयाज्या। तत्र 'अपायि'-इति पिबति-धातुः श्रूयते। मदिधातुर्यास्वृच्वस्ति, ताः 'महत्यः'; तादृश्यस्तृतीयपर्य्याये याज्याः कर्त्तव्याः। "तिष्ठा हरी"-इत्येषा (सं० २.३५.१.) होतुः शस्त्रयाज्या। तस्या अवसाने

"इदिमा ते मदाय"-इति मदिधातुः श्रूयते। एवं सर्वं सुदाहार्यम्। रात्रावन्नभोजनादन्यस्तौना मानुरूप्यम्, क्षीरपानात् पीवतीनाम्; तत ऊर्ध्वं हर्षात् मदतीनाम्। एव मानुरूप्ये सति तत्तत्कर्म सम्पन्नं भवति ॥

प्रथमपर्याये प्रयोगविशेषं विधत्ते— "प्रथमेन पर्यायेण स्तुवते, प्रथमान्येव पदानि पुनराददते, यदेवैषा मध्या गाव आसंस्तदेवैषां तेनाददते"-इति। यदा सामगाः प्रथमेन पर्यायेण स्तुवते, तदानीं स्तोत्रियाणां प्रथमपादान् हिरण्यस्यन्ति *। एवं ग्रक्षेऽपि "पुरुहूतं पुरुष्टुतम्"-इत्यादिकाः प्रथमपादा हिरण्यसभीयाः; "यथा वाव स्तोत्र मेवं शस्त्रम्"-इत्युक्तत्वात्। एवं सति 'एषाम्' असुराणां मध्या गाव आसन्निति यदस्ति, तत्सर्वं असुराणां धनम्; 'तेन' प्रथमपादाभ्यासेन स्वीकुर्वन्ति ॥

द्वितीयपर्याये विशेषं विधत्ते— "मध्यमेन पर्यायेण स्तुवते, मध्यमान्येव पदानि पुनराददते; यदेवैषा मनो रथा आसंस्तदेवैषां तेनाददते"-इति। "अयन्त इन्द्र सोमः"-इत्यस्या ऋचि (सं० ८.१७.११.) "नि पूतो अधि बर्हिषि, नि पूतो अधि बर्हिषि"-इत्येवं मध्यमः पादो हिरण्मनोयः। 'एषाम्' असुराणाम् 'मनः' प्रकटं यदस्ति, ये च 'रथाः', तत्सर्वं 'तेन' अभ्यासेन स्वीकृतं भवति ॥

तृतीयपर्याये विशेषं विधत्ते— "उत्तमेन पर्यायेण स्तुवत, उत्तमान्येव पदानि पुनराददते; यदेवैषां वामो हिरण्यं मधि-

* सामब्राह्मणं देवाना इति पाठ मा वा अन्यम इति च शाखां शस्त्रशाखां रात्रिपर्यायो विहिताः (ता० ब्रा० ८.१.२.)। तत्रैव "तान् समन्तं पर्यायं प्राणुदन्त, यत् पर्यायं प्राणुदन्त यत् पर्यायाणां पर्यायत्वम्"-इति पर्यायनिरुक्तिरुक्ता।

रध्यात्म मासीत्तदेवैषां तेनाददते"–इति। "इदं ह्यन्वोजसा सुतम्" –इत्यस्या मृचि (मं० ३.५१.१०.) "पिबा त्वस्य गिर्वणः, पिबा त्वस्य गिर्वणः"–इत्युत्तमस्य पादस्य हिरभ्यासः। आत्मानं शरीर मधिकृत्य वर्त्तत इति 'अध्यात्मम्', असुराणां शरीरे ऽवस्थितं वासः, 'हिरण्यं' मणिरित्येवमादिकम्, सर्वं गृहीतं भवति॥

वेदनं प्रशंसति—"आ द्विषतो वसु दत्ते निरेन मेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद"–इति। 'द्विषतः' शत्रोः सकाशात् तदीयं धन मादत्ते, 'एनं' शत्रुं सर्वेभ्यो लोकेभ्यो 'निर्णुदते' निराकरोति॥

अत्र कश्चित्प्रश्न मुत्थापयति — "पवमानवदङ्गारित्याहुर्न रात्रिः पवमानवती; कथ मुभे पवमानवती भवतः, केन ते समावङ्गाजौ भवत इति"–इति। बहिष्पवमानः, माध्यन्दिनः पवमानः, आर्भवः पवमानश्चेत्येव महनि पवमानस्तोत्रत्रयं विद्यते*, न तु रात्रौ तदस्ति; अत उभयोः पवमानत्वं कथं सिध्यति,— तदसिद्धौ च केनोपायेनाहश्च रात्रिश्चेत्येते 'समावङ्गाजौ भवतः' समानभागयुक्ते भवतः? इति प्रश्नवादिन आहुः॥

तत्रोत्तर माह— "यदेवेन्द्राय मदने सुत मिदं वसोसुत मन्ध इदं ह्यन्वोजसा सुत मिति सुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेनोभे पवमानवती भवतस्तेन ते समावङ्गाजौ भवतः"–इति। यदेव "इन्द्राय मदने सुतम्", "इदं वसो सुत मन्धः", "इदं ह्यन्वोजसा सुतम्"–इति†; ताभिरेताभिस्तिसृभिः

---

* ता० ब्रा०— बाहिष्पवमानः (६.७–१०.) ७. १, २ : माध्यन्दिनपवमानः ६–५ ; आर्भवपवमानः ८.४,५।

† सं० ८. ६१. १६, ८. २. १०; ३. ५१. १०।

सञ्जतारः सुवन्ति, होतारः शंसन्ति । अहनि यथा त्रिष्वपि पवमानस्तोत्रनामसु पवमानशब्दोऽनुवर्त्तः, एव मत्रापि तिसृषु ऋक्षु सुतशब्दोऽनुवर्त्तः ; अतः पवमानसाम्याद्रात्रिः पवमानवती ; 'तेन' प्रकारेण उभयोः पवमानवत्त्वे साम्ये सति तुल्यभागत्वं सिध्यति ॥

पुनरपि प्रश्नोत्तर मुत्थापयति— "पञ्चदशस्तोत्र मर्हरित्याहुर्न रात्रिः पञ्चदशस्तोत्रा ; कथ मुभे पञ्चदशस्तोत्रे भवतः, केन ते समावद्राजी भवत इति" इति । अग्निष्टोमस्तोत्राणि द्वादश, उक्थ्यस्तोत्राणि त्रीणि ; एतान्यहनि प्रयुज्यन्ते ; तस्मादहः पञ्चदशस्तोत्रोपेतम् ; रात्रौ तु न तानि विद्यन्ते, कथं पञ्चदशस्तोत्रसाम्येन तयोर्भागसाम्यं सिध्यति ? इति प्रश्नः ॥

तदुत्तर माह— "द्वादशस्तोत्राण्यधिगर्वराणि तिसृभिर्देवताभिः सन्धिना राथन्तरेण सुवते ; तेन रात्रिः पञ्चदशस्तोत्रा, तेनोभे पञ्चदशस्तोत्रे भवतस्तेन ते समावद्राजी भवतः" इति । द्वादशसु चमसगणपर्य्यायेषु द्वादश स्तोत्राणि विद्यन्ते, तानि 'अधिगर्वराणि' रात्रावनुष्ठेयानां छन्दसाम् 'अधिगर्वर'-सञ्ज्ञा पूर्वं सूत्रा (२५९ पृ०), नैष्कृन्दाभिनिधाय्यत्वात् स्तोत्राण्यपि तत्संज्ञकानि ; रथन्तरसाम्ना निष्पाद्यं यत्सन्धिस्तोत्रं *, तत्र तिस्रो देवताः सृज्यन्ते †, ताभिः स्तोतव्याभिस्तिसृभिर्देवताभिः स्तोत्रमपि त्रेधा भिद्यते ; 'तेन' कारणेन ताभिः पञ्चदशस्तोत्रा सम्पद्यते । तथा सति उभयोरहोरात्रयोः स्तोत्रसङ्ख्यासाम्यात्समानभागोपेतत्वं सिध्यति ॥

---

* "रथन्तरं प्रतिष्ठाकामाय सन्धिं कुर्यात्"-इति ता० ब्रा० ८.१.२८ ।

† "तीव्राण्युक्थानि निर्देवत्यः सन्धिः"-इति ता० ब्रा० ९. १. २६ ।

शस्त्रबाहुल्यं प्रशंसति— "परिमितं स्तुवन्त्यपरिमित मनु शंसति ; परिमितं वै भूत मपरिमितं भव्य मपरिमितस्यावरुध्या-इति"—इति। उद्गातारः परिमितं यथा भवति तथा स्तुवन्ति, त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंश इत्येवं चतुर्भिरेव स्तोमैरेव सर्वस्तोत्रनिष्पत्तेः*। होता तु अपरिमितं यथा भवति तथा अनु-शंसति ; शंसनीया ऋच एतावत्य एवेति सर्वत्रानुगतस्य सङ्ख्या-नियमस्य कस्यचिदभावात्। पूर्वभाविनः स्तोत्रस्य परिमितत्व मुत्तरभाविनः शस्त्रस्यापरिमितत्वं च लौकिकन्यायानुसारि ; लोके 'भूतं' पूर्वं सम्पादितं धनम्, 'परिमितम्' इयदेवेति नियतिरस्ति ; 'भव्यम्' इतः परं सम्पादनीयं धनम्, 'अपरिमितं' तृष्णायाः निरवधिकत्वेनैतावदेव सम्पादयिष्यामि, न त्वधिक मिति नियते-रभावात्। तस्मादुपरितनशंसनबाहुल्य मपरिमितधनप्राप्तेः भव-तीत्यभिप्रेत्य होतुरपरिमित मनुशंसनम्॥

प्रकारान्तरेण शस्त्रबाहुल्यं प्रशंसति— "अति शंसति स्तोत्र मति वै प्रजामान मति पशवस्तद्यत् स्तोत्र मति शंसति यदेवास्या-त्मानं तदेवास्यैतेनावरुन्धे"—इति†। स्तोत्रगता ऋक्सङ्ख्या मतिलङ्घ्य होता शंसतीति यदस्ति तदुक्त मेव ; लोके ह्यात्मान मतिलङ्घ्य प्रजानां चावस्थितत्वात्। स्वयं मेक एव, पुत्रादयस्तु बहवः, गवाश्वादिपशवश्च बहवः ; तस्मादात्मस्थानीयं स्तोत्रम्, प्रजापशुस्थानीयशस्त्राधिक्येन 'यदेव' प्रजापश्वादि धनं, तस्य यज-

---

* ता० ब्रा० ६, २, २।

† अतिरात्रे चत्वारः सवनीयाः, षोडशस्तेषां राशिपर्यायाख्यः, तत्र सन्धिस्तोत्रम्, तत्राश्विनं शस्त्रम्, ततोऽनुयाजादि। तदिह शस्त्रं सन्धिस्तोत्रान्तं चिन्तितम्, त्रिष्टुं पर-स्तात् वक्ष्यति।

मानस्य स्वात्मान मतिक्रम्याधिक मभीष्टम्, तत्सर्वम् 'अस्य' यज-
मानस्य होता सम्पादयति ॥ पदाभ्यासो ऽध्यायसमाप्त्यर्थः ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां प्रथमाध्याये
(षोड़शाध्याये) षष्ठः खण्डः ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः प्रथमोऽध्यायः ॥

॥ अथ द्वितीयाध्यायः ॥

(५५)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वे देवा वरा आगच्छंस्तस्या एतत्सहस्रं वहतु मन्वाकरोद् यदेतदाग्निन मित्याचक्षते ऽनाग्निनं हैव तद्यदर्वाक्सहस्रं तस्मात्तत्सहस्रं वैव शंसेद् भूयो वा प्राश्य घृतं शंसेद्यथा ह वा दृढं मनो वा रथो वाक्तो वर्त्तत एवं हैवाक्तो वर्तते शकुनिरिवोत्पतिष्यन्नाह्वयीत तस्मिन् देवा न समजानत ममेद मस्तु ममेद मस्विति ते सञ्जानाना अब्रुवन्नाजि मस्यायामहै स यो न उज्जेष्यति तस्येदं भविष्यतीति ते ऽग्नेरेवाधि गृहपतेरादित्यं काष्ठा मकुर्वत तस्मादाग्नेयी प्रतिपद् भवत्याग्निनस्याग्निर्हीता गृहपतिः स राजेति तद्वै क आहुरग्निं मन्ये पितर मग्नि मापिं मित्येतया प्रतिपद्येत दिवि शुक्रं यजतं सूर्यस्येति प्रथमयैव ऋचा काष्ठा मःप्नोतीति तत्तन्नाद्दृत्यं य एनं तत्र ब्रूयादग्नि मग्नि मिति वै प्रत्यपादाग्नि मापत्स्यतीति शश्वत्तथा

स्तोत्रियादग्निर्होता गृहपतिः स राजेत्येतयैव प्रतिपद्येत गृहपतिवती प्रजातिमती शान्ता सर्वायुः सर्वायुत्वाय सर्वायुरेति य एवं वेद ॥ १ (७) ॥

षष्ठे षोड़श्यङ्गि संस्थाचतुर्थं सर्वच्छन्दोविकियानुष्टुबाख्ये ।
पर्यायाणां स्याद्वतुःशस्त्रकाणा रात्रौ सन्धे: सङ्ख्या पाङ्क्तदश्यम् ॥

अथातिरात्रक्रतावेव रात्रिपर्यायेभ्य जह्नं माग्निनं शस्त्र माख्यायिकामुखेन विधत्ते -- "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं ; तस्यै सर्वे देवा वरा आगच्छंस्तस्या एतत्सहस्रं वहतु मन्वाकरोद्,— यदेतदाग्निन मित्याचक्षते ; ऽनाग्निनं वै, तद्यदर्वाक्सहस्रं ; तस्मात्तत्सहस्रं वै यंसेद् भूयो वा"-- इति । पुरा कदाचित्प्रजापतिः काञ्चिद् दुहितरं सोमाय राज्ञे 'प्रायच्छत्' विवाहार्थं दातु मुद्युक्तवान् । कीदृशीं दुहितरम् ? 'सूर्याम्' इत्येतन्नामधेययुक्तां 'सावित्रीं' सवित्रा लब्धाम् । यद्यप्येषा सवितुः पुत्री, तथापि स्नेहातिशयेन प्रजापतेर्दुहितेत्युच्यते । 'तस्यै' दुहित्रे तल्लाभार्थं सर्वे देवा वरा भूत्वा प्रजापतेः सकाश मागमन् । स च प्रजापतिः 'तस्यै' दुहितृलाभार्थम् 'एतद्' वक्ष्यमाण ऋचां सहस्रं 'वहतु मन्वाकरोत्' । वहनस्य विवाहस्य अलङ्कारार्थं माङ्गल्यार्थं च वरस्य पुरतो वहनीयो हरिद्रागुड़ादिमङ्गलद्रव्यसङ्घो 'वहतुः' ; यदेतद्वक्ष्यमाणं याज्ञिका आग्निनसहस्रं मित्याचक्षते, तत्सहस्र मेव वहतुरूपेण प्रत्यभिज्ञातवान् ; स देवानां मध्ये यो वरः आग्निनशस्त्रमन्त्रानेक एव पठति, तस्मै, दास्यामीति प्रतिज्ञातवानित्यर्थः । सहस्रादर्वाचीना ऋचो यस्मिन् शस्त्रे, तद् 'अर्वाक्सहस्रं' ताहृगं यदस्ति, तत् 'अनाग्निन मेव' ।

यस्मादाश्विनसङ्ख्यं प्रजापतिरङ्गीकृतवान्, तस्माद्धोता सङ्ख्यमेव शंसेत्, ततोऽप्यधिकं वा शंसेत्, न तु न्यूनम् * ॥

शंसनस्येतिकर्त्तव्यतां विधत्ते— "प्राश्य घृतं शंसेद्यथा ह वा इद मनो वा रथो वाङ्गो वर्त्तत एवं ह्येवाङ्गो वर्त्तते"—इति। प्रथमतो घृतं प्राश्य पश्चाच्छंसेत्। यथा लोके किञ्चिदिदं निदर्शनं तद्वत्। किं निदर्शन मिति,— तदुच्यते। 'अनः' खल्वशकटं वा प्रौढ़ो 'रथः' वा यदा प्रवर्त्तते, तदानी मस्य चक्रस्य भ्रमणस्थाने मधोमिश्रेण तैलेनाङ्गने कृते पश्चात् खल्वं शकटं रथो वा सहसा प्रवर्त्तते, एव मसौ होता घृतेनाक्तः शस्त्रे प्रवर्त्तते ॥

इति कर्त्तव्यतान्तरं विधत्ते—"शकुनिरिवोत्पतिष्यन्नाश्रयेत्" —इति। यथा लोके 'शकुनिः' कश्चित्पक्षी पद्भ्यां भूमिं दृढ़ मवष्टभ्य 'उत्पतिष्यन्' ऊर्ध्वमुखोत्पतनं कर्त्तु मिच्छन् पक्षान्तर मभिलक्ष्य ध्वनिं करोति, एव मसौ होता तदाकारं घटनं कुर्वन्नाहावं पठेत्। तदेतदाश्वलायनाचार्य्यैः स्पष्टीकृतम्—"प्राश्य प्रतिप्रहृत्य पश्चात् स्वस्य धिष्ण्यस्योपविशेत्, समस्तजङ्घोरुरत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन्नुपस्थकृतस्वेवाश्विनं शंसेत्"—इति (श्रौ० ६.५.४.) ॥

आश्विनशस्त्रस्य प्रतिपद माख्यायिकामुखेन विधत्ते—"तस्मिन् देवा न समजानत,— ममेद मस्तु ममेद मस्विति ; ते सङ्ज्ञानाना अब्रुवन्नाजि मस्थायामहै, स यो न उल्लेष्यति, तस्येदं भविष्यतीति ; ते उम्भेरेवाधि गृहपतेरादित्यं काष्ठा मकुर्वत, तस्मादाग्नेयो

* "प्रातरनुवाकन्यायेन तस्यैव शस्त्रावयवस्य सङ्ख्यावमनीदेतीः शंसेत्"—इति आश्व० श्रौ० ६.५.८।

प्रतिपद् भवत्याग्निनस्याग्निर्होता गृहपतिः स राजेति"–इति। 'तस्मिन्' आग्निनशस्त्रे देवाः परस्परं 'न समजानत' सज्ज्ञानं प्रतिपत्तिं नाकुर्वन्। कीदृशी तदीया प्रतिपत्तिः? इति, सोच्यते— 'ममैवेदं आग्निन मस्त्विति' सर्वेषा मभिप्रायः। सर्वविषयत्वं द्योतयितु मियं वीप्सा। 'ते' विप्रतिपन्ना देवाः 'सज्ज्ञानानाः' सम्प्रतिपत्तिं कर्तुं मुद्यताः परस्पर मिद मब्रुवन्— 'अस्य' आग्निनशस्त्रस्य लाभाय वयं सर्वे काश्चिदाजिम् 'आयामहै' समयबन्धपुरःसरा धावनरूपा गतिः 'आजिः', तां प्राप्नुवामः। तस्मिन्नाजिधावने 'नः' अस्माकं मध्ये च यः प्रबलः, यः कोऽपि प्रथम मुत्कर्षेण जेष्यति, तस्य 'इदम्' आग्निनं भविष्यतीति समयबन्धः। 'ते' कृतसमया देवाः 'गृहपतेरग्नेरेवाधि' गार्हपत्यस्योपरि द्यालोकवर्त्तिन मादित्यं 'काष्ठां' धावनसमाप्ति मनुकुर्वते,—गार्हपत्य मारभ्यादित्यपर्यन्तं धावेदिति तदीया मर्य्यादा। यस्मादग्निः आग्निनप्राप्तिहेतोर्धावनस्योपक्रमस्थानं, तस्मादाग्नेयी काश्चिदृगाग्निनस्य 'प्रतिपद् भवति' प्रारम्भरूपा कर्त्तव्या। "अग्निर्होता"–इति (सं० ६.१५.१२.) तस्याः प्रतीकम्॥

अत्र कश्चित् पूर्वपक्षं भद्भावयति "तद्वैक आहुरग्निं मन्थे पितर मग्नि मापि मित्येतया (सं० १०.२.३.) प्रतिपद्येत" इति। प्रारभेतेत्यर्थः॥

तदोपपत्तिं पूर्वपक्ष्यभिप्रेतां दर्शयति—"दिवि शुक्रं यजतं सूर्यस्येति प्रथमयैव ऋचा काष्ठा माप्नोति" इति। तस्माच्चतुर्थपादे 'सूर्यस्य यजतं' यस्मादग्निविशेषणं पठ्यते, तथा सति प्रथमैवर्चा सूर्यरूपा काष्ठा धावनाग्निरूपाप्ता भवतीति तेषा मभिप्रायः॥

तमिमं पक्षं दूषयति— "तत्तन्नाहाम, य एनं तत्र ब्रूयाद्-अग्निं मन्ये मित्रं वै प्रत्यपाद्यग्निं मापत्स्यतीति, शश्वत्तथा स्यात्" -इति। तस्मिन् शब्दोपक्रमे 'तत्' मतम्, "अग्निं मन्ये पितरम्" -इत्यादिकं नादरणीयम्। अनादरणे हेतुरुच्यते—'तत्र अग्निं मन्ये'-इत्येतया उपक्रमपदे, यः कोऽपि विरोधी समागत्य 'एनं' होतारं 'ब्रूयात्' प्रपेत्। कथं प्राप इति, तदुच्यते— अनेन होत्रा 'अग्नि मन्ये मित्रं' एव 'प्रत्यपादि' प्रारब्धम्, तस्मा ऋचि "अग्निम्मित्रमग्निम्भ्रातरम्"--इत्येव मशब्दमग्निस्वरूपम्; पित्रा-द्यभिधानादग्नि मसौ होता प्राप्नोतीति दग्धोभविष्यतीति यदि प्रपेत्, तदानीं 'शश्वत्' अवश्यं तथा स्यात्॥

परमतं दूषयित्वा स्वमतं निगमयति— "तस्मादग्निर्होता गृहपतिः स राजेत्येतयैव प्रतिप्रदेयः, गृहपतिवती प्रजातिमती शान्ता; सर्वायुः सर्वायुत्वाय"-इति। अस्या ऋचि गृहपतिशब्दः स्पष्टं दृश्यते (सं० ६.१५.१३.); तस्मादियं 'गृहपतिवती'; तथा द्वितीयपादे "विश्वा वेद जनिमा"-इति सर्वप्राणिजननाभिज्ञान-कथनादियं 'प्रजातिमती'; बहुकृत्वोऽग्निशब्दस्याभावादियं 'शान्ता'; तस्मादेतया प्रतिपद्यमानो होता सर्वायुर्भवति, तच्च यजमानस्य सर्वायुत्वाय सम्पद्यते॥ वेदनं प्रशंसति— "सर्व मायु-रेति य एवं वेद"-इति॥ १॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) प्रथमः खण्डः॥ १ (७)॥

॥ अथ द्वितीयः खण्डः ॥

तासां वै देवतानां माजिं धावन्तीनां मभिष्ठाना मग्निर्मुखं प्रथमः प्रत्यपद्यत त मश्विनावन्वागच्छतां त मब्रूता मपोदिह्यावां वा इदं जेष्याव इति स तथेत्यब्रवीत्तस्य वै ममेहाप्यस्तिति तथेति तस्या अप्यचाकुरुतां तस्मादाग्नेय माश्विने शस्यते ता उषस मन्वागच्छतां ता मब्रूतां मपोदिह्यावां वा इदं जेष्याव इति सा तथेत्यब्रवीत्तस्ये वै ममेहाप्यस्तिति तथेति तस्या अप्यचाकुरुतां तस्मादुषस्य माश्विने शस्यते ताविन्द्र मन्वागच्छतां त मब्रूता मावां वा इदं मघवञ्जेष्याव इति न इ तं दधृषतुरपोदिहीति वक्तुं स तथेत्यब्रवीत्तस्य वै ममेहाप्यस्तिति तथेति तस्मा अप्यचाकुरुतां तस्मादैन्द्र माश्विने शस्यते तदश्विना उदजयतां मश्विना बाप्नुवातां यदश्विना उदजयता मश्विनावाप्नुवातां तस्मादेतदाश्विन मित्याचक्षते ऽश्नुते यद्यत्कामयते य एवं वेद तदाहुर्यच्छस्यत आग्नेयं शस्यत उषसं शस्यत ऐन्द्र मथ कस्मादेतदाश्विन मित्याचक्षत इत्यश्विनौ हि तदुदजयतां मश्विनावाप्नुवातां यदश्विना उदजयतां मश्विनावाप्नुवातां

तस्मादेतदाग्निं मित्याचक्षते ऽश्नुते यद्यत्कामयते य एवं वेद ॥ २ (८) ॥

अथाग्नेयं काण्डं विधत्ते — "तासां वै देवतानां माजिं धावन्तीनां मभिसृष्टानां मग्निर्मुखं प्रथमः प्रत्यपद्यत, त मग्निनावन्वागच्छतां, त मब्रूतां मपोदिह्यावां वा इदं जेष्याव इति ; स तथेत्यब्रवीत्तस्य वै ममेहाप्यस्तिष्यति ; तथेति ; तस्मा अप्यत्राकुरुतां ; तस्मादाग्नेय माग्निने शस्यते"–इति । देवताः सर्वा गार्हपत्याग्निसमीपात् निर्गत्य सूर्यपर्यन्तामाजिं मुद्दिश्य धावन्त्यो 'अभिसृष्टाः' अभितः प्रहृताः,—एकदेवता एकस्यां दिशि धावति, अन्या परस्यां दिशीत्येवं सर्वतो धावन्ति । 'तासां' देवतानां मध्ये अग्निः मुखं यथा भवति तथा, मुख्यो भविष्यामीति अभिप्रायेण प्रथमतः 'प्रत्यपद्यत' पुरोगामी धावनं कृतवान् । 'तम्' अग्निम् 'अनु' पश्चादग्निनावगच्छताम्, समीपं गत्वा 'तम्' अग्निं मब्रूताम्,—हे अग्ने ! त्वं शान्तो भविष्यसि, तस्मात् 'अपोदिहि' उत्कर्षेणापेहि, दूरेऽपसर । 'आवाम्' उभावेव 'इदम्' आग्निनं मुद्दिश्य जेष्याव इति । 'सः' अग्निरङ्गीकृत्य 'तस्य' अपगच्छतो ममापि 'इह' शस्त्रे भागोऽस्तिति अङ्गीकृतवान् । अग्निनावङ्गीकृत्य 'तस्मै' अग्नये विभागं दत्तवन्तौ । यस्मादेवं 'तस्मात्' 'आग्नेयं' बह्वृचां समूहरूपं काण्डम् 'अग्निने' शस्त्रे होत्रा शस्यते । शंसनीयं तच्च काण्डं सर्वं सूत्रे द्रष्टव्यम ॥

---

* "आग्निनं शंसेत् । अग्निर्वीत्रा वृहपतिः स राजेति प्रतिपदैकपात्तिनी पक्षः । एतयाग्नेयं गायत्र मुपसन्तनुयात् । प्रातरनुवाकन्यायेन"–इत्यादि आश्व० श्रौ० ६. ५. ५–८ । "प्रातरनुवाक मनुब्रूयान्मन्त्रेण"–इत्यादिः, "इत्याग्नेयः क्रतुः"–इत्यत्रैव ४. १३.६–८ द्रष्टव्यः । "नौधि वह्निमाग्निनम्"–इति पं. ६.६.१० ।

अथोषसं काण्डं विधत्ते — "ता उषस मन्वागच्छतां, ता मब्रूता मपोदिदावां वा इदं जेष्याव इति ; सा तथेत्यब्रवीत्तस्य वै ममेहाप्यस्तिवति ; तथेति ; तस्या अप्यत्राकुरुतां ; तस्मादुषसं माश्विने शस्यते" - इति । 'तौ' अश्विनौ 'उषसम्' एतन्नामयुक्तां देवताम् । अन्यत् पूर्ववद् व्याख्येयम् ॥

ऐन्द्रं काण्डं विधत्ते — "ताविन्द्र मन्वागच्छतां, त मब्रूतां मावां वा इदं मघवञ्जेष्याव इति ; न ह तं दधृषतुरपोदिदीहीति वक्तुं ; स तथेत्यब्रवीत्तस्य वै ममेहाप्यस्तिवति ; तथेति ; तस्या अप्यत्राकुरुतां ; तस्मादैन्द्र माश्विने शस्यते" - इति । हे मघवन् ! आवां जेष्याव इत्येव अब्रूताम् ; इन्द्रस्य स्वामित्वात् 'तम्' इन्द्रम् उद्दिश्य 'अपोदिदीहीति वक्तुं न दधृषतुः' धार्ष्यं नाकुरुताम् । अन्यत् पूर्ववत् ॥

अथाश्विनं काण्डं विधत्ते — "तदश्विना उदजयता मश्विना-वाप्नुवातां ; यदश्विना उदजयता मश्विनावाप्नुवातां, तस्मादेतदा-श्विन मित्याचक्षते" - इति । 'तत्' तस्मा माजौ सङ्गमा मूर्ध्वपर्य्यन्तं गत्वा तावश्विनौ उत्कर्षेणाजयताम् । ततस्तावेव शस्त्रम् 'अश्नुवातां' व्याप्नवन्तौ । 'यत्' यस्मादश्विनौ जयपूर्वकं शस्त्रं व्याप्नवन्तौ, तस्मात् 'एतत्' शस्त्र माश्विन मिति याज्ञिका आचक्षते, आश्विनं काण्डं शंसेदित्यभिप्रायः ॥

वेदनं प्रशंसति — "अश्नुते यद् यत्कामयते य एवं वेद" - इति ॥

प्रश्नोत्तराभ्यां शस्त्रस्याश्विनत्व मुपपादयति — तदाहुर्यच्छस्यत आग्नेयं शस्यत उषसं शस्यत ऐन्द्र मथ कस्मादेतदाश्विन मित्या-चक्षत इत्यश्विनौ हि तदुदजयता मश्विनावाप्नुवातां ; यदश्विना

उद्जयता मग्निनावाग्नुवानां, तस्मादेतदाग्निन मित्याचक्षते"-इति। आग्निनकाण्डवत् आग्नेयोषस्यैन्द्रकाण्डाना मपि ग्रस्यमानत्वाच्चास्याग्नेयत्वादिनामपरित्यागेनाग्निनत्वनास्ति वा: पक्षपात: ? इति प्रश्न:। अग्निरुषा इन्द्रश्चेते परतोऽपक्षता:, न तु सूर्यपर्य्यन्त मधावत्, अग्निनी तु धावन्ती जयपूर्वकं ग्रस्तं ग्रासवत्ताविति तदीयत्वप्रसिद्धि: ग्रस्तस्य युक्ता ॥

वेदनं प्रशंसति—"अश्नुते यद् यत्कामयते य एवं वेद"-इति। पूर्वं माग्निनसम्बन्धमात्रवेदनम्, इह त्वन्यादिसम्बन्धराहित्यवेदनं चेति विशेष: ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) द्वितीय: खण्ड: ॥ २ (८) ॥

॥ अथ तृतीय: खण्ड: ॥

अश्नुतरीरथेनाग्निराजि मधावत्तासां राजमानो योनि मकूलयत्तस्माच्चा न विजायन्ते गोभिरुणोरुषा आजि मधावत्तस्मादुषस्यागतायां मरुण मिवैव प्रभातुषसो रूप मश्नुरथेनेन्द्र आजि मधावत्तस्मात्स उच्चैर्घोष उपब्दिमान् भवस्य रूप मैन्द्रो हि स मर्दभरथेनाग्निना उद्जयता मग्निनावाग्नुवानां

यदग्निना उदजयता मग्निनावाप्नुवाता तस्मात्स्व
स्तजवो दुग्धदोहः सर्वेषा मेतर्हि वाहनाना मना-
धिष्ठो रेतसस्त्वस्य वीर्यं नाहरता तस्मात्स हिरेता
वाजी तदाहुः सप्त सौर्याणि छन्दांसि शंसेद्यथैवा-
श्नेयं यथोषस्यं यथाग्निनं सप्त वै देवलोकाः सर्वेषु
देवलोकेषु राप्नोतीति तत्तन्नाहत्यं चीष्वेव शंसेत्त्रयो
वा इमे चिहतो लोका एषा मेव लोकाना मभि-
जित्यै तदाहुरुदु त्यं जातवेदस मिति सौर्याणि
प्रतिपद्येतेति तत्तन्नाहत्यं यथैव गत्वा काष्ठा मप-
राधुयात्तादृक्तात् सूर्यो नो दिवस्पात्वित्येतनैव प्रति-
पद्येत यथैव गत्वा काष्ठा मभिपद्येत तादृक्तादुदु त्यं
जातवेदस मिति द्वितीयं शंसति चित्रं देवाना
मुदगादनीक मिति चेष्टुभं मसौ वाव चित्रं देवाना
मुदेति तस्मादेतच्छंसति नमो मित्रस्य वरुणस्य
चक्षस इति जागतं तदाशीःपद माशिष मेवैते-
नाशास्त आत्मने च यजमानाय च ॥ ३ (९) ॥

अथाग्निनयज्ञप्रशंसार्थं देवाना माजिधावनकथा पूर्वं सुप-
न्यस्ता, त मेव कथाशेष माग्निनयज्ञप्रशंसार्थ मेव पुनरप्यनुवर्त्त-
यति— "अश्वतरीरथेनाग्निराजि मधावत्; तासां प्राजमानी
योनि मभूतयत्; तस्मात्ता न विजायन्ते"-इति। अश्वगर्दभसाङ्-
र्येण जाताः स्त्रीत्वप्रयोऽप्रजातयः। तदुक्तेन रथेनाग्नि राजि

मुद्दिश्य धावनं ज्ञातवान् । तदानीं 'प्राजमानः' प्रकर्षेणाश्वतरीः प्रेरयन् । "अज पशुप्रेरणे"-इतिधातुजन्योऽयं शब्दः । तत्प्रेरणकाले तासां पूर्वपुच्छभाग मुपस्पृश्य योनिम् 'अकूलयद्' दग्धवान् । 'तस्माद्' दग्धयोनित्वात् 'ताः' अश्वतर्यो 'न विजायन्ते' विजनन मपत्योत्पादनं न कुर्वन्ति ॥

अग्नेराजिधावन मुक्त्वोषसो धावनं दर्शयति—"गोभिररुणैः-रुषा आजि मधावत् ; तस्मादुषस्यागतायां मरुण मिवैव प्रभात्यु-षसो रूपम्"-इति । 'अरुणैर्गोभिः' ईषद्रक्तवर्णैर्बलीवर्दैर्युक्तेन रथेन यस्मादुषसो धावनम्, तस्माल्लोकेऽपि रात्रेरवसानं समागतायां मुषसि, तस्या उषसो रूपं प्राच्यां दिशि 'अरुण मिवैव' रक्तवर्ण मेव भूत्वा 'प्रभाति' प्रभायुक्तं भवति ॥

इन्द्रस्याजिधावनं दर्शयति—"अश्वरथेनेन्द्र आजि मधावत् ; तस्मात्त उच्चैर्घोष उपश्रिमान् क्षत्रस्य रूप मैन्द्रो हि सः"-इति । यस्मादश्वयुक्तेन रथेनेन्द्रो ऽधावत्, तस्माल्लोकेऽपि सोऽश्वयुक्तो रथः 'उच्चैर्घोषः' बहुलश्चनिर्दृश्यते, तथा क्षत्रस्य रूपम् 'उपश्रिमान्' शब्दोपेतं दृश्यते । यदा क्षत्रियो निर्गच्छति, तदीया यष्टिका अन्ये सेवकाः अश्वपुरतः शब्दं कुर्वन्त एव गच्छन्ति । स च शब्दः 'ऐन्द्रो हि' अमुरयुक्तेषु तङ्गोत्यर्थ मिन्द्रेण कृतत्वादैन्द्रत्वम् ॥

अश्विनोर्धावनं दर्शयति—"गर्दभरथेनाश्विना उदजयता मश्विना वाप्नुवातां ; यदश्विना उदजयता मश्विना वाप्नुवातां, तस्मात् स कृतध्वो दुग्धदोहः सर्वेषा मेतर्हि वाहनाना मनाग्निष्ठी रैतसस्यस्य घोषं नाशृणुतां ; तस्मात्त हिरेता वाजी"-इति । अश्विनौ गर्दभयुक्तेन रथेन शीघ्रं गत्वा जयपूर्वकं व्याप्तवन्तौ । 'यत्' यस्मादुभौ रथ मारुह्यातिवेगेन गत्वा व्याप्तवन्तौ, तस्मात् 'सः'

गर्दभो भारातिशयेन तीव्रधावनेन च लोके 'शतजवः' शतवेगः 'दुग्धदोहः' शतक्षीररसश्चाभवत् । तस्मादिदानीमपि गजाश्वादिवाहनानां सर्वेषां मध्ये गर्दभः 'अनाश्रितः' अत्यन्तवेगरहितो दृश्यते । तदीयस्य रेतसस्तु 'वीर्यं' सामर्थ्यम् अग्निनी 'नाशरता' न विनाशितवन्ती । तस्मादेतेन यानयोग्यं चारेण च राशिभेऽपि 'सः' गर्दभो 'द्विरेताः' गर्दभाश्वतरजातिद्वयोत्पादको 'वाजी' गमनवान् दृश्यते ॥

एवं शस्त्रप्रयंसार्थं मन्त्रविष्ट मुपाख्यानमेव मभिधाय सौर्याणां मन्त्रसमूहानां सङ्ख्यां विधातुं पूर्वपक्षम् उद्भावयति— "तदाहुः सप्त सौर्याणि छन्दांसि शंसेद्यथैवाग्नेयं यथोक्षरं यथाक्षिनं ; सप्त वै देवलोकाः, सर्वेषु देवलोकेषु राध्नोतीति"–इति । आग्नेयोक्थाक्षिनकाण्डानि यथा प्रत्येकं गायत्र्यादिभिः सप्तच्छन्दोभिर्युक्तानि *, एव मत्र सौर्येऽपि काण्डे सप्त छन्दांसि शंसनीयानि । तथा सति भोगस्थानरूपाणां देवलोकाना मवान्तरभेदेन सप्तविधत्वात् तत्सृष्टिः सिध्यतीति पूर्वपक्षिण आहुः ॥

तं पक्षं निराकृत्य छन्दस्त्रयपक्षं विधत्ते —"तत्तथाहुत्यं ; त्रीण्येव शंसेत्रयो वा इमे त्रिवृतो लोका एषा मेव लोकाना मभिजित्यै"–इति । पृथिव्यन्तरीक्षद्युलोकास्त्रय एव 'त्रिवृतः' सत्त्वरजस्तमोगुणैस्त्रिविधाः ; अतस्त्रयाणा मभिजयाय त्रीण्येव छन्दांसि शंसेत् ॥

त्रयाणां छन्दसां प्रारम्भं निषेतुं पूर्वपक्ष माह— "तदाहुरुदु त्यं जातवेदस मिति सौर्याणि प्रतिपदेरंयेति"–इति । यानि 'सौर्याणि' त्रीणि छन्दांसि, तेषां प्रारम्भे "उदु त्यम्"–इति (सं० १.५०.१.) शंसेदिति पूर्वपक्षः ॥

* आश्व० श्री० ४. ११, १२, १३ कण्डिका द्रष्टव्याः ।

त मेतं दूषयति — "तत्तथाऽस्तु ; यथैव गत्वा काष्ठा मपरा-धुयात्तादृक्तत्" – इति । लोके कश्चिन्नाषापूर्वक मप्रमादेन धावनं कृत्वा 'काष्ठाम्' अवधिस्थानं प्राप्य 'अपराधुयात्' तत्रावसाने स्खलनपतनादिरूप मपराधं कुर्यात्, तादृगेव तद्भवति । आग्नेय-काण्ड मारभ्य सूर्यकाण्डपर्यन्तं मस्खलन्होता समाप्तौ सूर्य-काण्डे स्खलति ; तस्माद् "उदु त्य" न शंसेत् ॥

इदानीं सिद्धान्त माह—"सूर्यो नो दिवस्पात्विति नैव (सं० १०.१५८.१–५.) प्रतिपदेत ; यथैव गत्वा काष्ठा मभिपदेत तादृक्तद्" – इति । यथा लोके कश्चिदवधिं प्राप्य स्खलनरहितः स्वाभीष्टं प्राप्नुयात्, तादृगेव तत् द्रष्टव्यम् । "सूर्यो नः"–इत्य-स्मिन् मन्त्रे सूर्यवायुग्नीनां लोकत्रयाद्रक्षणं * प्रार्थयतो रक्षित-त्वादेवापराधं न प्राप्नोति ; पूर्वत्र एतत् नास्तीति विशेषः ॥

प्रथमं सूक्तं विधाय नवर्चं † सूक्तान्तरं विधत्ते — "उदु त्यं जातवेदस मिति (सं० १.५०.१–९.) द्वितीयं शंसति"–इति । तदेतदुभयं गायत्रीच्छन्दस्कम् ॥

अथ त्रैष्टुभं सूक्तं विधत्ते — "चित्रं देवाना मुदगादनीक मिति (सं० १.११५.१–६.) त्रैष्टुभ मसौ वाव चित्रं देवाना मुदेति, तस्मादेतच्छंसति"–इति । अस्मिन् मन्त्रे देवानां सम्बन्धि किञ्चित् 'चित्रं' रूपम् 'उदगात्' उदयं प्राप्नोतीति श्रूयते, असौ वा आदित्य एव देवानां सम्बन्धि चित्रं रूप मुदेति ; कालभेदेन वर्णभेद-दर्शनात् । तस्मादेतत्सूक्तं प्रशस्तत्वादेव शंसनीयम् ॥

---

* "सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्। अग्निः पार्थिवेभ्यः"–इति ।

† उदु त्य मिति सूक्तं तु पूर्वमेवार्चम् ; तस्मादौ नव गायत्र्यः, ता एवेह शंसनीया भवन्ति ; "उदु त्यं जातवेदस मिति नव"–इतिसूत्रकारोऽपि ; (आश्व० श्रौ० ६.५.१८.) ।

तृतीयं छन्दो विधत्ते — "नमो मित्रस्य वरुणस्य चक्षस इति (सं० १०. ३१. १-१२.) जागतं; तद्वाशोःपद माशिष मेवैते-नाशास्त आत्मने च यजमानाय च"-इति। 'तद्' तदस्य नमो मित्रस्येत्यादिकम् 'वाशोःपदम्' आशिषः प्रतिपादकम्; द्वितीय-चतुर्थपादयोः "सपर्यत-शंसत"-इत्याशीरर्थस्य लोडन्तस्य पद-द्वयस्य प्रयुक्तत्वात्। तच्छंसनेन होता स्वस्य यजमानस्य चाशिषं प्रार्थयते * ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) तृतीयः खण्डः ॥ ३ (८) ॥

॥ अथ चतुर्थः खण्डः ॥

तदाहुः सूर्यो नातिशस्यो बृहती नातिशस्या यत्सूर्यं मति शंसेद् ब्रह्मवर्चस मति पद्येत यद् बृहती मति शंसेत्प्राणानति पद्येतेन्द्र क्रतुं न आ भरेत्येन्द्रं प्रगाथं शंसति शिक्षा गो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीत्यसौ वाव ज्योतिस्तेन सूर्यं नाति शंसति यदु बार्हतः प्रगाथस्तेन बृहतीं

* 'सूर्यो नो', 'उदु त्य', 'चित्र', 'नमो मित्रस्य' इति चत्वारि सूक्तानि सौर्याणि। "उदिते सौर्याणि प्रतिपद्यते"-इति आश्व० गौ० ६.५.१७।

नाति शंसत्यभि त्वा शूर नोनुम इति राथन्तरीं योनिं शंसति राथन्तरेण वै सम्भिनाग्निनाय स्तुवते तद्यद्राथन्तरीं योनिं शंसति रथन्तरस्येव सयोनित्वायेशान मस्य जगतः स्वदृश मित्यसौ वाव स्वदृक् तेन सूर्यं नाति शंसति यदु बार्हतः प्रगाथस्तेन बृहतीं नाति शंसति बहवः सूरचक्षस इति मैचावरुणं प्रगाथं शंसत्यहर्वै मित्रो रात्रिर्वरुण उभे वा एषोऽहोरात्रे आरभते योऽतिरात्र मुपैति तद्यन्मैचावरुणं प्रगाथं शंसत्यहोरात्रयोरेवैनं तत्प्रतिष्ठापयति सूरचक्षस इति तेन सूर्यं नाति शंसति यदु बार्हतः प्रगाथस्तेन बृहतीं नाति शंसति मही द्यौः पृथिवी च नस् ते हि द्यावापृथिवी विश्वशं भुवेति द्यावापृथिवीये शंसति द्यावापृथिवी वै प्रतिष्ठे इय मेवेह प्रतिष्ठासावमुच तद्यद् द्यावापृथिवीये शंसति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति देवो देवी धर्मणा सूर्यः शुचिरिति तेन सूर्यं नाति शंसति यदु गायत्री च जगती च ते हे बृहत्यौ तेन बृहतीं नाति शंसति विश्वस्य देवी मृचयस्य जन्मनो न या रोषति न यभदिति द्विपदां शंसति चितैध सुक्थ मिति ह स्म वा एतदाचक्षते यदेतदाग्निनं निष्ट-

तिर्ह स्म पाशिन्युपास्ते यदैव होता परिधास्यन्नेव पाशान् प्रति मोक्ष्यामीति ततो वा एतां बृहस्पतिर्द्विपदा मपश्यन्न या रोषाति न ग्रभदिति तया निर्ऋत्या: पाशिन्या अधराच: पाशानपास्यत्तद्यदेतां द्विपदां होता शंसति निर्ऋत्या एव तत्पाशिन्या अधराच: पाशानपास्यति स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय सर्व मायुरेति य एवं वेद मृचयस्य जन्मन द्रत्यसौ वाव मर्चयतीव तेन सूर्यं नाति शंसति यदु द्विपदा पुरुषच्छन्दसं सा सर्वाणि छन्दांस्यभ्याप्ता तेन बृहतीं नाति शंसति ॥ ४ (१०) ॥

ऐन्द्रादिप्रगाथान् विधातुं प्रस्तौति— "तदाहुः सूर्यो नातिशस्यो, बृहती नातिशस्या ; यत्सूर्यं मति शंसेद्, ब्रह्मवर्चस मति पदेत ; यद् बृहती मति शंसेत्प्राणानति पदेत" इति । 'तत्' तस्मिन्नाखिनशस्ते केचिदभिज्ञा एव माहुः । देवानां मध्ये यो यं सूर्योऽस्ति, सः 'नातिशस्यः' सूर्यं मति लक्षी शंसन न कर्त्तव्यम्, तथा छन्दसां मध्ये बृहती मतिलक्षं शंसनं न कर्त्तव्यम् ; सूर्योपासकेषु ब्रह्मवर्चसप्रदत्वात्तदभिलङ्घने ब्रह्मवर्चसं नश्येत्, बृहत्याः प्राणरूपत्वात्तदतिलङ्घने प्राणान्विनाशयेदिति तेषा मभिप्रायः ॥

इदानी मेकं प्रगाथं विधत्ते — "इन्द्र क्रतुं न आ भरेत्येन्द्रं प्रगाथं (सं० ७.३२.२६) शंसति"—इति । हे इन्द्र ! 'नः' अस्माक 'क्रतुम्' अतिरात्राख्यम् 'आ भर' आनयेति अस्य पादस्यार्थः ॥

द्वितीय महर्चं पठति— "शिक्षा णो अस्मिन् पुरुहूत यामनि, जीवा ज्योतिरशीमहीति"–इति। 'पुरुषु' बहुषु यागेषु आह्वयमान, हे इन्द्र! 'नः' अस्मान् 'अस्मिन्' अतिरात्रयागरूपे 'यामनि' नियमविशेषे 'शिक्ष' उपदेशेन प्रवर्त्तय। 'जीवाः' त्वत्प्रसादेन जीवन्तो वयं 'ज्योतिः' आदित्यमण्डलरूपम् 'अशीमहि' प्राप्नुयाम। अत्र ज्योतिःशब्दस्यादित्यपरत्वात् प्रगाथस्यैन्द्रत्वेऽपि सूर्यं नातिक्रम्य शंसनं न भविष्यतीत्येतद्दर्शयति— "असौ वाव ज्योतिस्तेन सूर्यं नाति शंसति"–इति॥

अत्र उत्तरस्या ऋचो विष्टारपङ्क्तित्वेऽपि प्रयत्नेन बृहतीसम्पादनात् बृहती मतिलङ्घ्य शंसनं न भविष्यतीत्येतद्दर्शयति— "यदु बार्हतः प्रगाथस्तेन बृहतीं नाति शंसति"–इति। अस्मिन् प्रगाथे पूर्वस्या ऋचः षट्त्रिंशदक्षरत्वात्पादचतुष्टयोपेतत्वाच्च सा स्वभावत एव बृहती; पुनरपि तस्याश्चतुर्थपाद मष्टाक्षरं द्विरावर्त्त्य इतरस्या ऋचः प्रथमार्द्धेन विंशत्यक्षरेण सह प्रयुज्य षट्त्रिंशदक्षरा द्वितीया बृहती सम्पादनीया; तत्राप्यन्तिमं पाद मष्टाक्षरं द्विरावर्त्त्य इतरार्द्धेन विंशत्यक्षरेण सह प्रयुज्य तृतीया बृहती सम्पादनीया; एवं सति बृहत्या अतिक्रमो न भवति॥

प्रगाथान्तरं विधत्ते— "अभि त्वा शूर नोनुम इति (सं० ७.३२.२०) राथन्तरीं योनिं शंसति; राथन्तरेण वै सन्धिनाग्निनाय सुवते, तस्यद्राथन्तरीं योनिं शंसति रथन्तरस्यैव सयोनित्वाय"–इति। रथन्तराख्यं साम "अभि त्वा शूर"–इत्यृचोत्पन्नम्*; तस्माद्रथन्तरयोनित्वम्। उद्गातारो रात्रौ रथन्तरसामसाध्येनाग्निमेन सन्धिना स्तोत्रेण आग्नेयशस्त्रप्रदर्शनार्थं

* ह० आ० ३.१५.१। आर्ष० ब्रा० २.१.२१। आर्षे० ब्रा० ३.१३।

मेव स्तुवते *, अतो राजन्तरयोनिशंसने सति स्तोत्रगतस्य रथन्तरस्यैव साम्नः 'सयोनित्वं' समानयोनित्वं सम्पद्यते ॥

अत्र सूर्यातिक्रमाभावं दर्शयति— "ईशान मस्य जगतः स्वर्दृश मित्यसौ वाव स्वर्दृक्तेन सूर्यं नाति शंसति"-इति † ईशान मित्यादिकः प्रथमायास्तृचः तृतीयः पादः । 'अस्य' सर्वस्य जगतः 'ईशानं' स्वामिनं 'स्वर्दृशं' स्वर्गलोके दृश्यमानम्, 'अभि नोनुमः'-इतिप्रथमपादगतेनान्वयः । अत्र स्वर्दृक्शब्देनासावादित्य एवोच्यते, तेन सूर्यातिक्रमो नास्ति ॥

पूर्ववद् बृहत्यतिक्रमाभावं दर्शयति— "यदु बार्हतः प्रगाथस्तेन बृहतीं नाति शंसति"-इति ॥

प्रगाथान्तरं विधत्ते — "बृहवः सूरचक्षस इति (सं० ७. ६६.१०.) मैत्रावरुणं प्रगाथं शंसत्यहर्वै मित्रो रात्रिर्वरुण उभे वा एषोऽहोरात्रे आरभते योऽतिरात्रं सुपैति ; तद्यन्मैत्रावरुणं प्रगाथं शंसत्यहोरात्रयोरेवैनं तत्प्रतिष्ठापयति"-इति । अह्नो 'मित्रः' स्वामी, रात्रेश्च 'वरुणः' तस्मात्तयोस्तद्रूपत्वम् । 'यः' यजमानः 'अतिरात्रं' क्रतुं मनुतिष्ठति, 'एषः' पुमानहोरात्रे 'उभे' अपि उद्दिश्य क्रतुं प्रारभते ; उभयोः कालयोरनुष्ठेयविशेषसम्भवात् । अतो मैत्रावरुणप्रगाथशंसनेनाहोरात्रयोरेव कालयोः 'एनं' यजमानं प्रतिष्ठितं करोति ‡ ॥

पूर्ववदनतिक्रमं दर्शयति— "सूरचक्षस इति तेन सूर्यं नाति शंसति ; यदु बार्हतः प्रगाथस्तेन बृहतीं नाति शंसति"-इति । 'सूरचक्षसः'-इति श्रूयमाणं सूरपदं सूर्यवाचि ; अतस्तस्य नातिक्रमः ॥

---

* ता० ब्रा० ९.१.२०—३८. द्रष्टव्यानि ।

† 'इन्द्र क्रतु', 'अभि त्वा', 'बृहतः सूरचक्षस'-इति त्रयः प्रगाथाः । ऋग्वे० ४.४.१८ ।

पुनरप्यन्ये द्वे ऋचौ विधत्ते— "मही द्यौः पृथिवी च नस्, ते हि द्यावापृथिवी विश्वशम्भुवेति द्यावापृथिवीये शंसति ; द्यावापृथिवी वै प्रतिष्ठे ; इय मेवेह प्रतिष्ठासावमुत्र ; तद्यद् द्यावापृथिवीये शंसति, प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति"—इति। "मही द्यौः"—इत्येका (सं० १.२२.१३), "ते हि"—इति (सं० १.१६०.१.) द्वितीया ; उभे अप्यृचौ द्यावापृथिवी-देवताके। ते च द्यावापृथिव्यौ सर्वेषां प्राणिना साधारभूते 'इह' मनुष्यजन्मनि 'इयम्' पृथिवी प्राणिना माश्रयः ; 'अमुत्र' जन्मान्तरे 'असौ' द्युलोक आश्रयः। तथा सति द्यावापृथिवीययोः ऋचोः शंसनेनोभयोरपि प्रतिष्ठारूपयोर्लोकयोः 'एनं' यजमानं प्रतिष्ठापयति ॥

अत्र सूर्यस्यानतिक्रमं दर्शयति— "देवो देवो धर्मणा सूर्यः शुचिरिति तेन सूर्यं नाति शंसति"—इति। उत्तरस्या ऋचि "देवो देवो"—इत्यस्मिन् पादे सूर्यस्य श्रूयमाणत्वात्तदतिक्रमो नास्ति ॥

बृहत्या अनतिक्रमं दर्शयति— "यद् गायत्री च जगती च ते द्वे बृहत्यौ ; तेन बृहतीं नाति शंसति"—इति। प्रथमा गायत्रीच्छन्दस्का चतुर्विंशत्यक्षरा, द्वितीया जगतीच्छन्दस्काष्टाचत्वारिंशदक्षरा ; मिलित्वा द्वासप्ततिरक्षराणि सम्पद्यन्ते ; तेषां द्वेधा विभागे सति षट्त्रिंशदक्षरे द्वे बृहत्यौ भवतः। तेन बृहत्या अनतिक्रमः ॥

अथाप्यन्या मेका ऋचं विधत्ते— "विश्वस्य देवी सृजतस्य जन्मनो न या रोषति न यभदिति द्विपदां शंसति"—इति। इयमृक् पादद्वयोपेता* अस्मिन् ब्राह्मणे एवोक्ता। ऋचि धातुर्गत्यर्थः।

* आश्वलायनीयाभ्यनूक्ता—"विश्वस्य—यभदिति द्विपदा"—इति ६.१.८।

मर्चयति गच्छतीति गतिमान् प्राणी *। 'विश्वस्य' सर्वस्य 'मर्चयस्य' गतिमतः प्राणिनो यज्ञस्य, तस्य 'जन्मनः' 'देवी' स्वामिनी काचिन्निर्ऋतिरूपा मृत्युदेवता विद्यते ; 'या' मृत्युदेवता यज्ञायुषु 'न रोषाति' न कुप्यति, 'न यभत्' नैव यज्ञहातीति द्विपदायाः ऋचोऽर्थः। ता मेतां द्विपदां शंसेत्॥

एता मृचं प्रशंसति—"चितैध मुक्थ मिति ह स्म वा एतदाचक्षते, यदेतदाश्विनं ; निर्ऋतिर्ह स्म पाशिन्युपास्ते, यदैव होता परिधास्यत्यथ पाशान् प्रति मोक्ष्यामीति ; ततो वा एतां ब्रह्मवादिन द्विपदा मपश्यन्न या रोषाति न यभदिति ; तया निर्ऋत्याः पाशिन्या अधराचः पाशानपास्यत्तद्यदेतां द्विपदां होता शंसति निर्ऋत्या एव तत्पाशिन्या अधराचः पाशानपास्यति स्वस्त्यैव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय"-इति। यदेतत् 'आश्विनं' शस्त्र मस्ति, तदेतच्चितैध मुक्थ मिति ब्रह्मवादिना आचक्षते। चिता एधाः काष्ठसमूहा मनुष्यं दग्धुं यस्मिन् श्मशानस्थाने, तत् स्थानं 'चितैधम्'; तत्सदृश मिदम् 'उक्थं' शस्त्रम्, यथा श्मशानं जीवनार्थिनो बिभ्यति, तद्वदाश्विनं शस्त्र' भयहेतुरित्यर्थः। तत् कथ मिति, तदेवोच्यते— "निर्ऋतिः' मृत्युदेवता, सा च 'पाशिनी' पाशहस्ता सती 'उपास्ते' होतुः समीपे निवसति। केनाभिप्रायेणेति सोऽभिधीयते,— यदैवायं होता 'परिधास्यति' शस्त्रममाप्तिं करिष्यति, तदैव बन्धनार्थं पाशान् अस्मिन् होतरि 'प्रति

* "मर्चिर्हिंसाकर्मा, 'मर्च यरिष्ण मर्चयता सुपेशसा'-इत्यादिषु (यजु० सं० ८ २.१७ ; काण्व० सं० १.१७.१६ ; पार० सं० २.१) तथा दृष्टत्वात्"-इति, "मर्चयात -मर्चयति-हिंसाकर्मा, हिंस्यात्"-इति च सत्यव्रत सामश्रमि: (८.६०,९,२.२१.७.)। 'मर्च च (अच्छार्थः) '-इति च० पं० ११६। 'मर्च गतौ' सौत्र० ; उणा० ३.४३। मर्चयतेर्मर्चः पा० १.१.६८. वा० २।

मोक्ष्यामि' प्रजेष्यामि 'इति' तस्या अभिप्रायः। 'ततो वै' तस्मादेव निर्ऋत्याः परिहरणीयत्वकारणात् तदपाकरणार्थं बृहस्पतिः 'एतां' द्विपदां तत्परिहारहेतुत्वेनापश्यत्। कासौ द्विपदेति विवक्षायां तदीयो द्वितीयः पादो "न या"-इत्यादिकः प्रदर्शनार्थं सुपादीयते। 'तया' द्विपदया पाशहस्ताया निर्ऋत्याः सकाशात् 'अधराचः' अधो लम्बमानान् पाशान् बृहस्पतिः 'अपास्यत्' द्विपदायां पत्यमानायां तद्धस्तात्पाशाः पतिता इत्यर्थः। तद्वदेतापि द्विपदायाः शंसनेन पाशान् 'अपास्यति' निराकरोति। 'खल्वेव' चेमेणैवायं होता निर्ऋतिपाशात् मुच्यते। ततः सर्वायुर्भवति, यजमानस्यापि सर्वायुत्वाय शंसनं सम्पद्यते॥ वेदनं प्रशंसति— "सर्वं मायुरेति य एवं वेद"-इति॥

तत्र सूर्यस्यानतिक्रमं दर्शयति— "मृचयस्य जघन इत्यसौ वाव मर्चयतीव; तेन सूर्यं नाति शंसति"-इति। द्विपदायां गतिवाची 'मृचय'-शब्दोऽस्ति, 'असौ वाव' आदित्योऽपि मर्चयतीव सर्वदा गच्छत्येव; 'तेन' सूर्याभिधानान्नास्त्यतिक्रमः॥

बृहत्या अनतिक्रमं दर्शयति— "यदु द्विपदा, पुरुषच्छन्दसं मा सर्वाणि छन्दांस्यभ्यासा; तेन बृहतीं नाति शंसति"-इति। 'यदु' यस्मादेव कारणादियं द्विपदा, तस्मादेव पुरुषसादृश्यात् पुरुषसम्बन्धिच्छन्दो भवति। पुरुषस्य सर्वच्छन्दसां प्रयोक्तेति पुरुषद्वारा 'सा' द्विपदा सर्वाणि छन्दांसि अभितो व्याप्नोति; 'तेन' बृहत्या अपि व्याप्तत्वात् नास्त्यतिक्रमः॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) चतुर्थः खण्डः॥ ४ (१०)॥

॥ अथ पञ्चमः खण्डः ॥

ब्राह्मणस्पत्यया परि दधाति ब्रह्म वै बृहस्पतिर् ब्रह्मण्येवैनं तदन्ततः प्रतिष्ठापयत्येषा पिचे विष्णु-देवाय वृष्ण इत्येतया परि दध्यात्प्रजाकामः पशु-कामो बृहस्पते सुप्रजा वीरवन्त इति प्रजया वै सुप्रजा वीरवान्वयं स्याम पतयो रयीणा मिति प्रजावान् पशुमान् रयिमान् वीरवान् भवति यचैवं विद्वानेतया परि दधाति बृहस्पते अति यदर्यो अर्हा-दित्येतया परि दध्यात्तेजस्कामो ब्रह्मवर्चसकामो ऽतीव वान्यान् ब्रह्मवर्चस मर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्र मिति चित्र मिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवति यचैवं विद्वानेतया परि दधाति तस्मादेवं विद्वानेतयैव परि दध्याद् ब्राह्मणस्पत्या तेन सूर्यं नाति शंसति यद् त्रिष्टुभं त्रिः शंसति सा सर्वाणि छन्दांस्यभ्याप्ता तेन बृहतीं नाति शंसति गायत्रा च त्रिष्टुभा च वषट् कुर्याद् ब्रह्म वै गायत्री वीर्यं त्रिष्टुब् ब्रह्मणैव तद्वीर्यं सन्दधाति ब्रह्मवर्चसी ब्रह्मयशसी वीर्यवान्

भवति यश्चैवं विद्वान् गायत्र्या च त्रिष्टुभा च वषट् करोत्यश्विना वायुना युवं सुदक्षोभा पिबत मश्विनेति गायत्र्या च विराजा च वषट् कुर्याद् ब्रह्म वै गायत्र्यन्नं विराड् ब्रह्मणैव तदन्नाद्यं सन्दधाति ब्रह्मवर्चसी ब्रह्मयशसी भवति ब्रह्मादो मन्न मत्ति यश्चैवं विद्वान् गायत्र्या च विराजा च वषट् करोति तस्मादेवं विद्वान् गायत्र्या चैव विराजा च वषट् कुर्यात् प्र वा मन्थांसि मदान्यस्थुरुभा पिबत मश्विनेत्येताभ्याम् ॥ ५ (११) ॥

अथाश्विनस्य समाप्त्यर्थं मंका मृचं विधत्ते— "ब्राह्मणस्पत्यया परि दधाति ; ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तदन्ततः प्रतिष्ठापयति" इति । "बृहस्पते अति यदर्य्यः"—इति (सं० २,२३.१५.), एषा 'ब्राह्मणस्पत्या' ; बृहस्पतेर्देवेषु ब्राह्मणजातिस्वरूपत्वात् । तेन परिधानेनैतच्छस्त्रं 'ब्रह्मणैव' ब्राह्मणरूपे बृहस्पतावेव प्रतिष्ठितं भवति ॥

नित्यप्रयोगार्थं परिधानीयां विधाय काम्यप्रयोगं विधत्ते— "एवा पित्रे विश्वदेवाय हृषा इत्येतया (सं० ४.५०.६.) परि दध्यात् प्रजाकामः पशुकामः"—इति ।

तस्या ऋचस्तृतीयपाद मनूद्य व्याचष्टे— "बृहस्पते सुप्रजा वीरवन्त इति प्रजया वै सुप्रजा वीरवान्"—इति । पुत्रादिरूपया 'प्रजया' पिता 'सुप्रजाः' शोभनापत्यः 'वीरवान्' शूरपुत्रयुक्तश्च । तेन तृतीयपादोक्तं "सुप्रजा वीरवन्तः"—इति' एतदुपपन्नम् ॥

चतुर्थपाद मनुवदति— "वयं स्याम पतयो रयीणा मिति"—इति। हे बृहस्पते! त्वत्प्रसादाद् वयं 'रयीणां' धनानां पतयः स्याम॥ अस्यार्थस्य स्पष्टत्वाद् व्याख्यान मुपेक्ष्य ज्ञानपूर्वकानुष्ठानं प्रशंसति— "प्रजावान् पशुमान् रयिमान् वीरवान् भवति, यत्रैवं विद्वानेतया परि दधाति"—इति॥

फलान्तरार्थम्* अन्या मृचं विधत्ते— "बृहस्पते अति यदर्यो अर्हादिद्येतया (मं० २.२३.१५.) परि दध्यात्तेजस्कामो ब्रह्मवर्चसकामो ऽतीव वान्यान् ब्रह्मवर्चस मर्हति"—इति। अत्र पादे योऽयं मतिशब्दस्तत्प्रसादादनुष्ठातान्यपुरुषान् 'अतीव' अतिक्रम्यैवाधिकं ब्रह्मवर्चसम् 'अर्हति' प्राप्नोतीत्यर्थः॥

द्वितीयपादे प्रथमपद मनूद्य व्याचष्टे— "द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति, वीव वै ब्रह्मवर्चसं भाति"—इति। "द्युमद्विभाति क्रतुमज्जनेषु"—इति द्वितीयः पादः। ब्रह्मवर्चसविशेषणेन द्युतिमत्पर्यायो 'द्युमदिति' शब्दः प्रयुज्यते। श्रुताध्ययनसम्पन्निरूपं 'ब्रह्मवर्चसं' विद्वत्सभायां 'द्युमदिव वै' प्रकाशयुक्त मेव भूत्वा 'विभाति' सर्वेषा मेव भासते 'इति' तस्य पादस्य तात्पर्यम्। एतत्पादप्रशंसनेन ब्रह्मवर्चसं 'वीव वै' विशेषेणैव भाति॥

तृतीयपाद मनूद्य व्याचष्टे— "यद्दीदयच्छवस ऋतप्रजातेति, दीदायेव वै ब्रह्मवर्चसम्"—इति। अस्मिन्नपि पादे ब्रह्मवर्चसविशेषणत्वेन दीप्यमानत्ववाचकं दीदयदिति पद मस्ति; ब्रह्मवर्चसं 'दीदायेव वै' ब्राह्मणेषु दीप्यत एवेति तस्य पदस्यार्थः॥

चतुर्थपाद मनूद्य व्याचष्टे— "तदस्मासु द्रविणं धेहि चित्र मिति, चित्र मिव वै ब्रह्मवर्चसम्"—इति। अस्मिन् पादे यच्चित्र

* नित्यप्रयोगार्थश्च। आश्व० श्रौ० ६.५.१८. देखो।

मिति विशेषणम्, तद्युक्त मेव ; ब्रह्मवर्चसस्य वेदेन शास्त्रेणाचारेण च विचित्रत्वात् ॥

वेदनपूर्वक मनुष्ठानं प्रशंसति – "ब्रह्मवर्चसी ब्रह्मयशसी भवति, यत्रैवं विदानेतया परि दधाति"–इति। 'ब्रह्मवर्चसी' श्रुतसम्पन्नः 'ब्रह्मयशसी' तन्निमित्तकीर्त्तियुक्तः ॥ उक्त मर्थं निगमयति– "तस्मादेवं विदानेतयैव परि दध्याद्"–इति ॥

सूर्य्यस्यानतिक्रमं दर्शयति–"ब्राह्मणस्पत्या ; तेन सूर्यं नाति शंसति"–इति। यस्मादियं ऋक् ब्रह्मणस्पतिदेवताका, सूर्य्यश्च सन्ध्योपासनादौ ब्राह्मणानां स्वामी, तस्मान्नातिक्रमः ॥

बृहत्या अनतिक्रमं दर्शयति– "यदु त्रिष्टुभं त्रिः शंसति ; सा सर्वाणि छन्दांस्यभ्यासा ; तेन बृहतीं नाति शंसति"–इति। "त्रिः प्रथमां त्रिरुत्तमाम्"–इतिन्यायेन * परिधानीयायास्त्रिरावृत्तिरस्ति ; इयं त्रिष्टुप् त्रिरावर्त्स्यमाना द्वात्रिंशदधिकशताक्षरा सम्पद्यते ; तच्चदक्षरेषु सर्वच्छन्दसा मन्तर्भावयितुं शक्यत्वादियं सर्वाणि छन्दांस्यभितो व्याप्नोति, अतो बृहत्या अपि तद्व्याप्तत्वान्नात्यतिक्रमः ॥

यदुक्तं सूत्रकारेण "आश्विनेन ग्रहेण सपुरोडाशेन चरन्ति"–इति (आश्व० श्रौ० ६.५.२१.), तत्रोभयार्थं हे याज्ये विधत्ते– "गायत्रया च त्रिष्टुभा च वषट् कुर्य्याद्"–इति। "उभा पिबत मश्विना"–इति (सं० १.४.६.१५.) गायत्री, "अश्विना वायुना"–इति (सं० ३.५८.७.) त्रिष्टुप् ; ताभ्यां 'वषट् कुर्यात्' याज्यात्वेन तदुभयं पठेदित्यर्थः ॥

तदेतदुभयं प्रशंसति–"ब्रह्म वै गायत्री, वीर्यं त्रिष्टुब् ; ब्रह्मणैव

* १भा० २१५० ४पं०, ८७५० १६ पं० इत्यादिषु द्रष्टव्यम्।

तदीर्यं सन्दधाति"–इति। गायत्रया ब्राह्मणस्य च प्रजापति-मुखजत्वसाम्यादेकत्वम् *, त्रिष्टुभो वीर्यहेतुत्वात् तद्रूपत्वम् † ; तदुभयपाठे सति ब्राह्मणेन सह वीर्यं सम्पादयति ॥

वेदनपूर्वकं मनुष्ठानं प्रशंसति— "ब्रह्मवर्चसी ब्रह्मयशसी वीर्यवान् भवति, यवैवं विद्वान् गायत्रया च त्रिष्टुभा च वषट् करोति"–इति ॥

तदुभयोर्गायत्रीत्रिष्टुभोः प्रतीकद्वयं दर्शयति— "अश्विना वायुना युवं सुदक्षोभा पिबत मक्षिनेति"–इति। अश्विनेत्यादिकं त्रिष्टुभः प्रतीकम्, उभा पिबत मित्यादिकं गायत्र्याः प्रतीकम्। एतं त्रिष्टुब्-गायत्री याज्ये इत्येकः पक्षः ॥

पक्षान्तरं विधत्ते —"गायत्रया च विराजा च वषट् कुर्याद् ; ब्रह्म वै गायत्र्यं विराड् ; ब्रह्मणैव तदन्नाद्यं सन्दधाति"– इति। गायत्र्या ब्रह्मत्वं पूर्वं मुक्तम्, विराजोऽन्नसाधनत्वादन्नत्वम् ; अतस्तदुभयपाठे सति 'आद्यम्' अन्नं ब्राह्मणजात्या संयोजयति ॥

वेदनपूर्वकं मनुष्ठानं प्रशंसति— "ब्रह्मवर्चसी ब्रह्मयशसी भवति, ब्रह्माद्य मन्न भक्ति, यवैवं विद्वान् गायत्रया च विराजा च वषट् करोति"–इति। ब्राह्मणेनान्नं योग्यं पवित्रीभूतं 'ब्रह्माद्यम्' ॥

तयोर्गायत्रीविराजोः प्रतीकप्रदर्शनपुरःसरं मेतं पक्षं निगमयति — "तस्मादेवं विद्वान् गायत्रया चैव विराजा च वषट् कुर्यात्,— प्र वा मन्मांसि मयान्यस्थुरुभा पिबत मक्षिनेत्येताभ्याम्"–इति। "प्र वा मन्मांसि"–इति (सं० ७.६८.२.) विराट्, "उभा पिबतम्"–इति (सं० १.४६.१५.) गायत्री।

* १भा० १८ ब्रा० ५पं०, २५ब्रा० १५पं०। † ४८ब्रा० ८पं०, १५०ब्रा० १५पं०।

'गायत्रया चैव विराजा च'-इत्येवकारेण पूर्वोक्तस्य त्रिष्टुप्पक्षस्य व्यावृत्तिः ; तस्मादपि विराट्पक्षः प्रशस्त इत्यर्थः * ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) पञ्चमः खण्डः ॥ ५ (११) ॥

॥ अथ षष्ठः खण्डः ॥

चतुर्विंश मेतदहरुपयन्त्यारभ्माणीयं मेतेन वै संवत्सर मारभन्त एतेन स्तोमांश्च छन्दांसि चैतेन सर्वा देवता अनारब्धं वै तच्छन्दोऽनारब्धा सा देवता यदेतस्मिन्नहनि नारभन्ते तदारभ्माणीयस्यारभ्माणीयत्वं चतुर्विंशः स्तोमो भवति तच्चतुर्विंशस्य चतुर्विंशत्वं चतुर्विंशतिर्वा अर्धमासा अर्धमासश्च एव तत्संवत्सर मारभन्त उक्थ्यो भवति पशवो वा उक्थानि पशूना मवरुद्ध्यै तस्य पञ्चदश स्तोत्राणि भवन्ति पञ्चदश

* 'गायत्र्यै'-इत्यारभ्य (२६६५०) एतदन्ता उक्ता अतिरात्रविधयः, कल्पोऽप्येवम् 'अतिरात्रे'-इत्यारभ्य कण्डिकात्रये (६.४,५.)। "अतिरात्रेण प्रजाकामः पशुकामो वा"-इत्यादिकस्तोत्रविधिसूत्रम् (१४.१.२.)। यद्यपि तत्रैव पूर्वक्रमे 'चतुःसंस्थो ज्योतिष्टोमः प्रथमं विधीयते'-इति (१भा० ८पृ०), 'अग्निष्टोमः०—०वचनात्'-इति च (१भा० ६पृ०), तत्सर्वं मेतदनं ज्ञातव्यम्।

शस्त्राणि स मासो मासश एव तत्संवत्सर मारभन्ते तस्य षष्टिश्च चीणि च शतानि स्तोचियास्तावन्ति संवत्सरस्याहान्यहःश एव तत्संवत्सर मारभन्ते ऽग्निष्टोम एतदहः स्यादित्याहुरग्निष्टोमो वै संवत्सरो न वा एतदन्यो ऽग्निष्टोमादहर्दाधार न विद्याचेति स यद्यग्निष्टोमः स्यादष्टाचत्वारिंशास्त्रयः पवमानाः स्युश्चतुर्विंशानीतराणि स्तोचाणि तदु षष्टिश्चैव चीणि च शतानि स्तोचियास्तावन्ति संवत्सरस्याहान्यहःश एव तत्संवत्सर मारभन्त उक्थ्य एव स्यात्पशुसमृद्धो यज्ञः पशुसमृद्धं सचं सर्वाणि चतुर्विंशानि स्तोचाणि प्रत्यक्षाद्वेतदहश्चतुर्विंशं तस्मादुक्थ्य एव स्यात् ॥ ६ (१२) ॥

अग्निष्टोम उक्थ्यः षोड़श्यतिरात्रश्चेत्येवं चतुःसंस्थो ज्योतिष्टोमः सार्द्धेनाध्यायषोड़शकेनाभिहितः ; अथ एतच्चतुष्टय मुपजीव्य प्रवर्त्तमानं "गवामयनं" नाम संवत्सरमत्र मभिधातव्यम् * । संवत्सरगतेषु षष्ट्यधिकशतत्रयदिवसेष्वेकैकस्मिन् दिवसे पूर्वोक्तानां चतसृणां संस्थानां मध्ये कयाचित् संस्थया युक्तः सोमप्रयोगः सर्वोऽप्यनुष्ठेयः । सोऽय मेकैकदिनमाध्यः सोमप्रयोगो वेदेष्वहःशब्देन व्यवह्रियते । संवत्सरसत्रस्यार्थे दिवसे कस्मिंदतिरात्रसंस्थः सोमप्रयोगोऽनुष्ठेयः । तदनन्तरभाविनि द्वितीयदिवसेऽनुष्ठेयं सोम-

* सामब्राह्मणे चैतत् चतुर्थपञ्चमप्रपाठकयोराख्यातम् ।

प्रयोगं विधत्ते — "चतुर्विंश मेतदहरुपयन्त्यारम्भणीयम्"–इति। 'चतुर्विंश'-नामकः कश्चित् स्तोमविशेषः। स च छन्दोगैरेव माम्नायते— "अष्टाभ्यो हिङ्करोति, स तिसृभिः स चतसृभिः स एकया; अष्टाभ्यो हिङ्करोति, स एकया स तिसृभिः स चतसृभिः; अष्टाभ्यो हिङ्करोति, स चतसृभिः स एकया स तिसृभिः"–इति*। अस्याय मर्थः— स्तोत्रस्याधारभूते ऽहे विद्यमानास्विह ऋच आवृत्तिविशेषेण चतुर्विंशतिसङ्ख्याका ऋचः कर्त्तव्याः। सा चावृत्तिस्तिसृभिः पर्यायैः सम्पद्यते। तत्र प्रथमे पर्याये प्रथमा मृचं त्रिरभ्यस्य 'सः' उद्गाता ताभिस्तिसृभिर्गायेत्, द्वितीया मृचं चतुर्वार मभ्यस्य ताभिश्चतसृभिर्गायेत्, तृतीयाया ऋचः सकृदेवपाठो न चावृत्तिः। एवं प्रथमपर्याये ऽष्टौ ऋचः सम्पद्यन्ते; ताभिः 'हिङ्करोति' उद्गायेत्। द्वितीयपर्याये प्रथमायाः सकृत्पाठः, द्वितीयायास्त्रिरावृत्तिः, तृतीयायाश्चतुरावृत्तिः; इत्येव मष्टाभ्यष्टौ सम्पद्यन्ते। तृतीयपर्याये प्रथमायाश्चतुरावृत्तिः, द्वितीयायाः सकृत्पाठः, तृतीयायास्त्रिरावृत्तिः; इत्येव मष्टाभ्यष्टौ सम्पद्यन्ते। तत् सर्वं मिलित्वा चतुर्विंशतिसङ्ख्या ऋचो भवन्ति। सोऽयं चतुर्विंशस्तोमः। अनेन स्तोमेन स्तोत्राणि यस्मिन्नहनि निष्पाद्यन्ते, तदहः 'चतुर्विंशम्'; तादृश मेतदहः 'उपयन्ति' अनुतिष्ठेयुः। अत्र सर्वेषु सर्वत्रोपयन्त्यासत इति शब्दावनुष्ठानपरौ; एताभ्यां विधान मेव सूचितम्। "तत्र ये यजमानास्ते ऋत्विजः"–इति श्रुत्यन्तराद् ऋत्विजां सर्वेषां यजमानत्वेनोपयन्तीति बहुवचनम्। तस्यैतस्याङ्गः 'आरम्भणीयम्'–इति नामधेयम्॥

---

* ता० ब्रा० ३.८। षडाषडहस्य त्रिरुदायः षट् स्तोमाः, तत्सन्धीनां चतुर्विंशत्युदयस्य स्तोमा आवापाः; तेष्वयं प्रथमः।

. तस्यैतस्य नाम्नो निर्वचनं दर्शयति — "एतेन वै संवत्सर मारभन्त, एतेन स्तोमांश्च छन्दांसि चैतेन सर्वा देवता ; अनारब्धं वै तच्छन्दो ऽनारब्धा सा देवता, यदेतस्मिन्नहनि नारभन्ते ; तदारभ्यीयस्यारभ्यीयत्वम्"-इति । एतेनैव चतुर्विंशेनाङ्गा सन्निधः 'संवत्सरं' सच मारभन्ते । तत्र सामगै प्रयोक्तव्या ये स्तोमाः, बह्वृचैः प्रयोक्तव्यानि यानि छन्दांसि, याश्च तत्तन्मन्त्र-प्रतिपाद्याः सर्वा देवताः, तत् सर्वं मनेनैवाङ्गारभन्ते । यदि कथञ्चिदेतस्मिन्नहनि छन्दो वा देवतान्तरं वा नारभेरन्, तदानी मन्यस्मिन्नहनि आरब्धमपि छन्दोदेवतादिकं मनारब्धसदृशमेव भवति । तस्मादस्मिन्नेवाहनि सर्वस्य मुख्यः प्रारम्भः । तथा सत्यारभ्यते सर्वं मस्मिन्नहनीति व्युत्पत्त्यारभणीयं नाम सम्यक्तम् । यद्यप्येतस्मादङ्गः पूर्वभाविनि प्रायणीयाख्येऽहनि सर्वं प्रारब्धम्, तथापि तया प्रायणीयस्यातिरात्रसंयुक्तस्य संवत्सरोपक्रमसाधारणत्वात् अस्य सत्रस्य विशेषेण प्रारम्भोऽस्मिन्नेव भवतीत्यभिप्रेत्यैतस्यारभणीयत्वमेव युक्तम् ॥

अस्मिन्नहनि स्तोमविशेषं विधत्ते —"चतुर्विंशस्तोमो भवति ; तच्चतुर्विंशस्य चतुर्विंशत्वम्"-इति । यान्यत्र स्तोत्राणि भवन्ति, तेषु सर्वेषु यः पूर्वं मुदाहृतः * चतुर्विंशत्वसङ्ख्याभ्यादनरूपः स्तोमः ; स एव कर्त्तव्यः । ईदृशस्तोमयोगादेवाङ्गोऽपि चतुर्विंशं नाम सम्पन्नम् ॥

तं स्तोमं प्रशंसति — "चतुर्विंशतिर्वा अर्धमासा, अर्धमासश्च एव तत्संवत्सर मारभन्ते" इति । दादशसु मासेषु विद्यमाना अर्धमासाश्चतुर्विंशतिसङ्ख्याकाः । तथा सत्यर्धमासगणः एक मर्ह

* 'यत् पूर्वं मुदाहृतम्' क ।

मासं समाप्य पुनरप्यपरोऽर्धमास इत्येवं क्रमेण चतुर्विंशतिसम्पत्तौ संवत्सरसत्रप्रारम्भो भवति। तस्मात्तुर्विंशस्तोमः प्रशस्तः ॥

एतस्मिन्नहनि सोमयागस्य संस्थाविशेषं विधत्ते—"उक्थ्यो भवति; पशवो वा उक्थानि, पशूना मवरुद्ध्यै"—इति। अग्निष्टोमादूर्ध्वभावी योऽयं मुक्थ्योऽस्ति *, सोऽस्मिन्नहनि प्रयोक्तव्यः। तत्र द्वादशस्तोत्रेभ्य उत्तराणि त्रीण्युक्थनामकानि स्तोत्राणि; तेषां पशुप्राप्तिहेतुत्वात् पशुत्वम्। अत उक्थानुष्ठानं पशुप्राप्तये भवति ॥

तस्मिन्नहनि चोदकप्राप्तस्तोत्रशस्त्रसङ्ख्यां प्रशंसति—"तस्य पञ्चदश स्तोत्राणि भवन्ति, पञ्चदश शस्त्राणि; स मासो, मासश्च एव तत्संवत्सर मारभन्ते"—इति। मासगतानां दिवसानां त्रिंशत्त्वात् स्तोत्रशस्त्रसङ्ख्यायाश्च तथात्वान्मासत्वसम्पत्तिः। 'मासशः' एकैकमासक्रमेणेत्यर्थः ॥

स्तोत्रगतानां ऋचां सङ्ख्यां प्रशंसति—"तस्य षष्टिश्च त्रीणि च शतानि स्तोत्रियास्तावन्ति संवत्सरस्याहान्यहःश्च एव तत्संवत्सर मारभन्ते"—इति। एकैकस्य स्तोत्रस्य चतुर्विंशतिसङ्ख्यायाहत्तत्वात्तत्राः स्तोत्रयोग्या ऋचश्चतुर्विंशतिः सम्पद्यन्ते; तथा सति दशसु स्तोत्रेषु चत्वारिंशदधिकं शतद्वयम्, पञ्चसु स्तोत्रेषु विंशत्यधिक मेकं शतम्,—एतदुभयं मिलित्वा षष्ट्यधिकशतत्रयसङ्ख्याकाः स्तोत्रियाः सम्पद्यन्ते। संवत्सरसम्बन्धीन्यहान्यपि तत्सङ्ख्याकानि; तथा सति 'अहःशः' अहःक्रमेणैव संवत्सरसत्र मारभन्ते। तदेव मुक्तः पक्ष उपपादितः † ॥

---

* २३५—२४३पृ० द्रष्टव्यम्।

† "चतुर्विंशं भवति०...० प्रतिपदहनि"—इति पं ता० ब्रा० ४.२,४-१०।

अथ पक्षान्तरं विधत्ते*—"अग्निष्टोम एतदहः स्यादित्याहुरग्निष्टोमो वै संवत्सरो ; न वा एतदन्यो ऽग्निष्टोमादहर्दाधार, न विद्याचेति"—इति । यदिदं द्वितीय मङ्गः, सोऽग्निष्टोमः कर्त्तव्यः ; अग्निष्टोमस्य संवत्सरसत्ररूपत्वात् । कथ मिति चेत्, तदुच्यते— 'अग्निष्टोमादन्यः' उक्थ्यादिरूपः कश्चिदपि क्रतुः संवत्सरसत्रावयवभूतः, एतदहः 'नैव दाधार' नैव धारयितुं शक्तः । अनुपदिष्टान्यङ्गानि सर्वाण्यग्निष्टोमादतिदिश्यन्ते ; तदेतदग्निष्टोमस्य धारयित्वत्वम् । तस्मादग्निष्टोमव्यतिरिक्तः क्रतुरेतदहः 'न विद्याच्च' विवेक्तु मनुष्ठापयितुं न शक्तः । 'इति' एवं पक्षान्तरवादिनामभिप्रायः ॥

अस्मिन् पक्षे स्तोमविशेषं विधत्ते—"स यद्यग्निष्टोमः स्यादष्टाचत्वारिंशाक्षरयः पवमानाः स्युश्चतुर्विंशानीतराणि स्तोत्राणि ; तदु षष्टिरेव त्रीणि च शतानि स्तोत्रियास्तावन्ति संवत्सरस्याहान्यहःश्च एव तत्संवत्सर मारभन्ते"—इति । अग्निष्टोमपक्षे त्रिष्ववसान-माध्यन्दिनपवमानाभेषवमानेषु त्रिषु स्तोत्रेष्वष्टाचत्वारिंशनामकः स्तोमः कर्त्तव्यः । स च छन्दोगैरेव माम्नातः—"षोड़शभ्यो ह्रिङ्करोति, स तिसृभिः स द्वादशभिः स एकया ; षोड़शभ्यो ह्रिङ्करोति, स एकया स तिसृभिः स द्वादशभिः ; षोड़शभ्यो ह्रिङ्करोति, स द्वादशभिः स एकया स तिसृभिः"—इति † । प्रथमे पर्य्याये प्रथमाया ऋचस्त्रिरावृत्तिः, द्वितीयाया द्वादशकृत्व आवृत्तिः, तृतीयायाः सकृत्पाठः ; द्वितीयपर्य्याये प्रथमायाः सकृत्पाठः,

* एव मेव पक्षान्तरं सामब्राह्मणेऽपि (ता० ब्रा० ४,२.११,१२.) ।

† एषाष्टाविंशस्य 'प्रतिष्ठिता' विश्रुतेः (ता० ब्रा० १२.), आत्माता आपरा तत्रैव 'नेदीयःसङ्गमा'—इति (३.१९.) ।

द्वितीयायास्त्रिरावृत्तिः, तृतीयाया द्वादशकृत्व आवृत्तिः ; तृतीय-पर्य्याये प्रथमाया द्वादशकृत्व आवृत्तिः, द्वितीयायाः सकृत्पाठ*, तृतीयायास्त्रिरावृत्तिः ; मिलित्वाष्टाचत्वारिंशत् स्तोत्रीयाः सम्पद्यन्ते । सोऽय मष्टाचत्वारिंशः स्तोमः । त मेतं पवमानेषु त्रिषु कृत्वा शिष्टेषु नवसु स्तोत्रेषु चतुर्विंशं स्तोमं कुर्य्यात् । तथा सति पवमानस्तोत्रेषु चतुश्चत्वारिंशदधिकशतसङ्ख्याकाः स्तोत्रीयाः सम्पद्यन्ते ; इतरस्तोत्रेषु षोड़शाधिकशतद्वयसङ्ख्याकाः ; ततो मिलित्वा षष्ट्यधिकशततत्रयसङ्ख्याका भवन्ति । संवत्सरगताना मङ्गा मपि तावत्त्वादहःक्रमेणैव संवत्सर मारभन्ते ॥

एवं पक्षद्वय मुपन्यस्य तयोः समविकल्पत्व मभिप्रेत्य पुनरपि पूर्वोक्त मुक्थ्य मुपन्यस्यति—"उक्थ्य एव स्यात् ; पशुसमृद्धो यज्ञः, पशुसमृद्धं सत्रं, सर्वाणि चतुर्विंशानि स्तोत्राणि प्रत्यक्षाद्दोतदहश्चतुर्विंशं ; तस्मादुक्थ्य एव स्यात्"—इति । उक्थस्तोत्राणां पशु-साधनत्वात् उक्थ्यो यज्ञः पशुसमृद्धः, सत्रं च पशुसमृद्धं कर्त्तव्यम् । किञ्च उक्थ्यपक्षे सर्वाणि स्तोत्राणि चतुर्विंशस्तोमकानि ; स त्वग्निष्टोमपक्षे पवमानव्यतिरिक्तान्येव । तथा सति प्रत्यक्षात् मुख्यत्वेनैवैतदहश्चतुर्विंशं भवति ; सङ्ख्यान्तरस्य कुत्राप्यप्रविष्ट-त्वात् । 'तस्मादुक्थ्य एव' कार्य्यः * । एवशब्दो विकल्पार्थः ; "अग्निष्टोम इद महरुक्थ्यो वा"—इतिसूत्रकारवचनात् † ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) षष्ठः खण्डः ॥ ६ (१२) ॥

* एव सामब्राह्मणेऽपि द्रष्टव्यम् (ता० ब्रा० ४.२.१३,१४.) ।

† आश्व० श्रौ० ७. ४. १४, १५ ।

॥ अथ सप्तमः खण्डः ॥

बृहद्रथन्तरे सामनी भवत एते वै यज्ञस्य नावौ सम्पारिण्यौ यद् बृहद्रथन्तरे ताभ्या मेव तत्संवत्सरं तरन्ति पादौ वै बृहद्रथन्तरे शिर एतदहः पादाभ्या मेव तच्छिरं शिरोऽभ्यायन्ति पक्षौ वै बृहद्रथन्तरे शिर एतदहः पक्षाभ्या मेव तच्छिरं शिरोऽभ्यायुवते ते उभे न समवसृज्य य उभे समवसृजेयुर्यथैव छिन्ना नौर्वभ्रनात्तीरं तीर मृच्छन्ती प्रवेतैव मेव ते सविणस्तीरं तीर मृच्छन्तः प्रवेरन् य उभे समवसृजेयुस्त्यदि रथन्तर मव सृजेयुर्बृहतैवोभे अनवसृष्टे अथ यदि बृहदवसृजेयू रथन्तरमेवोभे अनवसृष्टे यद्वै रथन्तरं तद्वैरूपं यद् बृहत्तद्वैराजं यद्रथन्तरं तच्छाक्वरं यद् बृहत्तद्रैवत मेव मेते उभे अनवसृष्टे भवतो ये वा एवं विद्वांस एतदहरुपयन्त्यात्वा वै ते ऽहंशः संवत्सर मात्मन्नर्धमासश आत्मा मासश आत्मा स्तोमांश्छन्दांसि चात्मा सर्वा देवतास्वप एव तप्यमानाः सोमपीथं भक्षयन्तः संवत्सर मभिषुण्वन्त आसते ये वा अत ऊर्ध्वं संवत्सर मुपयन्ति गुरुं वै ते भार मभि नि दधते स वै गुरुभारः शृणात्यथ य एनं परस्तात्

कर्मभिरात्मावस्तादुपैति स वै खलु संवत्सरस्य पार मश्नुते ॥ ७ (१३) ॥

पृष्ठस्तोत्रे चोदकप्राप्तं विकल्पितं * सामद्वय मनूद्य प्रशंसति— "बृहद्रथन्तरे सामनी भवत ; एते वै यज्ञस्य नावौ सम्पारिण्यौ यद् बृहद्रथन्तरे ; ताभ्या मेव तत्संवत्सरं तरन्ति"–इति। "त्वा भिद्धवामहे"–इत्यस्या मृचुत्पन्नं साम 'बृहत्' †, "अभि त्वा शूर नोनुमः"–इत्यस्या मृचुत्पन्नं 'रथन्तरम्' ‡। एते उभे अपि यज्ञाख्यस्य समुद्रस्य सम्यक् परतीरप्राप्तिसाधनभूते नौ। संवत्सरसत्रस्य समुद्ररूपत्वं शाखान्तरे दर्शितम्— "समुद्रं वा एते प्रप्लवन्ते, ये संवत्सर मुपयन्ति"–इति (तै० सं० ७.५.१.२. §)। तथा सति तत्पारनयनहेत्वोः साध्वोर्नौरूपत्वं युक्तम्। अतो बृहद्रथन्तररूपाभ्या मेव संवत्सरसत्ररूपं समुद्रं 'तरन्ति' गवामयनस्य पारं गच्छन्तीत्यर्थः ॥

प्रकारान्तरेण प्रशंसति— "पादौ वै बृहद्रथन्तरे, शिर एतदहः ; पादाभ्या मेव तच्छिरो ऽभ्यायन्ति"–इति। यथा मनुष्यस्य पादौ, तथा सत्रस्य 'बृहद्रथन्तरे' सामनी ; 'एतत्' आरभ्यमाणं महः शिरःस्थानीयम्। ततो यथा लोके पुरुषाः पादाभ्या मेव देशान्तरात् स्वगृहे गत्वा, तत्र शिरोऽभिलक्ष्याभ्यङ्गकर्णाभरणादि-

* "रथन्तरसाम्ना बृहत्साम्नोभयसाम्ना वा प्रथमं यजेत"–इति आप० श्रौ० १० २ १।

† ऋ० आ० ३.१.५.२. ऋचि आर० गा० १.१.२७. बृहत् (योनिसाम); सु० आ० २.१.१२.१.२ ऋची: प्रगाथटचे ऊह्य० गा० १.१.५. बृहत् (स्तोत्रम्)।

‡ ऋ० आ० ३.१.५.१ ऋचि आर० गा० २.१.२१. रथन्तरं (योनिसाम); सु० आ० १.१.११.१.२ ऋची: प्रगाथटचे ऊह्य० गा० १.१.१. रथन्तरं (स्तोत्रम्)।

§ एष मेव ता० ब्रा० ५.८.४.६. (प्रवसाम—मै० गा० १४.१.१४.)।

रूपां 'श्रियम्' 'आयन्ति' प्राप्नुवन्ति ; एव मेते सत्रिणः सामभ्या मेतदहः प्राप्नुवन्ति ॥

पुनरपि प्रकारान्तरेण प्रशंसति—"पद्भ्यो वै बृहद्रथन्तरे, शिर एतदहः ; पद्भ्यामेव तच्छ्रियं शिरोऽभ्यायुवते"—इति । यथा लोके पद्भ्यो पद्भ्यामेवाकाशे सञ्चरन्, शिरोऽभिलक्ष्य नानाविध-दिग्दर्शनरूपां 'श्रियं' मिश्रयति ; एव मत्रापि सामभ्या मेतच्छिर-इति 'श्रियम्' अनुष्ठानरूपां सत्रिणो 'युवते' मिश्रयन्ति ॥

सामद्वयस्य परित्यागं निषेधति—"ते उभे न समवसृज्ये ; य उभे समवसृजेयुर्यथैव छिन्ना नावेत्यनात्तीरं तीर मृच्छन्ती ध्रुवेतैव मेव ते सत्रिणस्तीरं तीर मृच्छन्तः ध्रुवेरन् य उभे समवसृजेयुः"—इति । 'उभे' सामनी 'न समवसृज्ये' न परित्याज्ये ; एकस्याप्यन-नुष्ठान मुभयपरित्यागः । 'ये' सत्रिणो ऽनभिज्ञाः सन्तः उभयं परित्यजन्ति, तेषां छिन्ननौसादृश्यं प्रसज्येत । लोके हि नाविकः सायं काले नावं कयाचिद्रज्ज्वा तीरस्थे स्थाणौ बध्नाति ; यदा प्रवाहवेगाद्रज्जुस्त्रुट्यति, तदानीं बन्धनस्थाणोश्छिन्ना नौः प्रवाहवेगेनेतस्ततो नीयमाना परतीर मवाक्तीरञ्च पुनः पुनः प्राप्नु-वन्ती रज्जुकाभावात् 'ध्रुवेत' यत्र क्वापि गच्छेत् । एव मेव ते सत्रिणः सामद्वयाभावे तत्तत्तीरमदृष्टानदृष्टविशेषान् 'ऋच्छन्तः' अनु-तिष्ठन्तोऽपि 'ध्रुवेरन्' विनश्येयुरित्यर्थः । ये सामद्वय मपि परि-त्यजन्ति, तेषा मेवायं दोष इति दर्शयितुं 'य उभे समवसृजेयुः'-इति पुनरभिधानम् ॥

उभयोः सान्नोर्विकल्पितत्वादेकपरित्यागे दोषो नास्तीत्ये-तदर्शयति—"तद्यदि रथन्तर मवसृजेयुर्बृहतैवोभे अनवसृष्टे ; अथ यदि बृहदवसृजेयू रथन्तरेणैवोभे अनवसृष्टे"—इति । 'तम्' तयोः

सामयोर्मध्ये यदा रथन्तरं परित्यजेयुः,— बृहदेवानुतिष्ठेयुः, तदा बृहतैव प्रयोगसम्पत्तेः फलत उभय मप्यपरित्यक्त मेव भवति ; एवं बृहत्परित्यागपक्षेऽपि रथन्तरेणैव सम्पत्तिः ॥

प्रकारान्तरेण सामद्वयं प्रशंसति— "यद्वै रथन्तरं तद्वैरूपं, यद् बृहत्तद्वैराजं, यद्रथन्तरं तच्छाक्करं, यद् बृहत्तद्रैवत मेव मेते उभे अनवरुद्धे भवतः"–इति। पृष्ठाषड्हे* षट्स्वपि दिवसेषु क्रमेण पृष्ठस्तोत्रनिष्पादकानि षट् सामानि,— रथन्तरं, बृहद्, वैरूपं वैराजं, शाक्करं, रैवत मिति। तत्र रथन्तरस्य बृहतस्तोत्पत्तिस्थानं पूर्वं सुतम् (३१२ पृ०) ; "यद् द्याव इन्द्र ते शतम्"-इत्यस्या ऋचुत्पन्नं वैरूपं साम† ; "पिबा सोम मिन्द्र मन्दतु त्वा"–इत्यस्या ऋचुत्पन्नं वैराजं साम ‡ ; "प्रो ष्वस्मै पुरो रथम्"–इत्यस्यां गीयमानं शाक्करं साम§ ; "रेवतीर्नः सधमादे"--इत्यस्यां गीयमानं रैवतं साम ॥। तत्र बृहद्रथन्तरयोरेवात्तरस्थानीयत्वाद्ग्रेधसामफलसिद्ध्यर्थं मेते उभे अपरित्यक्ते एव भवतः ; उभयपरित्यागः सर्वथा न योग्य इत्यर्थः ॥

---

* "पृष्ठाः षड्हो भवति"–इति तै० सं० ७.२.६.२। पृष्ठानां समूहः पृष्ठ्यः पा० ४. २.४२. वा०। "अभिप्लवं पूर्वं पुरस्ताद् विषुवत उपयन्ति पृष्ठ्य सुत्तरम्"–इति श्रत० ब्रा० १२.२.३.४। परस्तात् टीप्पन्यां (३१६ पृ०) द्रष्टव्यम्।

† ऋ० भा० १.२.४.६ ऋचि भार० गा० १.१.३. वैरूपं (योनिसाम); उ० भा० २.२.११.१.२ ऋचीः प्रगाथरूपे ऋग्० गा० १.१.७. वैरूपं (स्तोत्रम्)।

‡ ऋ० भा० ५.१.१.८ ऋचि भार० गा० २.१.११. वैराजं (योनिसाम); उ० भा० २.१.१६.१–२ ऋचे ऋग्० गा० १.१.१०. वैराजं (स्तोत्रम्)।

§ उ० भा० ६.१.१४.१. (१०)।

‖ ऋ० भा० २.२.१.८ ऋचि भार० गा० २.१.१७. रैवतं (योनिसाम); उ० भा० ४.१.१४.१–३. ऋचे ऋग्० गा० २.२.७. रैवतं (स्तोत्रम्)।

उक्तस्याङ्गोऽनुष्ठानं प्रशंसति— "ये वा एवं विद्वांस एतदङ्गं उपयन्त्यात्मा वै ते ऽहःश्रः संवत्सर आत्मार्धमासस्य आत्मा मासस्य आत्मा स्तोमाश्च छन्दांसि च आत्मा सर्वा देवतास्तप एव तप्यमानाः सोमपीथं भक्षयन्तः संवत्सर मभिसुखस्य आसते"–इति । 'ये' सत्रिणः पूर्वोक्तप्रकारेण एतस्याङ्गं महिमानं विद्वांस एतदङ्गं अनुतिष्ठन्ति, ते सत्रिणः संवत्सरसत्र महद्वारेण, अर्धमासद्वारेण, मासद्वारेण, स्तोमच्छन्दोद्वारेण, सर्वदेवताद्वारेण प्राप्य तपश्चरन्तो निर्विघ्नं सोमपानं कुर्वन्तः संवत्सर मपि नैरन्तर्येण सोम मभिसुखस्य आसते ; विघ्नः कोऽपि न भवतीत्यर्थः ॥

अथ सत्रगतस्योत्तरपक्षस्य प्रत्यवरोहं विधत्ते— "ये वा अत 'ऊर्ध्वं' संवत्सर मुपयन्ति, गुरुं वै भार मभि नि दधते ; स वै गुरुभारः शृणात्यथ य एनं परस्तात् कर्मभिरात्मा ऽवस्तादुपैति, स वै स्वस्ति संवत्सरस्य पार मश्नुते"–इति । 'ये वै' केचन मन्दबुद्धयः सत्रिणः 'अतः' आरब्धव्योयं चतुर्विंश महः प्रारभ्योर्ध्वं मानुलोम्येनैतत्संवत्सरसत्रम् 'उपयन्ति' अनुतिष्ठन्ति, ते सत्रिणो 'गुरुं वै' प्रौढ़ मेव भारम् 'अभिनिदधते' स्वोपरि स्थापयन्ति ; 'स वै'* स एव गुरुभारः 'शृणाति' भारवाहकान् सत्रिणो विनाशयति । 'अथ' पूर्वोक्तवैलक्षण्येन 'ये' सत्रिणः 'एनं' संवत्सरं 'परस्ताद्' आदित आरभ्य विहितैः 'कर्मभिः' पूर्वपक्षगतैः 'आत्मा' अनुष्ठायोत्तरपक्षे 'अवस्तात्' प्रत्यवरोहक्रमेण 'उपैति' उपयन्ति, अनुतिष्ठन्ति । 'स वै' त एव सत्रिणः 'स्वस्ति' क्षेमेण संवत्सरसत्रस्य 'पारं' समाप्तिम् 'अश्नुते' अश्नुवते, प्राप्नुवन्ति ॥

अयं मर्थः ।—अस्ति किञ्चिद्विषुवन्नामकं संवत्सरसत्रस्य मध्ये

* 'स वै'–इत्येव माध्यन्दिनः पाठः, परं सर्वमूलपुस्तकविरुद्धः ।

साम्नोर्मध्ये यदा रथन्तरं परित्यजेयुः,— बृहदेवानुतिष्ठेयुः, तदा बृहतैव प्रयोगसम्भूतेः फलत उभय मप्यपरित्यक्त मेव भवति ; एवं बृहत्परित्यागपक्षेऽपि रथन्तरेणैव सम्पूर्त्तिः ॥

प्रकारान्तरेण सामद्वयं प्रशंसति— "यद्वै रथन्तरं तद्वैरूपं, यद् बृहत्तद्वैराजं, यद्रथन्तरं तच्छाक्करं, यद् बृहत्तद्रैवत मेव मेते उभे अनवरुद्धे भवतः"–इति। पृष्ठ्यषड्हे* षट्स्वपि दिवसेषु क्रमेण पृष्ठस्तोत्रनिष्पादकानि षट् सामानि,— रथन्तरं, बृहद्, वैरूपं वैराजं, शाक्करं, रैवत मिति। तत्र रथन्तरस्य बृहत्सोत्पत्तिस्थानं पूर्वं सूक्तम् (३१२ पृ०); "यद् याव इन्द्र ते शतम्"-इत्यस्या ऋच्युत्पन्नं वैरूपं साम† ; "पिबा सोम मिन्द्र मन्दतु त्वा"–इत्यस्या ऋच्युत्पन्नं वैराजं साम ‡ ; "प्रो ष्वस्मै पुरो रथम्"–इत्यस्यां गीयमानं शाक्करं साम§; "रेवतीर्नः सधमादे"–इत्यस्यां गीयमानं रैवतं साम ‖। तत्र बृहद्रथन्तरयोरेवात्तरस्थानीयत्वाद्ग्रेषसामफलसिद्धार्थं मेते उभे अपरित्यक्ते एव भवतः ; उभयपरित्यागः सर्वथा न योग्य इत्यर्थः ॥

---

* "पृष्ठाः षडही भवति"–इति तै० सं० ७.२.६.२। पृष्ठानां समूहः पृष्ठाः या० भ. २.४२, वा०। "अभिप्लवं पूर्वं पुरस्ताद् विपुवत उपयन्ति पृष्ठ मुत्तरम्"–इति शत० ब्रा० १२.२.३.४। परस्तात् टीप्पन्यां (३१६ पृ०) द्रष्टव्यम्।

† ऋ० आ० १.२.४.६ ऋचि आर० गा० १.१.३. वैरूपं (योनिसाम); उ० आ० २.२.११.१,२ ऋचौ प्रगाथत्वे जग० गा० १.१.७. वैरूपं (स्तोत्रम्)।

‡ ऋ० आ० ५.१.१.८ ऋचि आर० गा० २.१.३१. वैराजं (योनिसाम); उ० आ० २.१.११.१–३ ऋचि जग० गा० १.१.१०. वैराजं (स्तोत्रम्)।

§ उ० आ० २.१.१४.१. (१)।

‖ ऋ० आ० २.२.१.८ ऋचि आर० गा० २.१.१७ रैवतं (योनिसाम); उ० आ० ४.१.१५.१–३. ऋचि जग० गा० २.२.७. रैवतं (स्तोत्रम्)।

उत्तरस्याङ्गोऽनुष्ठानं प्रशंसति— "ये वा एवं विद्वांस एतदह उपयन्त्यात्मा वै ते ऽहःश्रः संवत्सर आत्मार्धमासस्य आत्मा मासस्य आत्मा स्तोमाश्च छन्दांसि च आत्मा सर्वा देवतास्तेऽप एव तन्वाना: सोमपीथं भक्षयन्तः संवत्सर मभिसुखन्न आसते"–इति। 'ये' सत्रिणः पूर्वोक्तप्रकारेण एतस्याङ्गो महिमानं विद्वांस एतदहः अनुतिष्ठन्ति, ते सत्रिणः संवत्सरसत्र महद्वारेण, अर्धमासद्वारेण, मासद्वारेण, स्तोमच्छन्दोद्वारेण, सर्वदेवताद्वारेण प्राप्य तपश्चरन्तो निर्विघ्नं सोमपानं कुर्वन्तः संवत्सर मपि नैरन्तर्येण सोम मभिसुखन्न आसते ; विघ्नः कोऽपि न भवतीत्यर्थः ॥

अथ सत्रगतस्योत्तरपक्षस्य प्रत्यवरोहं विधत्ते— "ये वा अत 'ऊर्ध्वं' संवत्सर मुपयन्ति, गुरुं वै भार मभि नि दधते ; स वै गुरुभारः शृणात्यथ य एनं परस्तात् कर्मभिरात्मा ऽवस्तादुपैति, स वै स्वस्ति संवत्सरस्य पार मश्नुते"–इति। 'ये वै' केचन मनुष्याः सत्रिणः 'अतः' आरभ्यमाणोयं चतुर्विंश मह: प्रारभ्योर्ध्वं मासुलोम्येनैतत्संवत्सरसत्रम् 'उपयन्ति' अनुतिष्ठन्ति, ते सत्रिणो 'गुरुं वै' प्रौढ़ मेव भारम् 'अभिनिदधते' स्वस्योपरि स्थापयन्ति ; 'स वै'* स एव गुरुभारः 'शृणाति' भारवाहकान् सत्रिणो विनाशयति। 'अथ' पूर्वोक्तवैलक्षण्येन 'ये' सत्रिणः 'एनं संवत्सरं 'परस्ताद्' आदित आरभ्य विहितैः 'कर्मभिः' पूर्वपक्षगतैः 'आत्मा' अनुष्ठायोत्तरपक्षे 'अवस्तात्' प्रत्यवरोहक्रमेण 'उपैति' उपयन्ति, अनुतिष्ठन्ति। 'स वै' त एव सत्रिणः 'स्वस्ति' क्षेमेण संवत्सरसत्रस्य 'पारं' समाप्तिम् 'अश्नुते' अश्नुवते, प्राप्नुवन्ति ॥

अथ मर्त्यः। —अस्ति किञ्चिद्विषुवत्त्रामकं संवत्सरसत्रस्य मध्ये

* 'स वै'–इत्येव भाष्यसम्मतः पाठः, एवं सर्वमूलपुस्तकविरुद्धः।

राचो वा अस्य प्रायणीयो ऽवरोधन मुदयनीय उद्रोधनं स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद यो वै संवत्सरस्य प्रायोदानी वेद स वै स्वस्ति संवत्सरस्य पार मश्नुते ऽतिरात्रो वा अस्य प्रायणीयः प्राण उदान उदयनीयः स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद य एवं वेद ॥ ८ (१४) ॥

॥ इत्यैतरेयब्राह्मणे चतुर्थपञ्चिकायां द्वितीयोध्यायः ॥२॥

अथास्मिन्नारभ्यणीये चतुर्विंशेऽहनि निष्केवल्यशस्त्रे कञ्चिद्विशेषं विधत्ते— "यद्वै चतुर्विंशं तन्महाव्रतं बृहद्दिवेनात्र होता रेतः सिञ्चति ; तददो महाव्रतीयेनाङ्गा प्र जनयति ; संवत्सरे संवत्सरे वै रेतः सिक्तं जायते ; तस्मात्समानं बृहद्दिवो निष्केवल्यं भवत्येष ह वा एनं परस्तात् कर्म्मभिरात्मा ऽवस्तादुपैति य एवं विद्वानेतदहरुपैति" इति । यदेतद् द्वितीयं चतुर्विंश मह:, तदेव संवत्सरमत्रस्योपान्त्यं महाव्रताख्य महर्भवति । आरोहक्रमेण चतुर्विंशाख्यं पूर्वपक्षगतद्वितीय मह: ; अवरोहक्रमेण महाव्रताख्य मुपान्त्यत्वाद् द्वितीय महर्भवति । अनेन द्वितीयत्वसाम्येन तयोः परस्परैक्य मुपचर्यते, किञ्चोभयत्र बृहद्दिवसाम्य मस्ति । "तदिदास भुवनेषु ज्येष्ठम्"—इत्येतत्सूक्तं (सं० १०.१२०.१-९.) बृहद्दिवशब्देन विवक्षितम् ; प्रौढ़स्य द्युलोकस्य प्राप्तिहेतुत्वात् । एतदेवोभयत्र निष्केवल्यशस्त्रे क्रियते । तथा सत्यस्मिन् द्वितीयेऽह्नि चतुर्विंशनामके बृहद्दिवनाम्ना तदिदासेत्यादिना निष्केवल्यशस्त्रसूक्तेन होता रेतः सिञ्चति । 'तत्' एतत् सिक्तं रेतो 'महाव्रती-

रेतः' उपाख्येन 'अङ्गा' बृहद्दिवाख्यनिष्केवल्यसूक्तयुक्तेन 'प्रजनयति' यत्र संवत्सरसत्रमध्ये एव रेतःसेकः प्रजननं च द्वितीयोपाख्यदिवसयोः सम्पद्यते । ततो लोकेऽप्येकैकस्मिन् संवत्सरे रेतःसेकः उत्पत्तिश्चेत्युभयं सम्पद्यते । यस्माद् द्वितीयोपाख्ययोरङ्गोरुभयोरपि मिलित्वा प्राणिनो जन्मरूप मेकं कार्य्य मपेक्षितम्, 'तस्माद्' बृहद्दिवनामकेन सूक्तेनोभयत्र निष्केवल्यं शस्त्रं 'समानम्' एकरूपं कर्त्तव्यम् । 'यः' पुमान् 'एवं' महाव्रताङ्गसाम्येन निष्केवल्यस्य कर्त्तव्यतां विद्वान् 'एतद्' द्वितीय महरनुतिष्ठति, स पुमान् 'परस्तात्' सत्रस्य प्रथमभागे आनुलोम्येन क्रियमाणैः कर्म्मभिः 'आप्त्वा' प्राप्य 'अवस्तात्' अपरभागे प्रातिलोम्येनैव संवत्सर मनुतिष्ठति ॥ वेदनं प्रशंसति — "स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद"-इति ॥

अथ संवत्सरसत्रस्याद्यन्तौ द्वे अहनी विधत्ते— "यो वै संवत्सरस्यावारञ्च पारञ्च वेद, स वै स्वस्ति संवत्सरस्य पार मश्नुते ; उतिरात्रो वा अस्य प्रायणीयो ऽवार मुदयनीयः पारम्" इति । 'यः' पुमान् संवत्सरसत्रस्य समुद्रस्थानीयस्य 'अवारम्' अर्वाक्तीरस्थानीयं प्रथम महः, 'पारं' परतीरस्थानीय मन्तिम महः, 'वेद' तयोरङ्गोरनुष्ठेयं कर्त्तव्यं निर्विनोति, 'सः' पुमान् अविघ्नेनैव संवत्सरसत्रस्य 'पारं' समाप्तिं प्राप्नोति । योऽय मतिरात्रसंस्थः, स एवास्य 'प्रायणीयः' आरम्भे अनुष्ठेयत्वादर्वाक्तीरस्थानीयः ; स एवातिरात्रः पुनः 'उदयनीयः' समाप्तावनुष्ठेयत्वात् परतीरस्थानीयः ॥ वेदनं प्रशंसति— "स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद"-इति ॥

उक्तावाद्यन्तावतिरात्रौ प्रशंसति—"यो वै संवत्सरस्यावरोधनं पोद्रोधनं च वेद, स वै स्वस्ति संवत्सरस्य पार मश्नुते ; उतिरात्रो

वा अस्य प्रायणीयो ऽवरोधन मुदयनीय उद्रोधनम्"–इति। अवरुध्यते स्वाधीनं क्रियते येन प्रारम्भरूपेण कर्मणा तत्कर्म 'अवरोधनम्'। उद्रुध्यते समाप्यते येन कर्मणा तत् 'उद्रोधनम्'। अन्यत् पूर्ववत्॥ वेदनं प्रशंसति—"स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद"–इति॥

पुनरपि प्रकारान्तरेण प्रशंसति—"यो वै संवत्सरस्य प्राणोदानौ वेद, स वै स्वस्ति संवत्सरस्य पार मश्नुते; अतिरात्रो वा अस्य प्रायणीयः प्राण, उदान उदयनीयः"–इति। 'प्रायणीयः' अतिरात्रः 'प्र'शब्दसामान्यात् 'प्राणः' इत्युच्यते; उच्छब्दसामान्याद् 'उदयनीयः' अतिरात्रः 'उदानः'॥ वेदनं प्रशंसति "स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद य एवं वेद"–इति। अभ्यासो ऽध्यायसमाप्त्यर्थः॥ ८॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये
(सप्तदशाध्याये) अष्टमः खण्डः॥ ८ (१४)॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायाः द्वितीयोऽध्यायः॥

———

॥ अथ तृतीयाध्यायः ॥

(सप्त)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ ज्योतिर्गौरायुरिति सोमेभिर्यन्त्यं वै लोको ज्योतिरन्तरिक्षं गौरसौ लोक आयुः स एवैष उत्तरस्त्र्यहो ज्योतिर्गौरायुरिति चीर्ण्यानि गौरायुर्ज्योतिरिति चीर्ण्यं वै लोको ज्योतिरसौ लोको ज्योतिस्ते एते ज्योतिषी उभयतः सं लोकते * तेनैतेनोभयतोज्योतिषा षळहेन यन्ति तद्यदेतेनोभयतोज्योतिषा षळहेन यन्त्यनयोरेव तल्लोकयो-† रुभयतः प्रति तिष्ठन्तो यन्त्यस्मिंश्च लोकेऽमुष्मिंश्चाभयोः परि यद्वा ‡ एतद्वैवचक्रं यदभिप्लवः षळहस्तस्य यावभितो ऽग्निष्टोमौ तौ प्रधी ये चत्वारो मध्य उक्थ्यास्तन्नभ्यं गच्छति वै वर्त्तमानेन यच्च कामयते तत्स्वस्ति संवत्सरस्य पारं मश्नुते य एवं वेद यो वै तद्वेद यत्प्रथमः षळहः स वै स्वस्ति संवत्सरस्य पारं मश्नुते यस्तद्वेद यद् द्वितीयो यस्तद्वेद यत्तृतीयो यस्तद्वेद यच्चतुर्थो यस्तद्वेद यत्पञ्चमः ॥ १ (१५) ॥

* 'सङ्क्रीते' ख। † 'लोकयो' ङ, 'लोकयो' अ, ट, ठ। ‡ 'पर्वद' ग, घ।

आग्निमस्य विधिः प्रातरनुवाक उदीरितः ।
सङ्ख्याप्रतिपदावन्ये सौर्य्यादीन्यधिकानि तु * ॥

तत्र † गवामयनस्य प्रायणीयोदयनीयावाद्यन्तावतिरात्रावुक्थौ ; अथ मासकृत्तिविधानायाभिप्लवषड्हे पूर्वभागरूपाणि त्रीण्यङ्गानि विधत्ते— "ज्योतिर्गौरायुरिति स्तोमैभिर्यन्त्ययं वै लोको ज्योतिरन्तरिक्षं गौरसौ लोक आयुः"–इति । स्तोमशब्दो ज्योतिरादिभिः प्रत्येक मभि सम्बध्यते । तथा सति ज्योतिष्टोमः, गोष्टोमः, आयुष्टोम इत्येतैरङ्गोभिः 'यन्ति' अनुतिष्ठेयुरित्यर्थः । तदेतदङ्गत्रयं त्रित्वसाम्यात् क्रमेण लोकत्रयरूपम् । शाखान्तरेऽप्येतदभिप्रेतम्— "ज्योतिष्टोमं प्रथम मुपयन्त्यस्मिन्नेव तेन लोके प्रतितिष्ठन्ति ; गोष्टोमं द्वितीय मुपयन्त्यन्तरिक्ष एव तेन प्रतितिष्ठन्ति ; आयुष्टोमं तृतीय मुपयन्त्यमुष्मिन्नेव लोके प्रतितिष्ठन्ति"–इति (तै० सं० ७.४.११.१.) ॥

षड्हे पूर्वभागं त्र्यङ्ग मुक्त्वा तदुत्तरभागं विधत्ते— "स एवैष उत्तरस्त्र्यहः"–इति । त्रयाणां पूर्वोक्तानां त्रयाङ्गां समूहः पुनरनुष्ठीयमान उत्तरस्त्र्यहो भवति । तत्र षड्हे यथा मध्यङ्गां क्रमं दर्शयति— "ज्योतिर्गौरायुरिति त्रीण्यङ्गानि, गौरायुर्ज्योतिरिति त्रीणि"–इति । ज्योतिष्टोमादीना मेव ज्योतिरित्यादीनि नामानि ; तैर्नामभिर्धर्मा अतिदिश्यन्ते । ज्योतिरादिनामकाः ये स्वतन्त्रा एकाहाः सन्ति, तदीयधर्मा अत्रानुष्ठेया इत्यर्थः ॥

योऽय मुभयोस्त्र्यहयोः क्रमव्यत्यासस्तं मिमं प्रशंसति—"अयं वै लोको ज्योतिरसौ लोको ज्योतिस्ते एते ज्योतिषी उभयतः सं

---

* प्रथमादिषु पञ्चखण्डेष्वित्येव द्रष्टव्यम् (२०८–२०४ पृ०) ।

† 'तत्र'–इत्येव पाठो युक्ततरः स्यात् ।

लोकेते"-इति । प्रथमस्य त्रयहस्यादौ ज्योतिर्नामक महर्यदस्ति, तत्राथम्यसाम्याद्दूलोकस्वरूपम्; यच्चोत्तरस्य त्रयहस्यावसाने ज्योतिर्नामक महः, तदुत्तमत्वसाम्याद् द्युलोकस्वरूपम् । 'ते एते' षड्हस्याद्यन्तयोर्वर्त्तमाने 'ज्योतिषी' उभयतो उस्थाय परस्परं 'सं लोकेते' सम्मुखलेनेक्षेते । अष्टविंशेषांस्तत्क्रमं चोक्ता समष्टिरूपं षड्हं विधत्ते— "तेनैतेनोभयतोज्योतिषा षळहेन यन्ति ; तथदेतेनोभयतोज्योतिषा षळहेन यन्त्यनयोरेव तल्लोकयोरुभयतः प्रतितिष्ठन्तो यन्त्यस्मिंश्च लोके उमुष्मिंश्योभयोः"-इति । 'उभयतः' आद्यन्तयोर्ज्योतिर्नामक महर्यस्मिन् षड्हे तदेतत् 'उभयतोज्योतिः', तेनैतेन षड्हेनानुतिष्ठेयुः । तदनुष्ठानेनोभयतो वर्त्तमानयोः प्रतिष्ठां प्रापयन्तो वर्त्तन्ते । 'लोकयोरुभयतः' इत्यस्यैव विवरणम् —'अस्मिंश्च लोके उमुष्मिंश्योभयोः'-इति ; अग्नयोत्तरर्चत्वेनास्मिंश्चेत्यादिक मन्वेतव्यम् ॥

अस्मिन्नभिप्लवषड्हे संस्थाविशेषान् विधत्ते —"परि यद्वा एतद्देवचक्रं यदभिप्लवः षळहस्तस्य यावभितो अग्निष्टोमौ तौ प्रधी, ये चत्वारो मध्य उक्थ्यास्तन्नभ्यम्"-इति । योऽयं अभिप्लवः षड्हस्तदेतदस्मिंश्चामुष्मिंश्चोभयोर्लोकयोः 'परि यद्' परिवर्त्तमानमेव 'देवचक्रम्', — यथा लोके रथस्य चक्रं पुनः पुनः परिवर्त्तते, तद्वदिदं देवचक्रम् ; असकृत् षड्हपरिवर्तनस्य वक्ष्यमाणत्वात् । रथचक्रस्य हि निष्पादकानि त्रीणि फलकानि ; तत्र मध्यमफलके अक्षं प्रवेशयित्वा प्रोढं नाभिच्छिद्रं क्रियते, तस्य फलकस्योभयोः पार्श्वयोर्वर्तुलत्वाय फलकद्वयं क्रोचितं भवति ; एवं मध्येऽपि षड्हे ज्योतिर्यामाद्यन्तवर्त्तिनावग्निष्टोमसंस्थौ 'प्रधी' भवतः, प्रकर्षेणोभयतो धीयेते स्थाप्येते इति प्रधी, फलकद्वयस्थानीया-

विलेखः । एतस्मिन् 'ये' तु मध्ये 'चत्वारः' अष्टविंशेषाः उक्थ्यसंस्थाः, तदेतत् 'नभ्यं' ; नाभियोग्यस्थानम् उक्थ्यसंस्थाः कर्त्तव्या इत्यर्थः ॥ वेदनं प्रशंसति— "गच्छति वै वर्तमानेन यत्र कामयते, तत् स्वस्ति संवत्सरस्य पारं मश्नुते य एवं वेद"–इति । वेदिता 'यत्र' यस्मिन् लोके गन्तुं कामयते, तत्रानेनैव परिवर्तमानेन देवचक्रेण गच्छति ; 'तत्' तेन देवचक्रेण निर्विघ्न मेव संवत्सरसत्रसमाप्तिं गच्छति ॥

उक्तस्याभिप्रवषड्हस्यैकस्मिन्नासि पक्षकत्व माहत्तिं विधत्ते —"यो वै तद्वेद यत्प्रथमः षळहः, स वै स्वस्ति संवत्सरस्य पारं मश्नुते, यस्तद्वेद यद् द्वितीयो यस्तद्वेद यत् तृतीयो यस्तद्वेद यच्चतुर्थो यस्तद्वेद यत्पञ्चमः"–इति । 'प्रथमः षळहः'–इति यदस्ति, तद्यो वेद, 'सः' पुमान् निर्विघ्नेन सत्रपारं प्राप्नोति । तथा 'द्वितीयः' षड्ह इति यदस्ति, तद्यो वेद, स वै स्वस्तीत्यादिकं मनुवर्त्तनीयम् । एव मुत्तरेष्वपि त्रिषु पर्यायेषु द्रष्टव्यम् । षड्हे पक्षकत्व मावर्त्तमाने सति त्रिंशदहानि भूत्वा मासः सम्पद्यते ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां तृतीयाध्याये
(अष्टादशाध्याये) प्रथमः खण्डः ॥ १ (१५) ॥

॥ अथ द्वितीयः खण्डः ॥

प्रथमं षळहं मुपयन्ति षळहानि भवन्ति षड्वा ऋतव ऋतुश एव तत्संवत्सरं माप्नुवन्त्यृतुशः संव-

रसरे प्रतितिष्ठन्तो यन्ति द्वितीयं षऊह मुपयन्ति द्वादशाहानि भवन्ति द्वादश वै मासा मासश्च एव तत्संवत्सर माप्नुवन्ति मासशः संवत्सरे प्रतितिष्ठन्तो यन्ति तृतीयं षऊह मुपयन्त्यष्टादशाहानि भवन्ति तानि त्रेधा नवान्यानि नवान्यानि नव वै प्राणा नव स्वर्गा लोकाः प्राणांश्चैव तत्स्वर्गांश्च लोकान्माप्नुवन्ति प्राणेषु चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति चतुर्थं षऊह मुपयन्ति चतुर्विंशतिरहानि भवन्ति चतुर्विंशतिर्वा अर्द्धमासा अर्द्धमासश्च एव तत्संवत्सर माप्नुवन्त्यर्द्धमासशः संवत्सरे प्रतितिष्ठन्तो यन्ति पञ्चमं षऊह मुपयन्ति त्रिंशदहानि भवन्ति त्रिंशदक्षरा वै विराड् विराळन्नाद्यं विराज मेव तन्मासि मास्यभि सम्पादयन्तो यन्त्यन्नाद्यकामाः खलु वै सच मासत तद्यद्विराजं मासि मास्यभि सम्पादयन्तो यन्त्यन्नाद्य मेव तन्मासि मास्यवरुन्धाना यन्त्यस्मै च लोकायामुष्मै चोभाभ्याम् ॥ २ (१६) ॥

उक्तेषु पञ्चसु षड्हेषु प्रथम मनूद्य प्रशंसति -- "प्रथमं षऊह मुपयन्ति ; षऊहानि भवन्ति ; षड्वा ऋतव ऋतुश्च एव तत्संवत्सर माप्नुवन्त्यृतुशः संवत्सरे प्रतितिष्ठन्तो यन्ति"-इति। अनुष्ठिते

षड्हे षट्सङ्ख्याकान्यहानि भवन्ति ; ततः सङ्ख्यासाम्याद्द्वादशारा संवत्सरं प्राप्य तत्र प्रतिष्ठिताः सन्तो वर्तन्ते ॥

पूर्वेण षडहेन सहितं द्वितीयं षड्हं प्रशंसति — "द्वितीयं षळ्हं मुपयन्ति ; द्वादशाहानि भवन्ति ; द्वादश वै मासा, मासश्च एव तत्संवत्सर माप्नुवन्ति, मासशः संवत्सरे प्रतितिष्ठन्तो यन्ति"-इति । पूर्ववद् व्याख्येयम् ॥

उक्ताभ्यां षड्हाभ्यां तृतीयं षड्हं प्रशंसति— "तृतीयं षळ्हं मुपयन्त्यष्टादशाहानि भवन्ति ; तानि त्रेधा नवान्यानि नवान्यानि ; नव वै प्राणा, नव स्वर्गा लोकाः ; प्राणांश्चैव तत् स्वर्गांश्च लोकान्नाप्नुवन्ति, प्राणेषु चैव तत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति"-इति । त्रिषु षड्हेषु यान्यष्टादशाहानि, तेषां त्रेधा विभागे सति प्रत्येकं 'नव' सङ्ख्या सम्पद्यते । 'प्राणाः' सप्तसु ऊर्ध्वच्छिद्रेषु द्वयोरधश्छिद्रयोर्नवसङ्ख्याकाः,—स्वर्गलोकाश्च नवभोगस्थानभेदेन * नवविधाः । अतः सङ्ख्यासाम्यात् प्राणान् स्वर्गलोकांश्च प्राप्य तत्र प्रतिष्ठिता वर्त्तन्ते ॥

पूर्वैस्त्रिभिः षड्हैश्चतुर्थं षड्हं प्रशंसति—"चतुर्थं षळ्हं मुपयन्ति ; चतुर्विंशतिरहानि भवन्ति ; चतुर्विंशतिर्वा अर्धमासा, अर्धमासश्च एव तत् संवत्सर माप्नुवन्त्यर्धमासशः संवत्सरे प्रतितिष्ठन्तो यन्ति"-इति । अतः सङ्ख्यासाम्यात् अर्धमासद्वारा संवत्सरे प्रतिष्ठिताः ॥

पूर्वैश्चतुर्भिः षड्हैः सहितं पञ्चमं षड्हं प्रशंसति — "पञ्चमं षळ्हं मुपयन्ति ; त्रिंशदहानि भवन्ति ; त्रिंशदक्षरा वै विराड्,

* 'अष्टाभिर्लोकपालैः परिपालिता अष्टसङ्ख्याकाः स्वर्गा लोकाः ; तेषां मध्ये कर्मिभूर्लोकानां स्वर्ग इतरेषां नवसङ्ख्याकाः स्वर्गाः'-इति तै० ब्रा० १.२.२.१. सा० भा० ।

विराळन्नाद्यं, विराज मेव तन्नासि मास्यभि सम्पादयन्तो यन्ति" –इति । अहस्सङ्ख्याया विराट्साम्यादिराजन्नाद्यहेतुत्वात् प्रतिमासं विराड्द्वारा अन्नाद्यं प्राप्नुवन्ति ॥

पुनरपि षड्हपञ्चकं प्रशंसति– "अन्नाद्यकामाः खलु वै सत्र मासत ; तद्यद्विराजं मासि मास्यभि सम्पादयन्तो यन्त्यन्नाद्य मेव तन्नासि मास्यवरुन्धाना यन्त्यस्मै च लोकायामुष्मै चोभाभ्याम्"–इति । ये सत्रस्यानुष्ठातारः, ते हि 'अन्नाद्यकामाः' अनुतिष्ठन्ति ; तथा सति पूर्वोक्तरीत्या सङ्ख्यासाम्यात् पञ्चसु षड्हेषु त्रिंशदक्षररूपां विराजं प्रतिमासं सम्पादयन्तो वर्त्तन्ते, प्रतिमास मन्नाद्यं प्राप्नुवन्तो लोकद्वयार्थं गच्छन्ति ; प्रतिमासं षड्हपञ्चक मनुतिष्ठेयुरिति तात्पर्यार्थः । तत्र चत्वारोऽभिप्रवाः षडहाः, पञ्चमस्तु पृष्ठ्यषडह इति ; सूत्रकारैरभिधानादयं विशेषः शाखान्तरे द्रष्टव्यः * ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां तृतीयाध्याये
(अष्टादशाध्याये) द्वितीयः खण्डः ॥ २ (१६) ॥

॥ अथ तृतीयः खण्डः ॥

गवामयनेन यन्ति गावो वा आदित्या आदित्याना मेव तदयनेन यन्ति गावो वै सत्र मासत

* "चत्वारोऽभिप्रवाः पृष्ठ्यश्च मासः"–इति च कात्या० श्रौ० १३.२.१ । तथा "चतुरभिप्रवान् पृष्ठ्यषडहमान् पञ्च मासानुपयन्ति"–इति च आश्व० श्रौ० ११.७.२ ।

शफान्कृष्णानि सिषासत्यस्तासां दशमे मासि शफाः शृङ्गाण्यजायन्त ता अब्रुवन् यस्मै कामायादीचा-मह्यापाम त मुत्तिष्ठामेति ता या उदतिष्ठंस्ता एताः शृङ्गिण्यो ऽथ याः समापयिष्यामः संवत्सर मित्यासत तासा मश्वया शृङ्गाणि प्रावर्त्तन्त ता एतास्तूपरा ऊर्जं त्वसुन्वंस्तस्मादु ताः सर्वान्नतून् प्राप्नोत्तर मुत्तिष्ठन्त्यूर्जं ह्यसुन्वन्त्सर्वस्य वै गावः प्रेमाणं सर्वस्य चारुतां गताः सर्वस्य प्रेमाणं सर्वस्य चारुतां गच्छति य एवं वेदादित्याश्च ह वा अङ्गि-रसश्च स्वर्गे लोके स्पर्धन्त वयं पूर्वं एष्यामो वय-मिति ते हादित्याः पूर्वे स्वर्गं लोकं जग्मुः पश्चे-वाङ्गिरसः षष्ट्यां वा वर्षेषु यथा वा प्रायणीयो ऽति-रात्रश्चतुर्विंश उक्थ्यः सर्वे ऽभिप्लवाः षडहो आद्य-स्यन्यान्यहानि तदादित्यानामयनं प्रायणीयो ऽति-रात्रश्चतुर्विंश उक्थ्यः सर्वे पृष्ठ्याः षडहो आद्य-स्यन्यान्यहानि तदङ्गिरसामयनं सा यथाश्वतिरश्व-मायन्येव मभिप्लवः षडहः स्वर्गस्य लोकस्याथ यथा महापथः पर्याण एवं पृष्ठ्यः षडहः स्वर्गस्य लोकस्य तद्यदुभाभ्यां यन्त्युभाभ्यां वै यत्र रिष्यत्युभयोः कामयोरुपाप्त्यै यस्याभिप्लवे षडहे यस्य पृष्ठ्ये ॥३(१७)

संवत्सरसत्रस्यावयवावाम्नानमिधाय सत्रं विधत्ते— "गवामयनेन यन्ति ; गावो वा आदित्या, आदित्याना मेव तदयनेन यन्ति"–इति । संवत्सरसत्राणां प्रकृतिभूतस्यैतस्य सत्रस्य 'गवामयनम्' इति नामधेयम्, तेन 'यन्ति' अनुतिष्ठेयुः । गमनसाम्याद् गवां, गादित्यत्वम् ; तथा सति आदित्याना मेवायनेनानुष्ठानं सत्रं भवति ॥

तदेतद्गवामयनं प्रशंसति – 'गावो वै सत्र मासत, शफाञ्छृङ्गाणि सिषासन्त्यस्तामां दशम मासि शफाः शृङ्गाण्यजायन्त ; ता अब्रुवन् यस्मै कामायाटीक्षामश्चामः त मुत्तिष्ठामेति ; ता या उदतिष्ठंस्ता एताः शृङ्गिण्यः" इति । पुरा कदाचिद् गवाभिमानिनो देवताः स्वकीयानः गोरूपाणां पादमतान् 'शफान्', शिरोगतानि 'शृङ्गाणि' च 'सिषासन्त्यः' प्राप्तुमिच्छन्त्यः सत्र मध्यतिष्ठन् । तासां दशमे मासि तदुभयं सम्पन्नम् । ततः 'ताः' गावः परस्परं मिदं मन्त्रयन्ते – यस्मै कामाय वयम् 'अदीक्षामहि' सत्रदीक्षा मगमयाः, 'त' कामम 'आपाम' वयं प्राप्नवन्यः , तस्मादस्मात्सत्रादुत्तिष्ठामेति विचार्य उत्थाय गताः । 'ताः' पमिहाः या गाव एतदतिष्ठन्, ता इमाः शृङ्गिण्यो दृश्यन्ते । अनेन दशसु मासेषु अनुष्ठेयं गवामयनं प्रशस्तम् ॥

द्वादशसु मासेष्वनुष्ठेयं यद्गवामयनं भवति, तदिदानीं प्रशंसति— "अथ या: समापयिष्यामः सवत्सर मित्यामत, तामा भक्षयया शृङ्गाणि प्रावर्तन्त ; ता एतास्तूष्णी मासुन्वन्नुत्सृष्टाद्वै ता: सर्वानृतून् प्राप्नोत्तर मुत्तिष्ठन्नूर्जं प्राणुन्वन्नवैष्व वै गावः प्रेमाणं सर्वस्य चारुतां गताः" इति । अत्र मनुतिष्ठन्तीनां गवां मध्ये शफशृङ्गार्थिनीनां दशभिर्मासैः सिद्धिर्जाता ; तासां तु गवां

वृद्धापेक्षा नास्ति, किन्तु जर्गपेक्षैव; तादृश्यो या गाव जर्ज-सिद्ध्यर्थं द्वादशमासात्मकं संवत्सरं समापयिष्याम इति अभिप्रेत्य, तथैवान्वतिष्ठन्। 'तासां' गवां वृद्धेषु अशक्तया वृद्धाषि 'प्रावर्तन्त' नोत्पन्नानीत्यर्थः। 'ता एताः' गावो लोके 'तृपराः' वृद्धरहिता दृश्यन्ते। ताः वृद्धरहिता अपि सत्रानुष्ठानेन 'जर्ज्जं' बलाधिक्यम् 'असुन्वन्' सम्पादितवत्यः। 'तस्माद्' बलाधिक्यलक्षणस्य फलस्य सद्भावादेव 'ताः' गावः सर्वानृतून् षट्सङ्ख्याकानपि तस्मिन् सत्रानुष्ठाने प्राप्य 'उत्तरम्' ऊर्ध्वकाले सत्रादुत्तिष्ठन्ति। 'हि' यस्मात् 'जर्जम्' बलातिशयम् 'असुन्वन्' प्राप्तवत्यः, तस्माद् द्वादश-मासानुष्ठानं युक्तम्। 'ताः' वृद्धरहिता गावः प्रहारभयाभावात् 'सर्वस्य' जगतः 'प्रेमाणं' प्रियत्वं गताः, तथा बलाधिक्येन शरीर-पुष्ट्या च 'सर्वस्य' भारवहनादिकार्य्यस्य नेत्रदर्शनस्य चात्यन्तं 'चारुतां' रमणीयतां गताः॥ वेदनं प्रशंसति— "सर्वस्य प्रेमाणं सर्वस्य चारुतां गच्छति य एवं वेद"-इति॥

अथादित्यानामयनं, अङ्गिरसामयनं च गवामयनविकृतिरूप मुभयं वक्तुं प्रस्तौति— "आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोके ऽस्पर्द्धन्त वयं पूर्व एष्यामो वय मिति; ते ह्यादित्याः पूर्वं स्वर्गं लोकं जग्मुः, पञ्चैवाङ्गिरसः षष्ट्यां वा वर्षेषु"-इति। आदित्याश्च ये देवाः, ये चाङ्गिरसनामका ऋषयः, तदुभये परस्परं स्वर्गप्राप्तौ 'अस्पर्द्धन्त' अस्माक मेव प्रथमं गमन मिति आदित्याः, अङ्गिरसो-ऽपि तथैव तदादित्याः सहसा प्रथमं स्वर्गं प्रापुः अङ्गिरसस्तु 'पञ्चैव' विलम्बेनैव षष्टिसङ्ख्याकेषु वर्षेषु अतीतेषु स्वर्गं प्राप्ताः। 'वा'-शब्देन पक्षान्तरं द्योत्यते। अङ्गिरसां मध्ये तत्तच्छक्तयनुसारेण केचित् षष्टेः पूर्वं वा गता इत्यर्थः॥

अथादित्यानामयनेऽङ्गसंकृतिं विधत्ते— "यद्वा वा प्रायणीयो ऽतिरात्रश्चतुर्विंश उक्थ्यः, सर्वे ऽभिप्लवाः षडहा, आप्नुवन्त्याप्त्यङ्गानि ; तदादित्यानामयनम्"—इति । अत्र 'वा' शब्दो न विकल्पार्थः, किन्तु गवामयनप्रकारत्वाद्व्यर्थः । गवामयने प्रायणीयाख्यं प्रथम महः, अतिरात्रसंस्थं चतुर्विंश मुक्थ्य महर्द्वितीयम्, तदुभयं तत्र 'यथा' तथैवादित्यानामयनेऽपि ; तत्र जर्तु विशेषोऽस्ति । सर्वेऽभिप्लवाः षडहाः पूर्वाभ्याम् प्रथमद्वितीयाभ्यां महोभ्यां मध्यानि सर्वाण्यहानि 'आप्नुवन्ति' व्याप्तिं करिष्यन्ति ; गवामयने तु एकैकस्मिन्मासे चत्वार एवाभिप्लवषडहाः, अत इदं वैषम्यम् । तदिदम् 'आदित्यानामयनम्' ॥

अथाङ्गिरसामयनस्य कृतिं दर्शयति— "प्रायणीयो ऽतिरात्रश्चतुर्विंश उक्थ्यः, सर्वे पृष्ठ्याः षडहा, आप्नुवन्त्याप्त्यङ्गानि ; तदङ्गिरसामयनम्"—इति । प्रथमद्वितीय मतिक्रान्तानि सर्वाण्यहानि पृष्ठ्यषडहैर्व्याप्तानि, इत्येतावानत्र विशेषः । अथवा 'आप्नुवन्ति'-शब्दोऽङ्गविशेषनामधेयम् । तथाच बौधायन* आह— "अभिजिदिषुवान्त्यिग्रजिद्गम महर्मध्यात्रत मुदयनोयोऽतिरात्र इत्येतान्याप्नुवन्ति भवन्ति"—इति । तदेतद् बौधायनस्य† मतम् । अन्यदपि यान्यन्यानि पृष्ठ्याभिप्लवेभ्य इति शालिकाचार्या मेनिरे । यानि चान्यानि पृष्ठ्याभिप्लवेभ्यो दशमाच्च इत्युपमन्यव इति । तथा सति प्रायणीयाग्निष्टोमीयाभ्यां मभिप्लवषडहेभ्यश्चान्यानि यान्यङ्गानि सन्ति, तानि 'आप्नुवन्ति' एतन्नामकानीत्युभयत्र व्याख्येयम् । सर्वथाप्यस्तयनयोरुभयोरपि गवामयनादिशेषः । गवामयने त्वेकस्मिन्मासे चत्वारोऽभिप्लवाः षडहाः, पञ्चमः पृष्ठ्यः षडहः ।

* 'बौधा' ग ।

तथा चाश्वलायन आह— "अथ गवामयनं सर्वस्तोमाः प्रायणीय-चतुर्विंशे उपेत्य चतुरभिप्लवान् पृष्ठ्यषडहमान् पञ्च मासानुप-यन्ति"–इति (श्रौ० ११.७.१. *)। आदित्यानां मयने पृष्ठ्यः षड्हो नास्तीति †, अङ्गिरसामयने अभिप्लवषड्हो नास्तीति ‡ वैषम्यम् ॥

अयनद्वयगत मभिप्लवषड्हं पृष्ठ्यषड्हं च दर्शयति— "सा यथा स्रुतिरञ्जसायन्येव मभिप्लवः षळहः स्वर्गस्य लोकस्याथ यथा महापथः पर्याणः एवं पृष्ठ्याः षळहः स्वर्गस्य लोकस्य ; तथदुभाभ्यां यन्त्युभाभ्यां वै यज्ञ रिथत्युभयोः कामयोरुपाप्त्यै,— यस्याभिप्लवे षळहे, यस्य पृष्ठ्ये"–इति। यथा लोकस्य प्रसिद्धा 'स्रुतिः' राज-मार्गरूपा 'अञ्जसायनी' दुःखहेतूनां कण्टकपाषाणादीना मभा-वाद् अञ्जसा सम्यगयनस्य गमनस्य साधनभूता, एव मय मभिप्लवः षड्हः स्वर्गस्य लोकस्य अञ्जसा प्राप्तिहेतुः §। अथ पृष्ठ्यषड्-हस्य दृष्टान्त उच्यते,—यथा लोके 'महापथः' प्रौढ़मार्गः नगरद्वय-मध्यवर्त्ती 'पर्याणः' परितोऽयनस्य गमनस्य साधनभूतः,—नगर-

---

* आश्वलायनो हि "अथ गवामयनम्"–इत्यारभ्य "इति गवामयनम्"–इत्यन्तं ग्रन्थ मुक्त्वापि पुनरुक्तवान् "सर्वे वा षड्हा अभिप्लवाः सुताः"–इति (११.७.२१.)। ततो ज्ञायते वैषाङ्गिरसे गवामयनादित्यानामयनयोर्न षड्हकृतं वैषम्य मपि त्वन्यदेवेति। तच्च वैषम्य तत्र तत्रैव मेव स्फुटीकृतं द्रष्टव्यम्।

† "गवामयनेनादित्यानामयनं व्याख्यातम्। सर्वे त्वभिप्लवास्त्रिवृत्पञ्चदशाः"–इत्यादि आश्व० श्रौ० १२.१.१–७। तथाच सर्वेऽभिप्लवा· पर्यायतस्त्रिवृत्पञ्चदशस्तोमोपेता एव तत्र भवन्तीति प्रधानं वैषम्यं द्योतितम्।

‡ "आदित्यानामयनेनाङ्गिरसामयनं व्याख्यातम्। त्रिवृत्तस्त्वभिप्लवाः सर्वे"–इत्यादि आश्व० श्रौ० १२.२.१–६। तथाच सर्व एवाभिप्लवास्त्रिवृदेकसाध्या इति प्रधानं वैषम्यम्।

§ "स्वर्गं लोक मभ्यप्लवन्त, यदभ्यप्लवन्त तस्मादभिप्लवाः"–इति ऋत० ब्रा० ११.२.२.१०।

समीपे परस्तात्पर्वताद्यभावाद्यस्यां दिशि गन्तु मपेक्षा तत्र भवतु यक्षते, एव मयं पृष्ठाः षड्हः स्वर्गस्य लोकस्य प्राप्तिहेतुः * । तथा सत्यनयोरुभयोः 'उभाभ्यां' षड्हाभ्यां यन्नीति यदस्ति, तेन 'उभाभ्यां' पादद्वयस्थानीयाभ्यां 'यन्' गच्छन् पुरुषो 'न रिष्यति' न विनश्यति,—योऽभिप्लवकामोऽस्ति, यश्च पृष्ठ्यषड्हे; तयोरुभयोः कामयोः प्राप्तिं षड्हद्वयं सम्पद्यते † ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां तृतीयाध्याये
(अष्टादशाध्याये) तृतीयः खण्डः ॥ ३ (१७) ॥

॥ अथ चतुर्थः खण्डः ॥

एकविंश मेतद्रूपयन्ति विप्लुवन्तं मध्ये संवत्सरस्यैतेन वै देवा एकविंशेनादित्यं स्वर्गाय लोकायोदयच्छन्त्स एष इत एकविंशस्तस्य दशावस्तादहानि दिवाकीर्त्यस्य भवन्ति दश परस्तान्मध्य एकविंश उभयतो विराजि प्रतिष्ठित उभयतो ह वा एष विराजि प्रतिष्ठितस्तस्माद्देषोऽन्तरेमांल्लोका-

---

* "स्वर्गं लोक मभ्यभ्रंलयात् पृष्ठाः"—इति श्रुत० ब्रा० १२.२.२.११ ।

† "गावो वै सत्र मासत"—इत्याख्यायिका (३२७ पृ०) सामयज्ञयोरपि प्राय एव मेव (ता०ब्रा०४.१, तै०सं०७.५.१.) सुतयो वेताः सवस्व'—इत्यादि जै०सू०१.१.११ भा०भा० ।

न्यन्न व्यथते तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तं चिभिः स्वर्गैर्लोकैरवस्तात्पर्युत्तभ्नुवन्त्स्तोमा वै त्रयः स्वर्गा लोकास्तस्य पराचोऽतिपातादबिभयुस्तं चिभिः स्वर्गैर्लोकैः परस्तात् प्रत्यस्तभ्नुवन्त्स्तोमा वै त्रयः स्वर्गा लोकास्तत्त्रयोऽवस्तात्समृदशा भवन्ति त्रयः परस्तान्मध्य एष एकविंश उभयतः स्वरसामभिर्धृत उभयतो हि वा एषः स्वरसामभिर्धृतस्तस्मादेषोऽन्तरिक्षलोकान्यन्न व्यथते तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तं परमैः स्वर्गैर्लोकैरवस्तात्पर्युत्तभ्नुवन्त्स्तोमा वै परमाः स्वर्गा लोकास्तस्य पराचोऽतिपातादबिभयुस्तं परमैः स्वर्गैर्लोकैः परस्तात् प्रत्यस्तभ्नुवन्त्स्तोमा वै परमाः स्वर्गा लोकास्तत्त्रयोऽवस्तात्समृदशा भवन्ति त्रयः परस्तात्ते द्वौ द्वौ सम्पद्यन्त्रयस्त्रिंशा भवन्ति चतुस्त्रिंशो वै स्तोमाना मुत्तमस्तेषु वा एष एतदध्याहितस्तपति तेषु हि वा एष एतदध्याहितस्तपति स वा एष उत्तरोऽस्मात् सर्वस्माद् भूताद्भविष्यतः सर्वं मेवेद मतिरोचते यदिदं किञ्चोत्तरो भवति यस्मादुत्तरो बुभूषति तस्मादुत्तरो भवति य एवं वेद ॥ ४ (१८)-॥

इत्थं गवामयन मादित्यानामयन मङ्गिरसामयनं चेति संवत्सर-सत्रविशेषा उक्ताः। तत्र सर्वत्र पूर्वोत्तरयोर्मासषट्कयोः मध्य-वर्त्ति यत्प्रधान महरस्ति, तदेतद् विधत्ते — "एकविंश मेत-द्वहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्य"-इति। छन्दोगब्राह्मणे— "सप्तभ्यो हिङ्करोति"-इत्यादिना (ता० ब्रा० २.१४-१७ खं०) विहितो योऽय मेकविंशः स्तोमः, तेनैव स्तोमेनास्य सर्वस्तोत्र-प्रउक्तेरिद मह्नः 'एकविंशम्' इत्युच्यते। तत्र विषुवन्नामकं, संव-त्सरसत्रस्य ये पूर्वे षण्मासाः, ये चोत्तरे, तयोर्मासषट्कयोरुभयतो वर्त्तमानयोर्मध्ये तदेतदहरनुष्ठेयम्। एतच्च नोभयोर्मासषट्कयो-रन्तर्भवति, किन्त्वतिरिक्त मेकम्। तथा चाश्वलायन आह — "अथ विषुवानेकविंशो न पूर्वस्य पक्षसो नोत्तरस्य"-इति (श्रौ० ११.७.७,८.)॥

तदेतदहः प्रशंसति—"एतेन वै देवा एकविंशेनादित्यं स्वर्गाय लोकायोदयच्छन्'-इति। पुरा देवाः 'एतेन' यज्ञा स्वर्गलोकाख्यम् 'आदित्यम्' 'उदयच्छन्' इत ऊर्ध्वं प्रापितवन्तः। तथाच शाखान्तरे पठ्यते—"एकविंशः एष भवति, एतेन वै देवा एकविंशेनादित्य मित उत्तमं सुवर्गं लोक मारोहयन्'-इति (तै० ब्रा० १.२.४.१.७)॥

आदित्यस्य तेनाङ्गा साम्यं दर्शयति—"स एष इत एकविंशः"-इति। योऽय मादित्योऽस्ति, स एषः 'इतः' भूलोकादारभ्य गच्छमान एकविंशतिसङ्ख्यापूरको भवति। तथा चान्यशाखा-यते—"द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः"-इति (तै० सं० ५.१.१०.३.)। अथवात्रैव विषुवतः पुरस्तात् पश्चाच्च वक्ष्यमाण महर्दशकद्वय मपेक्ष्य 'विषुवान्'

* "एष एवैकविंशो य एष तपति"-इति च शत० ब्रा० १.३.५.२१।

'एकविंशः' इत्युच्यते। अस्मिन् पक्षे इदं वाक्यं मुत्तरग्रंथत्वेन योजनीयम्॥

इदानीं सुभयतो दशकद्वयं विधत्ते—"तस्य दशावस्तादहानि दिवाकीर्त्यस्य भवन्ति, दश परस्तात्, मध्य एष एकविंशः उभयतो विराजि प्रतिष्ठित, उभयतो हि वा एष विराजि प्रतिष्ठितस्तस्मादेषोऽन्तरेमांल्लोकान्न व्यथते"-इति। दिवैव कीर्त्तनीयं मन्त्रजातं यस्मिन्विषुवत्यहनि तदहः 'दिवाकीर्त्यम्'। तस्याहः 'अवस्तात्' अधोभागे दशाहानि भवन्ति, 'परस्तात्' ऊर्द्धभागेऽपि दशाहानि भवन्ति; तयोर्दशकयोर्मध्ये 'एष एकविंशः' विषुवान् वर्त्तते। 'तस्य' विषुवतः 'अवस्तात्' पूर्वपक्षे षष्ठे मासे 'स्वरसामानः' अहर्विशेषास्त्रयः, तेभ्यः पूर्वं मभिजिदाख्य मेकाहः, ततः पूर्वं पृष्ठाः षडह इति 'दशाहानि'। विषुवत ऊर्द्धं तु प्रत्यवरोहक्रमेण त्रयः स्वरसामानः, ततो विश्वजिदाख्य एकाहः, तत ऊर्द्धं पृष्ठाः षडह इति 'दश' अहानि। एव सुभयोः पार्श्वयोरङ्गां दशसङ्ख्योपेतत्वात् विराट्त्वम्। एतस्या सुभयतोऽवस्थितायां 'विराजि' अय मेकविंशः प्रतिष्ठितः। यथोक्तगणनया विराजि प्रतिष्ठा मेव 'हि'-शब्दोपेतेन वाक्येन स्पष्टीकरोति*। 'तस्मात्' उभयतो विराट्द्वयेन रचितत्वात् 'एषः' आदित्यो विषुवदहःस्थानीयः, 'इमान् लोकानन्तरा' एषां लोकानां सर्वेषां मध्ये 'यन्' गच्छन्नपि 'न व्यथते' व्यथां न प्राप्नोति। विषुवानप्येकविंश आदित्योऽप्येकविंशः; तस्मादुभयोरेकत्वे सति विषुवतो यद्विराड्द्वयोपेतत्वम्, तदेवादित्यस्योभयतोविराट्त्वं भवति। आदित्यस्य व्यथाराहित्येन विषुवतो वैकल्यराहित्यं सिद्धयति।

* "विराजि हि वा एष उभयतः प्रतिष्ठितः"-इति तै० ब्रा० पाठः (१.२.४.१.)।

अथवा विषुवतो यथा विराड्द्वय मुभयतो रथन्तरम्, एव मादित्यस्याप्यधस्तादुपरिष्टाच्च वर्त्तमानं लोकद्वयम्। एतदेवाभिप्रेत्य ब्राह्मणान्तरे श्रूयते— "तस्मादन्तरेमौ लोकौ यत् सर्वेषु सुवर्गेषु लोकेष्वभि तपत्येति"–इति (तै० ब्रा० १.२.४.१.) ॥

अथ विषुवत उभयतः समीपवर्त्तिनः स्तरसामाख्यानर्षिः प्रेषान् प्रशंसति—"तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्ं त्रिभिः स्वर्गैर्लोकैरवस्तात् प्रत्युत्तम्भुवन्स्तोमा वै त्रयः स्वर्गा लोकास्तस्य परस्ताच्चोऽतिपातादबिभयुस्ं त्रिभिः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तम्भुवन्स्तोमा वै त्रयः स्वर्गा लोकास्तत्त्रयो ऽवस्ताद्दशदशा भवन्ति, त्रयः परस्तात्तद्य एव एकविंश, उभयतः स्तरसामभिर्धृत, उभयतो हि वा एष स्तरसामभिर्धृतस्तस्मादेषोऽन्तरेमाँल्लोकान् यत्र व्यथते"–इति। योऽय मादित्योऽस्ति, 'तस्य' आदित्यस्य स्वर्गलोकात् 'अवपातः' आधाराभावादधःपतनम्, तस्माद् देवाः 'अबिभयुः' आदित्योऽधः पतिष्यतीति भीताः सन्तः 'तम्' आदित्यम् 'अवस्तात्' मण्डलस्याधोभागे 'त्रिभिः स्वर्गैर्लोकैः' स्वर्गशब्दोपलक्षितैः भूरादिभिः 'प्रत्युत्तम्भुवन्' अधःपातप्रतिबन्धार्थं सुस्तम्भन माधाररूप मकुर्वन्। यथा गृहगतवंशादीना मधःपतनिवारणाय स्तम्भेनोत्तम्भनं कुर्वन्ति, तद्वदिति। वर्त्तमानस्यादित्यस्य यथा त्रयो लोका उत्तम्भकाः, तथैवादित्यस्थानीयस्य विषुवतोऽङ्गः स्वर्गलोकसदृशास्त्रयः स्तोमा एवोत्तम्भकाः। दशदशस्तोमयुक्ताः स्तरसामानो ऽङ्गविशेषाः स्तोमशब्देनात्र विवक्षिताः। पुनरपि देवास्तस्यादित्यस्य 'पराचोऽतिपातात्' मण्डलात्पराभूतेषु ऊर्ध्ववर्त्तिषु लोकेषु योऽयम् 'अतिपातः' दृष्टिगोचरं देय सुत्तद्य यत्र क्वापि दूरदेशगमनम्, तस्मादिति-

पातान्मोताः सन्तः 'परस्तात्' आदित्यमण्डलस्योपरि त्रिभिः जन-तपःसत्यशब्दाभिधेयैः 'त्रिभिः स्वर्गैर्लोकैः' 'तम्' आदित्यं 'प्रत्यस्तभ्नुवन्'। यथा पूर्वस्तोधःपतननिहत्यर्थं सुस्तभनं कृतम्, एव मुपरिष्टादतिपातनिहत्यर्थं 'प्रतिस्तभनं' प्रतिबन्धकस्तम्भ मकुर्वन्। आदित्यस्थानीयस्य तु विषुवतोऽहः उत्तरपक्षगताः स्तोमशब्दोपलक्षिताः स्वरसामाख्यस्तयोऽहर्विशेषा एव प्रतिस्तम्भकाः। 'तत्' तथा सति ये विषुवतोऽहः 'अवस्तात्' अधोवर्त्तिनस्तयोऽहर्विशेषास्तेऽपि सप्तदशस्तोमयुक्ताः कार्य्याः। ये च 'परस्तात्' उपरिवर्त्तिनस्तयोऽहर्विशेषास्तेऽपि सप्तदशस्तोमयुक्ताः कार्य्याः। एवं च सति मध्येऽवस्थित एकविंशाख्योऽहर्विशेषः 'उभयतः' अधस्तादुपरिष्टाच्च स्वरसामनामकैः त्रिभिस्त्रिभिरहोभिर्धृतः। अय मेवार्थः शाखान्तरप्रसिद्धिद्योतकेन 'हि'-शब्दयुक्तेन वाक्येन पुनर्दृढीकृतः। यस्मादिषुवदहस्थानीय आदित्यः, स्वरसामस्थानीयैरुभयतोऽवस्थितैस्त्रिभिस्त्रिभिर्लोकैर्धृतः, 'तस्मात्' कारणादपि आदित्यः 'अन्तरा' मध्येऽवस्थित इमान् लोकान् सर्वान् सर्वदा 'यन्' गच्छन्नपि 'न व्यथते' व्यथां न प्राप्नोति। अत्रार्थवादेन पूर्वेषूत्तरेषु च त्रिष्वहस्सु सप्तदशस्तोमविधिरुक्तेयः। तथाच शाखान्तरे श्रूयते— "उक्थ्या एव सप्तदशाः परःसामानः कार्य्याः"—इति (तै० ब्रा० १.२.२.१.)। स्वरसामाख्याना मक्षा मेव परःसामेति नामान्तरम्॥

अथ विहितानेतान् पूर्वोत्तरान् सप्तदशस्तोमान् प्रकारान्तरेण च पुनः प्रशंसति— "तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तम् परमैः स्वर्गैर्लोकैरवस्तात् प्रत्युत्तम्भुवन्स्तोमा वै परमाः स्वर्गो लोकास्तस्य पराचोऽतिपातादबिभयुस्तम् परमैः

स्वर्गलोकाः परस्तात् प्रत्यस्तमुवगस्तोमा वै परस्ताः स्वर्गा लोका-स्तेभ्य एवोऽस्तात्तपदशा भवन्ति त्रयः परस्तात् द्वौ द्वौ सन्तश्चयस्त्रिंशा * भवन्ति ; चतुस्त्रिंशो वै स्तोमानां सुवर्गस्तोकस्य वा एष एतदध्याश्रितस्तपति, तेषु हि वा एष एतदध्याश्रितस्तपति"-इति । तेषु हि लोकेषु वर्त्तमानो य आदित्यस्तस्य स्वर्गलोका-दवपातः स्यादिति देवा भीताः सन्तः, त मित्यादि पूर्ववत् । स्तोमाना मादित्यस्य स्तम्भकत्वाय परमत्वम् । तेनोभयतो वर्त्त-माना: षट्सङ्ख्याकाः सप्तदशस्तोमकाः द्वौ द्वौ एकीभूय त्रिसङ्ख्या-काश्चतुस्त्रिंशस्तोमा भवन्ति । त्रिवृत्-पञ्चदश-सप्तदशै-कविंश-त्रिणव-त्रयस्त्रिंशाख्याश्चत्वारोगैराम्नाताः सन्ति †, तेषा मयं चतु-स्त्रिंशस्तोम उत्तमः ; पूर्वापेक्षया सङ्ख्याधिक्यात् । 'तेषु' स्तोम-स्थानीयेषु उभयतः स्थितेषु स्वर्गेषु 'एषः' आदित्यः 'अध्याहितः' जगत्कृद्भा स्थापितः सन् 'एतत्' प्रत्यक्षं यथा भवति तथा 'तपति' सन्तापं करोति । 'तेषु हि'-इतिवाक्येन तदेव दृढीक्रियते ॥

विषुवत एव प्रशंसा मभिप्रेत्य तद्रूपत्वेनोपचरित मादित्यं पुनः प्रशंसति— "स वा एष उत्तरोऽस्मात्सर्वस्माद्भूताद्भविष्यतः,— सर्व मेवेद मति रोचते यदिदं किञ्चोत्तरो भवति"-इति । योऽयं मादित्यो ऽभिहितः, स एवैष भूताद्भविष्यतश्च 'सर्वस्मात्' चराचरा-त्मकात् 'उत्तरः' उत्कृष्टः,— 'यदिदं किञ्च' जगदस्ति, इदम् सर्व मेव 'अतिक्रम्य' 'रोचते' दीप्यते ; तद्हयं विषुवानप्यन्येभ्यः सर्वेभ्योऽहोभ्यः 'उत्तरः' उत्कृष्टो भवति ॥

---

* 'सप्तदश०'-इत्येव पाठो बह्वृचकेषु । तदत्र तकारस्य विर्वचनम् 'अनचि च'-इति (पा० ८.४.४७.), प्रातिशाख्याऽऽश्रयं वेति । स्यादेवं पुरस्ताद्पि १८.१ पृ०, १४ पं० ।

† वा० ब्रा० २.१—७ खण्डेषु क्रमात् द्रष्टव्याः ।

वेदनं प्रशंसति—"यज्ञादुत्तरो बुभूषति, तस्मादुत्तरो भवति य एवं वेद"-इति। एतद्वेदनादुत्कृष्टो भूत्वा प्रतिष्ठयाधिकं शोभते, तस्मादुत्कृष्टतरो भवति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये (अष्टादशाध्याये) चतुर्थः खण्डः ॥ ४ (१८) ॥

॥ अथ पञ्चमः खण्डः ॥

स्वरसाम्न उपयन्तीमे वै लोकाः स्वरसामानूमान् वै लोकान्त्स्वरसामभिरस्पृणवंस्तत्स्वरसाम्नां स्वरसामत्वं तद्यत् स्वरसाम्न उपयन्त्येष्वेवैनं तल्लोकेष्वा भजन्ति तेषां वै देवाः सप्तदशानां प्रम्लयाद्बिभयुः समा इव वै स्तोमा अविगूळ्हा इवेमे ह न प्रम्लियेरन्निति तान्त्सप्तदशैः स्तोमैरवस्तात्पर्यार्षन्त्सप्तदशैः पृष्ठैः परस्तात् तद्यदभिजित्सप्तदशस्तोमोऽवस्ताद्भवति विश्वजित्सप्तदशपृष्ठः परस्तात् तत्सप्तदशानुभयतः पर्यूषन्ति ध्रुत्या अप्रम्लयाय तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तं पञ्चभी रश्मिभिरुद्यन्तं रश्मयो वै दिवाकीर्त्यानि महादिवाकीर्त्यं

पृष्ठं भवति विकर्णं ब्रह्मसाम भास मग्निष्टोम-सामीभे बृहद्रथन्तरे पवमानयोर्भवतस्तदादित्यं पञ्चभी रश्मिभिरुद्वयन्ति ध्रुत्या अनवपातायोदित आदित्ये प्रातरनुवाक मनुब्रूयात्सर्वं ह्येवैतदहर्दिवाकीर्त्यं भवति सौर्यं पशु मन्यङ्गश्वेतं सवनीयस्योपालम्भा मालभेरन्त्सूर्यदेवत्यं ह्येतदहरेकविंशतिं सामिधेनीरनुब्रूयात्प्रत्यृचाङ्ग्येतदहरेकविंश मेकपञ्चाशतं द्विपञ्चाशतं वा शस्त्वा मध्ये निविदं दधाति तावतीरुत्तराः शंसति शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय आयुष्यैवैनं तद्वीर्य इन्द्रिये दधाति ॥ ५ (१९) ॥

स्वरसामाख्येष्वहस्सु सप्तदशस्तोमाः पूर्वं विहिताः ; इदानीं तान्यहानि विधत्ते— "स्वरसाम्न उपयन्तोमे वै लोकाः स्वरसामान इमान् वै लोकान्स्वरसामभिरसृग्वंस्तत् स्वरसाम्नां स्वरसामत्वं ; तद्यत् स्वरसाम्न उपयन्त्येष्वेवैनं तल्लोकेष्वा भजन्ति"—इति । स्वरसामाख्यान् षट्सङ्ख्याकान् अहर्विशेषानुतिष्ठेयुः । आदित्यस्य अधस्तादुपरिष्टाच्च वर्त्तमाना इमे एव लोकाः स्वरसामरूपाः । तत्प्रीतिहेतुभिरेतैः स्वरसामभिरिमान् लोकान् 'असृग्वन्' प्रीतान्-कुर्वन् । तस्मादेतेषां मन्त्रां स्वरोपेतसामवत् प्रीतिहेतुत्वात् स्वरसामेति नाम सम्भवम् । एतेषां मनुष्यातारो लोकेषु सर्वेषु 'आ भजन्ति' भोगभाजो भवन्ति ॥

अथ स्वरसाम्नः सर्वेभ्योऽधस्तादुपरिष्टाच्च ये अहनी विधत्ते

—"तेषां वै देवाः सप्तदशानां प्रवृयाद्भिभयुः, समा इव वै स्तोमा अविगूळहा इवेमे इ न प्रविशेरन्निति ताञ्सर्वैः स्तोमैरवस्तात्पर्यार्षन्त्सर्वैः पृष्ठैः परस्तात्; तद्यदभिजित् सर्वस्तोमोऽवस्ताद्भवति, विश्वजित् सर्वपृष्ठः परस्तात्, तत् सप्तदशानुभयतः पर्यृषन्ति, धृत्या अप्रवृथाय"—इति। ये स्वरसामानः सप्तदशस्तोमयुक्ताः 'तेषां' 'प्रवृयात्' प्रकर्षेण विशरणाद् देवा अबिभयुः। 'वी विशरणे'—इतिधातोरिदं रूपम्। विशरणशङ्का कथमिति, तदुच्यते— षट्स्वहस्सु प्रयोक्तव्या एते सप्तदशस्तोमाः 'समा इव वै' सदृशा एव; तस्मात् 'अविगूळहा इव' गूढनस्य गोपनस्याभावाच्छिथिला एव,—एकवन्धे त्वसति नूतनत्वचमत्काराभावादनादरेण विशीर्णा भवन्ति। तस्मादिमे स्तोमाः 'न प्रविशेरन्' प्रकर्षेण विशीर्णा मा भूवन्निति विचार्य 'तान्' सप्तदशस्तोमान् 'अवस्तात्' अधोभागे सर्वैः स्तोमैः त्रिवृत्-पञ्चदश-सप्तदशैकविंश-त्रिणव-त्रयस्त्रिंशाख्यैः 'पर्यार्षन्' परितो गताः, रक्षणाय परितो वेष्टनं कृतवन्त इत्यर्थः। तथा 'परस्तात्' सप्तदशस्तोमानां उपरि भागे 'सर्वैः पृष्ठैः' रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवत-सामाख्यैः पृष्ठस्तोत्रैः 'पर्यार्षन्'। तस्मात् स्वरसाम्नाम् 'अधस्तात्' पूर्वस्मिन् दिवसे सर्वस्तोमयुक्तम् 'अभिजिद्'आख्य महरनुष्ठेयम्। तथा तेषां उपरिष्टात् सर्वपृष्ठस्तोमयुक्तं 'विश्वजिद्'आख्य महरनुष्ठेयम्। यदेतद् द्विविध मनुष्ठानं तेन सप्तदशस्तोमान् उभयतः 'पर्यृषन्ति' परिरक्षन्ति। तच्च रक्षणं 'धृत्यै' दार्ढ्याय 'अप्रवृथाय' शैथिल्याभावाय सम्पद्यते॥

अथ विषुवत्यहनि पञ्च सामानि विधत्ते— "तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवयातादबिभयुस्तं पञ्चभी रश्मिभिरुदयन्; रश्मयो वै दिवाकीर्त्यानि, महादिवाकीर्त्यं पृष्ठं भवति,

विकर्णं ब्रह्मसाम, भास मग्निष्टोमसामोभे बृहद्रथन्तरे पक्षयोर्नवी-भैवतरतदादित्यं पञ्चभी रश्मिभिरुद्वयन्ति धृत्या अनवपातायै"-इति। देवाः पुनरपि 'तस्य' आदित्यस्य स्वर्गलोकादधःपात मार्शङ्क्य तत्राग्नीताः। यद्यपि पृथिव्यादिलोकत्रय सुरक्षमक सुखम्, तथापि उपरि रज्जुभिरिव दृढ़बन्धनस्याभावात् ततश्चलने सति पार्श्वयोः पतन मा भूदिति देवा त मादित्यं 'पञ्चभिः रश्मिभिः' प्रग्रहैः 'उदवयन्' ऊर्ध्वं सुरक्षमक वयनं ज्ञातवन्तः, दृढं बद्धवन्त इत्यर्थः। ये बन्धनहेतवो रश्मयः, तत्स्थानीयानि अस्मिन् विषुवति 'दिवाकीर्त्यानि' दिवैव पठनीयानि पञ्च सामानि। तेषु मध्ये महादिवाकीर्त्यनामक मेकं साम। तच्च "विभ्राड् बृह-त्पिबतु सोम्यं मधु"-इत्यस्या ऋचुत्पन्नम् *। तत्सामयुक्तं पृष्ठ-स्तोत्रं कर्त्तव्यम्। तथा विकर्णाख्य मेकं साम। तच्च "प्रचस्य ब्रह्मणो अरुषस्य नू महः"-इत्यस्या ऋचुत्पन्नम् †। तदेतद् ब्रह्म-साम कर्त्तव्यम्। ब्राह्मणाच्छंसिन मभिलक्ष्य गीयमानं साम 'ब्रह्म-साम'। तथा भासाख्य मपरं साम। तदपि "प्रचस्व"-इत्यस्या मेवोत्पन्नम् ‡। तदग्निष्टोमसाम कर्त्तव्यम्। येन साम्ना अग्नि-

---

* 'आर० आ० ४. २ ऋचि आर० गा० ६.१.१५. महादिवाकीर्त्यं (योनिसाम); छ० आ० ६.३.५ १-३ ऊर्ध्वं ऊह्य० गा० २.१.१२. महादिवाकीर्त्यं (योनिसाम)।

† 'प्रचस्व'-इत्यस्याम् (आर० आ० २.८) ऋचि विकर्णं नावगम्यते, अपि तु 'विभ्राड् बृहत्'-इत्यस्या मेव (आर० आ० ४ २ ऋचि) योनिसाम सुपन्नं (आर० गा० ६.१.७.) श्रूयते। 'ब्रह्म क्रतु' म:'-इत्यच (उ० आ० ६ २.६.१.२) प्रगाथे गीतं (ऊह्य० २.१.१७.) सीच मेवेह विधित मिति च गम्यते, तान्याभाष्यदर्शनादिति (ता०ब्रा०४.६.१५.सा०भा०)।

‡ आर० आ० ४.८ ऋचि आर० गा० ६.१.८. छ० आ० तत्रैव, तच्चादित्यं यौनि-साम्नैव स्तोत्रम्। एतदेव इत्यनेन निगद्यते।

ष्टोमसंस्था समाप्यते, तत् 'अग्निष्टोमसाम'। उक्थ्यग्रहान्तरे प्रक्षिप्ते भवतः * ; माध्यन्दिनपवमानाभ्रवपवमानयोः कर्त्तव्यत्वात् †। पञ्चसामप्रयोगेणादित्यं पञ्चभिः सामरज्जुभिरुद्यन्तं बध्नन्ति, तस्मादित्यस्य धारणाय भवति; तेन धारणेनाधःपातो न भवति ॥

अथ प्रातरनुवाकस्य चोदकप्राप्तं कालं बाधितुं कालान्तरं विधत्ते— "उदित आदित्ये प्रातरनुवाकं मनुब्रूयात् ; सर्वं ह्येवैतदह्नर्दिवाकीर्त्यं भवति"–इति। प्रकृतावादित्योदयात् प्रागेव प्रातरनुवाकः पठ्यते ‡, अथ तु सर्वस्याह्नो दिवाकीर्त्यत्वसिद्ध्यर्थं मुदयादूर्द्धं मनुब्रूयात् ॥

सवनीयपशौ कञ्चिद्विशेषं विधत्ते—"सौर्यं पशुमन्यङ्गश्वेतं सवनीयस्योपालभ्य मालभेरन्सूर्य्यदेवत्यं ह्येतदह्नः"–इति। सूर्या देवता यस्य पशोः सोऽयं 'सौर्यः', 'न्यङ्ग' वर्णान्तरेण सम्पादितं चिह्नम्, तत्रास्ति यत्र सः 'अन्यङ्गः', तादृशश्चासौ श्वेतश्च सोऽयम् 'अन्यङ्गश्वेतः' वर्णान्तरेणामिश्रितः, सर्वश्वेत इत्यर्थः §। तादृशः पशुरत्र सवनीयस्थाने उपालभ्य ‖ ; अतस्त मालभेरन्। यस्मात् एतदह्नः सूर्यदेवत्यम्, तस्माद्युक्तः सौर्यः पशुः ॥

सामिधेनीषु विशेषं विधत्ते— "एकविंशतिं सामिधेनीरनुब्रूयात्प्रत्यृचाऽऽप्तेतदह्नरेकविंशम्"–इति। 'एतद्' विषुवन्नामक मह-

---

* ११२ पृ० †, ‡ टीप्पनीद्वयं द्रष्टव्यम्।

† "दीवाकीर्त्यसामा भवति"–इत्यादि (ता० ब्रा० ४.६.१२–१६।

‡ "सहति राजा मनुष्यः प्राक् शकुनिवादात्"–इति १ भा ३३५ पृ०।

§ "जातवेदोन्यङ्गं"–इति १भा० ४६४पृ० २पं०। "मैत्रावरुणो न्यङ्गः"–इति, "एष वै सोमस्य न्यङ्गो यदश्वपुच्छाणि फाल्गुनानि"–इति श्रुत० ब्रा० १.८.१.१७ ; ४.५.१०.२।

‖ 'उपात् प्रशंसायाम्'–इति (पा० ७.३.४६.) मुनि कृपम्।

[illegible]शस्त्रौनिषुक्तत्वात् 'प्रत्यवादि' साधादेव शस्त्र मेकविंशम्। तस्मात्सामिधेनीना मेकविंशतिसङ्ख्या युक्ता। अत्र चोदकप्राप्ताः पञ्चदश, धाया: षट्सङ्ख्यका इत्येकविंशतिः। तथा ब्राह्मणेऽप्यत्र आह—"विभुवान् दिवाकीर्त्य, उदिते प्रातरनुवाकः, बृहद्भानो अमर्त्य इति षट् धाया: सामिधेनीनां, सौर्य: सवनीयशो-षाक्षभाः"—इति (ऐ० ८.६.१–४.)॥

निष्केवल्यशस्त्रे निविदं विधत्ते—"एकपञ्चाशतं द्विपञ्चाशतं वा शस्त्वा मध्ये निविदं दधाति; तावतीरुत्तरा: शंसति; शतायुर्वै पुरुषः शतवीर्य: शतेन्द्रिय आयुष्येवैनं तद्वीर्ये इन्द्रिये दधाति"—इति। तस्मिन् शस्त्रे स्तोत्रियानुरूपयोस्तृचयोः षड्चः *, 'यद्वावान'—इत्येका (सं० १०.७४.६.) धाया, बृहद्रथन्तरयोर्योनी हे †, उत्तमसामप्रगाथस्य प्रयजनेन तिस्रः ‡, 'वृषा सु त्वा वृत-मम्'—इति (सं०३.५१.४.) तिस्र:, 'यस्तिग्मशृङ्गः'—इत्येकादशर्चः (सं० ७.१८.१–११.), 'अभि त्यम्'—इति पञ्चदशर्चः (सं० १.५१. १–१५.); इत्येव मेकचत्वारिंशत्। तत्र प्रथमया चिरभ्रस्तया सह त्रिचत्वारिंशत्। 'इन्द्रस्य नु वीर्याणि' इत्यस्मिन् पञ्च-दशर्चे (सं०१.३२.१–१५.) सूक्ते अष्टौ नव वा शंसनीया:; तथा-त्वपक्षे एकपञ्चाशद्भवति, नवपक्षे द्विपञ्चाशत्। तच्छंसना-दूर्ध्वम् 'इन्द्रस्य नु वीर्याणि'—इत्यस्य सूक्तस्य मध्ये ऐन्द्रीं 'निविदं' दध्यात्§। तत ऊर्ध्वं पुनरपि 'तावती:' ऋच: शंसेत्। तथा सति

* विभाड् बृहत् पिबतु, सोमो मित्रस्य—सं० १०.१७०.१–३, १०.१७०.१–३=६।

† बृहद्रथन्तरयोर्योनी—सं० ६.४६.१, ७.३२.२२=ऐ० आ० ३.१.५.२, ५.१।

‡ इन्द्र मिद्र देवसातये—सं० ८.३.५, ६=उ० आ० ७.१.८.१, २=३।

§ आश्व० श्रौ० ८.६.११–१२. सूक्तोपान्त्यमृचमन्त्यामित्यादि।

शतसङ्ख्यासाम्यात् सम्पत्त्या पुरुषायुःसाम्यं भवति । इन्द्रियाणि च शतसङ्ख्यानि गात्रेषु सञ्चाराच्छतं भवन्ति ; तदीयव्यापाराश्च तथा शतसङ्ख्याकाः । एवं सति यजमानं सम्पूर्णे आयुषि वीर्ये इन्द्रियेषु अवस्थापयति ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां द्वितीयाध्याये (अष्टादशाध्याये) पञ्चमः खण्डः ॥ ५ (१८) ॥

॥ अथ षष्ठः खण्डः ॥

दूरोहणं रोहति स्वर्गो वै लोको दूरोहणं स्वर्ग मेव तं लोकं रोहति य एवं वेद यदेव दूरोहणाऽम् असौ वै दूरोहो यो ऽसौ तपति क्षिप्रा अच गच्छति स यद्दूरोहणं रोहत्येत मेव तद्रोहति हंसवत्या रोहति हंसः शुचिषदित्येष वै हंसः शुचिषद् वसुरन्तरिक्षसदित्येष वै वसुरन्तरिक्षसद्धोता वेदिषदित्येष वै होता वेदिषदतिथिर्दुरोणसदित्येष वा अतिथिर्दुरोणसन् नृषदित्येष वै नृषद् वरसदित्येष वै वरसदं वा एतत्सन्नानां यच्चिन्नेष आसन्नसत्सदित्येष वै सत्सद् व्योमसदित्येष वै व्योम-

सद् व्योम वा एतत्सद्मनां यच्चिन्नेष आसन्नसप-
त्यजा इत्येष वा अज्जा अन्नो वा एष प्रातरुदेत्यप:
सायं प्रविशति गोजा इतेाष वै गोजा ऋतजा
इतेाष वै सत्यजा अद्रिजा इतेाष वा अद्रिजा ऋत
मितेाष वै सता मेष एतानि सर्वाण्येष ह वा अक्ष
छन्दस्सु प्रताच्यतमादिव रूपं तस्माद्यत्र क्व च दूरो-
ड्डीणं रोहेद्ध्रंसवतैव रोहेत्तार्क्ष्यं स्वर्गकामस्य रोहे-
त्तार्क्ष्यो ह वा एतं पूर्वोऽध्यान मैद्यवादो गायत्री
सुपर्णी भूत्वा सोम माहरत्तदथा चेचक्ष मध्वन: पुर
एतारं कुर्वीत तादृक्तदेव तार्क्ष्य इयं वै तार्क्ष्यो
योऽयं पवत एष स्वर्गस्य लोकस्याभिवोळ्हा त्य मू षु
वाजिनं देवजूत मितेाष वै वाजी देवजूत: सहावानं
तरुतारं रथाना मितेाष वै सहावांस्तरुतैष हीमां-
ल्लोकान्त्सदास्तरत्यरिष्टनेमिं पृतनाज माशु मितेाष
वा अरिष्टनेमि: पृतनाजिदाशु: स्वस्तय इति स्वस्तिता
माशास्ते तार्क्ष्य मिहा हुवेमेति क्षयतेाधैन मेत-
दिन्द्रस्येव राति माजोहुवाना: स्वस्तय इति स्वस्तिता
मेवाशास्ते नाव मिवा रुहेमेति समेवैन मेतदधि-
रोहति स्वर्गस्य लोकस्य समष्ट्यै सम्यत्तौ सङ्क्तौ
उर्वी न पृथ्वी बहुले गभीरे मा वा मेतौ मा परेतौ

रिषामेतौमे एवैतदनुमन्त्रयते आ च परा च मेध्यन्त्यदश्चिद्यः शवसा पञ्च दृष्टीः सूर्य इव ज्योतिषापस्ततानेति प्रत्यक्षं सूर्यमभिवदति सहस्रसाः शतसा अस्य रंहिर्न स्तरन्ते युवतिं न शर्या मित्याशिष मेवैतेनाशास्त आत्मने च यजमानेभ्यश्च ॥ ६ (२०) ॥

अथ कस्याश्चिदृचः प्रशंसनं विधत्ते—"दूरोहणं रोहति ; स्वर्गो वै लोको दूरोहणम्"–इति। दुःशकं रोहणं यस्मिन्नादित्यमण्डले तद् 'दूरोहणं', तत्रारोहणस्य साधनत्वात्प्रत्यक्षरूप मपि 'दूरोहणम्'–इत्युच्यते ; तद् 'रोहति' आरोहणार्थं प्रशंसेदित्यर्थः। यद्वा मन्त्रस्य दुःशक उच्चारणविशेषः 'दूरोहणम्' ; स च विशेषः सूत्रे ऽवगन्तव्यः*। तं 'रोहति' विशिष्ट मुच्चारणं कुर्यादित्यर्थः। योऽयं स्वर्गलोकः, तस्यारोहणं दुःशक मिति दूरोहणत्वम् ; तादृशं स्वर्गलोकं प्रापयतीत्यर्थः। वेदनं प्रशंसति—"स्वर्ग मेव तं लोकं रोहति य एवं वेद"–इति ॥

विहित मर्थं प्रशंसति—"यदेव दूरोहणा३म् असौ वै दूरोहो यो ऽसौ तपति ; कश्चिदा अत्र गच्छति, स यद् दूरोहणं रोहत्येत मेव तद्रोहति"–इति। दूरोहण मिति यदुक्तं तत् किमिति शेषः। प्रश्नार्था श्रुतिः। असावित्यत्रोत्तर मुच्यते। 'यो ऽसौ' आदित्यस्तपति, असावेव 'दूरोहः' दुःशकारोहणस्थानावस्थितत्वात्।

* आश्व० श्रौ० ८.३.११–१५।

अन्वया यः 'कश्चिद्' यजमानः सम्यगनुष्ठायादित्यलोके गच्छति, सोऽपि 'दूरोहः' दुःखस्थानारोहणत्वात् । एवं सति 'यद्' यदि 'रोहणं' मन्त्रं 'रोहति' भंसेत्, 'तत्' तेन भंसनेन 'एतमेव' आदित्यं लोकं 'रोहति' प्राप्नोति ॥

मन्त्रविशेषं विधत्ते—"हंसवत्या रोहति"-इति । हंसशब्दो यस्या ऋचस्ति, सेयं 'हंसवती' *, तया रोहेत्, तां सुष्ठादित्यर्थः ॥ तस्या ऋचः प्रथमपादे पूर्वभाग मनूद्य व्याचष्टे—"हंसः शुचिषदित्येष वै हंसः शुचिषत्"-इति । हन्ति सर्वदा गच्छतीति 'हंसः' ; शुचौ शुद्धे द्युलोके सीदति तिष्ठतीति 'शुचिषत्' । अस्मिन् भागे यः प्रतिपाद्यते, स 'एष वै' मण्डले दृश्यमान एव ;—स च सर्वदा गतिमत्त्वाद्धंसो भवति, द्युलोकेऽवस्थानाच्छुचिषदपि भवति ॥ उत्तरभाग मनूद्य व्याचष्टे—"वसुरन्तरिक्षसदित्येष वै वसुरन्तरिक्षसत्"-इति । वसति सर्वदेति 'वसुः वायुः', न हि वायोरहनि रात्रौ वा कदाचिदस्तमयोऽस्ति ; तादृशो वायुरन्तरिक्षे सीदतीति 'अन्तरिक्षसत्' । आदित्यस्य परमाणुरूपत्वेन सर्वात्मकत्वादन्तरिक्षसद्वायुरूपेण एवेत्युच्यते ॥ द्वितीयपादस्य पूर्वभाग मनूद्य व्याचष्टे—"होता वेदिषदित्येष वै होता वेदिषत्"-इति । 'होता' होमस्य कर्त्ता ; यागवेद्यां सीदतीति 'वेदिषत्' । आदित्यस्य तद्रूपत्वं पूर्ववत् ॥ उत्तरभाग मनूद्य व्याचष्टे—"अतिथिर्दुरोणसदित्येष वा अतिथिर्दुरोणसत्"-इति । न विद्यते तिथिविशेषनियमो यागार्थं यस्य, सोऽयम् 'अतिथिः' ;

* "हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥"
—इति ४.४०.५ । तै० सं० १,८ १४.२ । शत० ब्रा० ६,५,३,१२ । निरु० १२.४.१ ।

दुरोणेषु तत्तद्गृहेषु सीदति याचितुं प्रविशतीति 'दुरोणसत्'। आदित्यस्य तद्रूपत्वं मयि द्रष्टव्यम्॥ तृतीयपादं चतुर्धा विभज्य प्रथमभागं मनूद्य व्याचष्टे—"नृषदितीयं वै नृषद्"-इति। नृषु मनुष्येषु वृष्टिरूपेण सीदतीति 'नृषत्'। तथा चारण्यकाण्डे वक्ष्यति—"आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्"-इति (४.२.४)। तस्मादेष आदित्य एव नृषच्छब्दवाच्यः॥ द्वितीयभागं मनूद्य व्याचष्टे—"वरसदितीयं वै वरसद्; वरं वा एतत्सद्मनां यस्मिन्नेष आसन्नस्तपति"-इति। वरे श्रेष्ठे मण्डले सीदतीति 'वरसत्'। एतस्यादित्यस्य मण्डले अवस्थानं प्रसिद्धम्। यानि 'सद्मानि' निवासस्थानानि सन्ति, तेषां मध्ये 'यस्मिन्' मण्डले 'एषः' आदित्यः 'आसन्नः' उपविष्टः सन् तपति। 'एतत्' मण्डलं 'वरं' श्रेष्ठं सद्म॥ तृतीयभागं मनूद्य व्याचष्टे—"ऋतसदितीयं वै सत्यसद्"-इति। ऋतं सत्यवदनं वेदवाक्यं तत्र सीदति प्रतिपाद्यते इति 'ऋतसत्'। आदित्यस्य सत्येन वेदवाक्येन प्रतिपाद्यत्वं मनेकमन्त्रेषु प्रसिद्धम्॥ चतुर्थभागं मनूद्य व्याचष्टे—"व्योमसदितीयं वै व्योमसद्; व्योम वा एतत्सद्मनां यस्मिन्नेष आसन्नस्तपति"-इति। व्योम्नि आकाशमार्गे सीदतीति 'व्योमसत्'। आदित्यस्य तथाविधत्वं प्रसिद्धम्। 'यस्मिन्' व्योमस्थाने 'एषः' आदित्यः प्रत्यासन्नस्तपति, तत् 'एतत्' स्थानं 'सद्मनां' निवासस्थानानां मध्ये 'व्योम' गृहाद्यावरणशून्यं माकाशम्॥ चतुर्थं पादं पञ्चधा विभज्य प्रथमभागं मनूद्य व्याचष्टे—"अजा इतीयं वा अजा, अङ्गो वा एष प्रातरुदेत्यपः सायं प्रविशति"-इति। अङ्गो जायते योऽयं मकारादिः, सोऽयम् 'अजाः' तद्रूपत्वं मस्य सर्वोत्पत्तिकत्वादवगन्तव्यम्। किञ्चायमादित्यो ऽस्माभिर्दृष्टा प्रातःकाले

पूर्वस्तनुद्भवताभ्योऽग्र उदेति, सायं काले पश्चिमस्तनुद्भवताभ्यः प्रविशतीव लक्ष्यते ; तस्मादजा ॥ द्वितीयभाग मनूक्त व्याचष्टे— "गोजा इतीव वै गोजाः"–इति । गोभ्यो जायते जीवादि, स 'गोजाः' । अस्य तद्रूपत्वं पूर्ववत् ॥ तृतीयभाग मनूक्त व्याचष्टे— "ऋतजा इतीव वै सत्यजाः"–इति । ऋतं सत्यं वैदिकमेव आतम्, तस्माज्जायत इति 'ऋतजाः' ; वैदिकानुष्ठानेन हि देवलोकादौ जायते इति प्रसिद्धम् । आदित्यस्य तद्रूपत्वं पूर्ववत् ॥ चतुर्थभाग मनूक्त व्याचष्टे— "अद्रिजा इतीव वा अद्रिजाः"–इति । अद्रावुदयगिरावुत्पद्यत इति 'अद्रिजाः' ; आदित्यस्य तथात्वं पुराणादौ प्रसिद्धम् ॥ पञ्चमभाग मनूक्त व्याचष्टे— "ऋत मित्येव वै सत्यम्"–इति । ऋतशब्दः सत्यवाची । सत्यं च द्विविधम्,— व्यावहारिकं पारमार्थिकं च । तत्र 'व्यावहारिकं' वाचा सत्यभाषणम्, 'पारमार्थिकं' परं ब्रह्म ; "सत्यं ज्ञान मनन्तं ब्रह्म"–इतिश्रुतेः (तै० आ० ८.१) । तदिह ऋतशब्देन विवक्षितम् । अयं चादित्यो ब्रह्मरूपं सत्यम् । अत एव शाखान्तरे "ऋतं बृहत्" इति मन्त्रशेषं पठन्ति * । मन्त्रान्तरं चैवं श्रूयते— "असौ वा अदित्यो ब्रह्म"–इति (शत० ब्रा० ७.४.१.१४.) ॥

छन्दस्य मन्त्रस्य तात्पर्यं दर्शयति— "एष एतानि सर्वाण्येवा ह वा अस्य छन्दस्, प्रत्यक्षतमादिव रूपम्"–इति । शुचिषदित्यादिशब्दैर्यानि रूपाण्यभिहितानि, तानि सर्वाण्येव एव ; अस्य परब्रह्मत्वेन सर्वात्मकत्वात् । 'छन्दस्' वेदेषु मध्ये 'एषा ह वै' येयं हंसवती ऋक्, सैव 'अस्य' आदित्यस्य सर्वात्मकं 'रूपं'

* वा० सं० १०.२४ । तै० सं० १.८.१५.२ । जाबा० उ० १५.१.२६ । कठ० उप० ५.१ ।

'प्रसक्षतमादिव' प्रतियत्नेन प्रसक्तं विशिष्टं यथा भवति तथा प्रतिपादयतीति शेषः ॥

अस्यातात्पर्यं दर्शयन्नेव विधिं निगमयति—"तस्मादश्व इव दूरोहणं रोचेतांसवत्त्वेव रोचेत्"—इति । यत्र क्वापि कर्मणि दूरोहणविधानमस्ति, तत्र सर्वत्र हंसवत्त्वेव विज्ञेया ॥

फलभेदेन सूक्तान्तरं विधत्ते—"तार्क्ष्यं स्वर्गकामस्य रोचेत्"—इति । तार्क्ष्याख्येन मन्त्रदृष्टा दृष्टं तार्क्ष्यम् (सं० १०.१७८.१–३.*); तस्मिन् सूक्ते स्वर्गकामस्य यजमानस्य दूरोहणं रोचेत्, न तु हंसवत्त्वम् ॥

तदेतत्प्रशंसति—"तार्क्ष्यो ह वा एतं पूर्वोऽध्वानमैयवादो गायत्री सुपर्णी भूत्वा सोममाहरत्; तथथा क्षेत्रज्ञ मध्वनः पुर एतारं कुर्वीत, तादृक् तदेव तार्क्ष्यं; ऽयं वै तार्क्ष्यो योऽयं पवत एष स्वर्गस्य लोकस्याभिवोळ्हा"—इति । अत्रैव वक्ष्यमाणं कार्यं सम्पद्यते । तत्र 'तार्क्ष्यो ह वै' गरुड़ एव 'पूर्वः' प्रथमगामी सन् 'एतम्' अध्वानम् 'ऐत्' प्राप्तवान् । किं वक्ष्यमाण मिति, तदुच्यते— गायत्री 'सुपर्णः' पक्षी भूत्वा सोम माहरत् । एतच्च पूर्वमेव प्रतिपादितम् (११६ पृ०) । एवं सति 'तार्क्ष्ये' सूक्ते 'यदेव' शंसनं 'तत्' तत्र शंसने दृष्टान्तः कथ्यते,— यथा लोके 'क्षेत्रज्ञ' मार्गविशेषाभिज्ञं तद्देशवासिनं कञ्चित् पुरुषम् 'अध्वनः' मार्गस्य 'पुर एतारं' पुरतो गन्तारं मार्गप्रदर्शकं कुर्वीत, तादृक् 'तत्' तार्क्ष्यशंसनम् । यः 'अयं' वायुरन्तरिक्षे पवते, अय मेव तार्क्ष्य-

---

* अस्य सूक्तस्य ऋषिस्तार्क्ष्यः, देवोऽपि तार्क्ष्य एव । तत्र ऋषिपदे ढक्यञौ (पा० ४.१.१०५.) । देवपदे तु तिसृभ्यो जसि (पा० ४.१.१५.) ।

स्वरूपः *। एष च स्वर्गस्य लोकस्य 'अभिवोळ्हा' नेता भवति । तस्मात्तार्क्ष्यसूक्तेनैव दूरोहणं रोहेत् ॥

तस्य सूक्तस्य प्रथमायां ऋचि प्रथमपादं मनुष्य व्याचष्टे—"त्व मू षु वाजिनं देवजूत मित्येष वै वाजी देवजूतः"—इति । चतुर्थपादे तार्क्ष्यं मिति वक्ष्यति । कीदृशं तार्क्ष्यम् ? 'त्व मू षु' त्वच्छब्दः सर्वनामत्वात् प्रसिद्धवाची, उ शब्द एवकारार्थः,—पुराणादिषु प्रसिद्ध मेव । 'वाजिनम्' अन्नवन्तं, 'देवजूतं' देवानां मध्ये वेगवन्तम् । अस्मिन् पादेऽभिधीयमानः 'एष वै' तार्क्ष्य एव ; तस्यान्नवत्त्वाद् देवेषु मध्ये वेगवत्त्वाच्च ॥ द्वितीयपादं मनुष्य व्याचष्टे—"सहावानं तरुतारं रथानां मित्येष वै सहावांस्तरुतैष इमांल्लोकान्मद्यस्तरति"—इति । पुनरपि कीदृशं तार्क्ष्यम् ? 'सहावानं' सहाः सहनं सर्वलोकानामभिभवस्तद्वन्तम् । रथानां 'तरुतारम्' उल्लङ्घयितारम् । 'एष वै' तार्क्ष्य एवास्मिन् पादेऽभिहितः, 'सहावान्' अभिभवक्षमः, 'तरुता' उल्लङ्घयिता भवति ; यस्मादेष इमान् लोकान् 'मद्यः' तदानीं मेवन्तरितुं क्षमः ॥ तृतीयपादं मनुष्य व्याचष्टे— "अरिष्टनेमिं पृतनाजं साधु मित्येष वा अरिष्टनेमिः पृतनाजिदाशुः"—इति । पुनरपि कीदृशं तार्क्ष्यम् ? 'अरिष्टनेमिं' रिष्ट' क्षिप्रा, तद्राहित्य मरिष्टम्, तस्य च नेमिरिवानीयम्,—यथा रथचक्रस्य नेमिः परितो रक्षिका भवति तादृशम् । 'पृतना' परकीयसेना, तां जयतीति 'पृतनाजम्' । 'आशुं' वेगवन्तम् । अस्मिन् पादेऽभिहितानां गुणानां तार्क्ष्ये सद्भावादेष एवात्र प्रतिपाद्यः ॥ चतुर्थपादे प्रथमभाग मनुष्य व्याचष्टे—"स्वस्तय इति स्वस्तिता मयास्ते"—इति । 'स्वस्तये'

* "क मन्य मध्यमादैव मवद्यत्"—इति निरु० १०.३.४ । मध्यमः = वायुः ।

क्षेमार्थम्। अनेन पादेन क्षेमः प्रार्थितो भवति ॥ उत्तरभाग मनूद्य व्याचष्टे—"तार्क्ष्य मिहा हुवेमेति क्षयत्येवैन मेतद्"-इति। 'तार्क्ष्य' गरुडम् 'इह' कर्मणि 'हुवेम' आह्वयामः। एतेन भागेन माह्वयत्येव (सं० १०.१७८.१.) * ॥

तार्क्ष्यसूक्ते द्वितीयस्या ऋचः पूर्वार्धे प्रथमभाग मनूद्य व्याचष्टे—"इन्द्रस्येव राति माजोहुवाना: स्वस्तय इति स्वस्तिता मेवाशास्ते"-इति। यथेन्द्रस्य दातव्यं हविः प्रयच्छामः, तथैवास्य तार्क्ष्यस्य 'रातिं' दातव्यं वसु 'आजोहुवानाः' समन्तात् पुनःपुनर्ददाना वयं आजुहोमेति वक्ष्यमाणेन सम्बन्धः। किमर्थम्? 'स्वस्तये' क्षेमार्थम्,— एतत्पाठेन 'स्वस्तिता मेव' क्षेम मेव 'आशास्ते' प्रार्थयते ॥ उत्तरभाग मनूद्य व्याचष्टे—"नाव मिवा रुहेमेति, स मेवैन मेतदधिरोहति; स्वर्गस्य लोकस्य समष्ट्यै, सम्पत्त्यै सङ्गत्यै"-इति। यथा लोके नदुत्तरणाय नाव मारोहति, एवं च स्वर्गं प्राप्तुं दूरोहण मारुहेम। एतद्भागपाठेन 'एनं' दूरोहणं स्वर्गं 'सम्' सम्यगेव अधिरोहति। अतस्तच्छंसनं स्वर्गस्य 'समष्ट्यै' प्राप्त्यै भवति। सा च प्राप्तिः 'सम्पत्त्यै' भोगाय, भोग्यवस्तु-सम्पादनाय भवति। सम्पादनं च 'सङ्गत्यै' भोगसम्बन्धाय भवति ॥ उत्तरार्ध मनूद्य व्याचष्टे—"उर्वी न पृथ्वी बहुले गभीरे मा वा मितौ मा परितौ रिषामेतीमे एवैतदनुमन्त्रयत मा च परा च मेथन्"-इति। नकारः समुच्चयार्थः। 'उर्वी न' भूमिश्च 'पृथ्वी' विस्तीर्णा द्यौश्च, 'बहुले' उभे अपि अतिदीर्घे, 'गभीरे' अत्यन्त-गाम्भीर्येण युक्ते, उभयोरियत्तां निर्वेतु मशक्येत्यर्थः। तादृश्यौ हे द्यावापृथिव्यौ! वयम् 'एतौ' आगमनवेलायां 'परितौ' पुनर्गमन-

* ऋग्० १०.३.४. द्रष्टव्यम्।

वेत्तायाच्च 'वाम्' उभे 'मा रिषाम' हिंसायुक्ते मा करवाम (सं० १०.१७८.२.) । एतत्पाठेन होता 'आमेथांश्च' आगमिष्यतोऽपि, 'परामेथांश्च'* पुनरपि परावृत्य गमिष्यतोऽपि 'इमे एव' आवापद्विष्यावेव अनुमन्त्रयते ॥

तृतीयस्या ऋचः पूर्वार्धं मनूदा व्याचष्टे— "सदाविदः श्रवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततानेति प्रत्यक्षं सूर्यमभिवदति"–इति । 'यः' तार्क्ष्यः 'सदाविद्' तस्मिन्नेव क्षणे 'श्रवसा' बलेन 'पञ्च कृष्टीः' पञ्चविधान् पुरुषजातिविशेषान्, देवमनुष्यासुर-राक्षस-गन्धर्वान् अतिविस्तारितवान्,— यथा सूर्यः 'ज्योतिषा' स्वकीयरश्मिसमूहेन 'अपः' वृष्ट्युदकं 'ततान' विस्तारयति, तद्वत् । एतत्पाठेन तार्क्ष्यदेवं सूर्यं 'प्रत्यक्षं' मुख्यं कृत्वा 'अभिवदति' प्रशंसति ॥ उत्तरार्धं मनूदा व्याचष्टे— "सहस्रसाः शतसा अस्य रंहिर्न मा वरन्ते युवतिं न शर्या मित्याग्निप मेवैतेनाग्नास्त आत्मने च यजमानेभ्यश्च"–इति । 'अस्य' तार्क्ष्यस्य 'रंहिः' गतिः 'सहस्रसाः' सहस्रभेदयुक्ताः, 'शतसाः' शतभेदयुक्ताः । "षण सम्भक्तौ"–इति धातुः ; सहस्रं सनुते सम्भजतीति 'सहस्रसाः' सहस्रभेदयुक्ता । तां गतिं केऽपि 'न मा वरन्ते' न वारयन्ति । यथा लोके 'शर्या' शरकाष्ठनिर्मितां 'युवतिं' शत्रुशरीरभिन्नणयोग्यां न वरते, तद्वत् । नकार उपमानार्थः । यथातिशूरेण धानुष्केण प्रयुक्तो बाणः केनापि न निवार्यते, तथा त्वदीयगतिरित्यर्थः (सं० १०.१७८.३.) † । 'एतेन' अर्धर्चपाठेन अयं होता 'आत्मने च' स्वार्थे मपि 'यजमानेभ्यश्च' मतानुज्ञानात् बहुयजमानार्थं

* निघण्टौ गतिकर्मसु 'गिर्यति' २ १४ २७ ।

† निरु० १०.३.४. द्रष्टव्यम् ।

मप्याग्निष मेव प्रार्थयते रक्षार्थाय ; मार्ष्णगतेरनिवार्यत्वाभिधानात् * ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां तृतीयाध्याये
(अष्टादशाध्याये) षष्ठः खण्डः ॥ ६ (२०) ॥

॥ अथ सप्तमः खण्डः ॥

आहूय दूरोहणं रोहति स्वर्गो वै लोको दूरोहणं वागाहावो ब्रह्म वै वाक् स यदाह्वयते तद् ब्रह्मणाहावेन स्वर्गं लोकं रोहति स पक्षः प्रथमं रोहतीमं तं लोक माप्नोत्यथार्ङ्चंशोऽन्तरिक्षं तदाप्नोत्यथ त्रिपद्यामुं तं लोक माप्नोत्यथ केवल्या तदेतस्मिन् प्रति तिष्ठति य एष तपति त्रिपद्या प्रत्यवरोहति यथाशाखां धारयमाणस्तदमुष्मिंल्लोके प्रति तिष्ठत्यर्ङ्चंशोऽन्तरिक्षे पक्षो ऽस्मिंल्लोक आप्त्वैव तत् स्वर्गं लोकं यजमाना अस्मिंल्लोके प्रति तिष्ठन्त्यथ य एककामाः स्युः स्वर्गकामाः पराञ्च मेव तेषां रोहेत्ते जयेयुर्हैव स्वर्गं लोकं नेत्त्वेवास्मिंल्लोके ज्योगिव

* अहर्गणेषु द्वितीयादिष्वह्सु निष्केवल्यसूक्तानां पुरस्तादिदं सूक्तं शंसनीयं भवति ; त्रिपवति तु निष्केवल्यसूक्ताना मन्त एव । आश्व० श्रौ० ७.१.१३,८.६.१४ सूत्रे द्रष्टव्ये ।

वसेयुर्मिथुनानि सूक्तानि शस्यन्ते चैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दांसि पशूनामवरुद्ध्यै ॥ ७ (२१) ॥

अथ दूरोहणसूक्तशंसनस्य प्रकारान्तरं विधत्ते— "आहूय दूरोहणं रोहति ; स्वर्गो वै लोको दूरोहणं, वागाहावी, ब्रह्म वै वाक्, स यदाह्वयते तद् ब्रह्मणाहावेन स्वर्गं लोकं रोहति"-इति। "शंसावोम्" -इत्यध्वर्योराह्वानं कृत्वा तदनन्तरं "त्य मू षु"-इत्यादिकं दूरोहणं सूक्तं 'रोहेत्' आरोहणक्रमेण पठेत्। दूरोहणस्य स्वर्गरूपत्वात्, आहावस्य वायुपत्वात्, वाचश्च वेदात्मिकायाः ब्रह्मत्वात्, प्रथम मन्त्रानै सति ब्रह्मरूपेण आहावेन स्वर्गं मारोहति ॥

अपरं प्रकारविशेषं विधत्ते— "स पञ्चः प्रथमं रोहतीमं तं लोक माप्नोत्यथार्धर्चशोऽन्तरिक्षं तदाप्नोत्यथ त्रिपद्यामुं तं लोक माप्नोत्यथ केवल्या ; तदेतस्मिन् प्रतितिष्ठति य एष तपति" इति। त्रेधा सूक्तस्य शंसनम्, रोहक्रमेणावरोहक्रमेण चेति। तं चारोहे चतुर्वारं मावर्त्तनीयम्। प्रथमावृत्तौ 'पञ्चः' पादशः पठेत्, एकैकस्मिन् पादे ऽवसानं कृत्वा शंसेत्। द्वितीयस्यां मावृत्तौ 'अर्धर्चशः' एकैकस्मिन्नृचे ऽवसानं कृत्वा पठेत्। तृतीयस्यां मावृत्तौ 'त्रिपद्या' आवृत्त्या पादत्रये ऽवसानं कृत्वा पठेत्। चतुर्थ्यां मावृत्तौ अवसानरहितया सम्पूर्णया शंसेत्। 'तत्' एताभिश्चतसृभिरावृत्तिभिः लोकत्रयम् प्राप्य, पश्चात् 'एतस्मिन्' प्रकाशमाने सूर्यमण्डले प्रतितिष्ठति ॥

आरोहप्रकारविशेषं विधाय प्रत्यवरोहणं विधत्ते— "त्रिपद्या प्रत्यवरोहति,— यथा शाखां धारयमाणस्तदमुष्मिंल्लोके प्रति तिष्ठ

त्यर्चशोऽन्तरिक्षे पक्षोऽस्मिंल्लोक आत्मैव तत् स्वर्गं लोकं यजमाना अस्मिंल्लोके प्रतितिष्ठन्ति"–इति। प्रत्यवरोहक्रमे प्रथमावृत्तौ पादत्रये अवसानम्; द्वितीयावृत्तावर्धर्चे अवसानम्; तृतीयावृत्तौ पादे अवसानम्। तथा सति यथा लोके वृक्षाय मारुह्य पुरुषः प्रत्यवरोहन् हस्तेन शाखां दृढं मवलम्ब्य स्थिरो भवति, एव मयं प्रथमतः स्वर्गे प्रतिष्ठाय पश्चादन्तरिक्षे भूलोके च प्रतितिष्ठति। यथा होतुः प्रतिष्ठा, तथा यजमानानामपि; ते च स्वर्गं प्राप्य पुनरागत्यास्मिंल्लोके प्रतितिष्ठन्ति। तावेतावारोहप्रत्यवरोहौ हंसवतीपक्षे तार्क्ष्यपक्षेऽपि समानौ। एव सुचारणस्य दुःशङ्कत्वादस्य ध्वंसनस्य 'दूरोहण'-सञ्ज्ञा* ॥

कामनाभेदेन प्रकारान्तरं विधत्ते— "अथ य एककामाः स्युः, स्वर्गकामाः पराञ्च मेव तेषां रोहेत्; ते जयेयुर्हैव स्वर्गं लोकम्"–इति। एकस्मिन्नेव लोके कामो येषां ते 'एककामाः'। स्वर्गं लोकमेव कामयन्ते, न त्वेनं लोकम्; तेषां 'पराञ्च मेव' प्रत्यवरोहरहित मेव 'रोहेत्' शस्त्रं पठेत्। तावता ते स्वर्गं लोकं 'जयेयुर्हैव' प्राप्नुवन्त्येव ॥

अस्मिन् पक्षे कञ्चिद्दोषं दर्शयति –"नेत्त्वेवास्मिंल्लोके ज्योगिव वसेयुः"–इति। ते स्वर्गं प्राप्नुवन्त्येव, किन्त्वत्र दोषोऽस्त्येव;— ते यजमाना अस्मिन्नेव लोके 'ज्योगिव' चिरकाल मेव 'नेदसेयुः' सर्वथा न तिष्ठेयुः। परिभवद्योतकन्नेदित्यनेन आयुःक्षयहेतुरयं पक्षो दूषितः ॥

सूक्तान्तराणि विधत्ते—"मिथुनानि सूक्तानि शस्यन्ते,— त्रैष्टु-

* "तस्य (तार्क्ष्यस्य) एकाम् (ऋचं) शस्त्वा ऽऽहूय (आहावं प्रतिष्ठा) दूरोहणं रोहेत्"–इति आश्व० श्रौ० ८. ६. १५।

आनि च जागतानि च; मिथुनं वै पशवः, पशवश्छन्दांसि, पशूना मवरुद्ध्यै"-इति। मिथुनशब्द एकत्वनिवारकः, ततो 'बहूनि' इत्युक्तम् भवति। "यस्मिन्नग्नयः"-इत्यादीनि 'त्रैष्टुभानि' *, "दिवश्चिदस्य वरिमा"-इत्यादीनि 'जागतानि' †। तदेच्छन्दोद्वयम् मिथुनसदृशम्; पशवोऽपि मिथुनात्मकाः; छन्दांसि च पशुसाधनत्वात् 'पशवः'; अतस्तेषां संसनं पशुप्राप्तिर भवति ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपङ्क्तिकायां तृतीयाध्याये
(अष्टादशाध्याये) सप्तमः खण्डः ॥ ७ (२१) ॥

॥ अथ अष्टमः खण्डः ॥

यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणो ऽर्द्ध एवं पूर्वो ऽर्द्धो विषुवतो यथोत्तरो ऽर्द्ध एव मुत्तरो ऽर्द्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्र बाहुक् सतः शिर एव विषुवान् विदलसंहित इव वै पुरुषस्तद्यापि स्यू मेव मध्ये शीर्ष्णो विज्ञायते तदाहुर्विषु-

---

* "यस्मिन्नग्नयो (सं० २.१८.), इमिलं मिथम् (स० १.५१.), इदस्य यु वीर्याणि (सं० १.६२.) इति"-इति आश्व० श्रौ० ८,६,१९।

† "दिवश्चिदस्य (सं० १.५५.), सुत इन्द्रम् इन्दम् (सं० ६.२३.), एव प पूर्वी (सं० १.५६.) इमा मह (सं० ६.२४.), प्र संहिषाय (सं० १.५७.), त्व सु प (सं० १०.१७८.) इति"-इति आश्व० श्रौ० ८,६,१९।

वत्थेवैतदहः शंसेद्विषुवान्वा एतदुक्थानां मुक्थं विषुवान् विषुवानिति ह विषुवन्तो भवन्ति श्रेष्ठतां गच्छत इति तत्तन्नाहतं संवत्सर एव शंसेद्रेतो वा एतत्संवत्सरं दधतो यन्ति यानि वै पुरा संवत्सरादेतांसि जायन्ते यानि पञ्चमास्यानि यानि षण्मास्यानि स्रीण्यन्ति वै तानि न वैतैर्भुञ्जते ऽथ यान्येव दशमास्यानि जायन्ते यानि सांवत्सरिकाणि तैर्भुञ्जते तस्मात्संवत्सर एवैतदहः शंसेत् संवत्सरो ह्येतदहराप्नोति संवत्सरं ह्येतदहराप्नुवन्त्येष ह वै संवत्सरेण पाप्मान मपहते एष विषुवताङ्गेभ्यो हैव मासैः पाप्मान मपहते शीर्ष्णो विषुवताप संवत्सरेण पाप्मानं हते ऽप विषुवता य एवं वेद वैश्वकर्मण मृषभं सवनीयस्योपालम्भा मालभेरन् द्विरूप मुभयत एतं महाव्रतीये ऽहनीन्द्रो वै वृत्रं हत्वा विश्वकर्माभवत्प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माभवत्संवत्सरो विश्वकर्मेन्द्र मेव तदात्मानं प्रजापतिं संवत्सरं विश्वकर्माण माप्नुवन्तीन्द्र एव तदात्मनि प्रजापतौ संवत्सरे विश्वकर्मण्यन्ततः प्रति तिष्ठन्ति प्रति तिष्ठति य एवं वेद य एवं वेद ॥ ८ (२२) ॥

॥ इत्यैतरेयब्राह्मणे चतुर्थपञ्चिकायां तृतीयोध्यायः ॥३॥

अथ विषुवन्नामकं 'महर्विशेषं' मनुष्यसाम्येन प्रशंसति—'यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणोऽर्ध एवम् पूर्वोऽर्धो विषुवतो यथोत्तरोऽर्ध एव 'सुत्तरो'ऽर्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्राङ्मुक् मतः शिर एव विषुवान् विदलसंहित इव वै पुरुषस्तदापि स्थूमेव मध्ये श्रोणी विज्ञायते" इति। यथा लोके पुरुषो दक्षिणवामभागाभ्यां भागद्वयमध्ये शिरसा च युक्तः;—तस्य विषुवतः प्रशंसासाम्यकः पूर्वभागः, पुरुषसम्बन्धि दक्षिणभागस्थानीयः, तत्रावरोहकपर्वसप्तकात्मक उत्तरार्धो वामभागस्थानीयः। 'तस्मात्' वामभागसाद्दश्यादुत्तर इत्याचक्षते, न स्वतन्त्रानन्विक्षयविधितया। 'प्राङ्मुक् मतः' वामदक्षिणभागौ समौ लौकिक पुरुषस्य पुरुषस्य 'शिरो ग्रीवोरसं मध्येऽवतिष्ठते, एवं मापशब्दयोगेऽपि 'विषुवान्' उच्चैर्ग्रीवतिष्ठते। 'विदलं' भागः, ताभ्यां विदलाभ्यां दक्षिणवामभागाभ्यां 'संहितः' मेथीजित इव लोके पुरुषो भवति; 'तस्मादि' तस्मादेव भागद्वयमध्यानरूपात् कारणात् 'श्रोणी मध्ये स्थूमेव विज्ञायते'; 'स्थूम' स्थूतं, यथा वस्त्रयोः सन्धिः क्वचा स्यूत संयोजितो भवति, एवं शिरसि दक्षिणोत्तरभागयोः सन्धा स्यूत क्वाचिद्दृश्या दृश्यते। एतच्च भूमौ पतिते शुष्के सांसन्धिते शिरःकपालसंयसमूहरूपेऽस्थिनि विस्पष्टं गृहीतुं शक्यते। अत मनीषिणा पुरुषसाद्दश्यात् प्रशस्योऽयं विषुवान्॥

अत्र कश्चित् पूर्वपक्षं मुखापयति—"तदाहुर्विषुवत्येवैतदहः; ऐमेद्; विषुवान्वा एतदुक्थ्याना मुक्थं, विषुवान्विषुवानिति ह विषुवन्तो भवन्ति, येऽहता मध्यवत इति" इति। विषुवन्नामके दुःखेहनि य ऋक्सं विहितम्, 'तत्' तस्मिन् शस्त्रे पूर्वपक्षिण एव माहुः,—

दक्षिणायनस्योत्तरायणस्य च मध्ये विषुवन्नामकः तुलामेष-सङ्क्रान्तिद्वयरूपो यः कालविशेषः, सोऽयं विषुवच्छब्दाभिधेयः। स च व्यवहारः स्मृतिषु प्रचुरः। अस्मिन्नेव 'विषुवति' काले 'एत-दहः' शंसेत् ; एतस्मिन्नहनि विहितं शस्त्रं महःशब्देनोपलक्ष्यते। 'एतत्' सङ्क्रान्तिद्वययुक्तं महः 'उक्थानाम्' अङ्गां मध्ये 'उक्थम्' उक्थशस्त्रोपेतशस्त्रयोग्य मित्यर्थः। अत एव 'विषुवान्' विषु-वन्नामकशस्त्रवानेव सङ्क्रान्तिकालविशेषः। तत्कथ मित्युच्यते— तं सङ्क्रान्तिकालं विषुवानित्येव सर्वे व्यवहरन्ति। अतस्तस्मिन् काले शस्त्रपाठे सति यजमाना 'विषुवन्तः' योग्यशस्त्रयुक्ता भवन्ति, सर्वेष्वनुष्ठातृषु श्रेष्ठतां प्राप्नुवन्तीति पूर्वपक्षिणो मताशयः ॥

तं पक्षं निराकरोति — "तन्नाद्रत्यं ; संवत्सर एव शंसेद्रेतो वा एतत्संवत्सरं दधतो यन्ति" इति। कर्म्मान्तरेष्वपि विषुवाख्य-सङ्क्रान्तियुक्ते काले समागते सति शस्त्र मेतच्छंसनीय मिति यत् पूर्वपक्षिणां मतम्, तस्मिन् शस्त्रे 'तत्' मतं नादरणीयम्। किन्तु 'संवत्सरे' सत्रे एव गवामयने तत्पूर्वोक्तं शस्त्रं शंसेत्। एवं सति यजमाना अत्यन्तसंयोगेन संवत्सरकाल मेतद्रेतो धारयन्तो 'यन्ति' अनुतिष्ठन्ति ॥

विपक्षे बाधकं दर्शयति—"यानि वै पुरा संवत्सराद्रेतांसि जायन्ते, यानि पञ्चमासानि, यानि षण्मासानि, स्रोष्यन्ति वै तानि न वैतैर्भुञ्जते" इति। संवत्सरधारणात् पुरैव कतिपयमास-धारणेन यानि रेतांसि जायन्ते, पञ्चमाससम्बन्धीनि वा, षण्मास सम्बन्धीनि वा, तानि 'स्रोष्यन्ति वै' स्रवन्त्येव, गर्भस्रावो भवति ; न तु 'तैः' अष्टमासधृतैः रेतोभिः पुत्रादिशरीरं 'भुञ्जते' अनु भवन्ति ॥

शुद्धकथनपूर्वकं स्वपक्षं सुपसंहरति— "अथ यान्येव दशमास्यानि जायन्ते, यानि सांवत्सरिकाणि, तैर्भुञ्जते ; तस्मात् संवत्सर एवैतदहः शंसेत्"- इति । 'अथ' पूर्वोक्तविपरीतेन 'यान्येव' रेतांसि 'दशमास्यानि' दशसु मासेषु धृतानि च भूत्वा पश्चाज्जायन्ते, यानि च संवत्सरे धृतानि, तैः सर्वैः पुत्रादिशरीरं समुभवति । 'तस्मात्' गुणसद्भावात्संवत्सरसत्रे एव तस्मिन्विषुवत्यहनि यद्दीर्णं शस्त्रं शंसेत् ॥

पुनरपि प्रकारान्तरेण प्रशंसति — "संवत्सरो ह्येतदहराप्नोति, संवत्सरं ह्येतदहराप्नुवन्त्येष ह वै संवत्सरेण पाप्मान मप हत एष विषुवताङ्गेभ्यो हैव मासैः पाप्मान मप हते शीर्ष्णो विषुवता"-इति । योऽयं संवत्सरसत्ररूपः कर्मविशेषः, यच्चैतद्विषुवदाख्यं महः ; उभयोः परस्परं सम्प्राप्तिरस्ति ; तत्र 'संवत्सरः' कर्त्ता सन् अहरा-प्नोति, 'अहश्च' कर्त्तृ भूत्वा संवत्सर माप्नोति । व्यत्ययेनात्र बहु-वचनम् । तयोः परस्पर मविनाभावे सति 'एषः' यजमानः स्वक्ष-संवत्सरेण पाप्मानम् 'अपहते' विनाशयति ; तथैव 'एषः' यजमानो 'विषुवता' भवत्सरमध्यगतेनाङ्गा पाप्मानम् विनाशयति । तद्विवि-च्यते,—संवत्सरावयवैर्मासैरहस्तपादाद्यङ्गेभ्यः सकाशात्पापमं नाश-यति, 'विषुवता' मुख्येनाङ्गा 'शीर्ष्णः' शिरसः सकाशात् पाप्मानं नाशयति । वेदनं प्रशंसति — "अप संवत्सरेण पाप्मानं हते ऽप विषुवता य एवं वेद"-इति ॥

अथ प्रशस्तस्य विषुवतः प्रसङ्गाद् बुद्धिस्थे सत्रे महाव्रताख्ये ऽहनि कञ्चित्पशुं विधत्ते— "वैश्वकर्मणं ऋषभं सवनीयस्यो-पालभ्य मालभेरन्, द्विरूप मुभयत एतं महाव्रतीये ऽहनि"-इति । 'वैश्वकर्मणं' विश्वकर्मदेवताकम् 'ऋषभं' पुङ्गवम् 'सवनीयस्य'

चोदकप्राप्तस्य पशोः स्थाने उपालम्भनीयं 'द्विरूपं' वर्णद्वयोपेतम् 'उभयत एतं' दक्षिणोत्तरपार्श्वयोर्विलक्षणवर्णेन लाञ्छितं पशुं महाव्रतप्रयोगयुक्ते सत्रस्योपान्त्येऽह्न्यालभेरन् ॥

तत्र देवतां प्रशंसति – "इन्द्रो वै वृत्रं हत्वा विश्वकर्माभवत्, प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माभवत्, संवत्सरो विश्वकर्मेन्द्र मेव तदात्मानं प्रजापतिं संवत्सरं विश्वकर्माण माप्नुवन्तीन्द्र एव तदात्मनि प्रजापतौ संवत्सरे विश्वकर्मण्यन्ततः प्रति तिष्ठन्ति ; प्रति तिष्ठति य एवं वेद य एवं वेद"–इति*। इन्द्रो वृत्रवधादूर्ध्वं विघ्नकर्तुरभावाद् 'विश्वकर्मा' जगत्पालनरूपकर्मयुक्तोऽभवत् । प्रजापतिश्च 'प्रजाः' सर्वाः 'सृष्ट्वा' उत्पाद्य कृत्स्नजगत्सृष्टिरूपकर्मयुक्तोऽभवत् । स उभयविधो 'विश्वकर्मा' देवः संवत्सरात्मकः । अतः संवत्सरसत्रे द्विरूपपशुालम्भनेन 'तदात्मानं' संवत्सरात्मान मिन्द्र मेव, तथा संवत्सररूपम् 'प्रजापतिम्', इत्युभयविधं 'विश्वकर्माणं' यजमानाः प्राप्नुवन्ति । प्राप्य च 'तदात्मनि' संवत्सरात्मनि 'इन्द्रे', संवत्सररूपे 'प्रजापतौ', द्विविधेऽपि 'विश्वकर्मणि' 'अन्ततः' संव-

* "चतुर्विंश मेतदहः"–इत्यारभ्य (३०४ पृ०) एतदन्ता गवामयनादित्यानामयनाङ्गिरसामयनानां संवत्सरसत्राणां द्वौविधिक्य उक्ताः । कल्पेऽप्येवं 'सत्राणाम्'–इत्यधिकृत्य 'एतावत् सत्रं द्वौ कर्मान्यत्र महाव्रतात्'–इत्यन्तैः (७१.१–८.१३.३०) सत्रसाधारण विधय उक्ताः । ततस्तत्रैव प्रदर्शितैषा यज्ञगाथेति—"प्रायणीयसत्रविंशः सृष्ट्वा ऽभिप्लव एव च । अभिजित् स्वरसामानौ विषुवान् विश्वजित्तथा । छन्दोमा दशमं चाह उक्थं तु मध्यमम् । अहीनैकाहसत्राणां प्रकृतिः समुदाहृता'–इत्यादि. । इत उत्तरं यानि त्रीणि सूत्राण्यभिहितानि, तानि विशेषतः सर्वत्र ज्ञातव्यानि । तत उत्तरं क्रमात् गवामयनादीनां षण्णां विशेषविधय उपदिष्टाः (११.७.१—१२.२.६,) । अत० आ० १२.१–३ । कात्या० श्रौ० १३ अ० । "गावो वा एतत् सत्रं आसत"–इत्यादि तै० सं० ७.५.१ । सामब्राह्मणे चैवं "गावो वा एतत् सत्रं आसत"–इत्यारभ्य प्रपाठकद्वयेन (४,५ प्र०) गवामयनसत्रस्यौक्थ्यं विहितम्, तत उपरिष्टात् (२५प्र०) आदित्यानामयनस्याङ्गिरसामयनस्य च (१,२ख०)॥

स्वरसवत्स्थान्ते प्रतितिष्ठन्त्येव । यः पुनरेवं वेद, सोऽपि प्रतितिष्ठति । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां तृतीयाध्याये
(अष्टादशाध्याये) अष्टमः खण्डः ॥ ८ (२२) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायाः तृतीयोऽध्यायः ॥

"सो ऽकामयत,—कथं नु गायत्रा सर्वतो द्वादशाहं परिभूय सर्वां सृदि सृप्नुया मिति ; तं वै तेजसैव पुरस्तात्पर्यभवच्छन्दोभिर्मध्यतोऽक्षरैरुपरिष्टाद्गायत्रा सर्वतो, द्वादशाहं परिभूय सर्वां सृदि माप्नोत्" इति। 'सः' प्रजापतिः पुनरेव मकामयत,—'कथं नु' केन खलु प्रकारेण, गायत्रा सर्वतो द्वादशाहं व्याप्य, 'सर्वां' भोग्यवस्तुसमृद्धिं प्राप्नुयाम् ? 'इति' विचार्य, गायत्रीं त्रेधा व्यभजत,—ध्वनिरूपं तेज एको भागः, अक्षरसङ्ख्याभिव्यज्यमानं छन्दो द्वितीयो भागः, अक्षराणि तृतीयो भागः ; तैस्त्रिभिर्भागैरादिमध्यावसानेषु सर्वतो द्वादशाहं गायत्रा व्याप्य समृद्धिं प्राप्तवान्। छन्दोभिरिति बहुवचनं पूजार्थम्॥ वेदन प्रशंसति - "सर्वां सृदि सप्नोति य एवं वेद"- इति॥

अथ द्वादशाहमाहात्म्यं सुपर्णाख्यानमुखेन दर्शयति - "गौर्वै गायत्री पक्षिणी चक्षुष्मती, ज्योतिष्मती भास्वती वेद, गायत्रा पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकं मेत्येषा वै गायत्री पक्षिणी चक्षुष्मती ज्योतिष्मती भास्वती, य द्वादशाहस्य यावभिती रात्रिरात्री, तौ पक्षौ ; यावन्तराभिष्टोमौ, स चक्षुषी ; ये ष्टो मध्य उक्थ्याः, स आत्मा" इति। आदिमध्यावसानेषु द्वादशाहस्य गायत्रा व्याप्तत्वात् अभेद मभिप्रेत्य द्वादशाह मेव गायत्रीशब्देन व्यवहरति। सा च गायत्री पक्षद्वयोपेता, चक्षुर्द्वयोपेता, ज्योतिःशब्दोपलक्षितमध्यशरीरोपेता। तत एव सा 'भास्वती' प्रकाशवती ; अक्षोनसवाणां सर्वेषां प्रकृतित्वेन भासकत्वात् भास्वत्त्वम्। ईदृशीं गायत्रीं यो वेद, स तां मनुष्याय यथोक्तगुणवत्त्वविशिष्टया गायत्रा स्वर्गं लोकं प्राप्नोति। गूढाभिप्रायेण रूपकं परिकल्प्य "एषा वै"-इत्यादिना स्वाभिप्रायः

प्रकटीक्रियते । द्वादशाह एव यथोक्तगुणविशिष्टा गायत्री । तस्येत्यादिना द्वादशाहे ते गुणा. प्रदर्श्यन्ते । 'तस्य' द्वादशाहस्य आद्यन्तावहर्विशेषावतिरात्रसंस्थौ, तावेव पक्षस्थानीयौ ; तयोरन्तर्भाविनौ द्वितीयैकादशाहर्विशेषावग्निष्टोमसंस्थौ ; तौ चक्षुःस्वरूपौ ; ये च तृतीय मारभ्य दशमपर्यन्ता अष्टावहर्विशेषा मध्ये वर्त्तन्ते, ते सर्वेऽप्युक्थ्यसंस्था. सोऽष्टाङ्गःसमूह 'आत्मा' मध्यशरीरम् ॥ वेदनं प्रशंसति— 'गायत्रया पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोक मेति य एवं वेद' इति ॥

यथोक्तार्थःकौषीतकिब्राह्मणायनाचार्यैर्देशितो — "अथ भरतद्वादशाह इम मेवैकाहं पृथक् संस्थाभिरुपेयुरतिरात्र मग्रेऽग्निष्टोम मथाष्टा उक्थ्यानथाग्निष्टोम मथातिरात्रम्" इति (कौ० १०. ५.८ १०) ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) प्रथमः खण्डः ॥ १ (१३) ॥

॥ अथ द्वितीयः खण्डः ॥

चयश्च वा एते चाहो आ दशम मह्रा द्वावतिरात्रौ य द्वादशाहो* द्वादशाहानि दीक्षितो भवति यद्धिय

* "यद्द द्वादशाहो"—इति क । एव मिश्रोऽपरोऽपि ।

एव तैर्भवति द्वादश रात्रीरुपसद उपैति शरीर मेव ताभिर्धूनुते द्वादशाहं प्रसुप्तो भूत्वा शरीरं धूत्वा शुचः पूतो देवता अप्येति य एवं वेद षट्त्रिंशदक्षरो वा एष य द्वादशाहः षट्त्रिंशदक्षरा वै बृहती बृहत्या वा एतदयनं य द्वादशाहो बृहत्या वै देवा द्यूमांल्लोकानाप्नुवत ते वै दशभिरेवाक्षरैरिमं लोक माप्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्या मेवास्मिंल्लोके प्रत्यतिष्ठन् प्रति तिष्ठति य एवं वेद तदाहुर्यदन्यानि छन्दांसि वर्षीयांसि भूयोऽक्षरतराण्यथ कस्मादेतां बृहतीत्याचक्षत इत्येतया हि देवा द्यूमांल्लोकानाप्नुवत ते वै दशभिरेवाक्षरैरिमं लोक माप्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्या मेवास्मिंल्लोके प्रत्यतिष्ठंस्तस्मादेतां बृहतीत्याचक्षते ऽश्नुते यदात् कामयते य एवं वेद ॥ २ (२४) ॥

भरतद्वादशाहं विधाय व्यूढद्वादशाहं विधत्ते— "त्रयश्च वा एते भाहा आ दशम महरा द्वावतिरात्री य द्वादशाहः"–इति। योऽयं व्यूढद्वादशाहोऽस्ति, सोऽय मेतादृशः,— तत्राद्यन्तौ यौ 'द्वावतिरात्रौ' प्रथमद्वादशौ, यच्च दशम महः, तत्परित्यज्यावशिष्टे-ष्वहस्सु, नवसङ्ख्याकेषु 'त्रयस्त्र्यहाः' कर्त्तव्याः। विराजः कश्चित् कर्मविशेषः, सोऽयं त्रिवार मावर्त्तनीयः; 'आ दशमम्'–इत्यत्र

योऽयं माकारः, स वर्जनार्थः ; निपातानां अनेकार्थत्वात् । यद्वा मर्य्यादाया अयं माङ् भविष्यति,— आयत्नावतिरात्रौ दक्षय-महस्य मर्य्यादां कृत्वा अवशिष्टो नवरात्रक्षिरावृत्तः तत्रत्याक्त इत्यर्थः ॥

तत्र चोदकेन दीक्षादिसङ्ख्याविकल्पः प्राप्तः ; "एका दीक्षा, तिस्रो दीक्षाः"-इत्यादिविकल्पस्य प्रकृतौ श्रुतत्वात्* । तं विकल्प मपवदितुं नियमविशेषं विधत्ते—"द्वादशाहानि दीक्षितो भवति, यज्ञिय एव तैर्भवति"-इति । द्वादशसु दिनेषु दीक्षाख्यनियमे अनुष्ठिते सति तैर्द्वादशभिः दीक्षाविशेषैरयं पुरुषः यज्ञयोग्य एव भवति † ॥

उपसत्सु विशेषं विधत्ते— "द्वादश रात्रीरुपसद उपैति, शरीर मेव ताभिर्धूनुते"-इति । प्रकृतौ तिस्र एवोपसदः ‡ ; ताश्चैकैका चतुर्षु दिनेषु आवर्त्त्य, द्वादशसु दिनेषु उपसदोऽनुष्ठिते सति 'ताभिः' द्वादशभिरुपसद्भिः शरीर मेव 'धूनुते' अम्मयति, शरीरगतमांसादिधातुशोषणेन पापक्षयो भवति । तथाच सूत्र-कारेणोपसंगृहीतम्— "यदा वै दीक्षितः क्षयो भवति, अथ मेध्यो भवति"-इति । उपसद्दिनेष्वस्य क्षीरमाचाहारत्वात् भवत्येव क्षार्यम्, तदिदं सर्वं धूनुत इत्यनेन विवक्षितम् § ॥

अथ द्वादशसु दिनेषु सोमाभिषवं विधत्ते—"द्वादशार्कं प्रसुतः" —इति । भवेदिति शेषः ॥ दीक्षोपसदावङ्गकर्मणी; अभिष-

---

* "एका तिस्रो वा दीक्षा"-इति आश्व० श्रौ० ४.२.१७.

† "दीक्षणादिविशेषसंस्कारेण दीक्षाः"-इति च आश्व० श्रौ० ४.२.१३।

‡ "तिस्र उपसदः"-इति आश्व० श्रौ० ४.२.१७।

§ "द्वादशाहतापद्विशेषु यथासंख्योपसदः"-इति आश्व० श्रौ० ४.२.१५।

॥ "सूत्र सङ्ग्रहणम्"-इति आश्व० श्रौ० ४.२.१७।

वस्तु प्रधानकर्म । वेदनं प्रशंसति— "भूत्वा, शरीरं धूत्वा, शुद्धः ; पूतो देवता अप्येति य एवं वेद"–इति । 'द्वादशाहं प्रसुतः'–इति पदद्वयं मनुवर्त्तनीयम् । वेदिता द्वादशसु दिनेषु सोमाभिषवयुक्तो भूत्वा पूर्वोक्ताभिरुपसद्भिः 'शरीरं धूत्वा' शरीरगतं पापम् परित्यज्य, अतएव शुद्धः इह लोके भूत्वा, परलोकेऽपि पूतः सर्वदेवताः प्राप्नोति । अथवा शुद्ध इत्यन्तो विधिवाक्यशेषः, पूत इत्यादिका वेदनप्रशंसा द्रष्टव्या ॥

यथोक्तदीक्षोपसत्सुत्यादिनसङ्ख्याः प्रशंसति— "षट्त्रिंशदक्षरो वा एष य द्वादशाहः ; षट्त्रिंशदक्षरा वै बृहती; बृहत्या वा एतदयनं य द्वादशाहो; बृहत्या वै देवा इमांल्लोकानाप्नुवत,—ते वै दशभिरेवाक्षरैरिमं लोकमाप्नुवत, दशभिरन्तरिक्षं, दशभिर्दिवं ,चतुर्भिश्चतस्रो दिशो, द्वाभ्यां मेवास्मिंल्लोके प्रत्यतिष्ठन्"–इति । यो द्वादशाहोऽस्ति, एष पूर्वोक्तरीत्या षट्त्रिंशदक्षरात्मकः ; बृहतीच्छन्दश्च षट्त्रिंशदक्षरम् । तस्माद्यो द्वादशाहोऽस्ति, एतद् बृहत्याः 'अयनम्' अयनस्थान मित्यर्थः । देवाश्च बृहत्या सर्वांल्लोकान् 'आप्नुवत्' प्राप्नुवन् ,—दशभिर्दशभिरक्षरैः प्रत्येक मेवं लोकत्रयप्राप्तिः . चतुर्भिरक्षरैर्दिक्चतुष्टयप्राप्तिः , द्वाभ्यां मक्षराभ्यां मस्मिंल्लोके प्रतिष्ठां प्राप्ताः । तथाविधबृहतीसाम्याद्विगता षट्त्रिंशत्सङ्ख्या प्रशस्ता ॥ वेदनं प्रशंसति—"प्रति तिष्ठति य एवं वेद"–इति ॥

अत्र किञ्चिच्चोद्य मुद्भावयति— "तदाहुर्यदन्यानि छन्दांसि वर्षीयांसि भूयोक्षरतराण्यथ कस्मादेतां बृहतीमाचक्षत इति"–इति । यस्मात् कारणाद् बृहत्याः 'अन्यान्युत्तराणि' पङ्क्तित्रिष्टुब्जगतीच्छन्दांस्युत्तरोत्तरं चतुरक्षराधिकानि, अतो 'वर्षीयांसि',

तस्यैव व्याख्यानं 'भूयोऽक्षरतराणि'-इति। 'अथ' एवं सति पङ्क्त्यादीनि छन्दांस्युपेक्ष्य कस्मात् कारणात् 'एतां' षट्त्रिंशदक्षरमात्रयुतां वैदिकीं बृहतीत्याचक्षते ? इति चोद्यम् ॥

पूर्वोक्त मेवार्थवाद मुपजीव्य परिहार माह—"एतया हि देवा इमांल्लोकानाप्नुवत,—ते वै दशभिरेवाक्षरैरिमं लोक माप्नुवत, दशभिरन्तरिक्षं, दशभिर्दिवं, चतुर्भिश्चतस्रो दिशो, द्वाभ्या मेवास्मिंल्लोके प्रत्यतिष्ठंस्तस्मादेतां बृहतीत्याचक्षते"-इति। अक्षरसङ्ख्यान्यूनत्वेऽपि लोकत्रयप्राप्तिहेतुत्वात्प्राधान्य मभिप्रेत्य बृहतीत्यभिधानम् ॥ उक्तार्थवेदनं प्रशंसति—"अश्नुते यद्यत्कामयते य एवं वेद"-इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) द्वितीयः खण्डः ॥ २ (२४) ॥

॥ अथ तृतीयः खण्डः ॥

प्रजापतियज्ञो वा एष य द्वादशाहः * प्रजापतिर्वा एतेनाग्रे ऽयजत द्वादशाहेन सो ऽब्रवीदृतूंश्च मासांश्च याजयत मा द्वादशाहेनेति तं दीक्षयित्वा ऽनपक्रमं गमयित्वाब्रुवन् देहि नु नो ऽथ त्वा याज-

* "यद द्वादशाहः" क। इदं खण्डं एव मीदृशमपि सर्वत्र।

यिष्याम इति तेभ्य इष मूर्जं प्रायच्छत्तैषोर्गृतुषु च मासेषु च निहिता ददतं वै ते त मयाजयंस्तस्माद् ददद्याज्यः प्रतिगृह्णन्तो वै ते त मयाजयंस्तस्मात्प्रतिगृह्णता याज्य मुभये राध्नुवन्ति य एवं विद्वांसो यजन्ते च याजयन्ति च ते वा इम ऋतवश्च मासाश्च गुरव इवामन्यन्त द्वादशाहे मतिरेच्छा ते ऽब्रुवन् प्रजापतिं याजय नो द्वादशाहेनेति स तथेत्यब्रवीत्ते वै दीक्षध्व मिति ते पूर्वपक्षाः पूर्वे ऽदीक्षन्त ते पाप्मान मपाहत तस्मात्ते दिवेव दिवेव ह्यपहतपाप्मानो ऽपरपक्षा अपरे ऽदीक्षन्त ते न तरां पाप्मान मपाहत तस्मात्ते तम इव तम इव ह्यनपहतपाप्मान स्तस्मादेवं विद्वान् दीक्षमाणेषु पूर्वः पूर्व एव दिदीक्षिषेताप पाप्मानं हते य एवं वेद स वा अयं प्रजापतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत् ते वा इम ऋतवश्च मासाश्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठंस्त एते ऽन्योऽन्यस्मिन् प्रतिष्ठिता एवं ह वाव स ऋत्विजि प्रति तिष्ठति यो द्वादशाहेन यजते तस्मादाहुर्न पापः पुरुषो याज्यो द्वादशाहेन मेदृयं मयि प्रति तिष्ठादिति ज्येष्ठयज्ञो वा एष य द्वादशाहः स वै देवानां ज्येष्ठो य एतेनाग्रे ऽयजत

श्रेष्ठयज्ञो वा एष य द्वादशाहः स वै देवानां श्रेष्ठो य एतेनाग्रे ऽयजत ज्येष्ठः श्रेष्ठो यजेत कल्या-णीह समा भवति न पापः पुरुषो याज्यो द्वादशा-हेन नेदयं मयि प्रति तिष्ठादितीन्द्राय वै देवा ज्यैष्ठ्याय श्रैष्ठ्याय नातिष्ठन्त सोऽब्रवीद् बृहस्पतिं याजय मा द्वादशाहेनेति तं मयाजयत् ततो वै तौ देवा ज्यैष्ठ्याय श्रैष्ठ्यायातिष्ठन्त तिष्ठते ऽग्नौ स्वा ज्यैष्ठ्याय श्रैष्ठ्याय स यस्मिन्नस्वा श्रेष्ठतायां जानते य एवं वेदोर्ङ्वो वै प्रथमस्त्र्यङ्मध्यमो ऽर्वाङुत्तमः स यदूर्ङ् प्रथमस्त्र्यङ्तस्मादय मग्निरूर्ङ् उह्यीयत ऊर्ङ्ङा ह्येतस्य दिग् यत्तिर्यङ् मध्यमस्तस्मादयं वायु-स्तिर्यङ् पवते तिरश्चीरापो वहन्ति तिरश्ची ह्येतस्य दिग्यदर्वाङुत्तमस्तस्मादसावर्वाङ् तपत्यर्वाङ् वर्षत्य-र्वाञ्चि नक्षत्राण्यर्वाची ह्येतस्य दिक् सम्यञ्चो वा इमे लोकाः सम्यञ्च एते चाराः सम्यञ्चो ऽस्मा इमे लोकाः श्रियै दीव्यति य एवं वेद ॥ ३ (२५) ॥

अस्मिन् कर्मणि यजनयाजनयोरधिकारिविशेषौ दर्शयति—"प्रजापतियज्ञो वा एष य द्वादशाहः ; प्रजापतिर्वा एतेनाग्रे ऽयजत द्वादशाहेन ; सोऽब्रवीदनूध मामिति,—याजयत मां द्वाद-शाहेनेति ; तं दीक्षयित्वानपक्रमं गमयित्वाहुवन्,—देहि नु नोऽय

त्वा याजयिष्याम इति ; तेभ्य इषमूर्जं प्रायच्छत् ; सैषोर्गृतुषु च मासेषु च निहिता ; ददतं वै ते त मयाजयंस्तस्माद्दद्याज्यः ; प्रतिगृह्णन्तो वै ते त मयाजयंस्तस्मात् प्रतिगृह्णता याज्यम्"—इति । यो द्वादशाहः, स प्रजापतेर्यज्ञः । कथ मिति, तदुच्यते—प्रजापतिरेव 'अग्रे' सर्वेभ्यः पूर्वं मेतेन द्वादशाहेनायजत, तस्मादयं प्रजापतियज्ञ इति । तद्यजनप्रकार उच्यते—'सः' प्रजापतिः वसन्ताद्यृतुदेवांश्चैत्रादिमासदेवांश्चाब्रवीत्। हे देवाः ! यूय ऋत्विजो भूत्वा मां द्वादशाहक्रतुना याजयतेति । ते च मासर्त्तुदेवा ऋत्विजो भूत्वा 'तं' प्रजापतिं दीक्षयित्वा, तत्राध्वानम् 'अनपक्रमं' निर्गमनरहितं गमयित्वाभुवन् । न हि यज्ञं सङ्कल्प्य दीक्षां कृत्वा तदनुष्ठान मन्तरेण देवयजनदेशान्निर्गन्तुं शक्यते । हे प्रजाप्यते ! 'नु' क्षिप्र मेव 'नः' अस्माकं 'देहि' अपेक्षितं प्रयच्छ, 'अथ' अनन्तरं त्वां याजयिष्याम इति । ऋतुभिर्मासैश्चोक्तः प्रजापतिः 'तेभ्यः' ऋतुभ्यो मासेभ्यश्च 'इषम्' अन्नम् 'ऊर्जं' क्षीरादिरसं प्रायच्छत् । सैषा 'ऊर्ग्' रसरूपा ऋतुषु च मासेषु चेदानी मपि 'निहिता' स्वस्वकालोचितप्रकारेण ऋतुषु मासेषु च प्रवर्त्तमानेषु गोक्षीरादेश्च बाहुल्यं भवति । ततो ऽन्नपाने 'ददतं तम्' प्रजापतिं 'ते' ऋतवश्च मासाश्च अयाजयन् । तस्माद् 'ददद्' पुरुषो याज्यो यस्तु योग्यः ; न हि दानहीनस्याधिकारोऽस्ति । तथा 'ते' मासाश्चर्त्तवश्च 'प्रतिगृह्णन्तो वै' प्रजापतिदत्ते अन्नपाने स्वीकुर्वन्तः सन्तः प्रजापति मयाजयन् । तस्मादिदानी मपि ऋत्विजा दक्षिणां प्रतिगृह्णता 'याज्यम्' यजनं कर्त्तव्यम् ॥ यजमानाना मृत्विजां च वेदनं प्रशंसति—"उभये राध्नुवन्ति य एवं विद्वांसो यजन्ते च याजयन्ति च"—इति ॥

द्वादशाहे दीक्षां प्राप्नुवत्सु यजमानेषु दीक्षाप्राप्तिं प्रशंसति—"ते वा इमे ऋतवश्च मासाश्च गुरव इवामन्यन्त द्वादशाहे प्रतिगृह्य; तेऽब्रुवन् प्रजापतिं याजय नो द्वादशाहेनेति; स तथेत्यब्रवीत्; ते वै दीक्षध्वमिति; ते पूर्वपक्षाः पूर्वे ऽदीक्षन्त; ते पाप्मान मपाहत, तस्मात् ते दिवेव,— दिवेव ह्यपहतपाप्मानो; ऽपरपक्षा अपरे ऽदीक्षन्त; ते न तरां पाप्मान मपाहत। तस्मात्ते तम इव, —तम इव ह्यनपहतपाप्मानस्तस्मादेवं विद्वान् दीक्षमाणेषु पूर्वः पूर्व एव दिदीक्षिषेत"-इति। ये पूर्वं सृष्टिक्रमेण व्यवस्थिताः 'ऋतवश्च मासाश्च ते वा इमे' अपि द्वादशाहे दक्षिणां प्रतिगृह्य 'गुरवः इव' पापभारगौरवेणाक्रान्ता एव वयं मित्यमन्यन्त। ततस्ते पापपरिहाराय 'द्वादशाहेन' क्रतुना 'नः' अस्मान् याजयेति प्रजापतिं मब्रुवन्। प्रजापतिरङ्गीकृत्य ते यूयं दीक्षां कुरुध्वं मित्यब्रवीत्। तेषु मासेषु 'पूर्वपक्षाः' शुक्लपक्षाभिमानिनो देवा ये सन्ति, ते 'पूर्वे' प्रथमभाविनः सन्तो दीक्षां मकुर्वत। तादृशाः 'ते' पूर्वपक्षाः स्वकीयं पाप्मानम् 'अपहत' नाशितवन्तः। 'तस्मात्' पापराहित्यात् 'ते' शुक्लपक्षाः 'दिवा इव' दिवसा इव प्रकाशयुक्ताः। लोकेऽपि 'अपहतपाप्मानः' पुरुषाः 'दिवेव हि' दिवसा इव, पुण्यरूपेण तेजसा युक्ता भवन्ति। अथ 'अपरपक्षाः' कृष्णपक्षाभिमानिनो देवा ये सन्ति, ते तु 'अपरे' पश्चात् प्रवर्त्तमाना दीक्षां ऋतवन्तः। ते मालिन्यदोषेण पाप्मानं 'न तरां मपाहत' अतिशयेन विनाशं न कृतवन्तः। 'तस्मात्' कृत्स्नपापविनाशाभावात् 'ते' कृष्णपक्षाः 'तम इव' कृष्णवर्णा इवन्ते; तदीयरात्रिषु चन्द्रप्रकाशस्याभावात्। लोकेऽपि 'अनपहतपाप्मानः' पापविनाशरहिताः पुरुषाः 'तम इव हि' पापरूपान्धकारश्लिष्टत्वेन निष्प्रा

भवन्ति । 'तस्मात्' कारणादेव पूर्वापरकालवैषम्यं 'विद्वान्' पुरुषो 'दीक्षमाणेषु' यजमानेषु एकैकस्मात् 'पूर्वः पूर्व एव' पूर्वपक्षे 'दिदीक्षिषेत' दीक्षितु मिच्छेत् ॥ वेदनं प्रशंसति— "अप पापानं हते य एवं वेद"–इति ॥

यजमानपापविनाशहेतुत्वादृत्विजं प्रशंसति— 'स वा अयं प्रजापतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत्; ते वा इम ऋतवश्च मासाश्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठंस्त एतेऽन्योऽन्यस्मिन् प्रतिष्ठिता; एवं ह वाव स ऋत्विजि प्रति तिष्ठति यो द्वादशाहेन यजते; तस्मादार्तुर्न पापः पुरुषो याज्यो द्वादशाहेन,—नेदयं मयि प्रति तिष्ठादिति"–इति । यः प्रजापतिः द्वादशाहेनायष्ट, 'स प्रजापतिः' संवत्सरकालात्मको भूत्वा ऋतुषु च मासेषु च 'प्रत्यतिष्ठत्' प्रतिष्ठितो ऽभवत्; तदार्त्विज्यबलात् प्रजापतेरुत्कर्षत्वात् । 'ते वै इमे' ऋतवश्च मासाश्च प्रजापतिरूपे संवत्सरे प्रतिष्ठिता अभवन्; प्रजापतिप्रसादेन तत्पापविनाशात् । 'त एते' प्रजापतिः ऋतवो मासाश्च अन्योन्यपापविनाशात् अन्योन्यस्मिन् प्रतिष्ठिताः । एव मेवेदानी मपि यो द्वादशाहेन यजते, सोऽय ऋत्विजि प्रतितिष्ठति; ऋत्विक्प्रसादेन यजमानस्य पापविनाशात् । यस्मादेवं 'तस्मात्' अभिज्ञा एव माहुः,— "पापपुरुषो द्वादशाहेन ऋत्विग्भिर्न याज्यः" तस्य कर्मणि आर्त्विज्यं न कार्य्य मिति । 'अयं' पापो 'मयि' ऋत्विजि 'न प्रतितिष्ठात्' सर्वथा मा मां प्रविशत्वेव मभिजानामीत्यभिप्रायः ॥

द्वादशाहं प्रकारान्तरेण प्रशंसति—"ज्येष्ठयज्ञो वा एष य द्वादशाहः,— स वै देवानां ज्येष्ठो य एतेनाग्ने ऽयजत; श्रेष्ठयज्ञो वा एष य द्वादशाहः,— स वै देवानां श्रेष्ठो य एतेनाग्ने ऽयजत"–

इति । यो द्वादशाहोऽस्ति, असौ ज्येष्ठस्य यज्ञः । अथ मिति, तदुच्यते— यः पुमान् 'एतेन' द्वादशाहेन 'अग्रे' प्रथमम् अयजत, स एव देवतानां मध्ये 'ज्येष्ठः' वयसा प्रवृद्धो भवति । किञ्चायं द्वादशाहः श्रेष्ठस्य यज्ञः ; य एतेन प्रथम मयजत, स देवेषु मध्ये गुणतः श्रेष्ठो भवति ॥

एतां द्वादशाहप्रशंसां सुपजीव्य अधिकारिविशेषं दर्शयति— "ज्येष्ठः श्रेष्ठो यजेत,— कल्याणीश्च समा भवति ; न पापः पुरुषो याज्यो द्वादशाहेन,— नैदयं मयि प्रति तिष्ठादिति"-इति । यः पुमान् भ्रातृणां मध्ये वयसा ज्येष्ठो गुणैः श्रेष्ठश्च, तादृशोऽनेन यजेत । यस्मिन् देशे तथाविधकर्तृको यागः, 'इह' अस्मिन् देशे 'समा कल्याणी भवति' संवत्सरः सर्वोपद्रवरहितः सुखकरो भवति । यस्मात् पापस्य ज्येष्ठस्य चाधिकारः, तस्मात्पापः कनिष्ठो गुणहीनश्च पुरुषो न तेन याजनीयः । 'मयि' यत्सिञ्चि 'अयं' पापो नैव प्रतितिष्ठत्विति तस्यर्त्विजोऽभिप्रायः ॥

प्रकारान्तरेण द्वादशाहं ज्येष्ठ्यश्रैष्ठ्यहेतुतया प्रशंसति— "इन्द्राय वै देवा ज्येष्ठ्याय श्रैष्ठ्याय नातिष्ठन्त ; सोऽब्रवीद् इन्द्रस्तिं याजय मा द्वादशाहेनेति, त मयाजयन्ततो वै तस्मै देवा ज्येष्ठ्याय श्रैष्ठ्यायातिष्ठन्त"-इति । इन्द्रस्य वयसा ज्येष्ठत्वं गुणैः श्रेष्ठत्वं च देवा नाङ्गीकृतवन्तः ; ततः सोऽङ्गीकारो द्वादशाहेन लब्धः ॥ वेदनं प्रशंसति—"तिष्ठन्ते ऽस्मै स्वा ज्येष्ठाय श्रैष्ठाय, स मस्मिन्स्वा श्रेष्ठतायां जानते य एवं वेद"-इति । 'अस्मै' अस्य वेदितुः 'स्वाः' ज्ञातय. 'ज्येष्ठाय श्रैष्ठाय तिष्ठन्ते' ज्यैष्ठं श्रैष्ठं चाङ्गीकुर्वन्ति । किञ्च 'अस्मिन्' वेदितरि येयं श्रेष्ठता, तस्यां ज्ञातयः 'सञ्जानते' ऐकमत्यं प्राप्नुवन्ति ॥

व्यूढे द्वादशाहे प्रथमदशद्वादशदिनव्यतिरिक्तो यो नवरात्रस्तत्र ये त्रयस्त्र्यहाः पूर्वं मुक्ताः (१७०पृ०), तान् प्रशंसति—"ऊर्ङ्ङ् वै प्रथमस्त्र्यहस्तिर्यङ् मध्यमो ऽर्वाङुत्तमः ; स यदूर्ङ् प्रथमस्त्र्यहस्तस्मादयं मग्निरूर्ङ् उदीयते,—ऊर्ङ् श्वेतस्य दिग् ; यत्तिर्यङ् मध्यमस्तस्मादयं वायुस्तिर्यङ् पवते,— तिरश्चिखो वहन्ति ; तिरश्ची श्वेतस्य दिग् ; यदर्वाङुत्तमस्तस्मादसावर्वाङ् तपत्यर्वाङ् वर्षत्यर्वाञ्चि नक्षत्राण्यर्वाची श्वेतस्य दिक् ; सम्यञ्चो वा इमे लोकाः, सम्यञ्च एते त्र्यहाः"-इति। योऽयं नवरात्रे प्रथमस्त्र्यहः, सोऽयम् 'ऊर्ङ्ङ् वै' आरोहप्रकार एव। तद्यथा— गायत्रं प्रातस्सवनं, त्रैष्टुभं माध्यन्दिनसवनं, जागतं तृतीयसवन मित्ययं स्वभावसिद्धः क्रमः ; तस्य व्यत्यासभावादूर्ङ् इत्युच्यते। यस्तु मध्यमस्त्र्यहः, सोऽयं 'तिर्यङ्' वर्त्तते। तद्यथा— जागतं प्रातस्सवनं, गायत्रं माध्यन्दिनं, त्रैष्टुभं तृतीय मित्यत्र नात्यन्त मनुक्रमो नाप्यत्यन्तं व्युत्क्रमः ; तस्मादयं तिर्यङ्। य उत्तमस्त्र्यहः, 'सः' 'अर्वाङ्' अधोमुखः। तद्यथा — त्रैष्टुभं प्रातस्सवनं, जागतं माध्यन्दिनं, गायत्रं तृतीयसवन मित्येतदर्वाक्त्वम्। प्रथमो जागतान्तो द्वितीयस्त्रैष्टुभान्तस्तृतीयो गायत्रान्त इत्येवम् ऊर्ङ्तिर्यङ्ग्रार्वाक्त्वानि त्रिष्वपि त्र्यहेषु द्रष्टव्यानि। यस्मात् 'सः' प्रथमस्त्र्यह ऊर्ङ् स्तस्मात्तदात्मकोऽयं मग्निरूर्ङ्भिमुखो दीप्यते। 'एतस्य' चाग्नेः ऊर्ङ्ङ् दिक् प्रिया। मध्यमस्य त्र्यहस्य तिर्यङ्त्वात् तद्रूपो वायुस्तिर्यङ् वर्त्तते,— वायुना हि प्रेरिता आपः 'तिरश्चिखः' तिर्यग्भूताः प्रवहन्ति। 'एतस्य' वायोस्तिर्यङ्त्वात् तिरश्ची दिक् प्रिया। उत्तमस्य त्र्यहस्यार्वाङ्त्वात्तद्रूपः 'असौ' आदित्योऽधोमुखस्तपति,— आदित्यप्रेरितः पर्जन्योऽधोमुखो वर्षति,— आदित्यवन्नक्षत्राण्यपि

'अर्वाञ्चि' अधोमुखानि प्रकाशन्ते । 'एतस्य' आदित्यस्य अर्वाची दिक् प्रिया । किञ्च इमे त्रयो लोकास्तत्सहासिनां सुखहेतुत्वात् 'सम्यञ्चः' ; एते च त्रयाः लोकत्रयसाम्येनानुष्टातॄणां सुखहेतुत्वात् सम्यञ्चः ॥ वेदनं प्रशंसति— "सम्यञ्चोऽस्मा इमे लोकाः प्रियं दीयति य एवं वेद"–इति ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) तृतीयः खण्डः ॥ ३ (२५) ॥

॥ अथ चतुर्थः खण्डः ॥

दीक्षा वै देवेभ्योऽपाक्रामत् तां वासन्तिकाभ्यां मासाभ्यां मन्वयुञ्जत तां वासन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हैमन्तिकाभ्यां मासाभ्यां मन्वयुञ्जत तां हैमन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां शैशिराभ्यां मासाभ्यां मन्वयुञ्जत तां शैशिराभ्यां मासाभ्यां माप्नुवन्नाप्नोति य मीप्सति नैनं द्विषन्नाप्नोति य एवं वेद तस्माद्यां कस्यां दीक्षोपनमेदेतयोरेव शैशिरयो-

र्मासयोरागतयोर्दीक्षेत साक्षादेव तद्दीक्षाया मागतायां दीक्षते प्रत्यक्षादीक्षां परिगृह्णाति तस्मादेतयोरेव शैशिरयोर्मासयोरागतयोर्यै चैव ग्राम्याः पशवो ये चारण्या ऋषिमाण मेव तत्परुषिमाणं नियन्ति दीक्षारूप मेव तदुप निम्नवन्ते स पुरस्ताद्दीक्षायाः प्राजापत्यं पशु मालभते तस्य सप्तदश सामिधेनीरनुब्रूयात् सप्तदशो वै प्रजापतिः प्रजापतेराप्नो तस्याप्रियो जामदग्नो भवन्ति तदाहुर्यदन्येषु पशुषु यथर्क्ष्याप्रियो भवत्यथ कस्मादस्यान्त्यर्वषां जामदग्न्य एवेति सर्वरूपा वै जामदग्न्याः सर्वसमृद्धाः सर्वरूप एष पशुः सर्वसमृद्धस्तद्यज्जामदग्नो भवन्ति सर्वरूपतायै सर्वसमृद्ध्यै तस्य वायव्यः पशुपुरोळाशो भवति तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्माद्वायव्यः पशुपुरोळाशः क्रियत इति प्रजापतिर्वै यज्ञो यज्ञस्यायातयामतायै इति ब्रूयाद्यदु वायव्यस्तेन प्रजापतेर्नैति वायुर्वै खलु प्रजापतिस्तदुक्तमृषिणा पवमानः प्रजापतिरिति सत्र मु चैत्स न्युप्याग्नीन् यजेरन्त्सर्वे दीक्षेरन्त्सर्वे सुनुयुर्वसन्त मभ्युदवस्यन्त्यूर्ग् वै वसन्त ऊर्ज मेव तदूर्ज मभ्युदवस्यति ॥ ४ (२६) ॥

अथ द्वादशाहे दीक्षायाः कालविशेषं विधातुं प्रस्तौति—"दीक्षा वै देवेभ्यो ऽपाक्रामत; तां वासन्तिकाभ्यां मासाभ्यां मन्वयुञ्जत, तां वासन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हैमन्तिकाभ्यां मासाभ्यां मन्वयुञ्जत, तां हैमन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां शैशिराभ्यां मासाभ्यां मन्वयुञ्जत, तां शैशिराभ्यां मासाभ्यां माप्नुवन्"—इति। पुरा कदाचित् 'दीक्षा' स्त्रीमूर्त्तिरूपा सती देवेभ्यपरक्ता, तेभ्यो देवेभ्यो निर्गता। देवाश्च 'वासन्तिकाभ्यां' चैत्रवैशाखमासाभ्यां 'तां' दीक्षाम् 'अनु'गम्य 'अयुञ्जत' तद्युक्ता भवाम इत्येव मपेक्षितवन्तः। ततस्त्वरया गच्छतीति 'तां' दीक्षां ताभ्यां मासाभ्यां मुत्कर्षेण 'न आप्नुवन्' नाशक्नुवन्। एवं ग्रैष्म—वार्षिक—शारदेषु मासेषु यथायोगं पदान्यध्याहृत्य व्याख्येयम्। अध्याहारविधां दर्शयितु मेव हैमन्तिके पर्य्याये सम्पूर्णं वाक्य मान्नातम्। यथोक्तपक्षर्त्तुगतैर्मासैस्तत्प्राप्त्यभावेऽपि शैशिरमासाभ्यां तत्प्राप्तिर्जाता॥ वेदनं प्रशंसति—"आप्नोति य मीप्सति; नैनं द्विषन्नाप्नोति य एवं वेद"—इति। वेदिता पुरुषः 'यं' कामं मापु मिच्छति, त माप्नोति; किञ्च 'एनं' वेदितारं 'द्विषन्' वैरी न प्राप्नोति॥

इदानीं कालं विधत्ते—"तस्माद्य' सचिवा दीक्षोपनमनेदेतयोरेव शैशिरयोर्मासयोरागमनयोर्दीक्षित; साक्षादेव तद्दीक्षाया मागतायां दीक्षते,— प्रत्यक्षादीक्षां परिगृह्णाति; तस्मादेतयोरेव शैशिरयोर्मासयोरागमनयोर्यै चैव ग्राम्याः पशवो ये चारण्या अधिमाश मेव तत्परिमाणं नियन्ति, दीक्षारूप मेव तदुप निधत्ते"—इति। यस्मात् शैशिराभ्यां मासाभ्यां देवानां दीक्षाप्राप्तिः,

'तस्माद्' 'यं' पुरुषं हादशाहादिसत्रसम्बन्धिनी दीक्षा प्राप्नुयात्, दीक्षां तत्र करिष्यामीति * यस्येच्छा जायते, स पुमान् 'एतयोरेव' शिशिरसम्बन्धि-माघफाल्गुनयोर्मासयोः प्राप्तयोः सतोः दीक्षां कुर्य्यात्। तथा सति दीक्षायां साक्षादेवागतायां बलात्कार मन्तरेण स्वप्रिये काले स्वय मेव 'समागतायां' सत्या मयं दीक्षितो भवति। अतः 'प्रत्यक्षात्' प्रत्यक्षेण दृश्यमाना मिव 'मुख्यां दीक्षां परिगृह्णाति। यस्मादुक्तमासद्वयागमे दीक्षा, 'तस्मात्' तयोर्मासयोरागतयोः सतोः 'ग्राम्याः' गवादिपशवः, 'आरण्याः' द्विकरादिपशवश्च 'अभिमाणं' क्षयत्वं 'पुरुषिमाणं' पारुं च 'नियन्ति' नितरां प्राप्नुवन्ति। वर्षाशरद्धेमन्तेषु ऋतुषु सन्तापराहित्यात्सर्वत्र हरितदृणं भक्षयित्वा पशवः पुष्टाङ्गाः स्निग्धावभासन्ते; शैशिरे तु ऋतौ दृणस्य शीर्षोपक्रमात्सम्पूर्णभक्षणाभावेन पशवः क्षीणा भवन्ति; अतएवास्थिदर्शनात् पुरुषा दृश्यन्ते। एतच्च युक्त मेव। 'तत्' तस्मिन् शिशिरर्त्तौ दीक्षारूप मेवोपेत्य नितरां 'ह्रवन्ते' सञ्चरन्ति। दीक्षितो नियमविशेषैः पीडितः क्षयः पुरुषश्च भवति, अतः पशूनां क्षयत्वं पारुष्यञ्च दीक्षाकाललिङ्गम्॥

दीक्षार्थिनः कञ्चित्पशुं विधत्ते—"स पुरस्ताद्दीक्षायाः प्राजापत्यं पशु मालभते"—इति। यो दीक्षां वाञ्छति, 'सः' पुमान् दीक्षोपक्रमात् पुरा प्रजापतिदेवताकं पशु मालभेत †। द्विविधो हि

* "गमिष्यामीति" ग।

† "अथ सप्तदश प्राजापत्यान् पशूनालभते। ते वै सर्वे तूपरा भवन्ति, सर्वे श्यामाः, सर्वे शुक्लराः ०—०तूपरो ऽविधाय:०—०र्वै वै श्यामस्य रूपे शुक्लं चैव लोम क्षयं च०—० प्रजनयति वै शुक्लः"—इत्यादि शत० ब्रा० ५.१.१.७-१०। "प्राजापत्यो वा अश्वः"—इति च शत० ब्रा० ६.५.१.१; तै० ब्रा० २.७.१.३; म० सं० ११.१८। वा० सं० २४ अ०।

दाहरणाद्,— साग्निचित्यो निरग्निचित्यश्च * ; तत्राग्निचित्यपशुते पशुत्व भवगन्तव्यः ॥

सामिधेनीषु चोदकप्राप्तं † पाञ्चदश्य मपवदितुं विशेषं विधत्ते— "तस्य सप्तदश सामिधेनीरनुब्रूयात्, — सप्तदशो वै प्रजापतिः, प्रजापतेरात्म्यै"–इति । इयोर्धाप्ययोः ‡ प्रकृतेषु सप्तदशसङ्ख्या सम्बध्यते । सप्तदशत्वं "द्वादशमासाः"–इत्यादिना पूर्व मेवोक्तम् (१भा०१३पृ०) । अतः सप्तदशसङ्ख्या प्रजापतेः प्राप्तेः सम्बध्यते ॥

आग्नेयाज्यासु विशेषं विधत्ते— "तस्याग्नेयो जामदग्न्यो भवन्ति"–इति । पशोः प्राप्तिहेतुत्वात्प्रयाजा आग्नेया इत्युच्यते § । तदत्र जमदग्निना दृष्टाः "समिधो अद्य मनुषः"–इत्यादिसूक्ते समाम्नाताः (मं० १०.११०.१–११.) द्रष्टव्याः ॥ ॥

अत्र चोद्य मुद्भावयति —"तदाहुर्यदन्येषु पशुषु यथर्क्षाग्नेयो भवत्यथ कस्मादग्निन्तर्वेषां जामदग्न्य एवेति"–इति । तत्र-प्राजापत्यपशुव्यतिरिक्तेषु सर्वेषु पशुषु 'आग्नेयो यथर्क्षि भवति' यस्य यजमानस्य गोत्रप्रवर्त्तको य ऋषिर्भवति, त मनतिक्रम्य तेन दृष्टा एवाग्नेयो भवन्ति । एवं सत्यत्रापि जमदग्निगोत्र-जाना मेव "समिधो अद्य"–इत्याग्नेयो ऋचो युक्ताः, न त्वन्येषाम् । अत्रैवं सति 'कस्मात्' कारणात् 'अस्मिन्' पशौ 'सर्वेषां' जमदग्नि-गोत्रजाना मन्येषां चैता एवाग्नेयाः क्रियन्ते ? इति चोद्यम् ॥

---

* "साग्निचित्यो निरग्निचित्यश्च"–इति आप० श्रौ० २२.१०.३१ । "सर्वस्मिन् स महात्रत: संवत्सरशीव."–इत्यादि च १.४५ । आप० श्रौ० ४.१.२१ , ८.२० ; १०.१० ।

†, ‡ १भा० २३४० ०– ॥ टीप्पण्यौ द्रष्टव्याः ।

§ १भा० २४०,२६१०, ० टीप्पणी च द्रष्टव्या ।

॥ लिङ्ग० ८. २. २—८. ३. ६ द्रष्टव्याः ।

तस्योत्तर माह—"सर्वरूपा वै जामदग्न्याः सर्वसमृद्धाः सर्वरूप एष पशुः सर्वसमृद्धस्तद्यज्जामदग्न्यो भवन्ति सर्वरूपतायै सर्वसमृद्ध्यै"—इति। जमदग्निना दृष्टा ऋचः 'सर्वरूपा वै' सर्वासा ऋचां स्वरूपभूता एव, 'सर्वसमृद्धाः' सर्वसमृद्धिफलहेतुत्वात्। 'एषः' प्रजापतिदेवताकः पशुरपि 'सर्वरूपः' प्रजापतेः सर्वदेवतात्मकत्वेन तदीयपशोरपि सर्वपशुात्मकत्वम्; अतोऽयं पशुरपि सर्वफलसमृद्धि-हेतुत्वात् सर्वैः फलैः समृद्धः। 'तत्' तथा सति यज्जामदग्न्याना मनुष्ठानं, तत्सर्वानुष्ठानसिद्ध्यर्थं सर्वफलसमृद्ध्यर्थं च भवति॥

पशुबन्धे पशुपुरोडाशे विशेषं विधत्ते—"तस्य वायव्यः पशुपुरो-डाशो भवति"—इति। 'तस्य' प्राजापत्यस्य पशोः। वायुर्देवता यस्य पुरोडाशस्य सोऽयं 'वायव्यः'॥

अत्र चोद्य मुद्भावयति—"तदाहुर्यदन्यदेवत्य उत पशुर्भव-त्यथ कस्मादायव्यः पशुपुरोडाशः क्रियत इति"—इति। 'यद्' यस्मात्कारणात् 'अन्यदेवत्य उत' वायुव्यतिरिक्त-प्रजापतिदेवताक एवायं पशुर्भवति, तस्मात् पुरोडाशोऽपि प्रजापतिदेवताक एव युक्तः; "यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः"—इत्यभिधानात्। अथैवं सति प्रजापतिं परित्यज्य 'कस्मात्' कारणात् पुरोडाशो वायुदेवताकः क्रियते? इति चोद्यम्॥

तस्योत्तर माह—"प्रजापतिर्वै यज्ञो, यज्ञस्यायातयामतायै इति ब्रूयाद्; यद् वायव्यस्तेन प्रजापतेर्नैति; वायुर्ह्येव प्रजापतिः" —इति। पशुरूपस्य यज्ञस्य प्रजापतिदेवातात्मकत्वेन प्रजापति-रूपत्वम्; तादृशस्यास्य यज्ञस्य पशुर्हविषि पुरोडाशे तद्देवतैक्ये सति 'यातयामत्वम्' असारत्व मालस्यकारणं भवेत्— सति हि भेदे भिन्नदेवताकं कर्म आलस्यरहितं भवति; तस्माद् 'अयातयाम-

कार्यं निस्सारत्वरूपावस्थपरिहाराय देवतान्तरं युक्तम् 'इति' उक्तार्थं ब्रूयात् । न च वायुदेवताकत्वे प्रजापतेः सकाशात्पुरोडाशोऽप्यगच्छतीति शङ्कनीयम् ; वायुप्रजापत्योः कार्यकारणभावेनैक्ये सति वायव्यस्येव प्राजापत्यत्वात् । तदिदमुच्यते—'यदु वायव्यस्येन प्रजापतेर्नेति"—इति । नापगच्छतीत्यर्थः ॥

वायुप्रजापत्योरैक्यं मन्त्रसंवादेन दृढयति—"तदुक्तं ऋषिणा—पवमानः प्रजापतिरिति"—इति । "त्वष्टार मग्रजां गोपाम्"—इत्यस्या ऋचः चतुर्थपादे यः 'पवमानः' वायुः, स प्रजापतिरिति तादात्म्यं सामानाधिकरण्येन दर्शितम् * ॥

पूर्वं भरतद्वादशाहो व्यूढद्वादशाहश्चेति द्वौ भेदावुक्तौ ; प्रकारान्तरेणापि सत्त्वरूपो ऽहीनरूपश्चेत्येवं द्विविधो द्वादशाहः । तत्र सत्त्वपक्षे विशेषान्विधत्ते—"सत्र सु चेत्सं न्युप्याग्नीन्यजेरन्सर्वे दीक्षेरन्सर्वे सुनुयुर्वसन्त मभ्युदवस्यतूर्ग् वै वसन्त ऋष मेव तदूर्ज मभ्युदवस्यति"—इति । 'सत्र सु चेत्' यद्ययं द्वादशाहः सत्त्वरूपो भवेत्, तदानीं सत्त्वस्य बहुयजमानत्वात्सर्वेषां यजमानानां मन्त्रौ 'सम्न्युप्य' सम्भूयैकत्वेनावस्थाप्य, तस्मिन् सर्वे यजेरन् ; यजमानत्वादेव सर्वेऽपि 'दीक्षेरन्' दीक्षां कुर्युः । "य एव यजमानास्त एव ऋत्विज."—इत्युक्तत्वेन 'सर्वे' यजमानाः 'सुनुयुः' ऋत्विकार्यं सोमाभिषवं कुर्युः । वसन्तर्तुं मभिलक्ष्य 'उदवस्यति' उदवसानीयां समाप्तिकालीना मिष्टिं सनुतिष्ठेत्, वसन्तर्तौ समापयेदित्यर्थः । वसन्तकाले भवति फलानां ग्रहेष्वागमनेन रसबाहुल्यात् 'ऊर्ग् वै', रस एव वसन्तः । तथा सत्येतस्मिन्नेतत्समापनेन 'ऋषम्' अन्नम्,

* "त्वष्टार मग्रजां गोपां पुरोयावान मा हुवे । इन्द्रमिन्द्रो हवा हरिः पवमानः प्रजापतिः ॥"—इति ऋ० १. ५. ९ ।

'स्वर्गं' इसं वाभिसत्य 'उदवसति' यजमानसद्दो द्वादशार्द्धं समापयति ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये (एकोनविंशाध्याये) चतुर्थः खण्डः ॥ ४ (२६) ॥

॥ अथ पञ्चमः खण्डः ॥

छन्दांसि वा अन्योन्यस्मायतन मध्यध्यायन् गायत्री त्रिष्टुभश्च जगत्यै चायतन मध्यध्यायत् त्रिष्टुब् गायत्रैा च जगत्यै च जगती गायत्रैा च त्रिष्टुभश्च ततो वा एतं प्रजापतिर्यु॒ऊहच्छन्दसं द्वादशाह मपश्यत्त माहरत्तेनायजत तेन स सर्वान्कामांश्छन्दांस्यगमयत्सर्वान् कामान् गच्छति य एवं वेद छन्दांसि व्यूहत्यथातथामतायै छन्दांस्येव व्यूहति तद्यथादो ऽश्वैर्वानड्वाहैर्वान्यैरन्यैरश्वान्ततरैरश्वान्ततरैरुपविमोकं यान्त्येव मेवैतच्छन्दोभिरन्यैरन्यैरश्वान्ततरैरश्वान्ततरै रुपविमोकं स्वर्गं लोकं यन्ति यच्छन्दांसि व्यूहतीमौ वै लोकौ सद्दास्तां तौ व्यैतां नावर्षन्न समतपत्तौ पशवो न समजानत तौ देवाः समनयंस्तौ संयन्तावेतं

देवविशाहं व्यवहेतां रथन्तरेणैवेय ममूं जिन्वति बृहतासाविमां नौधसेनैवेय ममूं जिन्वति क्षैतेना-सावियां धूमेनैवेय ममूं जिन्वति दृष्द्यासाविमां देवयजन मेवेय ममुष्या मदधात्पशूनसावस्या मेतद्वा इय ममुष्यां देवयजन मदधाद्यदेतच्चन्द्रमसि कृष्ण मिव तस्मादापूर्यमाणपक्षेषु यजन्त एतदेवोपैषन्त जघानसावस्यां तद्यापि तुरः कावषेय उवाचोषः पोषो जनमेजयकेति तस्माद्यापीतर्हि गव्यं मीमां-समानाः पृच्छन्ति सन्ति तत्रोषाइः इति जघो हि पोषोऽसौ वै लोक इमं लोक मभिपर्यावर्त्तत ततो वै द्यावापृथिवी अभवतां न द्यावान्तरिक्षान्नान्त-रिक्षाद्भूमिः ॥ ५ (२७) ॥

अथ व्यूढद्वादशाहे यदेतद् व्यूढत्वम्, तदेतत् प्रपंचितु माख्या-यिका माह— "छन्दांसि वा अन्योन्यस्यायतन मभ्यध्यायन्,— गायत्रै त्रिष्टुभश्च जगत्यै चायतन मभ्यध्यायत्, त्रिष्टुब् गायत्रैश्च जगत्यै च जगती गायत्रैश्च त्रिष्टुभश्च ; ततो वा एतं प्रजापति-व्यूढद्वादशाहं छन्दसं द्वादशाह मपश्यत्, त माहरत्, तेनायजत ; तेन स सर्वान् कामांश्छन्दांस्यगमयत्"–इति । गायत्री त्रिष्टुप् जग-तीत्येतानि त्रीणि छन्दांसि, अन्योन्यस्यायतनम् 'अभि' आसुम् 'अध्यायन्' स्वस्मिन्नचिन्तयन् । तेषां च त्रयाणां छन्दसां यत्रैव यदनन्तर्यं स्थानम् । तत्र गायत्री त्रिष्टुजगत्योः स्थाने माध्यन्दिन-

सवनत्रतीयसवने ध्यातवती ; त्रिष्टुप् स्वस्थानव्यतिरिक्तं स्थानत्रयं मध्यध्यायत् ; तथा जगत्यपि। 'ततः' प्रजापतिश्छन्दसा मभिलाषं दृष्ट्वा, तत्सम्पादनक्रमेण 'एतं व्यूढच्छन्दसं द्वादशाहम् अपश्यत्'। सत्स्वस्थानविपरीतत्वेनोढानि स्थानान्तरे प्रक्षिप्तानि छन्दांसि यस्मिन् द्वादशाहे, सोऽयं 'व्यूढच्छन्दाः'। तादृशं द्वादशाहं दृष्ट्वा, तत्साधनान्याहृत्य, तेनेष्ट्वा, 'सः' प्रजापतिस्तेषा मपेक्षितान् स्थान-विपर्यासलक्षणान् 'सर्वान् कामान्' गायत्र्यादिच्छन्दांसि प्रापित-वान्॥ वेदनं प्रशंसति—"सर्वान् कामान् गच्छति य एवं वेद"-इति॥

इदानीं व्यूहनं विधत्ते—"छन्दांसि व्यूहत्ययातयामतायै"-इति। 'छन्दांसि' गायत्र्यादीनि 'व्यूहति' तत्तदायतनविपर्या-सेन अवस्थापयेत्। तच्च व्यूहनम् 'अयातयामतायै' असारत्वप्रयुक्त-कालस्य परिहाराय भवति॥

उक्तव्यूहन मनूद्य प्रशंसति—"छन्दांस्येव व्यूहति ; तद्यथा-दोऽश्वैर्वानड्वाहैर्वान्यैरन्यैरश्वतरैरश्वतरैरुपविमोकं यान्त्येव मेवैतच्छन्दोभिरन्यैरन्यैरश्वतरैरश्वतरैरुपविमोकं स्वर्गं लोकं यन्ति, यच्छन्दांसि व्यूहति"-इति। 'छन्दांसि' गायत्र्यादीनि अस्मिन् द्वादशाहविशेषे 'व्यूहत्येव' न त्वत्र सन्देहः कार्यः। 'तत्' तस्मिन् व्यूहने 'यथा' लोके 'अदः' निदर्शनम्। किं निदर्शनम्? इति, तदुच्यते—ये राजानो रथ मारुह्य तत्तत्यैरश्वैर्दूरदेशं गच्छन्ति, ते राजानो योजने योजने 'उपविमोकं' श्वानश्वान् उपविमुच्योपविमुच्य, 'अन्यैरन्यैः' पुनःपुनर्नूतनैर्दूरदेशं यान्ति। शब्दोपपत्तिः 'अश्वतरैः'-इति, अतिशयेन अश्वरहितैः। पौनः-पुन्यं द्योतयितुं वाक्यावृत्तिश्च। लाङ्गले घटीयन्त्रे वा तदा तदा

आत्मानमात्मनाऽनुष्टो वा विमुच्य-विमुच्य, नूतनैरनुष्टुभः प्रवर्तते। एष मेवात्रापि छन्दसां स्थानविपर्यासे सति स्वस्वस्थाने यान्यानि छन्दांसि पुनःपुनरुपविमुच्य, तदा तदा नूतनैः छन्दोभिः सचिवाः स्वर्गं लोकं गच्छन्ति। यदा छन्दांसि व्यूहति, तदानीं मरणं तदिति द्रष्टव्यम्॥

अथ बृहद्रथन्तरसामनो उपाख्यानेन प्रशंसति—"इमौ वै लोकौ सहास्ताम्; तौ व्यैतां, नावर्षत्र समतपत्; ते पञ्चजना न समजानत; तौ देवाः समनयंस्तौ संयन्तावेतं देवविवाहं व्यवहेतां; रथन्तरेणैवेयं मर्मृजिन्वति, बृहतासाविमाम्"—इति। 'इमौ' भूलोकस्वर्गलोकौ पूर्वस्मिन्काले 'सहवासताम्' अत्यन्तं प्रीतियुक्तावेकत्रैवावस्थितौ। कदाचित्तावुभौ केनापि निमित्तेन 'व्यैतां' वियोगं प्राप्तवन्तौ, परस्परविरोधेन सहवासं परित्यज्य दूरदेशेऽवस्थितौ। तदानीं द्युलोकात् निर्गतः पर्जन्यो 'नावर्षत्' वृष्टिं न सम्यादितवान्; आदित्यश्च द्युलोकवर्त्ती 'न समतपत्' आतपरूपं प्रकाशं न कृतवान्। तदानीं 'ते पञ्चजनाः' पूर्वोक्ताः* देवमनुष्यादयः पञ्चविधाः प्राणिनः 'न समजानत' अन्धकारग्रस्ताः सन्तः क्व मपि मार्गं मज्ञात्वा परस्परैकमत्यरहिता अभवन्। तदानीं तादृशान् प्राणिनो दृष्ट्वा 'तौ' उभौ लोकौ 'समनयन्' परस्परं सङ्गतिं प्रापितवन्तः। 'तौ' उभौ लोकौ 'संयन्तौ' परस्परं सङ्गमं प्राप्तवन्तौ। 'एतं' परोक्षरोपकाररूपं 'देवविवाहं' देवाना मुचितं विवाहं 'व्यवहेतां' विविधरूपेण कृतवन्तौ। लोकेऽपि विवाहो नाम परस्परविपर्यासेन सम्बन्धप्रापणम्। तथाहि—वरस्य पिता स्वपुत्रं कन्यापितुर्जामात्रत्वेन

* १४२, १४३ पृ०, तत्र टीप्पनी च द्रष्टव्या।

सम्बध्नयति, कन्यापिता च स्नुषां वरयितुः सूनात्वेन सम्बन्धयति। तदिदं विपर्यासेन सम्बन्धनयनं 'विवाहः'। तयोश्च विवाहे परस्परं षड्भोजनं वस्त्रप्रदानादुपचारश्च कुर्वन्ति। एवमेतौ लोकौ परस्पर मुपकुरुतः। तत्र 'इयं' भूमिः साम्ना 'रथन्तरेण' एतत्सामकेनैव 'अमूं' दिवं 'जिन्वति' प्रीणयति; 'असौ' द्यौश्च 'इमां' भूमिं 'बृहता' साम्ना जिन्वति। तत एव सर्वलेयं वै रथन्तर मसौ बृहदिति लोकद्वयरूपेण सामद्वयं स्तूयते॥

द्वादशाहे बृहद्रथन्तरयोरपेक्षितत्वेन प्रशंसां कृत्वा तत्संज्ञालोकद्वयस्यान्यानपि परस्परोपकारान् दर्शयति—"नौधसेनैवेय ममूं जिन्वति, श्यैतेनासाविमां; धूमेनैवेय ममूं जिन्वति, बृष्टासाविमां; देवयजन मेवेय ममुष्या मदधात्, पशूनसावस्याम्"—इति। "इन्द्र मिन्द्र सुतं पिबा"-इत्यस्या सृच्युत्पन्नं साम 'नौधसम्' *, "त्वा मिद्धी भरः"—इत्यस्या सृच्युत्पन्नं साम 'श्यैतम्' †; ताभ्यां लोकयोः परस्परं प्रीतिः। भूमावग्निजन्यो धूमो दिवि गच्छति, द्युलोकात् समुत्पन्ना वृष्टिरस्यां गच्छति; सोऽयं धूमवृष्टिभ्यां परस्परोपकारः। 'देवयजनं' देवयागयोग्यं किञ्चिद्देशम् 'इयं' भूमिः 'अमुष्यां' दिवि अदधात्, 'असौ' च द्यौः पशून् 'अस्यां' भूमावदधात्; अतो देवयजनपशुभ्यां परस्परोपकारः ‡॥

---

* ऋ० आ० ३. १. ५. ४ ऋचि मे० गा० ६. १. ६७. नौधसं (योनिसाम); उ० आ० १. १. १३. १. २ ऋचीः प्रगाथवचे ऋ० गा० १. १. ६. नौधसं (स्तोमम्)।

† "त्वाभिदा" ऋ० आ० ४. १. १. १०. साम गौरीवितं सुपलभ्यते। "अभि प्र वः"—इति ऋ० आ० ३. १. ५. १ ऋचि मे० गा० ६. १. ६. गौरीतं (योनिसाम); उ० आ० २. १. ५. १६. १ ऋचीः प्रगाथवचे ऋ० गा० २. १. २. गौरीतं (स्तोमं)। सामं लिङ्ग आ० ब्रा० १. ४. ४. ता० ब्रा० ११. २. ५. सा० भा० अपि द्रष्टव्यम्।

‡ सामब्राह्मणेऽपि एव मेव। ता० ब्रा० ७. १०. १–४; ११. ८५।

तत्र देवयजनशब्देन विवक्षितं अर्थं आचष्टे—"एतद्वा एव अमुष्यां देवयजनं यदधाय्येतच्चन्द्रमसि कृष्णं सिव"—इति। चन्द्रमण्डले अयमग्निदिशब्देन लोके व्यवह्रियमाणं यदेतत् 'कृष्णं सिव' कृष्णवर्णं मिव रूपं दृश्यते, एतदेव 'देवयजनं' देवयागयोग्यं वस्तु, 'अस्यं' भूमिः 'अमुष्यां' दिवि स्थापितवती॥

चन्द्रमसि कृष्णरूपप्रसङ्गात्यागेषु शुक्लत्वेन शुक्लपक्षं विधत्ते—"तस्मादापूर्यमाणपक्षेषु यजन्त एतदेवोपेप्सन्ते"—इति। यस्मात्यागप्रोक्षं कृष्णं चन्द्रमसि स्थितम्, 'तस्मात्' कारणात् शुक्लपक्षेषु यागं कुर्वन्तो यजमानाः 'एतदेव' चन्द्रमण्डलम् उपाप्तुं मिच्छन्ति। दिने दिने वर्धमानया कलया सर्वतः पूर्यमाणं चन्द्रमण्डलं येषु शुक्लपक्षेषु, तेन ते 'आपूर्यमाणपक्षाः'। कर्मिणां दक्षिणमार्गेण चन्द्रमण्डलप्राप्तिः सर्वासूपनिषत्सु प्रसिद्धा *॥

देवयजनशब्दं व्याख्याय पशुशब्दं व्याचष्टे—"अपानमावस्यां; तद्यापि तुरः कावषेय उवाचोषः पोषो जनमेजयकेति; तस्माद्याप्येवंविदं गव्यं मौसांममानाः पृच्छन्ति,—सन्ति तत्रोषाः इति; अपो हि पोषोऽसौ वै लोक इमं लोक मभि पर्य्यावर्त्तते"—इति। 'असौ' द्युलोकः 'अस्यां' भूमौ 'अपानं' आदधातीत्यध्याहारः। देशान्तरप्रसिद्धिं मुपजीव्य पशुशब्दस्योषशब्दो व्याख्यानम्। "वश कान्तौ" इत्यस्मादानोरूपशब्दो निष्पन्नः। 'उषाः' कमनीयाः; पशूनां चमरादीनां कमनीयत्वं प्रसिद्धम्। उषशब्दव्यवहार एव 'तद्यापि' इत्यादिना प्रदर्श्यते। यस्मादुषः पशुरिति देशविशेषे पर्य्यायत्वेन प्रसिद्धा, 'तद्यापि' तस्मादेव कारणात् तुरनामकः कश्चिन्महर्षिः कावषस्य पुत्रः, जनमेजयनामानं

* का० उप० ४. १०. ४; बृ० उप० १. १. ६. २. १६।

राजानं सम्बोध्यैव मुवाच,— हे जनमेजयक ! 'जवः पोषः' पोषशब्दाभिधेयः, पुष्टिहेतुः पशुरिति । यस्मात्तु जवशब्दं पशवे व्याजहार, 'तस्मादि' तस्मादेव कारणादिदानी मपि 'गव्यं मीमांसमानाः' केचिद्देशविशेषेषु गोरसं क्षीरादिकं विचारयन्त एवं पृच्छन्ति,—'तत्र' तेषु देशेषु, 'कि मूषाः सन्ति ?'—इति ; गोविषयः प्रश्नश्चेषा मभिप्रेतः । प्रश्नार्था श्रुतिः । यस्माज्जवशब्द-वाच्यः पोषहेतुर्गवादिरूपः पशुः, तस्माज्जवशब्देन पशुशब्दव्याख्यान मुचितम् । 'असौ' द्युलोकः 'इमं' भूलोक मभिलक्ष्य पर्य्यावर्त्तते, तेन पशुनोपक्षतवानित्यर्थः ॥

इत्थं लक्षद्वयन्तरप्रसङ्गेन द्यावापृथिव्योः परस्पर मुपकारम् बहुधा प्रपञ्चोपसंहरति— "ततो वै द्यावापृथिवी अभवतां, न द्यावान्तरिक्षान्नान्तरिक्षाद्भूमिः"—इति । 'ततो वै' तस्मादेव पर-स्परोपकारकत्वकारणाद्, द्यावापृथिव्यौ वियुक्ते अपि परस्परैकम-त्येन प्राण्युपकारित्वादभवताम् । न च तदान्तरिक्षलोकं कुत्र वर्त्तत इति शङ्कनीयम् ; 'द्यावा' द्युलोको नान्तरिक्षलोकात्, अस्य इति शेषः । भूमिश्च नान्तरिक्षादल्पा । उभयोर्द्यावापृथिव्यो-रन्तरिक्षेण सम्बन्धेनावस्थानात् । तस्मादृषिसंमतयोर्द्यावापृथिव्योरेवा-न्तरिक्षस्यान्तर्भाव इत्यभिप्रायः * ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) पञ्चमः खण्डः ॥ ५ (२७) ॥

---

* नवीनादिपुस्तकेषु लेखकप्रमादप्रवाहादेव सर्वपुस्तकेष्वयशो दृष्ट. यद्यपि एवमेव प्रसिद्धमस्ति, तथापि मूलाभिप्रायविरुद्ध एव भवति ।

॥ अथ षष्ठः खण्डः ॥

बृहच्च वा इदमग्रे रथन्तरं चास्तां वाक्च वै तन्मनश्चास्तां वाग्वै रथन्तरं मनो बृहत्तद् बृहत्पूर्वं समजायत रथन्तर मत्यमन्यत तद्रथन्तरं गर्भं मधत्त तद्वैरूप मसृजत ते द्वे भूत्वा रथन्तरं च वैरूपं च बृहदत्यमन्येतां तद् बृहद्गर्भं मधत्त तद्वैराज मसृजत ते द्वे भूत्वा बृहच्च वैराजं च रथन्तरं च वैरूपं चात्यमन्येतां तद्रथन्तरं गर्भं मधत्त तच्छाक्वर मसृजत तानि त्रीणि भूत्वा रथन्तरं च वैरूपं च शाक्वरं च बृहच्च वैराजं चात्यमन्यन्त तद् बृहद्गर्भं मधत्त तद्रैवत मसृजत तानि चीर्ण्यन्यानि चीर्ण्यन्यानि षट् पृष्ठान्यासंस्तानि ह तर्हि त्रीणि छन्दांसि षट् पृष्ठानि नोदाप्नुवन्त्सा गायत्री गर्भं मधत्त सानुष्टुभ मसृजत त्रिष्टुब् गर्भं मधत्त सा पङ्क्ति मसृजत जगती गर्भं मधत्त सातिच्छन्दस मसृजत तानि चीर्ण्यन्यानि चीर्ण्यन्यानि षट् छन्दांस्यासन् षट् पृष्ठानि तानि तथाकल्पन्त कल्पते यज्ञो ऽपि तस्यै जनतायै कल्पते यजैव मेतां छन्दसां च पृष्ठानां च क्लृप्तिं विद्वान् दीक्षते दीक्षते ॥ ६ (२८) ॥

॥ इत्येतरेयब्राह्मणे चतुर्थपञ्चिकायां चतुर्थोऽध्यायः ॥४॥

अथास्मिन् द्वादशाहमध्ये पृष्ठषडहे पृष्ठस्तोत्रोपयुक्तानि * सामानि विधातुमाख्यायिका माह—"बृहच्च वा इदमग्रे रथन्तरं चास्ताम्; वाक् च वै तन्मनश्चास्ताम्; वाग्वै रथन्तरम्, मनो बृहत्, तद् बृहत् पूर्वं ससृजानं रथन्तरमत्यमन्यत; तद्रथन्तरं गर्भं मधत्त, तद्वैरूप मसृजत"-इति। ये बृहद्रथन्तरे पूर्वम् "इमौ वै लोकौ"-इत्यादिना संस्तुते (३९० पृ०), ते उभे एव 'इदं' वैरूपादिसामजात मन्तर्भाव्य तदुत्पत्तेः पूर्वं मास्ताम्; 'इदं' वैरूपादिसामजात मुत्पत्तेः 'अग्रे' पूर्वं नासीत्। ते च सामनी मनोवाग्रूपे अभवताम्। तत्र वागेव रथन्तरं साम, मनो बृहत्साम। तदेतन्मनोरूपं बृहत्साम 'ससृजानं' सृष्टिं कर्त्तुं मुद्यक्तम्। 'तत्' तस्मा एव सृष्टिसिसृक्षये 'पूर्वं' प्रथमं वाग्रूपं 'रथन्तरं' साम 'अत्यमन्यत'। वाग्रूपत्वादेव स्त्रीरूपत्वम्, मनोरूपत्वात् स्वस्य पुरुषरूपत्वम्; तस्मादतिशयितं तत्स्वरूपम्; तत्र बृहत्साम स्वस्य पुरुषत्वाभिमानेन रथन्तरसाम्नि स्त्रीत्वभावनया सङ्गम मकरोदित्यर्थः। तत्स्त्रीस्थानीयं तद्रथन्तरं साम स्वोदरमध्ये गर्भं मधत्त; धृत्वा च वैरूपाख्यं पुत्रस्थानीयं सामान्तर मसृजत॥

वैरूपस्योत्पत्ति मभिधाय वैराजसाम्न उत्पत्तिं दर्शयति—"ते द्वे भूत्वा रथन्तरं च वैरूपञ्च बृहदत्यमन्येतां; तद् बृहद्गर्भं मधत्त, तद्वैराज मसृजत"-इति। मातृस्थानीयं रथन्तरं, पुत्रस्थानीयं वैरूपं चेति, 'ते' सामनी द्वे भूत्वा यद् बृहत्सामैकाकित्वेन वर्त्तमान मस्ति, तदपत्यं मन्येतां, तस्माद् बृहतोऽप्येकाकिनोऽतिशयेन मन्येतां, न्यूनत्वेन बृहत्साम्नि स्त्रीत्वबुद्धिं कृत्वा संयोग मकुरुताम्। तत्र बृहत्साम गर्भं धृत्वा वैराजाख्यं सामान्तर मसृजत॥

* ३१४ पृ० ६ पं० द्रष्टव्यानि।

शाक्करसाम्न उत्पत्तिं दर्शयति—"ते ते भूत्वा बृहच्च वैराजं च, रथन्तरं च वैरूपं चात्यमन्येतां तद्; रथन्तरं गर्भं मधत्तः; तच्छाक्कर मसृजत"—इति। वैराजसाम्नः सृष्टेर्हेतुं तदुत्पत्तेश्च बृहत्साम्नः न्यूनत्वेऽपगते सति 'ते' सामनी ते भूत्वा मिलित्वा वैरूपसहितस्य रथन्तरस्य वाग्रूपत्वेन स्त्रीत्व मभिप्रेत्य स्त्रीत्वम् 'अत्यमन्येतां' स्वाधिकारं मत्वा संयोग मकुरुताम्। ततो रथन्तरं साम गर्भं धृत्वा शाक्करास्यं सामान्तर मसृजत॥

रैवतसाम्न उत्पत्तिं दर्शयति—"तानि त्रीणि भूत्वा रथन्तरं च वैरूपं च शाक्करं च, बृहच्च वैराजं चात्यमन्यन्त तद्; बृहद्गर्भं मधत्त, तद्रैवत मसृजत"—इति। मातृस्थानीयं 'रथन्तरं' पुत्रस्थानीये 'वैरूपं' 'शाक्करं' चेति; एवं त्रीणि भूत्वा, वैराजेन युक्तस्य बृहत्साम्नो न्यूनत्वबुद्धा 'तदत्यमन्यन्त' तस्मादतिशयं पुत्रपस्थानीयं स्वपक्षे मत्वा संयोग मकुर्वत। ततो बृहद्गर्भं मधत्त; गर्भं धृत्वा रैवताख्यं सामान्तर मसृजत॥

उक्तानां षण्णां साम्नां पृष्ठस्तोत्रसाधनत्वं दर्शयति—"तानि तीव्रन्यानि त्रीण्यन्यानि षट् पृष्ठान्यासन्" इति। 'तानि' पूर्वोक्तानि रथन्तरवैरूपशाक्कराणि 'त्रीणि' सामानि, 'अन्यानि' इतरेभ्यो विलक्षणानि, पृष्ठाख्यं षड्ढं प्रथमतृतीयपञ्चमेष्वहस्सु, पृष्ठस्तोत्रनिष्पादकान्यासन्। तथा बृहद्-वैराज-रैवतरूपाणि 'त्रीणि' सामानि, 'अन्यानि' रथन्तरादिभ्यो विलक्षणानि भूत्वा, द्वितीयचतुर्थषष्ठेषु युग्मरूपेष्वहस्सु पृष्ठस्तोत्रनिष्पादकान्यासन्* ॥

---

* "रथन्तरपृष्ठान्यृजूनि। बृहत्पृष्ठानीतराणि। तृतीयादिषु पृष्ठाख्येषु द्वितीयानि वैरूपवैराज शाक्करवैतानि"—इति भाष्ये पृ० ७५.२—४।

अथ षड्विधपृष्ठस्तोत्रसामाधारत्वेन षड्विधानि छन्दांसि दर्शयति—"तानि ह तर्हि त्रीणि छन्दांसि, षट् पृष्ठानि नोदाप्नुवन्ना गायत्री गर्भं मधत्त, सानुष्टुभ मसृजत; त्रिष्टुब् गर्भं मधत्त, सा पङ्क्तिं मसृजत; जगती गर्भं मधत्त, सातिच्छन्दस मसृजत; तानि त्रीण्यन्यानि त्रीण्यन्यानि षट् छन्दांस्यासन्; षट् पृष्ठानि तानि तथाकल्पन्त; कल्पते यज्ञोऽपि"—इति। 'तर्हि' तस्मिन् षट्सामसम्पत्तिकाले गायत्री-त्रिष्टुब्-जगतीरूपाणि 'छन्दांसि' त्रीणि भूत्वा, 'तानि' पूर्वोक्तानि षट् पृष्ठसामानि 'नोदाप्नुवन्' पृष्ठानां निष्पत्तिं कर्तुं नाशक्नुवन्। ततो गायत्र्यादीनि त्रीण्यपि गर्भं धृत्वा, पुनः अन्यानि अनुष्टुप्पङ्क्त्यतिच्छन्दोरूपाणि छन्दांस्यसृजन्त। ततः 'तानि' सिद्धानि गायत्र्यादीनि 'त्रीणि', 'अन्यानि' पूर्वसिद्धत्वेनैव पृथग्भावान्यासन्, तथैवानुष्टुभादीनि 'त्रीणि', 'अन्यानि' छन्दांसि तदानीं सृत्यत्वानि, इति मिलित्वा षट् छन्दांस्यासन्। ततः षट्संख्याकानि पृष्ठसामानि धारयितुं 'तानि' षट् छन्दांसि 'तथा अकल्पन्त' तेनैव क्रमेण समर्थान्यभवन्। प्रथमद्वितीयतृतीयेष्वहस्सु गायत्रीत्रिष्टुजगत्यः पृष्ठस्तोत्रनिष्पादकाः; चतुर्थपञ्चमषष्ठेष्वहस्सु अनुष्टुप्पङ्क्त्यतिच्छन्दांसि स्तोत्रनिष्पादकानि। एवं सति यज्ञोऽपि पृष्ठषडहाख्यः * 'कल्पते' स्वप्रयोजनाय समर्थो भवति ॥

वेदनपूर्वकं मनुष्ठानं प्रशंसति—"तस्यै जनतायै कल्पते, यत्रैव मेतां छन्दसां च पृष्ठानां च क्लृप्तिं विद्वान् दीक्षते दीक्षते"—इति। 'यत्र' यस्यां जनतायाम्, 'एवम्' उक्तप्रकारेण गायत्र्यादीनां 'छन्दसां' रथन्तरादीनां 'पृष्ठानां' च एतां 'क्लृप्तिं' कल्पनार्थप्रकारं

* जै० सू० २. १. १९–२९ सू० ; ५ अधि०।

जानीते, स दीर्घां प्राप्नोति । स पुमान् 'तस्मै अनताय' नम्राय यज्ञसभार्या 'कल्पते' समर्थो भवति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥६॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) षष्ठः खण्डः ॥ ६ (२८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायाः चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

(तृ॰)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अग्निर्वै देवता प्रथम महर्वहति त्रिवृत् स्तोमो रथन्तरं साम गायत्री क्रन्दो यथादेवत मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद यद्वा एति च प्रेति च तत्प्रथमस्याह्नो रूपं यदुक्तवद्यद्रथवद्यदाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोको ऽभ्युदितो यद्राथन्तरं यन्नायनं यत्करिष्यदेतानि वै प्रथमस्याह्नो रूपाण्युपप्रयन्तो अध्वर मिति प्रथमस्याह्न आज्यं भवति प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपं वायवा याहि दर्शतेति प्रउग मेति प्रथमेऽहनि प्रथमस्याह्नो रूप मा त्वा रथं यथोतय इदं वसो सुत मन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ रथवच्च पिबवच्च प्रथमेऽहनि प्रथमस्याह्नो रूप मिन्द्र नेदीय एदिहीतोन्द्रनिहवः प्रगाथः प्रथमे पदे देवता निरुच्यते प्रथमेऽहनि प्रथमस्याह्नो रूपं प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूप मग्निर्नेता त्वं सोम क्रतुभिः पिन्व-

स्थप इति धाय्याः प्रथमेषु पदेषु देवता निरुक्ता प्रथमेऽहनि प्रथमस्याह्नो रूपम् प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूप मा यात्विन्द्रो वस उप न इति सूक्त मेति प्रथमेऽहनि प्रथमस्याह्नो रूप मभि त्वा शूर नोनुमो ऽभि त्वा पूर्वपीतय इति रथन्तरं पृष्ठं भवति राथन्तरेऽहनि प्रथमेऽहनि प्रथमस्याह्नो रूपं यद्दावान पुरुतमं पुराषाळिति धाय्याऽऽ इत्यहेन्द्रो नामान्यभा इत्येति प्रथमेऽहनि प्रथमस्याह्नो रूपं पिबा सुतस्य रसिन इति सामप्रगाथः पिबवान् प्रथमेऽहनि प्रथमस्याह्नो रूपं त्य मू षु वाजिनं देवजूत मिति तार्क्ष्यं पुरस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै तार्क्ष्यः स्वस्तये स्वस्त्ययन मेव तत् कुरुते स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद ॥ १ (२९) ॥

ज्योतिष्मत्या भावती द्वादशाहो,
दीक्षाकालो याजनं पाशुकश्च ।
गूढश्छन्दोद्वादशाहप्रशंसा
पृक्षादीनां छन्दसां तत्र सृष्टिः ॥

इदानीं द्वादशाहकृतौ प्रायणीयोदयनीयावतिरात्रौ, तयोः देवतेषु मंत्रेषु, तच्चितयं वर्जयित्वा मध्यगतो यो मंत्ररात्रः, तं विधातुं उपक्रमते—"अग्निर्वै देवता प्रथम मह्नामुखति, त्रिवृत्स्तोमो रथन्तर

साम गायत्रीच्छन्दः"–इति । देवतानां मध्ये योऽयमग्निरस्ति, सोऽयमत्र देवता भूत्वा नवरात्रस्य प्रथम महः 'वहति' निर्वाहयति । तथा स्तोमानां मध्ये त्रिवृत्स्तोमः प्रथमस्याह्नो निर्वाहकः; साम्नां मध्ये रथन्तराख्यं साम प्रथमस्याहः पृष्ठसामनिर्वाहकम्; छन्दसां मध्ये गायत्रीच्छन्दः प्रथमस्याह्नो निर्वाहकम् ॥ उक्तार्थवेदनं प्रशंसति— "यथादेवतं मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद"–इति । 'यः' पुमान् 'एवम्' अग्नित्रिवृद्रथन्तरगायत्रीच्छन्दसां प्रथमेऽहनि देवतात्वं स्तोमत्वं पृष्ठसामत्वं छन्दस्त्वं च क्रमेण वेद, स पुमान् 'एनेन' वेदनेन 'यथादेवतं' तस्याह्न उचितां देवता मनतिक्रम्य, तथा स्तोमसामच्छन्दांस्युचितानि अनतिक्रम्य समृद्धो भवति ॥

प्रथमेऽहनि विनियोज्यान्मन्त्रविशेषानादौ तावल्लक्षणमुखेन सङ्गिरय दर्शयति—"यद्वा एति च प्रेति च, तत्प्रथमस्याह्नो रूपं; यद् युक्तवद्रथवद्यदाशुमद्यत्पिबवद्, यत्प्रथमे पदे देवता निरुच्यते, यदयं लोकोऽभ्युदितो, यद्रायत्तरं, यद्गायत्रं, यत्सरिष्यदेतानि वै प्रथमस्याह्नो रूपाणि"–इति । 'यद्वै' यस्मिन्नेव मन्त्रे 'एति च' आकारस्वरनिर्देशार्थं मिति च शब्द उपरि प्रयुक्तः । उपसर्गेषु मध्ये योऽयमाङ् अस्ति, सोऽयमा चेति परोक्षं निर्दिश्यते। तथा प्रेत्युपसर्गनिर्देशः । आप्रेत्यनयोरुपसर्गयोरन्यतर उपसर्गो यस्मिन्मन्त्रेऽस्ति, 'तत्' मन्त्ररूपं प्रथमस्याह्नो 'रूपं' लक्षय मित्यर्थः । तथा 'यत्' मन्त्ररूपं 'युक्तवत्' युजिधातूपेतं, 'रथवत्' रथशब्दोपेतम्, 'आशुमत्' आशुशब्दोपेतम्, 'पिबवत्' पिबतिधातूपेतम्, तथा यस्य मन्त्रस्य प्रथमे पादे देवता 'निरुच्यते' निर्दिश्यते, तथा 'अयं लोकः' भूलोकः 'अभ्युदितः' कथितो भवति, तथा

यद् 'राथन्तरं' रथन्तरसामसम्बन्धि, 'गायत्रं' गायत्रीछन्दस्क-सम्बन्धि, गायत्रं साम वा ; 'करिष्यत्' करोतेर्धातोर्भविष्यदर्थ-यान्तम्, ईदृशं 'यद्' यस्मिन् । एतानि वै सर्वाण्यपि प्रथमस्थाङ्गो 'रूपाणि' निरूपकाणि, लक्षणानीत्यर्थः ॥

एवं लक्षणमुखेन मन्त्रविशेषान्विधाय प्रतीकादाहरणेन विशिष्टं विधत्ते — "उपप्रयन्तो अध्वर मिति प्रथमस्याङ्ग आर्ष्यं भवति"–इति । प्रकृतौ "प्र वो देवायाग्नये"–इत्यादि मन्त्रम्, तदाधित्वा नवरात्रस्य प्रथमेऽहनि "उपप्रयन्तः"–इति (सं० १.७४.) सूत्रेण याज्यात्वं संसनीयम् ॥

तस्मिन् सूत्रे पूर्वोक्तलक्षणेषु एकं लक्षणं योजयित्वा दर्शयति — "प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । 'प्र'शब्द-रूपोऽयं उपसर्गः, सोऽयं सूक्तगते 'प्रयन्त' इतिपदे दृश्यते ; अतः प्रथमेऽहनि विनियोक्तुं योग्यत्वात् प्रथमस्याङ्गो रूपम् ॥

मन्त्रान्तरे लक्षणान्तरं दर्शयति— "वायवा याहि दर्शतेति प्रउग मेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । यद्यपि "वायवा याहि"–इत्यादिकस्य (सं० १.२.) 'प्र'उपसर्गस्य प्राक्-तत्वाद्योदकेनैव तत्प्राप्तिः, तथापि लक्षणं दर्शयितुं मय रूप-न्यासः । एत्याकाररूपम् पद मध्यस्थि ; आ याहीतिश्रुतत्वात् । अतः प्रथमेऽहनि विनियोक्तुं योग्यत्वात् प्रथमस्याङ्गो रूपम् ॥

अथ तृचहये लक्षणद्वयं दर्शयति—"आ त्वा रथं यथोतय इदं वसो सुत मन्द इति मरुत्वतीयस्य प्रतिपदनुचरौ, रथवच्च विक-ल्पश्च, प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । "आ त्वा रथम्"–इति (सं० ८.६८.१–३.) तृचो मरुत्वतीयशस्त्रस्य प्रतिपत् ; तत्र रथशब्दोपेतम्, "इदं वसो सुतम्"–इति (सं० ८.२.१–३.) तत्र

ब्राह्मणानुवचः ; तेन पिबतम् ; पिबतं तु पूर्वं मित्रि द्वितीयपादे श्रुतत्वात् । प्रथमेऽहनीत्यादिकं पूर्ववत् ॥

मन्त्रान्तरे लक्षणान्तरम् दर्शयति— "इन्द्र नेदीय एदिहोतीन्द्रनिहवः प्रगाथः ; प्रथमे पदे देवता निरुच्यते ; प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । "इन्द्र नेदीय"–इत्यय ऋग्द्वयरूपत्वात्प्रगाथः' (सं० ८.५३.५,६.) । इन्द्रो नितरां नेदीयते यस्मिन् प्रगाथे सोऽयम् 'इन्द्रनिहवः' ; एदिहोत्येव मात्रान्त मत्र श्रूयते, प्रगाथस्य प्रथमे पादे इन्द्रेति च देवता निर्दिश्यते ; तदेतत्प्रथमस्याङ्गो 'रूपं' लक्षणम् ॥

मन्त्रान्तरे लक्षणान्तरं दर्शयति— "प्रेतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः ; प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । 'ब्राह्मणस्पत्यः' (सं० १.४०.३,४.), प्रगाथ इत्यनुवर्त्तते । अत्र 'प्र'शब्दो लक्षणम् ॥

अथ मन्त्रत्रये लक्षणं दर्शयति – "अग्निर्नेता, त्वं सोम क्रतुभिः, पिन्वन्त्यप इति धाय्याः ; प्रथमेषु पदेषु देवता निरुच्यन्ते ; प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"–इति । अस्त्रमध्ये प्रक्षेपणीया ऋचो धाय्याः । "अग्निर्नेता"–इति (सं० ३. २०. ४.) प्रथमा धाय्या, "त्वं सोम"–इति (सं० १.९१.२) द्वितीया, "पिन्वन्त्यपः" –इति (सं० १.६४.६.) तृतीया । एतासां तिसृणा मृचां प्रथमेषु पादेषु अग्निसोममरुद्देवता निर्दिश्यन्ते ; "पिन्वन्त्यपो मरुतः सुदानवः"–इति श्रवणात् * । सोऽयं देवतानिर्देशो लक्षणम् ॥

मन्त्रान्तरे 'प्र'शब्दरूपं लक्षणं दर्शयति— "प्र वः इन्द्राय

---

* प्रथमतृतीययोस्तु ऋचोः सूची प्रतीकयज्ञसमाचत एव देवताश्रवणं स्फुटम् ; तृतीयस्या ऋचि प्रथमे एव पादे देवतानुक्तिरिति प्रकटयितुं दर्शयति पिन्वन्त्यप इत्यादि ।

इहत इति (सं० ८.८८.३,४) मरुत्वतीय: प्रगाथः ; प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति ॥

मन्त्रान्तरे आकारकृपं लक्षणं दर्शयति—"आ यासिष्ठो वक्षथ न इति (सं० ४.२१.) सूक्त मेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति ॥

अथ निष्केवल्यशस्त्रगतस्य मन्त्रस्य रथन्तरसम्बन्धरूपं लक्षणं दर्शयति— "अभि त्वा शूर नोनुमो, अभि त्वा पूर्वपीतय इति रथन्तरम् पृष्ठं भवति ; रायन्तरेऽहनि प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति । "अभि त्वा शूर"-इति (सं० ७.३२.२२,२३.) रथन्तरसाम्नो योनिभूतः ; "अभि त्वा पूर्वपीतये"-इति (सं० ८. ३.७,८,) तस्यानुचरः । अतः अभि त्वा शूरेत्यत्र रथन्तरसामसाध्यं पृष्ठं भवति । इदं प्रगाथद्वयं रथन्तरसामसम्बन्धिन्यहनि योग्यम् । अतो रथन्तरसम्बन्धस्य रूपस्य लक्षणस्य सद्भावात् प्रथमेऽहनि प्रयुज्यते ॥

मन्त्रान्तरे त्वाकारकृपं लक्षणं दर्शयति— "यद्वावान सुष्टुतमं पुराणाछिति धाय्या ; ऽऽ इत्यहेर्ङो सामान्यप्रा इत्येति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति । "यद्वावान"-इति (सं० १०.७४. ६.) श्लस्यध्ये प्रक्षेपणीया ; तस्या द्वितीयपादादौ आ इत्यहेस्त्वाकारः श्रुतः ॥

मन्त्रान्तरे पिबतिधातुरूपं लक्षणं दर्शयति—"पिबा सुतस्य रसिन इति सामप्रगाथः ; पिबवान् प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति । "पिबा सुतस्य"-इत्ययं ऋक्षविशामग्निर्गृहपतिः आधारभूतः प्रगाथः (सं० ८.१.१,२. *) ॥

* इ० आ० १.१.५.० ऋचि मै० सं० ४.२.१२, पृष्ठ (वीनिशाल)।

अथ निविद्धानीयस्य सूक्तस्यादौ किञ्चित्सूक्तान्तरं विधत्ते—"त्य नू षु वाजिनं देवजूत मिति (सं० १०.१७८.) तार्क्ष्यं पुरस्ताच्छंसति ; स्वस्त्ययनं वै तार्क्ष्यः स्वस्तितायै"–इति। तार्क्ष्यो देवता अस्य 'तार्क्ष्यम्', 'स्वस्त्ययनं' क्षेमप्राप्तिरूपम् ; अतो निविद्धानीयसूक्तस्य पुरस्तात् तार्क्ष्यसूक्तशंसनं 'स्वस्तितायै' यजमानस्य क्षेमाय भवति ॥ वेदनं प्रशंसति—"स्वस्त्ययन मेव तत् कुरुते स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद"–इति । वेदितारं तेन वेदनेन 'स्वस्त्ययन मेव' क्षेमप्राप्ति मेव सम्पादयति। तथा द्वादशाहद्वारा संवत्सरमन्तस्य 'पार मश्नुते' समाप्तिं प्राप्नोति ॥१॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां पञ्चमाध्याये
(विंशाध्याये) प्रथमः खण्डः ॥ १ (२८) ॥

॥ अथ द्वितीयः खण्डः ॥

आ न इन्द्रो दूरादा न आसादिति सूक्त मेति प्रथमेऽहनि प्रथमस्याङ्गो रूपं सम्पातौ भवतो निष्केवल्यमरुत्वतीययोर्निविधाने वामदेवो वा बृमांशो-र्वागपश्यत्साग्न्यसम्पातैः समपतद् यत्सम्पातैः सम-

उ० चत० ६.२.१.१,२ अनुक्रमणिकायां प्रगाथत्वेन उ० गा० १६.२.१२. पृष्ठं (लोकम्)। अत्रा-ऽऽर्चिषि सामानि सन्ति, ततश्च 'कैश्चित्साम्ना नाधारभूतः प्रगाथः'–इति वक्तव्यं स्यात्।

पतत्तत्सम्मातानां सम्मातत्वं तद्यत्सम्मातो प्रथमेऽहनि शंसति स्वर्गस्य लोकस्य समष्ट्यै सम्पत्ये सहस्रं तत्सवितुर्वृणीमहे ऽया नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ रायन्तरेऽहनि प्रथमेऽहनि प्रथमस्याङ्गो रूपं युञ्जते मन उत युञ्जते धिय इति सावित्रं युक्तवत्प्रथमेऽहनि प्रथमस्याङ्गो रूपं द्यावा यज्ञैः पृथिवी ऋताद्रुधेति द्यावापृथिवीयं प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपं मिहेह वो मनसा बन्धुता नर इत्यार्भवं यद्वा एति च प्रेति च तत्प्रथमस्याङ्गो रूपं तद्यत्प्रेति सर्वं मभविष्यत् प्रैष्यन्नेवास्माल्लोकाद्यजमाना इति तद्यदिहेह वो मनसा बन्धुता नर इत्यार्भवं प्रथमेऽहनि शंसत्ययं वै लोक इहेहास्मिन्नेवैनांस्तल्लोके रमयति देवान् हुवे बृहच्छवसः स्वस्तय इति वैश्वदेवं प्रथमे पदे देवता निरुच्यन्ते प्रथमेऽहनि प्रथमस्याङ्गो रूपं महान्तं वा एतेऽध्वान मेष्यन्तो भवन्ति ये संवत्सरं वा द्वादशाहं वासते तद्यद्देवान् हुवे बृहच्छवसः स्वस्तय इति वैश्वदेवं प्रथमे ऽहनि शंसति स्वस्तितायै स्वस्त्ययनमेव तत्कुरुते स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद येषां चैवं विद्वानेतद्धोता देवान् हुवे बृहच्छ-

वसः स्वस्तय इति वैश्वदेवं प्रथमे ऽहनि शंसति वैश्वानराय पृथुपाजसे विपश्चित इत्याग्निमारुतस्य प्रतिपत्प्रथमे पदे देवता निरुच्यते प्रथमे ऽहनि प्रथमस्याह्नो रूपं प्र त्वचसः प्र तवसो विरप्शिन इति मारुतं प्रेति प्रथमे ऽहनि प्रथमस्याह्नो रूपं जातवेदसे सुनवाम सोम मिति जातवेदस्यां पुरस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै जातवेदस्याः स्वस्तितायै स्वस्त्ययन मेव तत् कुरुते स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद प्र तव्यसीं नव्यसीं धीति मग्नय इति जातवेदस्यं प्रेति प्रथमे ऽहनि प्रथमस्याह्नो रूपं समान मान्निमारुतं भवति यच्चाग्निष्टोमे यद्वै यज्ञे समानं क्रियते तत्प्रजा अनु समनन्ति तस्मात्समान मान्निमारुतं भवति ॥ २ (३०) ॥

यस्य सूक्तस्य पुरस्तात्सार्ध्वशंसनं विहितम्, तस्मिन्विनियोगे सूक्ते आकाररूपं लक्षणं दर्शयति— "आ न इन्द्रो दूरादा न आसादिति (सं० ४.२०.) सूक्त मिति प्रथमेऽहनि प्रथमस्याह्नो रूपम्"- इति ॥

इदानीं निष्केवल्यमरुत्वतीययोः शस्त्रयोर्निविधाने सूक्ते स्तोतु माह— "सम्पातौ भवतो निष्केवल्यमरुत्वतीययोर्निविधाने ; ग्राम-देवो वां इमांल्लोकानपश्यत्, तान्त्सम्पातैः समपतत् ; यत्सम्पातैः समपतत्तत्सम्पातानां सम्पातत्वं ; तथत्सम्पातौ प्रथमेऽहनि शंसति,

स्वर्गस्य लोकस्य समष्टै सम्यञ्चौ सादयति"–इति। सम्यञ्चौ प्राङ्मुखौ आभ्यां यजमानाः सर्वान् लोकानिति 'सम्यातौ'। निष्केवल्यमरुत्वतीयनिविद्धानयोः सूक्तयोर्वैकृतयोः सम्यात इति संज्ञा। "आ याह्यिन्द्रो वसः"–इति (सं० ४. २१.) मरुत्वतीयशस्त्रस्य निविद्धानं सूक्तम्; "आ न इन्द्रः"–इति (सं० ४. २०.) निष्केवल्यशस्त्रस्य निविद्धानं सूक्तम्; एतयोः सम्यात इति संज्ञा प्रतिपाद्यते*। पुरा कदाचित् वामदेवः 'इमान्' भूरादीन् लोकान् दृष्ट्वा, तत्प्राप्त्युपायं विचार्य्य, सम्यातसूक्तैस्तान् प्राप्तवान्। अतः 'सम्यतति' सम्यक् प्राप्नोति लोकानेतैरिति 'सम्यातत्वं' नाम सम्बन्धम्। तथा सत्यत्र प्रथमेऽहनि निष्केवल्यमरुत्वतीययोः सम्यातनामके सूक्ते यदि शंसेत्, तदानीं तच्छंसनं स्वर्गलोकप्राप्ति-भोग्यवस्तुसम्पत्ति-तद्भोग-सम्बन्धार्थं सम्पद्यते॥

अथ द्वयोस्तृचयो रथन्तरसम्बन्धरूपं लक्षणं दर्शयति –"तत्सवितुर्वृणीमहे.ऽग्निं नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ; रथन्तरेऽहनि प्रथमेऽहनि प्रथमस्याङ्गे रूपम्" –इति। "तत्सवितुः" –इति (सं० ५. ८२. १–३.) तृचो रथन्तरसाम्ना सह प्रयुज्यमानो वैश्वदेवशस्त्रस्य प्रतिपत्; "अग्ने नः"–इति (सं० ५. ८२. ४–६.) तृचस्तस्यानुचरः; अत उभयोरपि रथन्तरसम्बन्धोऽस्ति, रथन्तरसम्बन्धेऽहनि योग्यतास्ति॥

सूक्तान्तरे युजिधातुरूपं लक्षणं दर्शयति –"युञ्जते मन उत युञ्जते धिय इति सावित्रं; युञ्जवत्प्रथमेऽहनि प्रथमस्याङ्गे रूपम्" –इति। प्रथमाया ऋचोऽवसाने "देवस्य सवितुः परिष्टुतिः"–इति

* "आ न इन्द्रो दूरादा न आसादिति सम्यातः"–इति ऐ० आर० ५. ८. २. ३.।

युतत्वादिदं (सं० ५. ८१.) सवितृदेवताकम्। इह युजिधातुस्तु विस्पष्टः ॥

सूक्तान्तरे प्रशब्दरूपं लक्षणं दर्शयति—"प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति (सं० १. १५९.) द्यावापृथिवीयं ; प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"—इति ॥

अस्मिन्नेवदेवशस्त्रे सूक्तान्तरं विधत्ते— "इहेह वो मनसा बन्धुता नर इत्यार्भवं ; यद्वा एति च प्रेति च तत्प्रथमस्याङ्गो रूपं, —तथेति सर्वं सभविष्यत्प्रैष्यन्नेवास्माल्लोकाद्यजमाना इति ; तद्यदिहेह वो मनसा बन्धुता नर इत्यार्भवं प्रथमेऽहनि शंसत्यथं वै लोक इहेहास्मिन्नेवैनांस्तल्लोके रमयति"—इति। "इहेह वः"—इत्येतत्सूक्तम् (सं० ३. ६०.) ऋभुदेवताकम् ; द्विलोयाया ऋचोऽन्ते "तेन देवत्व मृभवः समानश" —इतिश्रवणात्। आकाङ्क्षा प्र-शब्दादिकं लक्षणं मन्ये नास्तीत्याशङ्क्य 'यद्वै'—इत्यादिना तत्सद्भावे बाध उपन्यस्यते। यदेतदेति च प्रेति चेति, तदेतत्प्रथमस्याङ्गो 'रूपं' लक्षण मिति पूर्वं सूक्तम् (४०२ पृ०) ; 'तत्' तथा सति यदि प्रैष्यन्नेन लक्षणेन युक्तं 'सर्वं' सूक्तजातम् अभविष्यत्, तदानीं यजमाना अस्माल्लोकात् 'प्रैथन्' प्रैष्यन्ति मरिष्यन्ति एवेति बाधोपन्यासः। 'तद्यदि'—इत्यादिना समाधान मुपन्यस्यते। यस्मात् प्रशब्दयोगे बाधोऽस्ति, तस्मात्कारणादिहेहेति सूक्तं यदि प्रथमेऽहनि शंसेत्, तदानीं मिहेहशब्देनास्य भूलोकस्य विवक्षितत्वात् 'अस्मिन्नेव' भूलोके एव तत्सूक्तपाठेन 'एनान्' यजमानान् 'रमयति' चिरं क्रीडयति ; ततः प्रशब्दप्रयुक्तो मरणबाधोऽपि परिहृतो भवति ॥

सूक्तान्तरस्य प्रथमपादे देवताभिधानं लक्षणं दर्शयति —"देवान् हुवे सुहवऋभवः स्वस्तय इति वैश्वदेवं प्रथमे पदे देवता निरुच्यन्ते ;

प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति । "देवान्"-इत्यादिके सूक्ते बहुवचनान्तस्य देवशब्दस्य श्रवणाद्देवताबाहुल्येनेदं सूक्तं (सं० १०, ६६.) वक्ष्यदेवम् । प्रथमपादे देवशब्दस्तु विस्पष्टः ॥

तत्र स्वस्तिशब्दस्य तात्पर्यं दर्शयति—"महान्तं वा एतेऽध्वानमेष्यन्तो भवन्ति, ये संवत्सरं वा द्वादशाहं वासते ; तद्यद्देवाकुर्वे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं प्रथमेऽहनि शंसति, स्वस्तितायै"-इति । 'ये' यजमानाः संवत्सरसत्रं वा द्वादशाहं वा प्रतितिष्ठन्ति, एते दीर्घं मध्वानं गन्तुं सुधुरा भवन्ति ; प्रयोगबाहुल्येनैवाहवत् सहसा समाप्त्यभावात् । अतो देवानित्यादिसूक्ते "स्वस्तये"-इत्येतस्य पदस्य शंसनं 'स्वस्तितायै' क्षेमार्थं भवति ॥

वेदनं प्रशंसति—"स्वस्त्ययन मेव तत् कुरुते स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद, येषां चैवं विदानेतद्धोता देवाकुर्वे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं प्रथमेऽहनि शंसति"-इति । उक्तार्थञ्च वेदिता तेन 'स्वस्त्ययन मेव' द्वादशाहस्य क्षेमप्राप्ति मेव करोति,—क्षेमेणैव संवत्सरसत्रस्य समाप्तिं प्राप्नोति । किञ्च 'येषां' यजमानानां सूक्तार्थवेदी होता शंसति, तेऽपि यजमाना द्वादशाहं क्षेमेण प्राप्नुवन्ति, संवत्सरसत्रं च समापयन्ति ॥

सूक्तान्तरस्य प्रथमे पादे देवताभिधानं लक्षणं दर्शयति—"वैश्वानराय पृथुपाजसे विप इत्याग्निमारुतस्य प्रतिपत् ; प्रथमे पादे देवता निरुच्यते, प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-इति । आग्निमारुतशस्त्रस्य "वैश्वानराय"-इति (सं० ३.३.) सूक्तं प्रतिपत् कर्त्तव्यम् । स एव शब्दो विस्पष्टं देवता मभिधत्ते ॥

सूक्तान्तरे प्रशब्दरूपं लिङ्गं दर्शयति— "प्रत्नप्रत्नः प्रत्नवसो विरप्शिन इति मारुतं ; प्रेति प्रथमेऽहनि प्रथमस्याङ्गो रूपम्"-

इति । "प्रत्यञ्चम्"-इति (सं० १.८७.) सूक्ते द्वितीयस्या ऋचो द्वितीयपादे "वय इव मरुतः"-इतिश्रवणात् इदं सूक्तं मरुद्देवताकं भंसेत् । अत्र 'प्र'शब्दो विस्पष्टः ॥

वक्ष्यमाणस्य जातवेदस्यसूक्तस्य पुरस्तादेता ऋचं विधत्ते— "जातवेदसे सुनवाम सोम मिति जातवेदस्यं पुरस्तात्सूक्तस्य भंसति ; स्वस्ययनं वै जातवेदस्याः * स्वस्तितायै"-इति । जातवेदा देवता यस्या ऋचः सेयं 'जातवेदस्या' (सं० १.९९.१.) ; तद्देवताकत्वं प्रथमपादे देवताभिधानं लिङ्गं च विस्पष्टम् । अस्या ऋचि "अरातीयतो नि दहाति"-इति शत्रुदाहश्रवणात्, "नावेव सिन्धुम्"-इति नौदृष्टान्तेन दुरितात्ययश्रवणात् च 'स्वस्ययनं' क्षेमगमन मत्र विद्यते ; तस्मादियं क्षेमप्राप्तये भवति ॥ वेदनं प्रशंसति— "स्वस्ययन मेव तत् कुरुते, स्वस्ति संवत्सरस्य पार मश्नुते य एवं वेद"-इति ॥

सूक्तान्तरे प्रशब्दलिङ्गं दर्शयति— "प्र तव्यसीं नव्यसीं धीति मन्मन इति जातवेदस्यं ; प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्"-इति । यद्यप्यस्मिन् सूक्ते जातवेदःशब्दो न श्रुतः, तथापि तदर्थवाची शब्दः श्रूयते ; जात मुत्पन्नं विश्वं तद्वेत्तीति 'जातवेदाः', तत्पर्यायो विश्ववेदःशब्दः । स च "य मेरिरे भृगवो विश्ववेदसम्"-इति चतुर्थ्यां ऋचि श्रूयते । तस्मादिदं सूक्तं (सं० १. १४३.) 'जातवेदस्यं' निविद्यानीयं भंसेत् । अत्र "प्र तव्यसीम्"-इति प्रशब्दो विस्पष्टः ॥

---

* "जातवेदस्या"-इति निर्विसर्गपाठो दृश्यते भाष्यपुस्तकेषु, अर्थतश्च गम्यते तथैव ; परं मूलपुस्तकविदस्त एव सः । "जातवेदसे सुनवाम सोम मित्याधिमारुते जातवेदस्यानाम्"-इति भाष्य० श्री० ७.१.१ । 'जातवेदस्यनिवित्सम्बन्धिसूक्तसम्बन्धात् जातवेदस्याना मिति बहुवचनं जात्यभिप्रायम्'-इति च तत्र हरिस्वामिनोक्तम् ।

वैश्वानरायेत्यादिकं यदाग्निमारुतं शस्त्रं शस्त्रम्, तदेतत् [illegible] सति— "समानं माग्निमारुतं भवति, यज्ञाग्निष्टोमे, यत्र यत्र समानं क्रियते ; तत् प्रजा अनु समनन्ति ; तस्मात्समानं माग्नि-मारुतं भवति"–इति । अस्मिन् प्रथमेऽहनि यदाग्निमारुतं शस्त्रं शस्त्रम्, यज्ञाग्निष्टोमे पूर्वं निरूपित माग्निमारुतं शस्त्रम्, तदुभयं 'समानम' एकविधम् ; न्यूनाधिकमन्त्राणा मभावात् । यत्र यत्रैवाङ्गं समानं क्रियते, 'तत्' अङ्गम् 'अनु' पश्चात् 'प्रजाः' ऋत्वियूपाः पुत्रादिरूपाश्च 'समनन्ति' सम्यक् चेष्टन्ते, सुखेन जीवन्तीत्यर्थः । तस्मात् 'समानं' तुल्य माग्निमारुतं शस्त्रं कर्त्तव्यम् ॥

अत्र प्रथमस्याङ्गे लिङ्गेषु 'आशुमद्', 'गायत्रं', 'करिष्यत्', 'अयं लोकोऽभ्युदितः' इति लिङ्गचतुष्टय मत्र नोदाहृतम्, तथापि-सम्भव मन्वेष्टव्यम् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां पञ्चमाध्याये
(विंशाध्याये) द्वितीयः खण्डः ॥ २ (१०) ॥

॥ अथ तृतीयः खण्डः ॥

बृहन्नो वै देवता द्वितीय महर्वहति पञ्चदश स्तोमो बृहत्साम त्रिष्टुप् छन्दो यथादेवत मेनेन यथास्तोम

यथासाम यथाच्छन्दसं राध्नोति य एवं वेद यद्वै नेति
न प्रेति यदरिष्यत तद् द्वितीयस्याह्नो रूपं यदूर्ध्वयत्-
प्रतिवद्यदन्तर्वद्यद्वृषण्वद्यद्वृधन्वद्यन्मध्यमे पदे देवता
निरुच्यते यदन्तरिक्ष मभ्युदितं यद्वार्हतं यत् चैष्टुभं
यत्कुर्वदेतानि वै द्वितीयस्याह्नो रूपाण्यग्निं दूतं
वृणीमह इति द्वितीयस्याह्न आज्यं भवति कुर्वद्
द्वितीये ऽहनि द्वितीयस्याह्नो रूपं वायो ये ते सह-
स्रिण इति प्रउगं सुतः सोम ऋतावृधेति वृधन्वद्
द्वितीयेऽहनि द्वितीयस्याह्नो रूपं विश्वानरस्य वस्पतिं
मिन्द्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपद-
नुचरौ वृधन्वच्चान्ततर्वच्च द्वितीयेऽहनि द्वितीयस्याह्नो
रूपं मिन्द्र नेदीय एदिहीत्यच्युतः प्रगाथ उत्तिष्ठ ब्रह्म-
णस्पत इति ब्राह्मणस्पत्य ऊर्ध्ववान् द्वितीयेऽहनि
द्वितीयस्याह्नो रूपं मग्निर्नेता त्वं सोम क्रतुभिः
पिन्वन्त्यप इति धाय्या अच्युता बृहदिन्द्राय गायतेति
मरुत्वतीयः प्रगाथो येन ज्योतिरजनयन्नृतावृध
इति वृधन्वान् द्वितीयेऽहनि द्वितीयस्याह्नो रूपं
मिन्द्र सोमं सोमपते पिबेम मिति सूक्तं सजोषा
रुद्रैरुष्टपदा वृषस्वेति वृषण्वद् द्वितीयेऽहनि द्वितीय-
स्याह्नो रूपं त्वां मिद्धि हवामहे त्वं होहि चेरव इति

बृहत्पृष्ठं भवति बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं यद्दावानेति धाय्याच्युतोभयं गृह्यवच्च न इति सामप्रगाथो यच्चेद मद्य यदु च ग्ना आसीदिति बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं त्य मू षु वाजिनं देवजूत मिति तार्क्ष्योऽच्युतः ॥ ३ (३१) ॥

द्वादशाहगतसवरात्रे प्रथम महर्निरूप्य द्वितीय महर्निरूपयति—"इन्द्रो वै देवता द्वितीय महर्वहति, पञ्चदश स्तोमो बृहत्साम त्रिष्टुप् छन्दः"—इति। देवतानां मध्ये इन्द्रो देवता, स्तोमानां मध्ये पञ्चदशः स्तोमः, साम्नां मध्ये बृहत्साम, छन्दसां मध्ये त्रिष्टुप् छन्दः; इत्येतच्चतुष्टयं द्वितीयस्याङ्गो निर्वाहकम्॥ वेदनं प्रशंसति—"यथादेवत मेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद" इति। वेदिता स्वकीयवेदनेन यथोक्तदेवतास्तोममसामच्छन्दांस्यनतिक्रम्य तत्प्रमादेन समृद्धो भवति॥

अथ द्वितीयस्याङ्गो गमकानि मन्त्रलिङ्गानि निर्दिशति—"यद्वै नेति न प्रेति, यत् स्थितं, तद् द्वितीयस्याङ्गो रूपं; यद्बृहद्वयःप्रतिवद्यदन्तर्वेद्यबृहगवद्यद्बृहन्वद्, यन्मध्यमे पदे देवता निगच्छते, यदन्तरिक्ष मभ्युदितं, यद्बार्हतं, यत् त्रैष्टुभं, यत् कुर्वन्तीमानि वै द्वितीयस्याङ्गो रूपाणि"—इति। प्रथमस्याङ्क एति प्रेति लिङ्गद्वयं 'यद्वै' यदेवोक्तम्, तदत्र द्वितीयस्याङ्गो लिङ्गं न भवतीति नकारद्वयेनोभयं निषिध्यते। 'यत् स्थितं' तिष्ठतिधातु-

रूपवद् बहुषु स्थानेष्वप्रच्युतत्वेनावस्थितं च मन्त्रे दृश्यते, तद् द्वितीयस्याङ्गो 'रूपं' लिङ्गम् । तथैवोर्ङ्शब्दोपेतम्, प्रतिशब्दोपेतम्, अन्तःशब्दोपेतं, इषशब्दोपेतं, इधशब्दोपेतं च यदाम्नातम्, तत्सर्वं द्वितीयस्याङ्गो रूपम् । यत्र साक्षाच्छब्दो न श्रूयते, तत्र तदर्थो द्रष्टव्यः । मध्यमे पदे देवताभिधानम्, अन्तरिक्षलोकाभिधानम्, बृहत्सामसम्बन्धम्, त्रिष्टुप्छन्दस्सम्बन्धम्, वर्तमानार्थप्रत्यययुक्त-करोतिधातुरूप मित्येतानि सर्वाणि द्वितीयस्याङ्गो 'रूपाणि' निरूपकाणि लिङ्गानि द्रष्टव्यानि ॥

अस्मिन् द्वितीयेऽहन्याज्यशस्त्रं विधत्ते—"अग्निं दूतं वृणीमह इति (सं० १. १२.) द्वितीयस्याङ्ग आज्यं भवति ; कुर्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"–इति । अत्र कुर्वदिति लिङ्गोपन्यासः । यद्यप्यग्निं दूत मित्यादौ साक्षात् कुर्वच्छब्दो न श्रूयते, तथापि करोत्यर्थस्य सर्वधातुगतसामान्यत्वात् वर्त्त-मानार्थवाचिप्रत्ययान्तं धातुमात्रं कुर्वच्छब्देन विवक्षितम् । अत्रापि "वृणीमहे"–इति वर्त्तमानार्थवाचिप्रत्ययान्तो धातुः श्रूयते । तस्मात् द्वितीयेऽहन्येतत्सूक्तं विनियोक्तुं योग्यम् ; ततो द्वितीय-स्याङ्गो लिङ्गम् ॥

आज्यशस्त्रं विधाय प्रउगशस्त्रं विधत्ते—"वायो ये ते सहस्रिण इति (सं० २. ४१.) प्रउगं ; सुतः सोम ऋतावृधेति वृधन्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"–इति । "वायो ये ते"–इत्यादिकं शस्त्रं कुर्यात् । एतस्मिन् सूक्ते चतुर्थ्यां ऋचो द्वितीयः पादः "सुतः सोम ऋतावृधा"–इति ; अस्य पादस्यान्ते वृधेति-श्रवणादिदं प्रउगं 'वृधन्वत्' वृधिधातुयुक्तम् । द्वितीयेऽहनीत्यादिकं पूर्ववत् ॥

अथ मरुत्वतीयं शस्त्रं विधत्ते— "विज्ञानरथ्य उक्थानि [illegible] इत्, त्रीसपवा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ ; [illegible] मैत्र, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"–इति। "विज्ञानरथ्य"–इत्यय ऋचः (सं० ८. ६८. ४–६) मरुत्वत प्रतिपत्। तस्मिन् ऋचि द्वितीयस्या ऋचः प्रथमपादे 'इषन्वत्' इषिधातुयुतं लिङ्ग मस्ति ; "अभिष्टये सदावृधम्"–इतिन्यायात् । "इन्द्रः"–इत्यय (सं० ८. २. ४–६) ऋचोऽनुरूपः। तस्यान्त्यमन्त्रयुतं लिङ्ग मस्ति ; "अथ माया ऋचस्तृतीयपादे 'अस्तर्देवान्'–इतिन्यायात् ॥

अथ प्रगाथद्वये लिङ्गद्वयं दर्शयति — "इन्द्र मेदीय एदिधी-त्यच्युतः प्रगाथः, उक्थिन ब्रह्मण्वत इति ब्राह्मणपत्व अर्हवान्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"–इति। "इन्द्र मेदीयः"–इत्यादिकः प्रगाथः (सं० ८. ५२. १, ६.) प्रथमेऽहन्येपि विहितः, उत्तरेऽपि विधास्यते ; तस्मादत्र विधीयमानोऽच्युतो भवति, अच्युतेर-भावात्। तदिद मच्युतत्वं स्थितशब्दार्थत्वात् स्थितवल्लिङ्गम्। "उक्थिन"–इत्यय प्रगाथः (सं० १. ४०. १, २) अर्हलिङ्गवान् ; अर्हवाचिन उक्थशब्दस्य श्रवणात् ॥

अथ तिसृषु धाय्यासु अच्युतत्वं लिङ्गं दर्शयति— "अग्निर्नेता, त्वं सोम क्रतुभिः, पिन्वन्त्यप इति धाय्या अच्युताः"–इति। "अग्निर्नेता"–इति (सं० ३. २०. ४.) प्रथमा धाय्या, "त्वं सोम"–इति (सं० १. ९१. २.) द्वितीया, "पिन्वन्त्यपः"–इति (सं० १. ६५. ६.) तृतीया। प्रथमेऽन्यपि एतासां विहितत्वादच्युतत्वम् ॥

प्रगाथान्तरे लिङ्गं दर्शयति—"इन्द्रदिन्द्राय गायतेति मरुत्व-तीयः प्रगाथो, येन ज्योतिरजनयन्नृतावृध इति इन्द्रवान्, द्वितीये ऽहनि द्वितीयस्याङ्गो रूपम्"–इति। "इन्द्रदिन्द्राय" इत्येषो मरु-

त्रैष्टुभाकः (सं० ८.८६.१,२.); "मरुतो वृषद्वन्तमम्"-इति द्वितीय पादे श्रवणात् । तस्य "येन ज्योतिः"-इति तृतीयः पादः ; तत्र "ऋतावृधः"-इतिश्रवणात् अयं प्रगाथो वृधिधातुरूपलिङ्गवान् ॥

लिङ्गदर्शनद्वारा सूक्तं विधत्ते—"इन्द्र सोमं सोमपते पिबेम मिति सूक्तं ; सजोषा रुद्रैस्तृपदा वृषस्वेति वृषण्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"-इति । "इन्द्र सोमम्"-इत्यस्मिन् सूक्ते (सं० ३. ३२.) "सजोषाः"-इत्यादिको द्वितीयस्या ऋचश्चतुर्थः पादः ; तत्र वृषस्वेतिश्रवणात् वृषण्वल्लिङ्गमस्ति ॥

अथ निष्केवल्यशस्त्रस्य स्तोत्रियानुरूपयोः प्रगाथयोः बृहत्सामसम्बन्धरूपं लिङ्गं दर्शयति—"त्वा मिद्धि हवामहे, त्वं ह्योहि चेरव इति बृहत्पृष्ठं भवति ; बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"-इति । "त्वा मिद्धि"-इति (सं० ६.४६.१,२.) बृहत्साम्न आधारभूतः स्तोत्रियः प्रगाथः ; "त्वं ह्योहि"-इत्यनुचरः प्रगाथः (सं० ८. ६१. ७, ८.)। प्रथमे प्रगाथे बृहत्सामयुक्तं पृष्ठस्तोत्रं भवति । अत्र प्रगाथद्वयस्य बृहत्सामसम्बन्धात् 'बार्हते' बृहत्सामसम्बन्धिन्यहनि तदुभयं योग्यम् ; द्वितीयस्य चाङ्गो बृहत्सामसम्बन्धित्वात् तस्मिन्नहनि विनियोक्तव्यम्। अयञ्च बृहत्सामसम्बन्धो द्वितीयस्याङ्गो लिङ्गम् ॥

अथैकस्या ऋचश्च्युतत्वं लिङ्गं दर्शयति—"यद्दावानेति (सं० १०.७४.६.) धाय्याच्युता"-इति । प्रथमेऽन्यस्या ऋचो विधितत्वादच्युतत्वम् ॥

अथ प्रगाथान्तरे बृहत्सामसम्बन्धरूपं लिङ्गं दर्शयति—"उभयं शृणवच्च न इति सामप्रगाथो, यच्चेद मद्य यदु च न्व आसीदिति बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"-

इति । "उभयम्"-इत्यादिको बृहत्सामसङ्ग्रयुज्यमानः प्रगाथः (सं० ८. ६१. १, २.)। उभयशब्दस्य कोऽर्थः सोऽभिधीयते—'अद्य' अस्मिन् दिने 'यत्' कार्यं मासीत्, 'इदम्' कार्यं मैकम्; 'यदु च' यदपि 'श्वः' पूर्वेद्युः कार्यं मासीत्, तदपीत्येवं कार्यद्वयम्। 'शृणवत्' श्रुत मासीत्। इति मत्सगतस्योभयं शृणवदित्यस्यार्थः। बार्हत इत्यादि पूर्ववत् ॥

सूक्तान्तरे पूर्ववदच्युतत्वं लिङ्गं दर्शयति—"त्य सू षु वाजिनं देवजूत मिति (सं० १०. १७८.) तार्क्ष्योऽच्युतः"-इति। तार्क्ष्यदेवताकस्य सूक्तविशेषस्य प्रथमेऽहनि विहितत्वादुत्तरोत्तरोत्प्लवोत्थत्वाटच्युतत्वम् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां पञ्चमाध्याये
(विंशाध्याये) तृतीयः खण्डः ॥ ३ (३१) ॥

॥ अथ चतुर्थः खण्डः ॥

या त ऊतिरवमा या परमेति मूर्ध्नो जहि दृष्ण्यानि कृणुह्यपराच इति वृषणवद् द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं विष्वो देवस्य नेतुं तत्सवितुर्वरेण्यं मा विष्वदेवं मत्यति मिति विष्वदेवस्य प्रतिपदनुचरी बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो

[illegible] वद् द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं ते हि द्यावा-
पृथिवी विश्वशम्भुवेति द्यावापृथिवीयं सुजन्मनो
धिषणे अन्तरीयत दूत्यन्नवद् द्वितीयेऽहनि द्विती-
यस्याङ्गो रूपं तच्चनथं सुवृतं विघ्नतापस दूत्या-
भंवं तच्चन् हरी इन्द्रवाहा वृषणसू दूति वृष-
णवद् द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं यच्चस्य
वो रथ्यं विश्पतिं विशा मिति वैश्वदेवं वृषा
केतुर्यजतो द्या मशायतेति वृषणवद् द्वितीयेऽहनि
द्वितीयस्याङ्गो रूपं तदु शार्यात मङ्गिरसो वै
स्वर्गाय लोकाय सत्र मासत ते इ स्म द्वितीयं
द्वितीय मेवाहरागत्य मुह्यन्ति तान्वा एतच्छार्यातो
मानवो द्वितीयेऽहनि सूक्त मशंसयत् ततो वै ते प्र
यज्ञ मजानन् प्र स्वर्गं लोकं तदा देतत्सूक्तं द्वितीये-
ऽहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानु-
ख्यात्यै पृक्षस्य वृष्णो अरुषस्य नू सह इत्याग्नि-
मारुतस्य प्रतिपद् वृषणवद् द्वितीयेऽहनि द्वितीय-
स्याङ्गो रूपं वृष्णे शर्दाय सुमखाय वेधस दूति
मारुतं वृषणवद् द्वितीयेऽहनि द्वितीयस्याङ्गो रूपं
जातवेदसे सुनवाम सोम मिति जातवेदस्या-

युक्त यज्ञेन वर्धत जातवेदस मिति जातवेदस्वी वृधन्वद् द्वितीयेऽहनि द्वितीयस्याङ्गो रूप मङ्गो रूपम् ॥ ४ (३२) ॥

॥ इत्यैतरेयब्राह्मणे चतुर्थपञ्चिकायां पञ्चमोध्यायः ॥५॥

सूक्तान्तरे हवगब्दोपेतं लिङ्गं दर्शयति—"या त ऋतिरवमा या परमेति सूक्तं ; जहि हवानि ऋचाङ्गो पराच इति हवद्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्" इति। "या त ऋतिः" —इत्यस्मिन् सूक्ते (सं० ६. २५.) "जहि हवानि"—इति तृतीयस्या ऋचश्चतुर्थः पादः । तच्च हवगब्दयुक्तं लिङ्गं दृश्यते ॥

अथ वैश्वदेवशस्त्रगतयोस्तृचयोर्बृहत्साममम्बन्धरूपं लिङ्गं दर्शयति— "विश्वो देवस्य नेतुस्तत्सवितुर्वरेण्य मा विश्वदेवं सत्पति मिति वैश्वदेवस्य प्रतिपदनुचरौ ; बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्" इति। "विश्वो देवस्य" इत्येका ऋक् (सं० ५. ५०. १.), "तत्सवितुः"- इति द्वे ऋचौ (सं० ३. ६२. १०,११.) ; सोऽयमेकस्तृचो बृहत्साममम्बन्धभूतो वैश्वदेवशस्त्रस्य प्रतिपद्यवति । "आ विश्वदेवम्"-इत्येष ऋचः (सं० ५. ८२. ७ ८.) तस्यानुचरः । अत उभयोर्बृहत्साममम्बन्धः ॥

सूक्तान्तरे लिङ्गं दर्शयति—"उदु ष्य देवः सविता हिरण्यपेति सावित्र मूर्ध्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"—इति। अस्मिन् ऋचात्मके सावित्रसूक्ते (सं० ६. ७१.) ऊर्ध्ववाचिन उच्छब्दस्य श्रवणात् ऊर्ध्वलिङ्गं मस्ति ॥

सूक्तान्तरे लिङ्गं दर्शयति—"ते हि द्यावापृथिवी विश्वशम्भुवेति द्यावापृथिवीयं ; सुजन्मनी धिषणे अन्तरीयत इत्यन्तर्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गस्य रूपम्"—इति । अस्मिन् द्यावापृथिवीये सूक्ते (सं० १. १६०.) "सुजन्मनी"—इत्येषः प्रथमाया ऋचस्तृतीयः पादः । तत्रान्तःपदस्य श्रूयमाणत्वात् अन्तर्वल्लिङ्गम् ॥

सूक्तान्तरे लिङ्गं दर्शयति— "तच्चथं सुहवं विश्वनापस इत्यार्भवं ; तच्चन् हरी इन्द्रवाहा वृषण्वसू इति वृषण्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गस्य रूपम्"—इति । "तच्चथम्"—इति सूक्तमृभुदेवताकम् (सं० १. १११.) ; प्रथमाया ऋचस्तृतीयपादे "तच्चन् पितृभ्या भवः"—इतिश्रवणात् । तत्रैव "तच्चन्हरी"—इत्यादिकस्तृतीयः पादः ; तस्मिन्वृषण्वसू इति वृषण्वल्लिङ्गं दृश्यते ॥

सूक्तान्तरे लिङ्गं दर्शयति— "यज्ञस्य वो रथ्यं विश्पतिं विशामिति वैश्वदेवं ; वृषा केतुर्यजतो द्यामशायतेति वृषण्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गस्य रूपम्"—इति । "यज्ञस्य"—इत्यादिसूक्ते (सं० १०. ६२.) "इन्द्रो मित्रो वरुणः"—इत्येवं बहुदेवताश्रवणात् इदं वैश्वदेवम् । "वृषा केतुः"—इति एषः प्रथमायाश्चतुर्थः पादः । तत्र वृषण्वल्लिङ्गमस्ति ॥

तदेतत् सूक्तं प्रशंसति— "तदु गार्यात मङ्गिरसो वै स्वर्गाय लोकाय सत्रमासत ; ते ह स्म द्वितीयं द्वितीयमेवाहरागत्य सुन्वन्ति ; तान्वा एतच्छार्यातो मानवो द्वितीयेऽहनि सूक्तमशंसयत् ; ततो वै ते प्र यज्ञं मजानन् प्र स्वर्गं लोकं ; तदेतत्सूक्तं द्वितीयेऽहनि शंसति, यज्ञस्य प्रज्ञात्यै, स्वर्गस्य लोकस्यानुख्यात्यै"—इति । "यज्ञस्य वो रथ्यम्"—इत्यादिकं सूक्तं (सं० १०. ६२.) 'गार्यातम्' गार्यातस्य कस्यचिदृषेः सम्बन्धादित्यवगन्तव्यम् ।

कथं सम्बन्धम् ? इति, तदुच्यते—पुरा कदाचिदङ्गिरसो महर्षयः स्वर्गार्थं सत्रं मनुष्यातु मुद्युक्ताः ; तदा ते महर्षयो यस्मिन् यस्मिन् सत्रे पृथ्यषड्हस्य द्वितीय मह्रस्तिष्ठन्ति, तत्र सर्वत्र द्वितीये द्वितीयेऽहनि शब्दबाहुल्यात् कुत्र किं शस्त्रं पठितव्य मिति भ्रान्त्वा मुह्यन्ति । तदानीं गार्ग्यायननामकः कश्चिन्मानवः ऋत्विग्भूत्वा 'तान्' अङ्गिरसो महर्षीन् "यज्ञस्य वः"—इत्यादिकं सूक्तं द्वितीये-ऽह्न्यशंसयत् । 'ततः' सूक्तप्रभावादेव 'ते' महर्षयो 'यज्ञं प्रजानन्' यज्ञं प्रकर्षेण ज्ञातवन्तः । तद्यज्ञसाध्यं स्वर्गलोकं च प्रजानन् । तस्माद् द्वितीयेऽह्न्येतस्य सूक्तस्य शंसनेन व्यामोह मन्तरेण यज्ञः प्रज्ञातो भवति, स्वर्गोऽवगम्यते ॥

शस्त्रान्तरस्य प्रतिपदि लिङ्गं दर्शयति—"पृक्तस्य वृष्णो मरुतस्य नु भह इत्याग्निमारुतस्य प्रतिपद् ; वृषण्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"—इति । तच्च (सं० ८, ८, १ ३.) "वृषणः"—इति-श्रवणाद् वृषण्वल्लिङ्गम् ॥

मारुतसूक्ते लिङ्गं दर्शयति—"वृषणो शर्धाय सुमखाय वेधस इति मारुतं; वृषण्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"—इति । अत्र प्रथमायां ऋचौ द्वितीयपादे "प्रभरा मरुद्भ्यः"—इतिश्रवणादिदं सूक्तं (सं० १, ६३,) मारुतम् । वृषण्वल्लिङ्गं स्पष्टम् ॥

जातवेदस्यायां मध्युतत्वं लिङ्गं दर्शयति—"जातवेदसे सुनवाम सोम मिति (सं० १, ९९, १.) जातवेदस्याच्युता"—इति । प्रथमेऽन्यस्या ऋचो विच्छिन्नत्वादच्युतत्वम् ॥

सूक्तान्तरे लिङ्गं दर्शयति—"यज्ञेन यज्ञ मयजन्त देवा मिति जातवेदस्यं ; वृषन्वद्, द्वितीयेऽहनि द्वितीयस्याङ्गो रूपम्"—इति । जातवेदोदेवताकत्वं वृषन्वल्लिङ्गं चात्र (सं० २, ३,) विस्पष्टम् ॥

पञ्चमोऽध्यायपरिसमाप्तश्च ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायां पञ्चमाध्याये
(विंशाध्याये) चतुर्थः खण्डः ॥ ४ (३२) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामभाष्ये
ऐतरेयब्राह्मणस्य चतुर्थपञ्चिकायाः पञ्चमोऽध्यायः ॥

देवा वै षट्[१]। प्रजापतिर्वै सोमाय राज्ञे ऽष्टौ[२]। ज्योतिर्गौरायुरष्टौ[३]। प्रजापतिः षट्[४]। अग्निर्वै चत्वारि[५] ॥ ४ * ॥
देवा वै, ब्राह्मस्पत्यया, ऽऽहूय दूरोहणं द्वादश ॥ ४ † ॥

॥ इति चतुर्थपञ्चिका समाप्ता ॥

---

* २७१, २७८, २२१, २३६, ४०१ पृ० (६-८-८-६-४= ३२ ख०)।
† २७५, २८८, २३६ पृ० (१०-१०-१२=३२ ख०)। १भा० २३२पृ० † द्रष्टव्यः।

BOUND BY
B
23 Gui

BOUND BY
BOOKBINDERS
23 Court Mews